श्रीमद्विश्वनाथप्रणीतः

साहित्यदर्पणः

(षष्ठपरिच्छेदात्मको द्वितीयो भागः)

VISWANATHA'S

SAHITYADARPANA

Vol. II (Chapter VI)

WITH INTRODUCTION. ORIGINAL SANSKRIT TIKA
AND ENGLISH TRANSLATION

(*Second Edition*)

REVISED & EDITED BY

Kumudranjan Ray, M.A., PH.D., M.D.(H),

AUTHOR OF SIDDHANTA-KAUMUDI, SANSKRIT DRAMA,
BHATTI, KAVYADARSHA, MEGHADUTAM, KIRATA
etc. etc.

1912

Rs. 10/8/-

PUBLISHED BY—
K. Ray, M.A.
176, Vivekananda Road,
CALCUTTA,

AGENT—
Sanskrita Pustak Bhandar
38, Cornwallis Street,
CALCUTTA,

Dedicated to—

The ever-green ever-glowing hallowed memory of my father and mother whose Sabdartha-like Parvati-Paramesha-like inseparable association in a source of perennial energy to me, and whose cares caresses and blessings carried me over to my present congenial cultural career, and whose presence I even now feel and enjoy whenever difficulty arises and whenever I invoke them ardently.

Printed by -
Sudhir Kumar Das Gupta
Kamala Printing Works,
3, Kashi Mitter Ghat Street,
Calcutta-3

श्रीविश्वनाथ-प्रणीतः

साहित्यदर्पणः

साहित्यस्य काव्यस्य दर्पणः (दर्पणभूतः), इतत्। Then by transference (उपचार or लक्षणा) it means the book on साहित्य। comp—काव्यादर्शः। Or साहित्यं (काव्यं) दृप्यति विस्तृतिं लभते येन ग्रन्थेन (यस्मिनवा) इति साहित्य+दृप+ल्युट् करणे or अधिकरणे =साहित्यदर्पणः। Or साहित्यं दर्पयति विश्लेषयति यः (ग्रन्थः) इति साहित्य+दृप+णिच्+ल्युट कर्त्तरि वाहुलकात्=साहित्यदर्पणः। The treatise which explains all about Sahitya. कर्त्तरि ल्युट् comes irregularly by the rule "कृत्यल्युटो वहुलम्।" Or as some say नन्द्यादि ल्यु, for नन्द्यादि has दर्पण there. दर्पण-शब्दस्य पुंसिव्यवहारात् ग्रन्थविशेषणाच्च पुंलिङ्गत्वम्। All about Sahitya or Kavya are discussed here. Compare—

'निर्दोषौ गुणसम्पन्नौ सालङ्कारौ रसान्वितौ
शब्दार्थौ सहितौ काव्यमतः साहित्यमुच्यते' ॥ (See also

the Title discussion in our साहित्यदर्पण chap. I).

N. B. The reading साहित्यदर्पणम् is also seen sometimes. But नन्द्यादि list has दर्पणः (there), Koshas mostly use it in masc like आदर्श, मुकुर। So we like to reject the reading साहित्यदर्पणम् here

Having defined काव्य as 'वाक्यं रसात्मकं काव्यम्' and having supported "काव्यस्यात्माध्वनिः" with reference to रसादिरूपध्वनि (in chap I) and having dealt with अभिधा, लक्षणा and व्यञ्जनाशक्ति of words in ch. II and having stated रसाभि - व्यक्ति (manifestation of sentiment in chap. III) through विभाव or prop of sentiment (उद्दीपन and आलम्बन विभाव), अनुभाव (external manifestations or signs of sentiment) and व्यभिचारिभाव (concomitant ideas, emotions and feelings), and having stated रस as आस्वाद्य etc—due to संस्कार (in chap. III) and having divided काव्य into ध्वनिकाव्य and गुणीभूत-व्यङ्ग्यकाव्य (in chap.IV) ; and having said something about ध्वनि in ch. V, our author will here again show काव्य as दृश्य and श्रव्य on the basis of अभिनेयत्व and अनभिनेयत्व । Hence before entering into the subject matter or Text here, we will first say something about ध्वनि, for according to our author रसादिध्वनि is the essence of all काव्य, and it has bearing even in this chapter (cp. sl. 62-64, 170 etc.) and in काव्यादिविषय-आलोचना । Our argument and instances will all along be here on the line of our author as said in chapters IV and V (mainly).

साहित्यदर्पणः

—o—

A discourse on Dhwani—ध्वनिविवेचनम्
(and ध्वनिकाव्यम) ।

Our cultural heritages of the Vedas and upanishads declare that from Paramatma's creative Will came out अव्यक्तनाद्, then व्यक्तनाद, then letters, words etc.—(एकं वै इदं विवभूव सर्वम्"—Rigveda ; also see Sitopanished and our Ev. of Gita P. 86.)

And a sentence is the combination of words—the words lying therein in close contiguity, the one wanting the other and being capable of establishing relationship amongst themselves and it having at least one क्रिया mentioned or not (cp. "एकतिङ्वाक्यम् -Bhashyam.)

Again the sentence has got some inherent capacity of expressing an idea directly and this inherent capacity is known as the Abhidhasakti—the idea thus expressed by the said Sakti—being known as Vachyartha—(साक्षात् सङ्केतितः अर्थः वा मुख्यार्थः) ।

Sometimes it happens that a sentence is incapable of expressing the idea—it wants to express, unless and until the meaning of a word is allowed to be a bit twisted—*i. e.* unless and until it includes something more than what is generally gained by its direct meaning—and in that case the idea thus expressed by the sentence is

said to be the Lakshyartha—and the power of the sentecce—by which the Laksyartha is expressed is called Lakshana Sakti. (cp. मुख्यार्थबाधे तद् युक्तो ययान्योर्थः प्रतीयते")।

To cite an example—suppose the sentence runs in this way—"Our college will go to play a friendly foot-ball match.'

Now the word college stands for an inanimate object and naturally it cannot go ; and hence the word "college' means here somthing more—namely the students of the college. Thus the meaning we now get from the sentence will be called Lakshyartha and the power of the sentence to express such a meaning is the Lakshana Sakti.—

From what is said, it is evident that Vachyartha and Lakshyartha cannot co-exist in a sentence—i. e. we cannot have both kinds of meaning from one and the same sentence at a time.

Besides these two another—and the third power—denominated "Vyanjana Sakti" is also in possesion of words and sentences—and the idea expressed by this Sakti is called Vyangartha : Vyangartha is thus an idea—which is not directly expressed by a sentence (the idea directly expressed being known as Vachyartha—as we have already said,) but which is implied by the same. Hence a sentence may express both the Vachyartha and the Vyangartha at a time—by dint of the two saktis in its possession—namely Abhidha and Vyanjana—or in other words the Vachyartha as well as the Vyangartha may be simultaneously expressed by a sentence like the resonance of a brass or copper Vessel struck with a hammer ; the resonance being heard even after the striking sound has ceased, यः अर्थः न साक्षात् सङ्केतितः अपि तु पश्चादभि-व्यज्यते

एव। एषोर्थः शब्दस्य व्यञ्जनाशक्त्युद्भूतः। एष एव ध्वनिः इति कथ्यते। ध्वन्यते गूढार्थः व्यज्यते यत्र वा येन स ध्वनिः। Also cp. "विरतास्वभिधायासु ययार्थो बोध्यते परःसावृत्तिर्व्यञ्जनानाम"। It is essential for internal रसबोध etc.

To cite an example—Suppose the sentence runs in this wise –

"The sun is set". The Vachyartha of this is that the sun has gone down the horizon and the dusk is at hand

But it may have more than one implication –*i. e.* a Vyangartha. Thus a Brahman will understand from this—that his prayer-- time has come.

Similarly, Laksyartha as well as Vyangartha may also co-exist with reference to some particular sentences etc.

Rightly speaking, the aforesaid three Saktis are but the properties of words. Thus writes Viswanatha -"तिस्रः शब्दस्य शक्तयः"। But they concern also sentences—though secondarily. Hence it is safe to say that the three Saktis, namely Abhidha, Lakshana and Vyanjana primarily concern words—and then extend their authority over sentences--which are constituted by words

Now as we have already seen a sentence may at a time express an idea—by means of its Abhidha Sakti and imply another idea by means of its Vyanjana Sakti : and if, of the two ideas thus extracted from a sentence --or in other words, of the two meanings of a sentence, namely the Vachyartha (or in some particular cases Laksyartha) as well as the Vyangartha, the former (*i. e.* the Vachyartha) appears more important and appealing, then the sentence—is said to be Gunibhuta Vyanga—provided the said sentence goes by the denomination "Kavya"—on account of its being Rasatmaka—*i. e.*

provided the sentence involves some particular sentiment; and if the latter (namely Vyangartha) predominates over the former (namely over Vachyartha), being itself more appealing and more important, then the sentence—denominated as Kavya—on account of its being permeated with some particular sentiment (i. e. being Rasatmaka) is said to be Dhwani; and a Dhwani—Kavya is declared to be one of a very high order. Thus writes Viswanatha :—

"वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ।"

Status of Dhwani is essential in Sanskrit or in Literatures—

As regards the true characteristic of a Kavya our ancient Rhetoricians have not been unanimous.

Mammata--the author of Kavyaprakasa has attached more importance, in this connection, to the absence of demerits. Vamana has stuck to style (रीति), some to अलङ्कार, whereas Viswanatha has adhered to Rasa, Panditaraja has rather challenged Viswanatha and affirmed "रमणीयार्थ-प्रतिपादकः शब्दः काव्यम्।" The author of Dhwanyaloka has declared that the very soul of Kavya is Dhwani or गूढार्थ । No Dhwani—no Kavya. Though Viswanatha and Pandita-raja have not fully or totalby admitted it asserting that a sentence may be classed as Kavya—even though there be no Dhwani therein, but there is ध्वनि in the context wherein it is put. Yet both of them concur on the point that a Dhwani—Kavya is the best of all Kavyas. Thus writes Pandita-raja :—

"शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदा आद्यम् ।"

Let us now go on with the different varieties of Dhwani गूढार्थ or implied sense which as seen above (and before) cannot be denied in Kavya or literatures, where more is meant than what meets the ear.

It has been already noted that the Vyanjana Sakti may function—(and thus imply some internal idea) along with either the lakshana Sakti or with the Abhidha Sakti ; and if the idea implied by the Vyanjana Sakti (*i. e.* the Vyangartha) be more important and more appealing than the idea expressed by the Lakshana Sakti (*i. e.* than the Lakshyartha), then the Dhwani or Vyanjana - thus given birth to is said to be Laksanamula ; it the Vyangartha be superior to the Vaehyartha (*i. e.* the idea expressed by the Abhidha Sakti) then the Dhwani. thus produced, is said to be Abhidhamula. **Thus Dhwani** or **गूढ़ार्थ at first undergoes two broad divisions**—(*i*) Lakshanamula—which is technically known as Avivakshitavachya—in as much as the Vachyartha therein has given way to Laksyartha—and (*ii*) Abhidhamula-which is technically known as vivakshita-anya-para-vachya-in as much as the Vachyartha therein has been less prominent or less important than the Vyangartha ; of these two principal types of Dhwani, the first one—namely Laksana-mula Dhwani which is technically termed Avivakshita—vachya Dhwani undergoes two further divisions ; the first one is called Arthantara—Samkramita Avivakshita Vachya Dhwani—since herein the Vachyartha has although yielded to Laksyarthayet the Laksyartha expresses nothing but some modification or some special feature of the vachyartha ; and the second one is called Atyanta-tira-skrita-vachya-Avivakasitavachya Dhwani—since herein the Vachyartha has given way to Laksyartha—and the said Laksyartha has totally suppressed the Vachyartha.

Let us give examples—

कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥

Translation—A plantain is but a mere plantain—the outer edge of the palm is what it is: the trunk of an elephant is nothing but the same—(none can compare with the thighs of the lady). So nothing in the three worlds can stand comparison with the thighs of this fawn-eyed woman. Here the word कदली, करभ and करिराजकर have been repeated; now repetition is a defect; therefore it is to be presumed that the second कदली, second करभ and second करिराजकर are not used in their primary senses, in which the first of these have been used; or in other words the meaning expressed by the first set is vachyartha, whereas the meaning expressed by the second set is laksyartha. But this lakshyartha does not altogether surpress the primary meaning of the second set—but adds some special characteristics to these. Thus the second कदली means 'a plantain which is but a cold and inanimate object." Thus here the laksyartha is Arthantara-Samkramitavachya and along with these, these words imply the "excessive-ness' of the cold and thus this exceesiveness is the vyangartha. And this vyangartha is superior to the laksyartha (which is of Arthantara-Samkramita-vachya type) and thus here occurs Dhwani of Arthantara-Samkramita-vachya type of the Avivaksita vachya variety. Now let us give an example of Dhwani of the Atyanta-tiraskrita vachya type of the Avivaksita-vachya-variety.

"निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।"

Now the primary sense (vachyartha) of the word अन्ध is blind and a mirror cannot be said to be blind. Hence what is necessary here is laksyartha—the same being "incapable of receiving reflection." Thus the

vachyartha namely blind is here altogether suppressed—giving way to the laksyartha "incapable of receiving reflection"—and thus the laksyartha here is what is called Atyanta-tiraskrita vachya type. Now along with this laksyartha, here occurs vyangartha (implied by the word अन्ध) and it is "extremely incapable of receiving reflection i. e. the extreme nature of incapability is here implied and this vyangartha is more charming than the laksyartha and thus here occurs the Dhwani of the Atyantatiraskrita type of the Avivaksita-vachya variety.

Here is given another example which is of controversial character ; some mistress who secretly meets her lover in a bower on the bank of the River Godavari says to a pious fellow who used very often to come near the said bower to pluck flowers and often became much disturbed by a howling dog :- -

भ्रम धार्म्मिक ! विश्वस्तः स श्वाऽद्य मारितस्तेन
गोदावरीकच्छ-कुञ्जवासिना दृप्तसिंहेन ।

O pious fellow, now travel confidently-since that dog has been killed to-day by a ferocious lion that lives in a grove on the bank of the river Godavari.

Here a study of the sloka convinces even a cursory or unwary reader of the fact that though the word "भ्रम" means "travel", yet it implies here "Don't travel", and this is the vyangartha and it being more important' there is Dhwani here. Now somehold that since here the affirmation (namely भ्रम) implies a negative idea (e. g. you should not travel) here is what is called विपरीतलक्षणा which has given birth to Dhwani of the Atyanta-tiraskrita vachya type of the Avivaksita vachya variety. But the author of

Sahityadarpana does not subscribe to this view. He opines that विपरीत-लक्षणा occurs when affirmation is undertood to be but negation—as soon as the text is heard or read ; but where such an understanding occurs after a carefully study of the text, then there will be no lakshana (i. e. विपरीतलक्षणा) but Dhwani ; and as there is no lakshana, so this Dhwani is Abhidha-mula i. e. vivaksita-anya-para-vachya the second broad division of Dhwani which we now propose to deal with.

It has been already noted that Abhidhamula Dhwani which occurs when vyangartha-co-exists with vachyartha and becomes more important than that is technically termed vivaksita-anya-para-vachya-Dhwani alias vivak sita-abhidheya-dhwani. It also falls under two principal heads—(1) A-samlaksya-krama-vyanga and (2) Sam-laksya-krama-vyanga of which the former undergoes no further division. In it what is implied (i. e. what is gained by the Vyanjana Sakti) is either Rasa or Rasa-bhasa or Bhava or Bhavabhasa or Bhava-Sandhi or Bhava-Savalya ; on the other hand the latter (i. e. the Samlaksya-krama-vyanga type of the Vivaksita-anya-vachya dhwani) is sub-divided into three sections—(1) Dhwani arising out of the capacity of the word itself ; it is known as Sabda-saktimula dhwani and in it the Vyangartha is realised as soon as the word is uttered.

(2) Dhwani-arising out of the capacity of the sense ; it is known as Artha-saktimula dhwani and in it the vyangartha is realised when the sense has been understood :

(3) Dhwani, arising out of the capacity of both the

word and its sense ; it is known as ubhaya-saktimula dhwani and in it the vyangartha is realised after a very careful understanding of both the word and its significance.

Of these three aforesaid types, the first one undergoes two divisions as to the vyangartha denoting a mere statement-involving no figure of speech or a figure of speech. The former is called Sabha-saktimula vastu-dhwani and the latter Sabha-saktimula alamkara-dhwani.

Illustrations—

(1) A way-farer met a woman on the way and noticing that the sun is going down asked residence for the night, whereupon the woman replies :—

पन्थिअ ! न एत्थ मत्थर अत्थि मणं पत्थरस्थले गामे ।
डणअपओहरं पेक्खिअ उण जइ वसमि ना वसमु ।

This prakrit is to be rendered into Sanskrit in the following way :—

पान्थ ! नात्रसंस्तरीऽस्ति (शास्त्रमस्ति) मनाक् प्रस्तरस्थले (पात्रस्थले) ग्रामे, उन्नतपयोधरं प्रेक्ष्य पुनर्यदि वससि तत् वस ।

Explanation—हे पान्थ ! भो पथिक ! अत्र अस्मिन् प्रस्तरस्थले पाषाणबहुले (अपि च पात्रस्थले भोगपात्रीकृत-रमणीसनाथे) ग्रामे मनाक् अल्पोऽपि संस्तरः आस्तरणीय कटादिः (अपिच अल्पमपि शास्त्रम् परस्त्रीसम्भोग-निषेधसूचकम् शास्त्रमिति यावत्) न अस्ति। किञ्च यदि उन्नतपयोधरं प्रेक्ष्य वससि गगने उदीयमानवृष्टिप्रदं मेघं प्रेक्ष्य, अत्र रात्रौ तिष्ठसि शयनक्लेशं स्वीकृत्यापि तिष्ठसि, तर्हि वस रात्रा अत्र तिष्ठ। अपिच यदि उन्नतपयोधरं प्रेक्ष्य मम विशालस्तनं प्रेक्ष्य सम्भोगकामनया वससि, तर्हि वस ।

Here the following is implied—

"Well, you may stay here for the night, provided you are capable of enjoying me", and this is a mere assertion, involving no figure of speech and this assertion is gained by the capacity of the words सत्थर, पत्थ and पओहर themselves. So here occurs what is called Sabda-saktimula-vastudhwani.

(2) अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो !
अहितः सहितः साधु यशोभिरसतामसि ।

Explanation--हे प्रभो ! त्वम अमितः तुलनारहितः
एवम् च समितः रणात प्राप्तः, लब्धैः उत्कर्षैः हर्षदः आनन्दप्रदः ।
एवम असताम् दुष्टानाम् अहितः शत्रुभूतस्त्वम् साधु यशोभिः
सुन्दरयशोभिः सहितः भवसि ।

Here the set of words--अमित and समित, as well as अहित and सहित though predicated of the same subject, appear to be mutually contradictory But as there occurs neither अपि nor च so the rhetoric विरोधाभास which can be expected in such a case, is not explicitly stated—i. e. we cannot get here विरोधाभास by the Abhidhasakti or in other words the said rhetoric is not vachyartha here, but it is certainly implied i. e. we get it as vyangartha through vyanjana sakti and thus the vyangartha here is but an Alamkara which we get through the capacity of the words अहित and सहित as well as अमित and समित ; and hence here occurs Sabda-sakti-mula-alamkaradhwani.

One thing in this connection is to be noted. Though the vyangartha is itself the object of beauty and not the beautifier, so it is really what is called अलङ्कार्य and not the Alamkara the beautifier. Still it is taken to be an alamkara by courtesy.

Now we come to Artha-saktimula-dhwani which undergoes twelve Divisons. The primary divisons of this dhwani, rightly speaking, numbers four, in accordance with the implier and the implied being an assertion or a Rhetoric.

(1) Thus there is the dhwani of an assertion by another assertion. (वस्तुना वस्तुध्वनिः)।

(2) The dhwani of an asertion by a rhetoric (अलङ्कारेण वस्तुध्वनिः)।

(3) The dhwani of a Rhetoric by an assertion (वस्तुना अलङ्कारध्वनिः)।

(4) The dhwani of a Rhetoric by another rhetoric (अलङ्कारेण अलङ्कारध्वनिः)।

Now the assertion (वस्तु) as well as the rhetoric (अलङ्कार) both may be either of the three types—

(1) स्वतः सम्भवी i. e. common or within the scope of possibility.

(2) कविप्रौढोक्ति सिद्ध i. e. not natural but accepted or current only in the tradition of poets.

(3) कविनिबद्धप्रौढोक्ति सिद्ध i. e. accepted or taken as valid by some person imagined by some poet.

We shall here add only four examples of the four principal divisions.

(1) दृष्टिं हे प्रतिवेशिनि । क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसा कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदाः नलग्रन्थयः ॥

Here the statement of the female speaker implies something, namely her attempt at explaining away the signs that may be noticeable over her person due to her

sexual intercourse with a man other than husband, a project that lies in her mind. It is वस्तुना वस्तुध्वनिः ।

(2) दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ।

Here the simple fact implies that the might of Raghu excels that of the sun and thus here is the dhwani of the व्यतिरेकालङ्कार । Thus here is वस्तुना अलङ्कारध्वनिः ।

(3) आपतन्तममुं दूरादुरीकृतनागक्रमः ।
बलोऽवलोकयामास मातङ्गमिव केसरी ।

Here the upama i. e. comparison of Balaram with a lion and of Benudasi with an elephant implies the simple fact that Benudasi will be killed by Baladeva.

Thus here is अलङ्कारेण वस्तुध्वनिः ।

(4) गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ।

Here occurs the विरोधालङ्कारः and this implies "the lip is bitten and together with it, the enemies are destroyed" which contains समुच्चयालङ्कारः । Thus here is अलङ्कारेण अलङ्कारध्वनिः ।

All these four come under the head "स्वतः सम्भवी" ; and for the rest, we refer to साहित्य दर्पण to our readers.

So many rhetorics may fall under the Sabda Saktimula dhwani or Artha-saktimula dhwani and for an exhaustive study of these we refer to our readers the commendable work Rasagandhara ; we only quote here a few examples—

(1) पान्थ ! मन्दमते किंवा सन्तापमनुविन्दसि ।
पयोधरं समाश्वास्य येन शान्तिमवाप्नुयाः ।"

Here is Sabda-saktimula parinamalankaradhwani.

(2) अनल्पतापाः कृतकोटिपापाः गदैकशीर्णा भवदुःखजीर्णाः
विलोक्य गङ्गाम् विचलत्तरङ्गाममी समस्ताःसुखिनो भवन्ति।

Here is उल्लेखध्वनिः।

(3) दर्यिते रदनत्विषां मिषादपितेऽमी विलसन्ति केसराः।
अपि चालकवेषधारिणो मकरन्द स्पृहयालवोऽलयः।

Here is अपह्नुतिध्वनिः।

Now let us come to ubhaya-saktimuladhwani which is only of one kind.

Example :–

'हिममुक्त-चन्द्ररुचिरः सपद्मको मदयन् द्विजान जनितमीनकेतनः, अभवत् प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः'।

Here माधव. (श्रीकृष्णः। माधवः (वसन्तकालः) इव प्रमदाजनस्य महोत्सवः अभवत् - this is the idea, and adjectives herein are applicable to Madhava in both the senses. Now what is implied here is that Madhava is just like Madhava (spring) and so here is उपमालङ्कारध्वनिः, and this is due to the capacity of the word माधव itself as well as to the capacity of the interpretation of so many words qualifying माधव in both the senses namely श्रीकृष्ण and वसन्तकाल, and so here occurs उभयशक्तिमूलध्वनिः।

Now summing up, we get eighteen kinds of Dhwani.

These are the following :-

(A) लक्षणाशक्तिमूलध्वनि--

1. अर्थान्तर-संक्रमितवाच्य

2. अत्यन्त-तिरस्कृत-वाच्य

(B) अभिधाशक्तिमूलध्वनि—

3. असंलक्ष्यक्रमव्यङ्ग्यः

4. संलक्ष्यक्रम व्यङ्ग-शब्दशक्तिमूल वस्तुध्वनिः
5. संलक्ष्य क्रमव्यङ्ग्य शब्दशक्ति मूलालङ्कारध्वनिः
6. संलक्ष्य क्रमव्यङ्ग्यार्थशक्तिमूलः स्वतःसम्भविवस्तुना वस्तुध्वनिः
7. ,, ,, ,, ,, ,, ,, अलङ्कारध्वनि.
8. ,, ,, ,, ,, ,, अलङ्कारेण वस्तुध्वनि.
9. ,, ,, ,, ,, . अलङ्कारेण अलङ्कारध्वनि.
10. ,, ,, ,, कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनि
11. ,, ,, ,, ,, ,, . अलङ्कारध्वनि.
12. ,, ,, ,, ,, अलङ्कारेण वस्तुध्वनि.
13. . , . , अलङ्कारेण अलङ्कारध्वनि
14. ,, ,, कविनिबद्धप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनि
15. ,, ,, वस्तुना अलङ्कारध्वनि
16. ,, ,, ,, ,, ,, अलङ्कारेण वस्तुध्वनि
17. ,, , ,, ,, , अलङ्कारेण अलङ्कारध्वनि
18. संलक्ष्य क्रमव्यङ्ग्योभयशक्ति मूलध्वनि.

Of these eighteen principal kinds of Dhwani, the last one namely संलक्ष्यक्रमव्यङ्ग्योभयशक्ति मूलध्वनिः may occur only in a sentence, whereas the remaining seventeen kinds may occur either in a sentence or in a word. Thus अत्यन्त-निरस्कृतवाच्य ध्वनि (due to lakshana sakti) as found in the line निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते rests only on the word अन्ध and it is due to what is said पदगत (and not वाक्यगत), Other examples of this type may be found in this Sahitya darpana—(Chap IV).

Thus we now get thirty five types of dhwani, since seventeen kinds of dhwani may rest either in a word or in a sentence, and so there are 17 × 2=34 altogether.

and add to this the eighteenth kind namely उभयशक्तिमूल which rests only in a sentence and these will come up to thirty five.

Again the twelve types of Artha-saktimula dhwani may rest also in a प्रबन्ध i. e. a text or a passage or a sloka; that is the dhawani or the object implied will be neither from a word nor from a sentence but from the whole of the text or in other words, a study of the whole of the text (passage or slokas) will make us to realise the implication which is available through the Vyanjana Sakti.

We shall soon refer to two slokas to show how the dhwani rests in some Pravandha, but before this we should say that the number of dhwani reaches herewith the num-forty seven : the previous thirty five plus the twelve kinds of अर्थशक्तिमूलक-प्रबन्धगत ध्वनिः।

Now let us quote two slokas one by one from the Mahabharat to show how अर्थशक्ति मूलध्वनि rests in a प्रबन्ध i. e. how the object implied is to be extracted from the simple meaning or Vachyartha of the whole passage. First sloka :—

> अलं स्थित्वा श्मशानेऽस्मिन गृध्रगोमायुसङ्कुले
> कङ्कालबहुले घोरे सर्व्वप्राणिभयङ्करे।
> नचेह जीवितः कश्चित कालधर्म्ममुपागतः
> प्रियो वा यदि वा द्वेष्यः प्राणिनाम् गतिरीदृशी।

The fact is this. A handsome young boy is dead. His relatives are wailing in the cremation ground with the corpse before them, There is a vulture as well as a jackal there. The day was going down. Finding this the vulture advises them to throw down the dead body and go away. In the above sloka is couched up the advice of the

vulture. But the object implied therein i. e. the dhwani arising out of the whole text is this :--"Throw down the corpse before the sun goes down otherwise I shall be blind with night fall and the jackal will eat it away."

The relatives following the advice were about to give up the corpse whereupon the jackal says :- -

आदित्योऽयं स्थितोमूढ़ाः स्नेहं कुरुत साम्प्रतं
वहुवर्णो मुहूर्त्तोऽयं जीवेदपि कदाचन ।
अमुं कनकवर्णाभं वालमप्राप्तयौवनं गृधवाक्यात् कथं वाला-
स्त्यजध्वमविशङ्किताः ॥

In the sloka the jackal advises them to wait till the sun goes down. But his real intention which is to be extricated from the whole text through vyanjana sakti i e. which is the dhwani of the whole text is this : -"Well just wait for sometime. Let the sun go down and the vulture be blind, so that I may cheat him out of the corpse."

The Asamlaksya-krama-vyangadhwani which is of only one kind and has been previously disposed of, now deserves some attention

This Dhwani may be found in a Padamsa, in a letter. in style or in Pravandha i. e in some text.

Thus Dhwani or गूढ़ार्थ comes up to fifty one,--Forty seven plus four.

By Padamsa is to be understood a root or stem, a suffix, a prefix. an upasaraga, some particular tense and so forth.

We shall only give two examples of Padamsa here. In Abhijnana Sakuntalam, the king says to the bee, hovering round the face of Sakuntala :—"वयं तत्त्वान्वेषान्मधुकर !

हतास्त्वं खलु कृती ।" Here the dhwani is in the root हन् itself in the word हता: and what is implied is that he met severe mental agony. Meghaduta has—"यक्षश्चक्रे जनकतनया-स्नानपुण्योदकेषु । स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।"

Here the dhwani lies in the plural number of आश्रमेषु which implies that the yaksa became very restless and frequently changed his abode.

This Asamlaksya-krama-vyangadhwani may rest in letters and style. This matter has also been dealt with in the eighth and the ninth chapters respectively of sahitya-darpan

In the eighth chapter it has been shown how some particular letters imply some particular merit (i. e. Guna) in some piece composition. Thus Viswanath writes--.

"शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः" ।

Words the meaning of which is understood simultaneously with the very utterance of those words imply प्रसादगुण or in other words Prasadguna is the thing which is to be taken as the dhwani of such words.

In like manner the presentation of some particular words in some composition imply some रीति or style.

Thus word implying माधुर्य्यगुण when used in some composition to imply the वैदर्भी रीति i. e. vaidarbhi style is the object that should be taken as the dhwani of some literary piece of composition that contains words implying the Madhuryya Guna. In like manner, dhwani of this type rests in the whole text, as Shantarasa is the dhwani of the Mahabharata, and Karunarasa of the Ramayana, Sringara-rasa in the Ratnavali and so forth ; or in other words Rasa is the object that is to be taken as the dhwani

or गूढ़ार्थ of some text. And as seen above Dhwani cannot be denied in Sahitya and in रसबोध etc.

This doctrine is technically known as Rasa-dhwani theory. The commentary Lochana on Dhwanyaloka supports this by affirming "रसाः प्रतीयन्ते ।"

Let me repeat in this connection the difference of opinion between the author of dhwani (Dhwanyaloka) and Sahityadarpan.

Dhwanikara says :- -काव्यस्यात्मा ध्वनिः, whereupon Viswanatha asks .—

Which sort of Dhwani ? Is it the Vastudhwani, Alamkaradhwani, as well as Rasadilakshanadhwani, or is it only the Rasadhwani ? (see ch. 1).

The first alternative cannot be taken as correct since in Prahelika (Riddle) and the like, there may be Vastu-dhwani (or sometime even Alamkaradhwani), though that is lacking in the Rasadhwani. But Prahelika and the like cannot come under true Kavya being mostly destitute of Rasa. And, then if the second alternative is stuck to, then Viswanatha stands by it. He affirms further in this connection that in the sloka like—"अत्ता अत्र निमज्जति अत्राहम् दिवसकं प्रलोकय। मा पथिक ! रात्र्यन्धकः शय्यायाम मम निमङ्क्ष्यसि", what is implied is mere vastu (assertion), true, but along with it lies herein the Dhwani of शृङ्गार रसाभास and so it comes under the category of Kavya and ध्वनि cant be denied in such Kavya.

Now let us count the total number of Dhwani.

I. First Laksanamula Dhwani also known as Avi-vakshita-vachya Dhwani. It is of two types :—

(A) अर्थान्तरसंक्रमित वाच्य - (१) पदगत (२) वाक्य गत

(B) अत्यन्ततिरस्कृत वाच्य— (१) पदगत (२) वाक्य गत

Thus Laksanamula Dhwani is of 4 kinds—Table No. I.

II. Now Abhidhamula Dhwani—also known as विवक्षितान्यपरवाच्य।

(A) असंलक्ष्यक्रमव्यङ्ग्य —

(१) पदगत (२) पदांशगत (३) वाक्यगत (४) महावाक्यगत (५) वर्णगत (६) प्रबन्धगत।

Total 6 kinds (Table No. II)

III (B) संलक्ष्यक्रमव्यङ्ग्य :-

(a) शब्दशक्तिमूल (१) वस्तुरूप पदगत (२) वस्तुरूप वाक्यगत (३) अलङ्काररूप पद गत (४) अलङ्काररूप वाक्य गत।

Total 4—(Table No. III)

IV. (b) अर्थशक्तिमूल

(१) पदगत=12 kinds
(२) वाक्यगत=12 kinds
(३) महावाक्यगत=12 kinds

Their names have already been mentioned.

Total=36 (Table No. IV)

V (c) उभयशक्तिमूल=1 kind

Total 1 kind (Table No. V)

Now Grand Total—Table No. I=4
Table No. II=6
Table No. III=4
Table No. IV=36
Table No. V=1

51

शुद्धध्वनि—These fifty one kinds are called pure, or and as in the case of Alamkaras, there may occur admixture of these fifty-one kinds of Dhwani in the following way :-

(१) अङ्गाङ्गिभाव सङ्कर (२) एकाश्रयानुप्रवेश सङ्कर (३) सन्देह सङ्कर and (४) संसृष्टि and taking all these into consideration the number of Dhwanis will come up to 5355 variety. The process is this :–

(A) अङ्गाङ्गि भावशङ्कर -

(1) उक्तिविनानां एकपञ्चाशत् प्रकाराणा शुद्धाना ध्वनीनाम् मध्ये सजातीयेन एकैकेन शुद्धेन सह सजातीयस्य एकैकस्य शुद्धस्य सङ्कर तेन हि एक पञ्चाशत । (51 kinds).

(२) द्वितीयस्य शुद्धस्य प्रथमेन शुद्धेन सह सङ्करः तेन हि एकः। एवं तृतीयस्य शुद्धस्य प्रथमेन द्वितीयेन च सह सङ्करेण द्वौ इत्यादि क्रमेण संख्या भवन्ति १२७५ । इदं हि सम्भवति शुद्धानां परस्पर विजातीयत्व-स्थले ।

(B) एकाश्रयानुप्रवेश सङ्कर

(१) उक्तरूपेण सजातीय स्थले- ५१

(२) उक्तरूपेण विजातीय स्थले- १२७५

(C) सन्देहसङ्कर -

(१) सजातीय सङ्करे --५१

(२) विजातीय सङ्करे–१२७५

(D) संसृष्टि-- ,

(१) सजातीय संसृष्टौ —५१

(२) विजातीय संसृष्टौ —१२७५

Thus 51+1275 and 51+1275 and 51+1275 and 51+1275 and 51 pure=5355.

Only one example is given here—

अत्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय सा पूर्णकुम्भ-नवनीरजतोरणस्रक्सम्भारमङ्गलमयत्नकृतं विधत्ते ।

Here स्तनौ एव पूर्णकुम्भौ ; दृष्य एव नवनीरज इति रूपकालङ्कार-ध्वनि ।

एवं स्तनयुगं दृष्यश्च नायकस्य रतिमुद्दीपयतीति सम्भोग—श्रृङ्गाररसस्य च ध्वनिः ।

Thus there is the मङ्कर of एकाश्रयानुप्रवेश type of Rupak-alamkara as well as of Romantic Sentiment (श्रृङ्गार रस).

Thus having disposed of the first type of kavya, namely ध्वनिकाव्य according to Viswanath, we shall now proceed to deal with the second type of Kavya -namely Gunibhuta-vyanga-kavya (गुणीभूतव्यङ्ग्य काव्य) following the Dhwani theory of the self same author.

The second type of Kavya known as गुणीभूतव्यङ्ग्यकाव्य is that in which the व्यङ्ग्यार्थ i. e. the meaning implied (or in other words the significance expressed by Vyanjana Sakti) is equally charming or equally important or less chaming or less important than the Vachyartha i. e. the simple direct meaning or the meaning denoted by the Abhidha Sakti.

This is of eight varieties –

(१) इतराङ्गम् (२) काक्वाक्षिप्तम् (३) वाच्यसिद्ध्यङ्गम (४) सन्दिग्ध प्राधान्यम् (५) तुल्यप्राधान्यम (६) अस्फुटव्यङ्ग्यम् (७) अगूढ व्यङ्ग्यम् and (८) असुन्दर व्यङ्ग्यम् ।

We shall take up these for discussion—one by one.

(1) इतराङ्गम् —It means इतरस्य रसभावादेः अङ्गम् अंगीभूतं रसभावादि व्यङ्ग्यम् and so it occurs when some Rasa and the like which is the implied object of the text stands as sub-ordinate to another Rasa (sentiment) or Bhava (emotion).

Thus —

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ।

Here Karuna (pathetic sentiment)--the primarily implied thing of the text, has got the implication of the Erotic Sentiment (शृङ्गार) subordinate to it.

The second type of Gunibhuta-vyanga is Kakwa-kshipta or presented by Kaku (intonation). Example :-

In Venisamhara Bhima says :-

मथ्नामि कौरवशतं समरे न कोपात् ।
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
संचूर्णयामि गदया न सुयोधनोरू ।
सन्धिं करोतु भवतां नृपतिः पणेन ।

Here what is implied is an affirmative idea (i. e, मथ्नाम्येव इत्यादि व्यङ्ग्यम्) but it is presented here through Kaku and thus it is simultaneously realised with the negative idea--the Vachyartha, and this simultaneous realisation stands in the way of the Vyangyartha being but charming, and so here is no ध्वनि but गुणीभूतव्यङ्ग्य

The third namely वाच्यसिद्ध्यङ्ग occurs when the व्यङ्ग्यार्थ forms a part of the वाच्यार्थ or rather depends on the वाच्यार्थ for its very existence

Thus

दीपयन् रोदसीरन्ध्रमेव ज्वलति सर्वतः
प्रतापस्तव राजेन्द्र ! वैरिवंश-दवानलः ।

Here the idea of a bamboo has been ascribed to the idea of a family as expressed by the word वंश through implication, or in other words the ascription of a bamboo on the family is the object implied (व्यङ्ग्यार्थ) but this व्यङ्ग्यार्थ is dependent on the ascription of दावानल on प्रताप which is but वाच्य being expressed in words and hence here is गुणीभूतव्यङ्ग्य of the वाच्यसिद्ध्यङ्ग type. The fourth

type of गुणीभूत व्यङ्ग्य is सन्दिग्ध-प्राधान्यं which occurs when there stands some doubt as to the relative superiority of वाच्यार्थ and व्यङ्ग्यार्थ ।

Thus—

हरस्तु किञ्चित परिलुप्तधैर्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः
उमामुखे बिम्बाफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥ Kum. III

Here there occurs some doubt as to which is more important whether the gazing which is but the वाच्यार्थ being expressed by the last line or the desire for a kiss व्यङ्ग्यार्थ being implied by the stead-fast looks as cast by Siva.

The fifth type is तुल्यप्राधान्य which occurs when both वाच्यार्थ and व्यङ्ग्यार्थ are equally important.

Thus Parasurama wrote to Ravana

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये
जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते ॥

Here the वाच्यार्थ namely a friend will be displeased as well as the व्यङ्ग्यार्थ namely the dis-affected friend will stand against are equally important. वाच्यार्थ is important because it denotes the loss of an ally, whereas व्यङ्ग्यार्थ is important because it signifies the appearance of a fresh enemy.

The sixth variety is अस्फुटव्यङ्ग्यम् and it occurs when the व्यङ्ग्यार्थ is not easily understood being far-fetched in character, with reference to the वाच्यार्थ ।

Thus सन्धौ सर्व्वस्वहरणं विग्रहे प्राण-निग्रहः
अल्लाबदीनभूपतौ न सन्धिर्नच विग्रहः ।

Here what is implied (i. e. the व्यङ्ग्यार्थ) is that neither the policy of peace nor the policy of war will do against Emperor Alauddin · and so what is to be adopted is either साम the policy of pacification or दान the policy of concession ; but this significance of the said assertion is difficult to be understood even by a scholar.

The seventh kind namely अगूढ़व्यङ्ग्यम् occurs when the व्यङ्ग्यार्थ is too explicit i. e. as easy to follow as the वाच्यार्थ ।

Thus — अनेन लोकगुरुणा सतां मार्गोपदेशिना । अहं व्रतवती स्वैरमुक्तेन किमतः परम् ।

Here the implication namely forcible seizure (i e. raping) of a female by Sakyamuni is too explicit and is as easy to follow as the वाच्यार्थ ।

The eighth असुन्दरव्यङ्ग्य occurs when the व्यङ्ग्यार्थ appears less charming than the वाच्यार्थ ।

Thus— वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः ।

गृहकर्म्म-व्यापृतायाः वध्वाः सीदन्त्यङ्गानि ।

Here the वाच्यार्थ is the following—

Some person with whom the woman in question has secret arrangement, has entered the creeper-arbour , but it is less charming than the वाच्यार्थ namely सीदन्ति अङ्गानि the limbs are being stirred up.

These are the eight varieties of गुणीभूतव्यङ्ग्य ।

Further the idea of a simile (उपमालङ्कारः) is implied in a दीपक in a तुल्ययोगिता and others. This उपमालङ्कार as implied in the said rhetorics is but an instance of गुणीभूतव्यङ्ग्य but not dhwani, since the appealing character of the Kavya in question is through Dipaka and so fourth and not through simile.

The author of Dhwani (ध्वन्यालोक) concurs on this point.

Moreover, the eight type of गुणीभूतव्यङ्ग्य occurs also there, where the charming nature of the poem as realised through implication i. e. through Vyanjana Sakti is marred by the presence of some particular word which makes the implication (व्यङ्ग्यार्थ) a bit explicit, and the mere removal of the self-same word will bring the poem under the category of Dhwani An example :–

> "दृष्ट्या केशव ! गोपरागहृतया किञ्चिन्न दृष्टं मया
> तेनात्र स्खलितास्मि नाथ ! पतितां किं नाम नालम्बसे ।
> एकस्त्वम् विषमेषु खिन्नमनसां सर्वाबलानां गति-
> र्गोप्यैव गदितः सलेशमवताद् गोष्ठे हरिर्वश्चिरम् ।

Here the वाच्यार्थ as denoted by the phrase गो-पराग-हृतया दृष्ट्या न किञ्चित् दृष्टम् and so forth, co-exists with the व्यङ्ग्यार्थ implied by the construction गोप-राग-हृतया and so forth and certainly it is more charming, but the implied meanings becomes too explicit by the word सलेशं which states that the वाच्यार्थ of the sloka has got some insinuation i. e व्यङ्ग्यार्थ । Remove the word सलेशं from the sloka and the व्यङ्ग्यार्थ will fall under the category of Dhwani

Further where the व्यङ्ग्यार्थ be it, Vastu or Alamkara or Rasa or the like, becomes incorporated in or subordinate to some other Rasa as in the previous quoted sloka "अयं स रशनोत्कर्षी etc." (wherein the Pathetic sentiment (करुणरस) stands as the main figure, the Erotic being incorporated within it), there the Kavya will be denominated by the principal sentiment : and thus with reference to the said sloka it is to be held it that it is an instance of करुणरसात्मक काव्यम् । it is of course an instance of गुणीभूत-व्यङ्ग्य of the इतराङ्ग type as it has been already noted.

One thing is to be noted in this connection : the author of Dhwani (ध्वन्यालोक) holds the view that sometimes गुणीभूत-व्यङ्ग्य of any one of the said eight varieties may come under the category of Dhwani through a careful scrutiny of the real significance of the Rasa and the like. In the said sloka, of course, these is no such Dhwani in as much as herein predominates करुणरस which forms also the subject-matter of the chapter—the chapter being the wailing of the woman after the Kuru-Kshettra War. But there may be cases where the Kavya is to be denominated after the subordinate thing, Rasa and the like.

An Example

यत्रोन्नमदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः ।
सन्ध्याभ्रमं प्रापदुत्तामकाण्डेऽप्यनङ्गनेपथ्य-विधि विधत्ते ।

Here what is found is the description of a city and it is the main thing It comes under the head वस्तु ; but there is also the presence of शृङ्गाररस which is but incorporated in the said वस्तु, namely description of the city. Thus, the शृङ्गार रस here is the अङ्ग of the वस्तु and here should be गुणीभूत व्यङ्ग्य of the इतराङ्ग type ; but a careful study of the sloka presents the fact that the implied object namely शृङ्गाररस is more charming and to make it appear charming is also the intention of the poet and so here the Kavya in question is to be denominated as शृङ्गार रसात्मकं काव्यम् and not नगरीवर्णनकाव्यम् though शृङ्गार here is but an instance of the गुणीभूत व्यङ्ग्य of the इतराङ्ग type as in the sloka "अयं स रसनोत्कर्षी" etc.

The view of Viswanath is supported by Chandidas his grand uncle who declares that when Rasa tasted with the whole heart, the relation of principal and subordinate as subsisting between two Rasas and so forth,

does not present itself before the reader ; or in other words the reader does not feel such a notice i. e. the relation of principal and subordinate . such an idea occurs after the whole topic has been carefully considered . and even then the denomination of Kavya by a Rasa and so forth, which stands subordinate to or which has been incorporated in some principal, is not to be discarded i. e. the Kavya will be denominated by the subordinate Rasa the same being more appealing even though it has been reduced to the position of गुणीभूतव्यङ्ग्य। An example of this we have already seen in the sloka "यत्रोन्मदानाम् etc.

Thus according to Viswanath and Chandidasa, in the case of a गुणीभूतव्यङ्ग्य of the इतराङ्ग type, the Kavya should be denominated after the गुणीभूत रस provided it appears more charming than the प्रधानरस।

But it appears to us that according to the author of Dhwanyaloka the गुणीभूतव्यङ्ग्य in such a case should assume the shape of ध्वनि and consequently should be designated as such in as much as he says :- "प्रकारोऽयम् गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपतां भजते रसादितात्पर्य-पर्यालोचनया पुनः"।

The phrase ध्वनिरूपतां भजते leads one to come such a conclusion. The आलोक attached to this Dhwani sloka remarks the following :—गुणीभूतव्यङ्ग्योऽपि काव्यप्रकारो रसभावादि-तात्पर्य-पर्यालोचनेन पुनर्ध्वनिरेव सम्पद्यते। This theory arises in connection with the question whether, in some case of doubt, there occurs ध्वनि or गुणीभूतव्यङ्ग्य and the author of Dhwani writes the following dictum :-

"प्रभेदस्यास्य विषयो यश्च युक्त्या प्रतीयते
विधातव्या सहृदयैर्न तत्र ध्वनि योजना ॥"

Aloka attached to this says—संकीर्णो हि कश्चित् ध्वनेर्गुणीभूत-व्यङ्ग्यस्य च लक्ष्ये दृश्यते मार्गः। तत्र यस्य युक्तिसहायता तत्र तेन व्यपदेशः कर्त्तव्यः न सर्व्वत्र ध्वनिरागिणा भवितव्यम्।

Then he sets forth two examples—

(a) पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्व्वम् सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तं निर्व्वचनं जघान।

(b) प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता।

न किञ्चिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम्। and remarks.

इत्यत्र "निर्व्वचनं जघान" "न किञ्चिदूचे" इति प्रतिषेधमुखेन व्यङ्ग्यस्यार्थस्य उक्त्या किञ्चिद् विषयीकृत गुणीभाव एव शोभते। यदा वक्रोक्तिं विना व्यङ्ग्योऽर्थः तात्पर्येण प्रतीयते तदा तस्य प्राधान्यम्। यथा 'एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्व्वती" इत्यत्र। इह पुनरुक्तिभङ्ग्याऽस्ति इति वाच्यस्यापि प्राधान्यम्। तस्मान्नात्र अनुरणनरूपव्यङ्ग्यध्वनिव्यपदेशो विधेयः। Thus in these two slokas there is no dhwani and through due considera-tion the conclusion is reached that in these occurs गुणीभूत व्यङ्ग्य। But there may be some case where गुणीभूत व्यङ्ग्य assumes the shape of a ध्वनि through a careful study of "रसादि तात्पर्य्य"।

Aloka sets forth the following example—

"दुराराधा राधा सुभग यदनेनापि मृजतस्तवैतत् प्राणेशजघन
वसनेनाश्रु पतितं
कठोरं स्त्रीचेतस्तदलमुपचारैर्विरम हे क्रियात् कल्याणं वो
हरिरनुनयेष्वेवमुदितः।"

The Lochana of Sree Abhinavagupta, attached to this Aloka remarks the following :—

"एवमेव व्यङ्ग्यार्थसारो वाच्यं भूषयति। तत्तु वाच्यं भूषितं सत् ईर्षाविप्रलम्भाङ्गत्वमेति इति।"

Now we shall discuss one more topic in the light of ध्वन्यालोक। We have seen that out of the eight varieties of गुणीभूतव्यङ्ग्य, the first is इतराङ्ग which occurs when the व्यङ्ग्य being either Rasa, or Bhava or the Abhasa of any of the two or the Prasama or Udaya of Bhava forms a part and parcel of another Rasa and the like (and consequently the व्यङ्ग्यार्थ goes on but beautifying the वाच्यार्थ); but in all these cases there occur also different rhetorics such as रसवत् प्रेयः, ऊर्जस्विन् and समाहित as stated in the tenth chapter of Sahityadarpan. Now--cannot the गुणीभूतव्यङ्ग्य of the इतराङ्ग types as well as the said Alamkaras be summarily disposed of by affirming the existence of ध्वनि in such cases ? Take an example :--

अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीविविस्रंसनः करः।

Here the शृङ्गाररस is dependent on the करुण which, thus it goes on beautifying, and so here occurs गुणीभूतव्यङ्ग्य of the इतराङ्ग type as well as रसवदलङ्कारः : well better say that here is शृङ्गार रसध्वनि and bid good-bye to both इतराङ्ग and रसवत्। No--says the author of Dhwani. The Aloka says :— रसादिरर्थो हि सहैव वाच्यत्वेन अवभासते।
स च अङ्गित्वेन अवभासमानो ध्वनेरात्मा।

इदानीं रसवदलङ्कारात् अलक्ष्यक्रमद्योतनात्मनो ध्वनेः विभक्तो विषय इति प्रदर्श्यते—

"वाच्यवाचक चारुत्वहेतूनां विविधात्मनाम् ।
रसादि-परता यत्र स ध्वनेर्विषयो मतः ।

Aloka says :— रसभावतदाभास-तत्प्रशमलक्षणम् मुख्यम् अर्थम् अनुवर्त्तमाना एव शब्दालङ्काराः अर्थालङ्काराः गुणाश्च परस्परं ध्वन्यपेक्षया च विभिन्नरूपा व्यवस्थितास्तत्र काव्ये ध्वनिरिति व्यपदेशः ।

Lochana here says :- अभिव्यज्यन्ते रसाः प्रतीयन्ते च रसन्ते इति । तत्र अभिव्यक्तिः प्रधानतया भवेत् अप्रधानतया वा । प्रधानत्वे ध्वनिः अन्यथा रसाद्यलङ्काराः ।

And – प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः । (ध्वनिकार) ।

Aloka :—यस्मिन् काव्ये प्रधानतया अन्योऽर्थः वाक्यार्थीभूतस्तस्य च अङ्गभूताः ये रसादयस्तेरसादेरलङ्कारस्य विषयः ।

The Lochana clears up the point by affirming "यस्मिन् काव्ये ते पर्व्वोक्ताः रसादयोऽङ्गभूता वाक्यार्थीभूतश्च अन्यः, तस्य काव्यस्य सम्बन्धिनो ये रसादयः अङ्गभूतास्ते रसादालङ्कारस्य रसवदलङ्कारशब्दस्य विषयाः । स एव अलङ्कार-शब्दवाच्यो भवति —योऽङ्गभूतः न तु अन्य इति यावत् ।

Thus in the aforesaid example– अयं स रसनोत्कर्षी etc., the शृङ्गाररस is the अङ्गभूत of करुणरस which is वाक्यार्थीभूत i. e वाच्यार्थः ; hence the अङ्गभूत रस has been taken as the रसवदलङ्कार, and the व्यङ्ग्य itself being गुणीभूत, has been denominated as इतराङ्ग—i. e. इतरस्य करुणरसस्य वाच्यस्य एव अङ्गभूतम् ।

The gist is thus stated by ध्वनिकारः—
रसभावादितात्पर्य्यमाश्रित्य विनिवेशनम्
अलङ्कृतीनां सर्व्वासामलङ्कारत्व-साधनम् ।

Aloka :—तस्मात् यत्र रसादयो वाक्यार्थीभूता सर्व्वे तेन रसादेः अलं-कारस्य विषयाः स ध्वनेः प्रभेदः। तस्य उपमादयोऽलङ्काराः। यत्र तु प्राधान्येन अर्थान्तरस्य वाक्यार्थीभावे रसादिभिश्चारुत्वनिष्पत्तिः क्रियते स रसादेरलङ्कारतायाः विषयः।

Upon this Lochana remarks उपमादीनाम् अलङ्कारत्वे यादृशी वार्त्ता, तादृशी एव रसादीनाम्। तद्वदवश्यमनेन अलङ्कार्य्येण भवितव्यम्। तत्र यद्यपि वस्तुमात्रमपि भवति तथापि तस्य पुनरपि विभावादिरूपतापर्य्यवसानात् रसादितात्पर्य्यमेवेति सर्व्वत्र रसध्वने-रात्मभावः। उपमया यद्यपि वाच्योऽर्थः अलंक्रियते, तथापि तस्य तदेव अलङ्करणं यत् व्यङ्ग्यार्थाभिव्यञ्जनसामर्थ्याधानमिति वस्तुतो ध्वन्यात्मा एव अलकार्य्यः। And so these रस and the like which are not dhwanis, serve as Alamkaras such as रसवत्।

Thus have been dealt with the two varieties of Kavya (and a Kavya is a रसात्मक वाक्य i. e. a sentence that is replete with some Rasa) namely, the Dhwani Kavya which is the first class Kavya as well as the Gunibhuta-vyangya kavya the second class one. Some authorities such as Mammata Bhatta the author of Kavya-prakasa add a third namely chitra-kavya in which nothing is implied i. e. in which the Vyanjana Sakti does not function at all ; and this Chitra-kavya is of two kinds Sabda Chitra as well as Vachya Chitra.

Viswanath refuses to accept this :. He opines—If there be no व्यङ्ग्य in Chitra-kavya then it is not at all a Kavya in as much as a Kavya is a रसात्मकं वाक्यं i. e. the वाक्यम् in which रस is व्यङ्ग्य constitutes a kavya. Thus चित्रम् is a mere वाक्यम् and not a काव्यम् and this is corroborated by the author of ध्वन्यालोक who writes :—

प्रधानगुणभावाभ्याम् व्यङ्ग्यस्यैव व्यवस्थिते।
उभे काव्ये ततोऽन्यद् यत् तच्चित्रमभि-धीयते।"

That is, a vyangyartha exists with the वाच्यार्थ and if of the two the vyangyartha is more important then it is ध्वनिकाव्य, otherwise it is a गुणीभूत व्यङ्ग्यकाव्य ; and these two only are kavyas and what is Chitra lies beyond the jurisdiction of kavya the same being a mere वाक्यम् (acc to our author).

साहित्यदर्पणः

षष्ठः परिच्छेदः

Introduction—As Sanskrit अलङ्कारशास्त्र is applicable to modern literatures and as this Chapter has bearing on theatres old and new, and as in Sans. dramas we have बीज-विन्यास of modern उपन्यास, so we deal with thischapter separately first (cp. "उपन्यासस्तु कार्य्याणां प्रथनम्" etc.)

The sixth chapter of the work deals with Dramaturgy. Indeed, Dramaturgy is not a new thing that has been taken up for considertion by our author. Long before him the subject underwent systematic treatment at the hands of the celebrated sage Bharata whose Natya Shastra in 2nd century B. C. has been declared to be the pioneer in the field of Dramaturgy, It is further to be noted that uses of figures in Vedas, Upanishads and mention of उपमा and रूपक by Yaska in 8th century B.C. and later by Paninni etc. in some or 5th or 6th century B. C. show that developed Rhetoric was in use since the six vedangas developed in some thousand B C. : Dramaturgy too (नाट्यशास्त्र) was also perhaps being studied in the last phase of the Samhita period, otherwise Panini in some 6th century B. C. cannot refer to नटसूत्र ; and a detailed work like भरतनाट्यशास्त्र cannot come into existence in some 2nd century B. C. or Bhasa cannot write such dramas in some 4th century B. C. (See also our Intro in ch. 1).

Then in subsequent period, the matter underwent careful deliberation in the works of Nandikeswara (Abhinaya-darpana), Dhananjaya (Dasa-rupaka with a

commentary by his brother Dhanika), Singh Bhupala (Rasarnava-sudhakara), Rupa Goswamin (Nataka-chandrika) and so forth ; and as such, naturally divergency of opinion in some particular subjects or topics relative to Drama and Dramaturgy, raised its head. Viswanatha has also differed from the old writers in several respects ; and Rupa Goswami, who followed Viswanatha by at least two centuries later, refused to follow him in lots of places (cf. "नातीव सङ्गतत्वात भरतमुनेर्मतविरोधाच्च । साहित्यदर्पणीया न गृहीता प्रक्रिया प्रायः" in the second sloka of Nataka Chandrika).

But the chief credit of Viswanatha of 14th century A. D. (See our preface in chap. I) lies in the fact that his work does not deal with Dramaturgy only. Indeed, his is primarily a work on Rhetorics like Mammata's Kavya-prakasa or Ekavali etc. and he has made his work complete and comprehensive by inserting therein a chapter on Dramaturgy ! and a comprehensive work of this type is rarely to be found. Viswanatha's other works are (1) राघवविलास (2) कुवलयाश्वचरित (Prakrita Mahakavya) ; (1) चन्द्रकला (2) प्रभावती (3) प्रशस्तिरत्नावली (=Natikas) ; नरसिंहविजयम् etc, and काव्यप्रकाशदर्पण ॥ He is an erudite pandit of Orissa .

In our annotation, we shall refer to the works of Bharata, Dhananjaya and Rupa Goswamin, also others whenever we shall think it proper and we shall mostly follow this course also by way of comparision and contrast, whenever necessary.

Text—एवं ध्वनि-गुणीभूतव्यङ्गत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्य-श्रव्यत्वेन भेदद्वयमाह ।

मितभाषिणीटीका—चतुर्थे अध्याये काव्यस्य द्वौ भेदौ प्रदर्शितौ : तौ च ईदृशौ=ध्वनिसनाथकाव्यं तथा गुणीभूतव्यङ्गसमायुक्तं काव्यम् । यस्मिन काव्ये वाच्यार्थात् (अभिधाशक्तिलब्धात् अर्थात् साक्षात् सङ्केतितार्थात) कश्चिदपरः व्यङ्गार्थः (व्यञ्जनाशक्तिलब्धोऽर्थः) अधिकतरं मनोरमम् विद्यते, तत् खलु ध्वनिसनाथम काव्यम् ; एवं यस्मिन काव्ये वाच्यार्थात् अधिकतरम् अभिरामो व्यङ्गार्थो न दृश्यते अपितु यस्मिन् काव्ये व्यङ्गस्य अर्थस्य गौणत्वम उपेक्ष्यत्वं वा प्रतीयते तदेव गुणीभूत-व्यङ्गसमायुक्तं काव्यम् । ननु ईदृशस्यभेदद्वयस्य का भित्तिः ? व्यञ्जना शक्तिलब्धोऽर्थएव भित्तिः (मूलं), यतः तमेव अर्थम् अवलम्ब्य भेदद्वयमुत्थितम । परम् किं काव्यस्य अपरः कश्चिद्भेदोऽस्ति यः अन्याम् कामपि भित्तिमाश्रित्य अवतिष्ठते ? अस्याः पृच्छायाः उत्तरं पठन कथयति -काव्यस्य दृश्यकाव्यम तथा श्रव्यकाव्यम् इति इन्द्रियभेदमवलम्व्य पुनरपि भेदद्वयं वर्त्तते । इन्द्रियभेदमेवावलम्व्य वर्त्ततेऽयं भेदः यतः दृश्यकाव्यम् खलु चक्षुरिन्द्रियग्राह्यं काव्यं, तथा श्रव्यकाव्यम् खलु कर्णेन्द्रियग्राह्यं काव्यम् । भेदमिमं वर्णयिष्यन कारिकामवतारयति—

English—Two varieties of poems have been shown by the author (in the fourth chapter), these are (1) Dhwani-kavya i. e. the poem in which the inner meaning गूढार्थ or the meaning which is got by implication is more appealing than the simple meaning or the meaning which is apparent. (2) Guni-bhuta-vyangya-kavya i. e. the poem in which the inner meaning if any, i. e. where the meaning which is indicated by the Vyanjana-sakti of the words can be relegated to a sub-ordinate position ; that is, it (ध्वनि) is more or less a negligible factor. Having disposed of these two varieties, our author proceeds to consider

two other varieties of poems (quite different from the above mentioned varieties) ; these are-Drishyakavya i. e. a poem that is audible i. e. a drama etc., and that can be put to the stage ; and Sravya-kavya i. e. a metrical or like composition that can be heard ; that is, an epic or a poem or a prose Kavya etc. of any other kind.

Note—Readers are here warned against committing fallacy of cross division in this connection. The two varieties-viz Dhwani-kavya and Gunibhuta-vyangya kavya are, as expected, mutually exclusive ; and so are the other two varieties namely the Drishya Kavya and Sravya Kavya. But the former two and the latter two are not mutually exclusive since the division is based, as we have clearly stated in the Mitabhasini, on two different stand-points. Thus a Drishya Kavya may be a Dwani Kavya or a Gunibhuta-vyangya-kavya, and a Sravya-kavya also Dhwani-kavya or a Gunibhuta-vyangya-kavya. The different types of Dhwani-kavya as well as of Gunibhuta vyangyakavya have been already stated here, and disposed of in the fourth chapter of this book ; and in this sixth chapter our author proceeds to take up for consideration the different varieties of Drishya kavyas alias Dramas etc.—a subject, hardly found in any other work on Rhetorics.

कारिका १। दृश्य-श्रव्यत्व-भेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयम्।

मितभाषिणी—काव्यम् दृश्यम तथा श्रव्यम् इति द्विप्रकारमिति एतन्निश्चितम्। एतयोर्मध्ये किं नाम प्रथमप्रोक्तं दृश्यकाव्यमिति आकाङ्क्षायाम् कथयति—तत्र तयोः काव्ययोर्मध्ये दृश्यं यत खलु दृश्यकाव्यमुच्यते, तत् अभिनेयम् नटप्रभृतिद्वारेण अभिनययोग्यम्। नटैरभि-

नीतं काव्यं नयनाभ्याम् दृश्यते इति अस्य दृश्यकाव्यमिति संज्ञा। ननु नटकृतेऽभिनयः श्रूयते अपि, तर्हि कथं न अस्य श्रव्यमिति संज्ञास्यात्। इति अस्य उत्तरं पश्चात् दास्यते।

Eng. Kavyas are of two varieties—Drishya and Sravya. Amonst these two, the first one viz the Drishya is that sort of Kavya which is put to the stage.

तस्य रूपकसंज्ञाहेतुमाह -

२। तद्रूपारोपात्तु रूपकम्

तत् दृश्यकाव्यं नटे रामादिस्वरूपारोपात रूपकमित्युच्यते।

मितभाषिणी - अस्य दृश्यकाव्यस्य रूपकम् - इति अपरा प्रसिद्धा संज्ञा अस्ति। अस्याः संज्ञायाः कारणं निर्दिशति तन्नाम दृश्यं काव्यं रूपकम् इति उच्यते। कथम्? तद्रूपारोपात्। ये खलुनटाःदृश्यं काव्यम् अभिनयन्ति एवं रङ्गमञ्चे कश्चित् रामरूपेण आगच्छति, कश्चिद्वा रावणरूपेण प्रतीयते, काचिच्च नटी सीतारूपेण ज्ञायते। अनेन यतः दृश्यकाव्यमधिकृत्य एव नटेषु तथा नटीषु राम-रावण-सीतादीनां रूपम् आरोप्यते सन्निवेश्यते अतएव अस्य दृश्यकाव्यस्य रूपकमिति साधारणी संज्ञा। मुखचन्द्रम् इत्यत्र यथा मुखे चन्द्रस्य आरोपात, रूपकालङ्कारः इष्यते, तद्वत् दृश्यकाव्ये खलु नटादिषु रामप्रभृतीनाम् आरोपणात् तस्य रूपकमिति संज्ञा लभ्यते। तथाहि दशरूपके—"रूपकम् तत् समारोपात्" "तथैव नायकारोपो नटे रूपकमुच्यते"।

Eng. The aforesaid Drishya Kavya passes by the general denomination 'Rupaka' because in it the actors and actresses appear on the theatrical stage, as the persons (नायक) dealt with in the Drishyakavya. (It is mainly चक्षुर्ग्राह्य)। Hence it is diff. from pure श्रव्यकाव्य — Which is श्रोत्रग्राह्य only.

कोऽसौ अभिनय इत्याह—

३। भवेदभिनयोऽवस्थानुकारः स चतुर्विधः। आङ्गिको वाचिकश्चैव-माहार्य्यः सात्त्विकस्तथा॥ नटैरङ्गादिभिः रामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः।

मित। दृश्यकाव्यम् अभिनययोग्यमिति प्रागुक्तम्। ननु को नाम अभिनयः? कथयति- अवस्थानुकारः रामरावणयुधिष्ठिरसीता-द्रौपदी प्रभृतीनाम् दृश्यकाव्ये उल्लिखितानाम् स्त्रीपुरुषाणाम् अनुकारः अनुकरणम् एव अभिनयो भवेत्। तत् च अनुकरणम् चतुर्धा भवति, अतएव अभिनयः चतुर्विध इति कथ्यते। के ते? प्रथमः आङ्गिक नटादिभिः अङ्गैः सम्पादनीयः रामप्रभृतिजनोचितः हस्तनेत्रमुखादिभङ्गीविशेषः। रामादिषु नाट्ये उल्लिखितेषु अवस्थाविशेषे यादृशी मुख-नेत्रादि-भङ्गी उचिता मता तादृशी एव मुखनेत्रादिभङ्गी नटादिभिः क्रियते। अतएव तासां भङ्गीनाम् अङ्गनिष्पाद्यत्वात् इदम् अनुकरणमाङ्गिकमिति भण्यते। द्वितीयस्तु वाचिकः वचसा प्रतिपादनीयः रामादिषु यादृशम् एव वाक्य-कथनम् उचितम् तादृशमेव वाक्यकथनम् नटादिभिः गीयते. अतएव इदमनु-करणम् वाचिकमिति कथ्यते। तृतीयः खलु आहार्य्यः आहरणीयः वेशभूषादिभिः निष्पाद्यः। रामादिषु यादृशो वेशविन्यासः न्याय्यः तादृशम् एव वेशविन्यासमाचर्य्य नटादयः रामादीनाम् अनुकुर्वन्ति इति इदम् अनुकरणम् आहार्य्यमिति आख्यायते। चतुर्थो हि सात्त्विकः। "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यम् प्रलय इत्यष्टौ सात्त्विकाः स्मृताः"। इति अस्मिन् ग्रन्थे तृतीयेऽध्याये अष्टसात्त्विकाः भावाः प्रोक्ताः। ते च भावाः नायकनायिकादौ आविर्भवन्ति। ननु रामादयः ये च नायकास्तथा सीतादयः याश्च नायिकाः, तेषु तासु च यत्र यत्र एतेषां सात्त्विकभावानाम् सम्भवः कल्पनीयः, रामादिरूपधारिणः तत्र तत्र एव तासाम् सात्त्विकभावानाम् अनुकरणम् स्व-स्वदेहेषु प्रदर्शयन्ति

अतएव स्तम्भादीनाम् सात्त्विकभावानाम् नटादिभिः अनुकरणादिकमनुकरणम् सात्त्विकमिति शंस्यते ।

अस्मिन्नवसरे पूर्वपरिनयुक्तस्य प्रश्नस्य उत्तरं दास्यते । ननु नटकृतमभिनयम् जनाः न केवलं पश्यन्ति अपितु शृणवन्ति च ! तर्हि कथमस्य अभिनययोग्यस्यकाव्यस्य दृश्यमिति संज्ञा ? श्रव्यमिति संज्ञा वा कथं न स्यात् ? उच्यते । अभिनयश्चतुर्विधः तत्र वाचिकम् अभिनयम् श्रोतारः शृणवन्ति पश्यन्ति च । परम् आङ्गिकम् अभिनयम् आहार्य्यमभिनयम् तथा सात्त्विकमभिनयम् ते पश्यन्ति एव, यतो न तेषां कदापि श्रवणयोग्यता । अतएव अत्र दर्शनयोग्यताया एव आधिक्यात् तथा श्रवणयोग्यतायाः अल्पत्वात्, "वैशेष्यात्तु तद्वादस्तद्वादः" (वेदान्तसूत्रम् २।४।२२) इति न्यायेन अत्र दृश्यकाव्यमिति आख्या । अस्य सूत्रस्यार्थस्तु अर्थ-वैशेष्यं भूयस्त्वमिति शङ्कराचार्यः । यस्य वैशेष्यं भूयस्त्वम् तस्य एव आख्यया समग्रस्य वस्तुनः आख्या कर्त्तव्या इति । एवं "प्राधान्येनैव व्यपदेशो भवति ।" इति अभिनयस्य दर्शन प्राधान्यात् दृश्यकाव्यत्वम् ।

Eng, Abhinaya is but the imitation of the condition of the heroes and heroines ; that is, by Abhinaya is to be understood the representation of the circumstances, relative to the life-incidents of the heroes and heroines as dealt with in dramas. This imitation is of four varieties the imitation of gestures and postures (Angika) of the heroes and heroines (by actors and actresses), the imitation of the speech (statements), the imitation of the dress, as well as the imitation of the Sattwikabhavas such as perspiration, horripilation and the like as might have been expected in the real personal i. e. the heroes and the heroines of dramas.

रूपकस्य भेदानाह—

४। नाटकमथ प्रकरणम् भाण-व्यायोग समवकारडिमाः। ईहामृगाङ्क-वीथ्यः प्रहसनमिति रूपकाणि दश।

मित — 1. रूपकाणाम् दशभेदान् दर्शयति। ते च इमे—(१) नाटकम् (२) प्रकरणम् (३) भाणः (४) व्यायोगः (५) समवकारः (६) डिमः (७) ईहामृगः (८) अङ्कः (९) वीथी (१०) प्रहसनम्। भारतीय नाट्यशास्त्रे तथा दशरूपकेऽपि एते एव भेदाः दीयन्ते। किंचात्र प्रसङ्गे दशरूपककृत् पूर्वपक्षमुत्थापयति "ननु डिम्बी श्रीगदितम् भाणी भाणी प्रस्थान रासकाः काव्यं च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत्" इति अन्यानामपि रूपकाणाम सद्भावात् प्रागुक्ता गणना न समीचीनत्वं गच्छति इति। अस्य उत्तरं च इत्थम् ददाति - रसाश्रयात् नाट्यम, भावाश्रयम नृत्यमन्यत्र। नाटकादि च रसविषयम, नृत्यं तु भावविषयम। विश्वनाथस्तु श्रीगदितम्, भाणीम् (भाणिकाम्) प्रस्थानम, रासकम तथाकाव्यम उपरूपकाणि इति विवेचयति। डिम्बीं तु न गणयति।

Eng.—Rupakas have got ten varieties; they are the following—Nataka, Prakarana, Bhana, Vyayoga, samavakara, Dima, Ihamriga, Anka, Vithi and Prahasana.

किञ्च—

नाटिका त्रोटकं गोष्ठी सट्टकम् नाट्यरासकम्। प्रस्थानोल्लाप्य-काव्यानि प्रेङ्क्षणं रासकं तथा। संलापकम् श्रीगदितम् शिल्पकम् बिला-सिका। दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च। अष्टादश प्राहुरुप-रूपकाणि मनीषिणः। विना विशेषं सर्वेषाम् लक्ष्म नाटकवन्मतम्।

सर्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणां च।

मित -1 अपि च दशसंख्यकरूपकेभ्योन्यानि अपि अष्टादशसंख्यकानि उपरूपकाणि विद्यन्ते च, एतानि - नाटिका, त्रोटकं गोष्ठी सट्टकं, नाट्य-

रासकम्, प्रस्थानम्, उल्लाप्यम्, काव्यम्, प्रेङ्खणम्, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्म्मल्लिका, प्रकरणी, हल्लीशो, भाणिका इति। विना विशेषम् इति—एषु अष्टादशसु एकैकस्य विशिष्टं लक्षणम् अस्ति तच्च पश्चात् वक्ष्यते। परम् तत् स्वस्वविशिष्टलक्षणम् वर्ज्जयित्वा एतेषां एव लक्ष म साधारणलक्षणम् नाटकवत् नाटकस्यसाधारणलक्षणमिव मतम् कथितम्। दशरूपककारस्तु नाटिकां गणयति, तथा श्रीगदितं, भाणिकाम्, प्रस्थानम्, रासकम् तथा काव्यं नृत्याङ्गम्, अनेन च भावविषयम मन्यते। अन्यानि तु न स्वीकरोति।

Eng. Over and above the said ten varieties of Rupaka, there are also eighteen kinds of uparupakas. They are the following :—Natika, Trotaka, Gosthi, Sattaka, Natyarasaka, Prasthana, Ullapya, Kavya, Prenkhana, Rasaka, Samlapaka, Srigadita, Silpaka, vilasika, Durmallika, Prakarani, Hallisa. and Bhani · and each of them has got some special features, and save and except the special features, reserved for each of them, their general characterstics are just like those of a Nataka.

तत्र—

६। नाटकम् ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्। विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः। सुखदुःखसमुद्भूति-नानारसनिरन्तरम्। पञ्चाधिकादशपरास्तत्राङ्काः परिकीर्त्तिताः। प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान्। दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायकोमतः। एक एव भवेदङ्गी शृङ्गारो वीर एव वा। अङ्गमन्येरसाः सर्वे कार्य्यं निर्वहणेऽद्भुतम्। चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपुरुषाः। गोपुच्छाग्रसमाग्रन्तु वन्धनं तत्र कीर्त्तितम्॥

ख्यातम् रामायणादिप्रसिद्धं वृत्तम्-यथा रामचरितादि। सन्धयो वक्ष्यन्ते। नानाविभूतिभियुक्तमिति महासहायम्। सुखदुःखसमुद्भूतत्वं रामयुधिष्ठिरादिवृत्तान्तेषु चाभिव्यक्तम्। राजर्षयः दुष्यन्तादयः। दिव्याः

श्रीकृष्णादयः। दिव्यादिव्यो यो दिव्योऽप्यात्मनि नराभिमानी। यथा श्रीरामचन्द्रः। गोपुच्छाग्रसमाग्रमिति "क्रमेणाङ्काः सूक्ष्माः कर्त्तव्याः" इति केचित। अन्येत्वाहुः—"यथा गोपुच्छे केचिद्वाला ह्रस्वाः केचिद् दीर्घाः। तथेह कानिचित् कार्य्याणि मुखसन्धौ समाप्तानि, कानिचित् प्रतिमुखे, एवमन्येष्वपि कानिचित् कानिचित् इति।

मितभाषिणी दशविधानां रूपकाणां मध्ये प्रथममेव उल्लिखितस्य नाटकस्य लक्षणं प्रदर्शयति—तदेव रूपकम् नाटकम् स्यात् नाटकमिति संज्ञां लभेत। कीदृशम्? यत् रूपकं ख्यातवृत्तं ख्यातम् प्रायशः एव इतिहासप्रसिद्धत् कदाचित् वा लोकगाथाप्रसिद्धं वृत्तम् वृत्तान्तः घटनावली इति यावत् यस्मिन् तत्। नाटके खलु आख्यायिका इतिहासात् पुराणात् कदाचित् लोकगाथाभ्य उपादेया। कविकल्पितस्य वृत्तान्तस्य तत्र न कश्चिदवकाशः। यथा रामचरितम् इति—अधुना कुत्रापि नाटके अवस्थिता आख्यायिका रामायणात् गृहीता। एवं अभिज्ञानशकुन्तलस्य घटना महाभारतात् पद्मपुराणाच्च संगृहीता। चण्डि स्वप्नवासवदत्तमिति भासकृते नाटके कथा प्राधान्येन इतिहासात् अंशतस्तु लोकगाथाभ्य उपादत्ता।

अथ विशेषणसमष्ट्या नाटकस्यलक्षणसमष्टिः निर्दिश्यते। पुनरपि कीदृशम्? पञ्चसन्धिसमन्वितम् पञ्चभिः सन्धिभिः समन्वितं युक्तम्। सन्धीनां सविशेषविवरणम् पश्चात् दास्यते। प्राञ्जलतायाः हेतोरत्र किञ्चिन्मात्रम् आलोच्यते। मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः तथा निर्वहणसन्धिः (उपसंहारसन्धिः) इति नाटकीयकथा—वस्तुनः (Plot इति इंलण्डीयभाषाप्रसिद्धवस्तुनः) पञ्च पर्व्वाणः वर्त्तन्ते। तत्र मुखसन्धौ वीजन्यासो भवेत। य एव पदार्थः प्रधानतया प्रदर्शयितुम् कविना अभिलषितः। तस्य एव पदार्थस्य सूत्रपातः खलु मुखसन्धिः इति नाम्ना प्रसिद्धे नाटकीयकथावस्तुनः (plot इत्यस्य) प्रथमे पर्व्वणि प्रदर्श्यते स एव वीजन्यास इति कथ्यते। यथा अभिज्ञान-

शकुन्तलनाटके शकुन्तलायाः दुष्यन्तेन सह प्रेमसंघटनं तथा पश्चात् खलु तयोर्वैवाहिकमेलनं कालिदासेन नाटकस्य चरमफलतया लक्ष्यीकृतम्। अतः नाटकीयकथावस्तुनः प्रथमपर्व्वणि (मुखसन्धौ) कण्वेन शकुन्तलायाः आश्रमस्य नेतृत्वपदे संस्थापनम् तथा दुष्यन्तस्य च आश्रमसन्निधौ एव मृगयाभियानम् कविना प्रदर्शितम्। अनेनैव खलु उपायेन तयोः प्रथमसाक्षात्कारः सम्भवत्। एवम् नाटकीयकथावस्तुनः द्वितीयपर्व्व खलु प्रतिमुखसन्धिरुच्यते। अत्र मुखसन्धिप्रदर्शितस्य वृत्तान्तस्य किञ्चिदग्रगतिः सम्प्रसारणमिति यावत् जायते। परन्तु किं नाम अन्ते घटिष्यते इति अस्मिन् पर्व्वणि अनुमातुं न शक्यते। यथा पूर्व्वोक्ते नाटके दुष्यन्तशकुन्तलयोः साक्षात्कारस्तथा तयोरन्योऽन्यानुराग-संघटनम्। किन्तु अस्य परस्परानुरागस्य को वा परिणामो भविष्यतीति अत्रांशे अनुमातुं न पार्य्यते। तृतीयपर्व्व नाम गर्भसन्धिः यत्र प्रतिमुख-सन्धिनिर्देशितस्य अधिकतरसंप्रसारणं जायते—तथा किं नाम अस्य नाटकस्य चरमफलमिति स्फुटम् परिज्ञातुं शक्यते। यथा तत्र दुष्यन्तेन शकुन्तलायाः गान्धर्व्वविधिमनुसृत्य पाणिपीडनम्। एवञ्च चतुर्थपर्व्व विमर्शसन्धिरिति कथ्यते। गर्भसन्धेरनन्तरं घटनावली एतादृशम् आकारम् अवलम्बते येन आशङ्का उत्तिष्ठति यत् अकस्मादेव नाटकस्य परिसमाप्तिः भवेत्। तथा सति चरित्रचित्रणं सम्यक् उत्कर्षं न गच्छति इति कौशलेन घटनावैचित्र्यम् संसृज्य नाटकीयकथावस्तुनः परिपुष्टि-करणाय (to drag the plot further) आकस्मिकपरिसमाप्तिशङ्का निवार्य्यते। गर्भसन्धेः परं यस्मिन् पर्व्वणि एतत् क्रियते स विमर्श सन्धिः। यथा शकुन्तलायाः दुष्यन्तेन सह गान्धर्व्वविवाहात् ऊर्द्ध्वम् दुष्यन्तप्रेरितेन दूतेन सह शकुन्तलायाः हस्तिनापुरगमने सति, नाटकस्य परिसमाप्तिः स्यात् तथा सति उभयोः प्रेमपुरस्कारस्य कृते दुःखभोग-माश्रित्य अग्निपरीक्षा न जायते। एवञ्च निष्ठां विशुद्धिं च न प्राप्नुयात् इति शकुन्तलायाः उपरि दुर्वाससः अभिशापः, येन दुष्यन्तः शकुन्तलां विस्मरति

अतश्च परिज्ञातुं च न पारयति : अनेन च तयोः मेलनेन नाटकस्य आकस्मिकपरिसमाप्ति निवार्य्यते तथा उभयोरेव परस्परस्य कृते उभौ संतापम् भजतः येन च तयोः क्रमेण दृढता तथा एकनिष्ठत्वं सम्पाद्यते यस्य एव प्रदर्शनम् कविना अभीष्टमिति इदमेव पर्व्व विमर्शसन्धिः। एवञ्च नाटकीयकथावस्तुनः अवसानभागः उपसंहारसन्धिः निर्वहणसन्धिरिति वा द्वाभ्याम् एव संज्ञाभ्याम् परिचीयते। अस्मिन् एव सन्धौ यदेव वस्तु कठिनचरमफलतया निर्दिष्ट तस्य एव सिद्धिः प्रदर्श्यते . तथा अवान्तर-घटनाश्च तस्मिन्नेव मुख्यफले अन्तर्भाव्यन्ते। तथा तत्र दुष्यन्तेन सह शकुन्तलायाः यत प्रेम तस्य एव परस्परसन्तापेनपरिशुद्धेरनन्तरं तयोः मेलनमेव कविना नाटकस्य मुख्यफलत्वेन निर्दिष्टं तस्य च सिद्धिर्नाटकस्य अवसानभागे प्रदर्श्यते इति सोऽवसानांशः निर्वहणसन्धिरिति ज्ञेयम्। एते खलु नाटकीयकथावस्तुनः पञ्चसन्धयः नाटके अवश्यमेव तिष्ठेयुरिति अनेनैव उक्तं "नाटकं पञ्चसन्धिसमन्वितं स्यात्"। विलासर्द्ध्यादिगुणवत्

इति—विलासः भाषायाः मावलीलरीतिः ऋद्धिः भाषायाः गाम्भीर्य्यं यथा दृश्यते उत्तररामचरिते। आदिपदेन श्लेषः प्रसादः माधुर्य्यम् औदार्य्यं सुकुमारता अर्थव्यक्तिरुदारत्वम् ओजः कान्तिः समाधिरिति काव्यादर्शोक्तादश गुणाः लक्ष्यन्ते। नाटके विलासस्तथा ऋद्धिस्तथा श्लेषप्रभृतयः ये गुणास्तै गुणैः समलङ्कृतया भाषया नाटकम् रूपनिबद्धं भवेत। यद्वा विलासः नायक-दर्शने नायिकायाः नायिकादर्शने नायकस्य वा गमनोपवेशनादिकर्म्मणि भङ्गीविशेषः। उक्तं च ग्रन्थकारेण तृतीयपरिच्छेदे यानस्थानासनादीनां मुखनेत्रादिकर्म्मणाम्, विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना इति। ऋद्धिः नायकस्य नायिकायाः श्रीवृद्धिः, तयोः सङ्कल्पस्य वा काचिदुन्नतिः अग्रगतिः इति यावत्। एवञ्च—

आदिपदेन निर्ज्जने प्रियसमागमादयः वोद्धव्याः। नायकनायिका-गतैरतैः खलु गुणैः समन्वितं नाटकं भवेत् इति। युक्तं नानाविभू-तिभिरिति—नाना विभूतिभिः नायक-नायकाद्गिताभिः नाटककलेवर-

गताभिः भाषागताभिर्वा बहुविधाभिः सम्पद्भिरन्वितम्। अपिच अनेन विशेषणेन नाटकम् महासहायमित्यपि लक्ष्यते। महान्तः नायकात् अपि गुणवत्त्वादिना श्रेष्ठाः सहायाः नायकस्य अभिप्रेतकर्म्मसाधने अनुकूला यस्मिन् तत् महासहायं नाटकम्। यथा शाकुन्तले नायकात् श्रेष्ठस्य इन्द्रस्य, दुष्यन्तस्य शकुन्तलया सह मेलनरूपकर्म्मणः सम्पादने आनुकूल्यम्। सुख-दुःखेति—सुखस्य नायक-गतस्य आनन्दस्य तथा दुःखस्य नायकादिगतस्य विषादस्य समुद्भूत्या आविर्भावेन। यथा उत्तररामचरिते रामस्य आदौ सुखम् पश्चात् च दुःखं दृश्यते। एवं वेणीसंहारे युधिष्ठिरस्य प्रथमतः दुःखं तदनन्तरं च सुखम् अभिव्यक्तम्। अनेन प्रकारेण सुखस्य तथा दुःखस्य च नायकनायिकादौ पर्य्यायक्रमेण आविर्भावात् 'नानारसनिरन्तरम्' शृङ्गारकरुणादिबहुभिः रसैः परिपूर्णम्। अन्तर्निष्क्रान्तनिखिलपात्र इति लक्षणान्वितः नाटकस्य परिच्छेद-विशेषः अङ्कः। नाटकेषु कति अङ्का इति—पञ्चादिकाः पञ्च आदयो येषां ते इति। पञ्चाधिका इति पाठः। न्यूनकल्पे पञ्च एव अङ्काः तत्र कर्त्तव्याः। अधिक-उत्तम। तथा दशपराः—दश परे परं वा येषां ते इति। अधिककल्पे तु दश अङ्काः कर्त्तव्याः। तथाहि नाटके अङ्कानां संख्या पञ्चभ्यः न्यूना दशभ्योऽधिकाः न भवन्तीति। अत्र नाटके नायकस्तु कीदृक् स्यादिति समाधत्ते—गुणवान् नायको मतः नायकस्तु एवम्प्रकार एव अभिमतः। स तथा प्रख्यातवंशः लोकप्रसिद्धकुलोद्भवः—यथा उत्तररामचरिते प्रख्याते सूर्य्यवंशे उद्भूतो रामचन्द्रः। तथा राजर्षिः, राजा ऋषिरिव इति उपमितकर्म्मधारय एवात्र न्याय्यः। तथा सति ऋषिषु विद्यमानाः ये करुणत्वधैर्य्यशालित्व-गाम्भीर्य्यादिगुणाः तैः सकलैः गुणैः विभूषितः राजा राजपदाधिकारी लोकपालः। स क्षत्रियो वा भवतु ब्राह्मणो वा शूद्रो वा भवतु इति न कश्चिन्नियमः। दृश्यते च नायकः शूद्रकुलोद्भवः राजपदाधिकारी चन्द्रगुप्तः मुद्राराक्षसनाटके। शाकुन्तले स्वगुणैः ऋषिभिः सह उपमितः दुष्यन्तः राजर्षिरिति वारं वारं कथ्यते अतो नाम श्रीमता

विश्वनाथेन व्याख्यातम् राजर्षयः दुष्यन्तादयः। तथाच स नायकः धीरोदात्तः स्यात्। न तु धीरोद्धतः वा धीरललितः नापि धीरप्रशान्तः। धीरोदात्तस्य लक्षणं तु उक्तं यथा—"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः स्थेयान् निगूढमानोधीरोदात्तो दृढव्रतः कथितः"। अविकत्थनः आत्मश्लाघारहितः। निगूढमानः विनयेन आच्छादितगर्वः। स्थेयान् स्थैर्यसम्पन्नः। प्रतापवान तेजस्वी। तथाहि दुष्यन्तस्य तेजस्वित्वं शाकुन्तले ऋषिकुमारैः वर्णितम्। दिव्योऽथ इत्यादि—स तु नायकः दिव्यः अदिव्यः दिव्यादिव्यः तथा "वा शब्दस्तु अनुक्तसमुच्चये" इति स्वीकृत्य वाशब्देन अदिव्योऽपि भवेत्। दिव्याः स्वर्गीयः इति केचित्। परम् दिव्यशब्दस्य अयमेवार्थः साधीयान—नरदेहम् स्वीकृत्य अपि नरलीला आचरन् अपि अप्राकृतकलेवरधारी यथा श्रीमद्भागवते निरस्तसाम्यातिशयेन राधसा ... तथा ललितमाधवेऽपि भगवान् श्रीकृष्णः। उक्तं च श्रीरूपगोस्वामीचरणैस्तस्य नाटकचन्द्रिकायाम्—'स्वयं प्रकटितैश्वर्यो दिव्यः कृष्णादिचरितः।" अत्र दुर्लभार्थं श्रीमद्भागवते कीर्तितं श्रीभगवच्चरितामृते "कृष्णस्य यन्ति सर्वलीला सर्वोत्तमा नरलीला, नरवपु ताहार स्वरूप, गोपवेश वेणुकर, नवकिशोर नटवर, नरलीलार हय अनुरूप"। दिव्याः कृष्णादयः इत्यत्र आदिशब्देन लक्ष्मी स्वयंवरनाटके नारायणः। एवम् अन्योऽपि अप्राकृतदेहिनः बोद्धव्याः। दिव्यादिव्यः—दिव्याः अप्राकृतदेहधारिणः। अपि अदिव्याः आत्मनि नराभिमानी यः अप्राकृतम् देहं धारयन् अपि आत्मानम् प्राकृतदेहधारिणम् मानवम् मन्यते तथा तद्वत एव आचरति स दिव्यादिव्यः यथा रामचन्द्रः। तथाहि नाटकचन्द्रिकायाम् दिव्योऽपि नरचेष्टत्वात् दिव्यादिव्यः रघूद्वहः। श्रीरामचन्द्रस्य सीताविच्छेदे विलापः तस्य नराभिमानित्वस्य प्रमाणम्। मतमिदं तु केचिन्न सहन्ते तेषाम् अयम् अभिप्रायः श्रीरामचन्द्रः अपि दिव्यः एव। अकिञ्चित्करं नराभिमानित्वं यतः श्रीकृष्णोऽपि नरलीलाम् अनुकरोति स्म। अतः यः अंशतः दिव्यस्तथा अंशतः एव अदिव्यः— स एव दिव्यादिव्यः। यथा श्रीयुधिष्ठिरभीमप्रभृतयः। ते तु देवेभ्यः

धर्म्मराजपवनप्रभृतिभ्यः मनुष्याम् कुन्त्याम् जाताः अतः अंशतः (पितृत्वानुसारेण) तेषाम् दिव्यत्वात् तथा अंशतः (मातृत्वानुसारेण) तेषाम् अदिव्यत्वात ते दिव्यादिव्याः। श्रीरामचरणतर्कवागीशपादास्तु इदमेव मतं साधु मन्यन्ते। तथा अदिव्यः—अदिव्यस्तु प्राकृतदेहधारी मनुष्यः यथा शाकुन्तले राजा दुष्यन्तः। गुणवान स्वकर्त्तव्यपरायणस्तथा धर्म्मसार्गानुसारी। एक एव इति नवरसानां मध्ये कश्चिद्रसः नाटके प्राधान्येन उद्दिष्टः स एव रसः अङ्गी (अङ्गिरसः) इति आख्यायते। स तु एक एव स्यात् शृङ्गाररसो वा। यथा शाकुन्तले शृङ्गाररस एव अङ्गी, एवम् मुद्राराक्षसे वीररस एव अङ्गी। किन्तु अत्र "वा शब्दस्य अनुक्तसमुच्चयार्थः" अवश्यमेव इत्थं कर्त्तव्यः। शिङ्गभूपालकृते रसार्णवसुधाकरे "शृङ्गारवीरशान्ता एव अङ्गिनः" इति एवमेव कथितम्। तमेव अनुसृत्य सङ्कलिते नाटकचन्द्रिकायाम—"रसाः शृङ्गारवीराद्याः ज्ञेया रससुधार्णवे"। अत्र "आदि" शब्देन यत् उद्दिष्टम् तदेव अनुक्तं दर्पणोक्तेन वाशब्देन लक्ष्यीकर्त्तव्यम्। तथा सति शृङ्गारवीराभ्याम् अपरः कश्चित् शान्तरसोऽपि कदाचित् अङ्गी भवेत्। यथा कृष्णमिश्रपादविरचिते प्रबोधचन्द्रोदयनाटके शान्तरस एव अङ्गी। प्रबोधचन्द्रोदयरूपकम् तु न नाटकम्, अपि तु प्रकरणम् तस्य ख्यातवृत्तत्वस्य असद्भावात्, इति न वाच्यम्। लोकप्रसिद्धम् वृत्तान्तमुच्यते इति एतदेव मतमासिकृत्य ग्रन्थकारेण प्रबोधचन्द्रोदयं नाम नाटकं ज्ञानाभिसंयुद्धविशुद्धनाटकमितिउक्तम्। तथा अन्ये सर्व्वे रसाः अङ्गरसात् अपरे सर्व्वे खलुरसाः नाटके अङ्गं कार्य्यम्—अङ्गिनः नाम रसस्य अङ्गत्वरूपेण नाटकेषु अवस्थातुम् अर्हन्ति इत्यर्थः। ते नु अप्रधानतया नाटककलेवरे इतस्ततः विक्षिप्ताः स्थास्यन्ति इति भावः। एवं च निर्व्वहणे निर्व्वहण-सन्धौ उपसंहारसन्धौ इत्यर्थः नाटकीयकथावस्तुनः अवसानांशे इति यावत अद्भुतं कार्य्यम अद्भुतरसस्य समावेशः कर्त्तव्यः। अभिनयं द्रष्टुमागतानां जनानां विस्मयम् जनयितुम् कश्चित् विस्मयावहो व्यापारस्तत्र उपनिबद्धव्यः। यथा—शाकुन्तले दुष्यन्ततनयस्य हस्तबन्धनी-

संक्रान्तः व्यापारः। एवम् अन्यत्रापि। चत्वार इति—चतुःसंख्यकाः पञ्चसंख्यकाः वा मुख्याः प्रधानाः (? प्रधानं) कार्य्यव्यापृताः नाटकीयकथावस्तुनः यद् कार्य्यं तत्र नियुक्ताः पुरुषाः जनाः नाटके स्थास्यन्ति। वाशब्दात् कदाचित् त्रयो वा कदाचित् षट् सप्त वा ईदृशः केषु केषु नाटकेषु दृश्यन्ते। यद्वा चतुःसंख्यकाः पञ्चसंख्यकाः वा मुख्याः प्रधानाः पुरुषाः कार्य्यव्यापृताः नायककार्य्यसम्पादने तत्पराः भवेयुरिति पक्षे वा अर्थोऽस्तु। श्लोकस्यास्य नाटके खलु चत्वारः पञ्च वा प्रधानपात्राणि स्थास्यन्ति इति सरलार्थः। "गोपुच्छाग्र समाग्रम्" इति—तस्य नाटकस्य बन्धनम् विविधाङ्ग-समावेशनम्, विविधानि अङ्गानि परस्परम् आबध्य नाटकस्य विरचनम् इति यावत् तु गोपुच्छाग्रसमाग्रम् इति कीर्त्तितम् प्राचीनैरिति भावः। गोपुच्छाग्रसमाग्रम्—गोः पुच्छाग्रस्य लोमगतस्य लाङ्गूलाग्रभागस्य समं तुल्यम् अग्रम् अवसानभागः यस्य तादृशम् इति। ननु नाटकस्य अवसानभागः लोमयुक्तस्य गोपुच्छाग्रस्य उपमां भजति! कथमिति चेत्तत्र प्रति केचित् अस्य इयमर्थं निश्चयन्ति, यत्—क्रमेण नाटकस्य अङ्गाः सूक्ष्माः पूर्वस्मात् अङ्गात् ह्रस्वतराः कर्त्तव्याः विधेयाः। अपरे तु मन्यन्ते "यथा गोपुच्छे केचित् बालाः ह्रस्वाः कानिचित् लोमानि क्षुद्राणि कदाचित् कानिचित् लोमानि च विशालानि, तथा इह नाटके कानिचित् कार्य्याणि (नाटकीयकथावस्तुनः अङ्गभूताः व्यापाराः) मुखसन्धौ प्रथमसन्धौ समाप्तानि संक्षेपेण उल्लेख्यानि अतएव तानि संक्षेपोल्लेखवशात् ह्रस्वानि। कानिचित् कार्य्याणि प्रतिमुखसन्धौ द्वितीयसन्धौ समाप्तानि अतएव तानि मुखसन्धिसमाप्तेभ्यः कार्य्येभ्यः किञ्चिन्नाम दीर्घतराणि एवम् अन्येषु गर्भसन्धौ विमर्शसन्धौ निर्वहणसन्धौ अपि कानिचित् कानिचित् समाप्तानि। एतेषु समाप्तानां कार्य्याणां खलु इयं रीतिः यत् परस्मिन् सन्धौ समाप्तम् कार्य्यं पूर्वस्मिन् सन्धौ समाप्तात् कार्य्यात् दीर्घतरं भवेत्। अतएव तुलनया कानिचित् कार्य्याणि ह्रस्वानि कानिचित् च दीर्घाणि इति गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम् इति उक्तम्। विश्वनाथस्तु

उभयमेव मतम् समीचीनं मन्यते। किञ्च परस्मिन् परस्मिन सन्धौ कार्याणि पूर्वस्मिन् सन्धौ निवेशितेभ्यः कार्येभ्यः दीर्घतराणीति अनेन कथनेन इदमेव ज्ञेयं -परस्मि परस्मिन सन्धौ अधिकतरं स्पष्टानि तथा अधिकतरं विस्तरेण प्रकाशितानि नाटकीयकथावस्तुनः अङ्गभूतानि कार्याणि।

Eng. Trans. A Nataka (i. e. a drama) is a (variety of) Rupaka, wherein the subject-matter must be a well-known one (being borrowed from either history or ancient story, or mythology or some folk-lore). the plot underlying the subject matter must have five successive stages each one of which being denominated as Sandhi; (the language of) the Nataka will be graceful as well as forceful and will also abound with several of the merits enumerated by ancient Rhetoricians (or—it will describe the dalliance-like movements of heroes and heroines together with some advancement, of course, in the process of their love affair and also some other facts such as the secret meeting of the hero and the heroine), it (the Nataka) will exhibit prosperous condition of the hero as well as of the subject and display a variety of Sentiments (Rasas), giving occasional rise to (the experience of) weal and woe, and it will contain any number of acts ranging from five to ten the hero will very often be a sagelike monarch born in a well-reputed family and he will be majestic and one of Dhirodatta type (as defined by the author in the third chapter of this book) he may be either a divine figure (such as Krishna) or a semi divine figure (such as, according to some, Ramchandra, or according to others-Yudhisthira) or a human figure (a mortal such as Dushyanta or Chandragupta); but he must be a righteous one (always adhering to the path of justice and

truth) : One of the nine Rasas will occupy the predominant position (throughout the Nataka), and it will be either Erotic, or Heroic (or the sentiment of Quietitude) ; and all other Rasas running throughout the Nataka will appear as subservient (that is as auxiliaries) to the Principal (Predominant) one that passes by the technical name of Angirasa , but in the concluding stage or portion, will be inserted the sentiment of astonishment about four or five persons will appear as main actors (i. e. the main role of the plot will devolve on four or five persons) . and the composition of Nataka will be just like the tuft of hair at the end of a cow s tail implying thereby that the acts will be successively smaller and also signifying that some incidents relative to the subject-matter (or plot) of the drama will be described in the first (Mukha) sandhi, some in the second (Pratimukha) sandhi, and so-forth , each incident described in the latter sandhi being of longer extent (i. e. being a bit more elaborate) than one described in the earlier sandhi.

N.B.—Readers are here warned against making any confusion between an anka (an act) and a sandhi. An act is a division of the drama relative to its subject matter (-अन्तनिष्कान्तनिखिलपात्रोऽङ्कः) whereas sandhis are different stages of the developments of the plot : and hence there is no strict co-ordination between the two. It may be that if the drama ends in five acts then each one of them will represent a sandhi , but there is no hard and fast rule is this. If the drama contains more than five acts, then the five sandhis will be incorporated within the body of the acts be it six or be it ten ; of course it may be, that in such a case, some particular sandhi ends with some particular act but this should be taken as a case of simple coincidence

some particular sandhi may begin or end in the middle of some act; and thus there is no hard and fast rule regarding the co-ordination of acts and sandhis.

७। प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः। भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः। विच्छिन्नावान्तरैकार्थः किञ्चित् संलग्नबिन्दुकः। युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान् न च। नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्। आवश्यकानां कार्याणामविरोधाद्विनिर्मितः। नानेकदिननिर्वर्त्यकथया सम्प्रयोजितः। आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा। दूराह्वानं वधो युद्धम् राज्यदेशादिविप्लवः। विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा। दन्तच्छेद्यं नखच्छेद्यम् अन्यद् व्रीडाकरं च यत्। शयनाधरपानादि नगराद्यवरोधनम्। स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः। देवी—परिजनादीनाममात्यवणिजामपि। प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः। अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः॥ ७।

बिन्द्वादयो वक्ष्यन्ते। आवश्यकं सन्ध्यावन्दनादि॥

मित—। पञ्चादिका दशपरा तत्राङ्काः परिकीर्तिताः इति नाटकलक्षणे कथितम्। अधुना तस्य अङ्कस्य लक्षणं लिखति—अङ्कः खलु ईदृशो भवेत्। कीदृशः? प्रत्यक्षनेतृचरितः—प्रत्यक्षं पाठकानां सम्यक् परिबोधनाय स्फुटम् उल्लिखितं स्पष्टम् अवलोक्यमानमिति यावत् नेतुः नायकस्य नाटकस्य प्रधानतमपात्रस्य इत्यर्थः चरितम् कार्यकलापः यस्मिन् तादृशः। रसभावसमुज्ज्वलः—रसास्तथा भावास्तथा उपलक्षणेन रसाभासः एवं च भावाभासः, एभिः समुज्ज्वलः सुसज्जितः सुशोभितः इति यावत्। तथा स च अङ्कः अगूढशब्दार्थो भवेत्। अगूढैः सुस्पष्टैः शब्दस्तथा अर्थश्च यस्मिन् तादृशः। अङ्के प्रयुक्तशब्दः लोकप्रचलित एव भवेत्। न अत्र लोकदुर्बोध्यस्य आभिधानिकशब्दस्य प्रयोगः कर्त्तव्यस्तथा स एव शब्द-

स्तत्र प्रयुज्येत यस्य अर्थोऽपि सुखबोध्यो भवितुमर्हति। अप्रचलिते अर्थे शब्दस्य प्रयोगः नाटकीये अङ्के न कर्त्तव्यः।

एवं च अङ्कः क्षुद्रेण अनतिदीर्घेण चूर्णकेण अल्पसमाससनाथगद्येन संयुक्तः स्यात्। विच्छिन्नः एकैकस्मिन्नेव अङ्के परिसमाप्तः ननु अङ्कान्तरे आक्रम्यमाणः अवान्तरैकार्थः अवान्तरः मूलवस्तुनः अङ्गस्वरूपः अतएव प्रासङ्गिकः एकार्थः एकविषयः यत्र स इति। मूलकथायाः अङ्गभूता प्रासङ्गिकी वार्त्ता एकस्मिन्नेव अङ्के समाप्ता भवितुमर्हति। अपि च किञ्चित्संलग्नबिन्दुकः—किञ्चित् येन केन वा प्रकारेण संलग्नः सुश्लिष्टः अन्तर्भावितः इत्यर्थः बिन्दुः यत्र तादृशः। बिन्दुरित्यस्य संज्ञा ईदृशी "अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्।" अवान्तरः प्रासङ्गिकः यः अर्थः विषयस्तस्य विच्छेदे परिसमाप्ते सति येन प्रबन्धेन अन्ततः परवर्त्ति-कथाभागेन सह तथा मूलकथाभागेन च सह संयोगः साध्यते स एव बिन्दुः। अतएव बिन्दुरेव समाप्तस्य पर्व्वविषयस्य तथा मूलविषयस्य च संयोगसाधने हेतुः। ईदृशबिन्दुरङ्केऽवश्यमेव प्रयोक्तव्यः, येन कदापि मूल-कथासूत्रेण सह अवान्तरविषयस्य सम्पर्कच्छिन्नो न स्यात्। बिन्दुः खलु सोदाहरणं पश्चादेव व्याख्यास्यते। "युक्तो न बहुभिः कार्यैः" अङ्कस्तु बहुभिः कार्यैः न युक्तः स्यात्। एकस्मिन्नङ्के बहूनेव कार्याणि न समापनीयानीति भावः। बीज इति—"अल्पमात्रम समुद्दिष्टम बहुधा यद्विसर्पति। फलस्य प्रथमो हेतुर्बीजं तदभिधीयते" इति बीजलक्षणम्। यत् खलु आदौ संक्षेपतः उक्लिखितं सत् क्रमेण विसरति एवं च बहुप्रकारेण विस्तारं भजते, तदेव बीजम्। "तस्य बीजस्य संहृतिमान्" उपसंहारयुक्तः परिसमाप्तिसनाथः न भवेदङ्कः। एष खलु शेषम् अङ्कम् वर्जयित्वा अन्येषामेव अङ्कानाम् धर्म्मः। शेषाङ्के तु सर्व्वस्य खण्डस्य परिसमाप्तिः स्यात्। एवं शेषाङ्कम वर्जयित्वा अन्यस्मिन्नङ्के बीजस्य परिसमाप्तिः कदापि न स्यात् इति भावः। नानेति—नानाविधानैः बहुलैः खलु चित्तहारिभिः घटनासन्निवेशैः संयुक्तः

परिपूर्णः—तथा अपि प्रचुरपद्यवान बहुसंख्यकैः श्लोकैः सनाथः न स्यात्। अङ्के पद्यभागापेक्षया गद्यभागस्यैव बाहुल्यं कर्त्तव्यमिति अभिप्रायः। आवश्यकानां कार्य्याणाम् पात्रविशेषेषु सम्पाद्यानाम कर्म्मणाम अविरोधात असंघर्षात् तैः कर्म्मभिः सह संघर्षं न कृत्वा तान्येव कर्म्माणि अवर्ज्जयित्वा इति यावत्, विनिर्मितः विरचितः इति। यदा कस्मिंश्चित ब्राह्मणजातीये पात्रे सायंकाले उपस्थिते सति सन्ध्योपासनमेव नियतम कर्म्म। अतएव तस्मिनकाले तस्मिन पात्रे तदेव आवश्यकम् कर्म्म उपेक्ष्य कर्म्मान्तरं न प्रयुक्तं स्यात्। तदा तेन किञ्चित कारयितव्यं चेत, सन्ध्योपासनादनन्तरमेव कारयितव्यम न तु सन्ध्योपासनात्पूर्व्वम इति दृष्टान्तः। एवं च 'अनेकदिननिवर्त्त्यकथया'—बहुकालेन एव सम्पादनीया या कथा बहुकालव्यापिनी या घटना इति यावत तया न सम्प्रयोजितः भवेत! अपेक्षाकृताल्पकालव्यापिनी या घटना तयैव उपजीव्य विरचितया कथया आलिङ्गितो भवेदङ्क इति। एकस्मिन्नङ्के बहुकालसंश्लिष्टायाः घटनायाः समावेशो न स्यादिति भावः। ननु अङ्कलक्षणे आद्यैव उक्त प्रत्यक्षनेतृ-चरितः परम सर्व्वस्मिन खलु अङ्के नायकस्य उपस्थितिः न सम्भवेदिति अत्र का गतिः इत्याकाङ्क्षायाम अनुकल्पम व्यवस्थापयति 'आसन्न-नायकः'। सर्वं सर्व्वस्मिन एव अङ्के नायकस्य उपस्थिति न सम्भवति, परम यत्र नायकस्य उपस्थितिर्नास्ति तत्रापि आसन्नः अनुपस्थितोऽपि स्व-माहात्म्येन वा स्वस्य वारं वारम उल्लेखेन वा सन्निहितः अविस्मृत इति यावत नायकः नायकवार्त्ता यस्मिन तादृशः। अनुपस्थिते अपि नायके कस्मिंश्चिदङ्के, तत्र तस्य प्रसङ्गः आलोचितः स्यादिति सर्व्वे एव अङ्काः साक्षात वा परोक्षम् वा आसन्ननायकाः। तथा त्रिचतुरैः त्रयो वा चत्वारो वा परिमाण येषामिति त्रिचतुराः। (बहुव्रीहौ अच्)। तादृशैः पात्रैः नाटकीयपुरुषैः युतो भवेदङ्कः। समासकलेवरे वर्त्तमानस्य "वा" शब्दस्य अनुक्तसमुच्चयार्थमुररीकृत्य इदमेवात्र मन्तव्यम्—यत अङ्के कदाचित पात्रा-णाम् संख्या चतुर्भ्योऽपि किञ्चिदधिका स्यात्। ननु मानवचरितस्यैव

अनुकरणमभिनयः। तर्हि किम् रङ्गमञ्चे मानवेन करणीयम् सर्व्वमेव प्रदर्शयितव्यमिति ? अस्य उत्तरं पठति - नहि नहि - कानिचित् खलु कार्य्याणि रङ्गमञ्चे वर्जयितव्यानि। तथा सति तानि नाटककलेवरेषु अङ्केषु न सन्निवेश्यानि। कानि तानीति वक्ति। दूराह्वानम् केनचित् जनेन बहुदूरे अवस्थितस्य अपरस्य जनस्य स्वसमीपे आह्वानम्। वधः कस्यचित् शस्त्राघातादिना प्राणनाशः, युद्धं योद्धृद्वयस्य योद्धृणां वा परस्परसमरविलासः, राज्यविप्लवः राष्ट्रस्य शासनव्यवस्थापरिवर्त्तनम्; नृपादीनां पदच्युतिः विनाशो वा इति यावत्, देशविप्लवः देशे वन्यादुर्भिक्ष-जनितः विप्लवः तथा आदिपदेन समाजविप्लवः धर्म्मविप्लवादयोऽपि ग्राह्याः, एवं विवाहः नायक-नायिकापरिणयः, भोजनम् अन्नग्रहणम् शापोत्सर्गौ शापः केनचिदृषिणा अन्यं प्रति उच्चारितोऽभिसम्पातस्तथा उत्सर्गः विष्ठामूत्रादित्यागः। अभिज्ञाने शकुन्तलाम् उद्दिश्य दुर्व्वाससा उच्चारितः शापः नेपथ्ये एव सम्पादितः न तु रङ्गमञ्चे इति द्रष्टव्यम्। मृत्यु-मरणम् तथा रतम् सम्भोगः। एवम् च दन्तच्छेद्यं नायकेन नायिकायाः ओष्ठदंशनम्, नखच्छेद्यं तेनैव नखेन तस्याः स्तनविलेखनम्, तथा अन्यदपि वस्तुयत् व्रीडाकरं लज्जाजनकम् भवति। किञ्च नगरस्य अवरोधनम् सैन्यदलेन कस्यचित् शत्रोः पुरस्य परिवेष्टनम्। नगरावरोधनमित्यत्र आदिपदेन रिपुदुर्गप्रभृतीनाम् अवरोधनम् ज्ञेयम्। तथा स्नानम् अवगाहनम् च अनुलेपनं गात्रे चन्दनादि-विलेपनं च इति एभिः खलु पदार्थैः वर्जितः परित्यक्तो भवेदङ्कः। नातीति न अति अतिशयितो विस्तरः यस्य तादृशः। नाटकीयस्य अङ्कस्य अवयवपरिमाणं विपुलं न भवितुमर्हति। देवीति एवं च अङ्कः, देवी राज्ञः प्रधानमहिषी, तस्याः परिजनः नायकस्य परिचारकाः तथा च नायिकायाः परिचारिकाः। आदिपदेन नायकस्य सखादयः नायिकायाश्च सख्यादयः ग्राह्याः। अमात्यः सचिवः वणिक् व्यवसायी इति एतेषामपि जनानाम् प्रत्यक्षचित्रचरितैर्युक्तः। भावस्य तथा रसस्य उद्भवः उत्पत्तिराविर्भावः येभ्यः तादृशैः रसस्य भावस्य

च उन्मादकैरिति यावत प्रत्यक्षचित्रचरितैः प्रत्यक्षाणि नयनाभ्याम् एव दर्शनीयानि यानि चित्राणि अपूर्व्वाणि चरितानि तादृशः युक्तः भवेदङ्कः। तथा अन्ते अवसाने समासीनानि यावत निष्क्रान्तानि रङ्गस्थान प्रस्थितानि निखिलानि सर्व्वाणि पात्राणि यस्य स तादृश एव अङ्कः इति अङ्कलक्षणम।

Eng. Trans.—An anka (i. e. an act) is a division of the drama, in which the character and exploits (or rather the influence) of the hero are clearly noticeable (or discernible), which itself will be glowing with Rasa and Bhava, in which the words used present us no difficulty in interpreting them, which will be abounding with piecemeals of prose passages, in which incidental happenings will meet there, and which is endowed with Vindu (i. e. reference in some passage to something, that goes on preserving the connecting-link between some minor incidental occurence and the main current of the story): which is not full of many affairs (relative to the main current), in which the very seed of the plot does not meet an abrupt end, which abounds with various amusing occurrences, which contains comparatively a small quantity of verses, in which the duties devolving on some particular persons (by their caste or profession) do not collide with any function they are required to be performed, in which the incidents described do not cover a pretty long period; in which the presence of the hero is felt when not witnessed and which is usually runon by three or four dramatic persons: which is not very long in extent and in which the following occurrences are to be avoided—as calling from a distance, killing, fighting, revolution political, social and the like, solemnisation of marriages, eating, pronouncing of a curse, passing of urine or

death, sexual enjoyment, laying siege to a city and the like i. e. the taking of ablution and the annointing of the person ; which is endowed with the striking character and exploits of the queen, attendants, ministers and merchants clearly visible therein due to sentiment and emotion, and in which all the actors present, leave the stage at the end

८। अङ्कप्रस्तावात् गर्भाङ्कमाह –

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान्। अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि। यथा बालरामायणे रावणं प्रति कञ्चुकी –

"श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः। भवदर्थमिव निबद्धं नाट्यं सीतास्वयंवरणम्" इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः।

मित।– अङ्कप्रस्तावात् अङ्कस्य विवरणप्रसङ्गेन गर्भाङ्कम् अङ्कमध्ये प्रविष्टम् अङ्कम् नाटकाभ्यन्तरे सन्निविष्टम् नाटकम् आह- तस्य लक्षणं कथयतीत्यर्थः।

'अङ्कोदरप्रविष्टः' प्रागुक्तलक्षणस्य यस्य कस्यचित् अङ्कस्य (श्रीरूप गोस्वामिचरणमते तु प्रथमम् अङ्कम् वर्जयित्वा यस्य कस्यचित् अङ्कस्य तथाहि नाटकचन्द्रिकायाम्--प्रथमाङ्के न कर्त्तव्यः सोऽयं काव्यविशारदैः इति) उदरे अभ्यन्तरे मध्यभागे इति यावत् प्रविष्टः सन्निविष्टः योऽपरोऽङ्कः अङ्कमध्ये प्रस्तुतस्य अन्यस्य वस्तु नाटकस्य अङ्गीभूतम् अङ्कान्तरम् इत्यर्थः स गर्भाङ्क इति आख्यायते। ननु स गर्भाङ्कः कीदृशो भविष्यति ? उत्तरं पठति-- रङ्गद्वारामुखादिमान् रङ्गद्वारम् पूर्वरङ्गस्य (पूर्वरङ्गस्य लक्षणं पश्चात् वक्तव्यः) प्रथमम् अङ्गम् रङ्गद्वारम् यत्र खलु अभिनयः प्राथम्यात् अवतार्य्यते। तच्च रङ्गद्वारम् वागङ्गाभिनयात्मकम् भवति। नान्द्याः अनन्तरम् रङ्गद्वारम् क्रियते। तथा आमुखं प्रस्तावना। एवं च आदिपदेन सभा-

पूजा तथा कविसंज्ञादेः कथनम् लक्ष्यते । गर्भाङ्कः एभिः पदार्थैर्युक्तः स्यात् । अपिच सबीजः बीजेन समन्वितः स्यात् । बीजन्तु फलस्य प्रथमोहेतुः, यत् आदौ अल्पमात्रम् उल्लिखितं सत् क्रमेण विस्तारं भजते । तथा फलवानपि फलयुक्तोऽपि भवेत् । केनचित् प्रधानेन उद्देश्येन अन्वितः स्यात् । कश्चित्मुख्यः उद्देश्यः गर्भाङ्कगर्जनेन साध्यते कविना इति भावः । अस्य गर्भाङ्कस्य दृष्टान्तं दर्शयति बालरामायणनाटके कस्यचित् अङ्कस्य मध्ये सीतास्वयंवरणं नाम नाट्यं निबद्धम् । तत् खलु गर्भाङ्कसंज्ञां गच्छति । तत्र रावणं प्रति तस्य कञ्चुकी कथयति अनेकैः बहुभिः श्रवणैः पेयम् नूतनत्वेन आग्रहभरात् बहुनयनरालोकनीयम् सीता-स्वयंवरणम् नाम नाट्यम् नटैः प्रयुज्यमानम् रूपकम् । निबद्धम् जनकेन आयोजितम् । कथम् ? भवदर्थमिव भवच्छिल्पमिव ! भवान् विंशतिलोचनः विंशतिकर्णश्च । अतएव मन्ये भवतः एव श्रवणार्थं तथा दर्शनार्थं सीतास्वयंवरणं नाटकम् जनकेन आयोजितम् । अनेन नाटकस्य माधुर्यं तथा सुदृश्यत्वं लक्ष्यीक्रियते ।

श्रीरूपमते तु गर्भाङ्के नान्दी भवत्येवात्र स्थापयति । आमुखं तु दिङ्मात्रमेव । परं तत्र विष्कम्भक-चूलिकादयः अर्थोपक्षेपकाः न स्थास्यन्ति । नाटकीयपात्राणि पञ्चपात्राणि भविष्यन्ति । तेनैव विरचिते ललितमाधवे चतुर्थाङ्के एवम्भूतो गर्भाङ्कोऽस्ति । उत्तररामचरितेऽपि दृश्यते ।

Eng.—In connexion with an Anka, a Garbhanka (a drama within a drama ") is being defined—

An act (of another drama, referred to in the body of a drama), that is inserted within an act (of a drama) goes by the name Garbhanka. It consists of Rangadwaram (a main division of the Purva-ranga), Amukha (prelude) and in it abounds the Vija, (the nucleus of a new drama, an act of which is incorporated within the

act of the main drama) and is backed by some motive i. e. it serves some important purpose-relating to the main drama.

As Kanchukin (says) to Ravana in the (drama) Bala-Ramayana—"A drama (entitled) Sita-swayam-varanam, which is to be listened (as it were) with many ears and to be seen (as it were) with many eyes, has been composed (or better is going to be put to the stage), as if it were for you.

N B—An instance of this Garbhanka is to be found in the Hamlet of Shakespeare

९। तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्। कथनं कविसंज्ञादेर्नाटकस्याप्यथामुखम्॥ तत्र नाटके इति।

मित—। नाटकस्य वस्तुविन्यासात् तत्र नाटके पूर्वं पूर्वरङ्गः क्रियते। नान्दीरङ्गद्वारादि-द्वाविंशति संख्याकैरङ्गैर्युक्तं मङ्गलाचरणं कर्त्तव्यं एतदेव पूर्वरङ्गः इति कथ्यते। ततः पूर्वरङ्गात् परम् अनन्तरं सभापूजा अभिनयं द्रष्टुमुपागतानां सभ्यानां या सम्प्रीत्या एव पूजा प्रशंसावादः कर्त्तव्यः। तदनु कविसंज्ञादेः कवेः नाटककारस्य संज्ञायाः नाम्नः तथा आदिशब्देन तस्य पित्रादिगोत्रादेः च कथनम्। अथ अपि तत्पश्चात् नाटकस्य 'आमुखं' प्रस्तावना स्यात्।

Eng. Tran.—In the drama, Purva-ranga will appear first then an encomium to the auditory and after that comes an account of the dramatist, followed in its turn by the Prelude of the drama (आमुख)।

९। यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये कुशीलवाः प्रकुर्वन्ति पूर्वरङ्ग स उच्यते। प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि। तथापि अवश्यमूकर्त्तव्या नान्दी विघ्नोपशान्तये।

मित—। धनञ्जय-विरचितस्य दशरूपकस्य धनिककृतायाम् अवलोकाख्यायामटीकायाम् पूर्व्वरङ्गशब्दस्य नाट्यशाला एव अर्थः। तमर्थम् असहमानः विश्वनाथः पूर्व्वरङ्गस्य लक्षणं कथयति—नाट्यवस्तुनः--अभिनयारम्भात् प्रागेव कुशीलवाः नटा नट्यश्च रङ्गविघ्नोपशान्तये रङ्गे अभिनय-प्रदर्शनव्यापारे यः विघ्नः सम्भाव्यमाना बाधा तस्य उपशान्तये तस्य दूरीकरणाय इत्यर्थः यत् स्तुतिपाठादिकं प्रकुर्वन्ति अनुतिष्ठन्ति तदनुष्ठानम् पूर्व्वरङ्ग उच्यते। पूर्व्वरङ्गस्य बहूनि नाम अङ्गानि। तेषु प्रधानं निर्दिशति यद्यपि अस्य पूर्व्वरङ्गस्य प्रत्याहारादिकानि प्रत्याहार-नान्दी-रङ्गद्वारगानृतीनि भूयांसि बहूनि नाविंशतिसंख्यकानि इति ज्ञेयम अङ्गानि सन्ति तथापि तेषु अङ्गेषु प्रधानभूता नान्दी विघ्नोपशान्तये रङ्गस्य सम्भाव्यमानो यो विघ्नस्तस्य निवृत्तये अवश्यमेव कर्त्तव्यम् अनुष्ठातव्यम्। एतेन नान्दीसंज्ञकस्य पूर्व्वरङ्गस्य प्रधानाङ्गस्य अवश्यकर्त्तव्यता तथा अन्येषाञ्च अङ्गानाम् स्वेच्छाधीनकर्त्तव्यता ग्रन्थकारस्य अभिमतेति बोध्यम्।

Eng. Tran. Whatever is observed by or done by actors (and actresses) just before the actual commencement of the performance, in order to counteract any probable impediment (to avert any disaster that may overtake the theatrical performance) is known by the name Purva-ranga. Though it has a good many preliminaries or divisions such as Pratyahara and the like, yet Nandi (a main division of Purva-ranga) needs be performed in order to avert any probable hindrance.

तस्याः (नान्द्याः) स्वरूपमाह—

११। आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनाम् तस्मान्नान्दीति संज्ञिता। मङ्गल्यशङ्ख-चन्द्राब्ज-कोककैरवशंसिनी। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत।

मितभाषिणी। नान्दी इत्यस्य लक्षणं विधत्ते—नन्दयति देवद्विज-नृपादीन्प्रशंसापदेन आह्लादयति इति नन्दिधातोरच् प्रत्ययः, तेन नन्द इति शब्दात् "प्रज्ञादिभ्यश्च" इति सूत्रेण स्वार्थे अणप्रत्ययः ततः स्त्रियाम् ईपि नान्दी इति। अस्यार्थस्तु आह्लाददायिनी। यद्वा नन्दनं नन्दःघञ्। तेन पठ्यते या इति नान्दी (शेषिकोऽण)। स च नान्दीअन्वर्थनामा इति दर्शयति यस्मात् यतः आशीर्वचनसंयुक्ता इष्टाभिप्रायाविष्करणम् आशीः। तस्य वचनं मङ्गलादिकामनासूचकम् वाक्यम् इत्यर्थः। तेन संयुक्ता समन्विता देवद्विजनृपादीनां सुरब्राह्मणभूपानाम् तथा आदिपदेन आचार्य्यगुरुप्रभृतीनां च स्तुतिः उत्कर्षज्ञापिका वाक् प्रयुज्यते नटैः विधीयते तस्मात् तेषां देव-द्विजनृपादीनाम् आह्लादकत्वात् सा वाक् नान्दी इति संज्ञिता आख्याता। सा च नान्दी मङ्गल्यं मङ्गलज्ञापकम् शङ्खं तथा चन्द्रम् अब्जम् पद्मम् कोकं चक्रवाकम् एवं च कैरवम् कुमुदं शंसति आत्मनः स्वचनान्ते उल्लिखति। उक्तं भारतेन चन्द्रनामाङ्कितायां मङ्गल्यपदोज्ज्वला। मङ्गल्ये चक्रकोकचकोरं कुमुदादिकम्। नान्दीवाक्यमिति। एतेषाम् शब्दानाम् उल्लेखोऽवश्यमेव कार्यं इति भावः। किंभागा नान्दी द्वादशभिः पदैरुत अष्टाभिः पदैर्युक्ता भवेत्। नान्दीश्लोकः नाटकस्य मङ्गल-श्लोक एव इति बोध्यम्। सा च नान्दी प्रस्तावनायाः आदौ कर्त्तव्या। उक्तं च भारूपेण प्रस्तावनावस्तुमुखे=नान्दी कार्य्या शुभावहा इति—।

Eng. Tran.—Since an eulogy directed towards some deity, Brahman, king or the like, and endowed with a benediction (for the people that have come to the theatre) is uttered here by actors (thereby causing the satisfaction of those for whom the said eulogy is intended), so it passes by the denomination Nandi i.e. a gladdener. It (the said Nandi) is comprised of words that are auspicious implying as they do a conchshell, the moon, a lotus, a

chakravaka (a kind of bird) or a lily ; and it is to be couched up in eight or twelve Padas.

Text अष्टपदा यथा अनर्घराघवे "निष्प्रत्यूहम उपास्महे" इत्यादि। द्वादशपदा यथा मम तातपादानाम् पुष्पमालायाम "शिरसि धृतसुरापगे स्मरारावरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री। अथ चरणयुगानते स्वकान्ते स्मित-सरसा भवतोऽस्तु भूतिहेतुः" ॥ एवमन्यत्र।

टीका - । नान्दी द्वादशपदा अष्टपदा वा भवेत्। ननु पदशब्दस्य कोऽर्थः? उच्यते - श्लोकपादं पदं इति केचित्। सुप्तिङन्तं तथापरे, अपरे वाक्यमेवाहुरिति। केषाञ्चिन्मते श्लोकपादः एव पदशब्देन लक्ष्यते। एतन्मते द्वादशपदा नान्दी यथा भट्टनारायणकृते वेणीसंहारनाटके अस्ति। तत्र त्रयः श्लोकाः अतएव द्वादशपादाः। अष्टपदा नान्दी श्रीभवभूति विरचिते मालतीमाधवप्रकरणे अस्ति, तथा द्वौ श्लोकौ अतएव अष्ट-पादाः।

Eng. Tran. The example of A Nandi couched up in eight Padas is to be found in the Anargha Raghava (by Murari Misra). It containing eight Padas (words) beginning with निष्प्रत्यूहम उपास्महे। A Nandi couched up in twelve Padas has its example in the Puspamala composed by my father (the Nandi-sloka there running is as follows) "May the daughter of the Lord of the Mountains, the lustre of whose moon-like face became red as the Divine River (the Ganges her co-wife) was placed on the head by the enemy of cupid (=Siva her husband) and who (subsequently) became soft (tender) with a smile as her beloved (husband) fell down at her feet, for the prosperity of yourself."

In like manner, examples of Nandi of either eight or twelve Padas (where Pada stands for either the foot of a stanza or a sentence) should be found in other dramas.

Text—एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु 'पूर्व्वरङ्गस्य रङ्गद्वाराभिधानमङ्गम्' इत्युच्यते। तदुक्तम्—"यस्मादभिनयो ह्यत्र प्राथम्यादवतार्य्यते। रङ्गद्वारमतोज्ञेयं वागङ्गाभिनयात्मकम्।" उक्त-प्रकारायाश्च नान्द्याः रङ्गद्वारात् प्रथमं नटैरेव कर्त्तव्यतया न महर्षिणा निर्द्देशः कृतः।

मित--। नान्दीविषयं यत् लक्षणम् कथितम् तत्तु ग्रन्थकारो नानु मन्यते इति प्रदर्शयितुम् विचारम् अवतारयति एतन्नान्दी इति आशी-र्वचनसंयुक्ता इत्यादि लक्षणाक्रान्ता नान्दी इति नाहम् अनुमोदे परं तत् तु कस्यचित् नाट्यशास्त्रकृतः मतानुसारेण उक्तम्। मङ्गलाचरणश्लोकंकेवल अहं नान्दीं न मन्ये। तर्हि किं तत्? नान्दी वा का? उत्तरं वदति--वस्तुतस्तु यथार्थतो हि पूर्व्वरङ्गस्य द्वाविंशतिसंख्यानाम् अङ्गानां मध्ये रङ्गद्वाराभिधानम् विहितं उच्यते प्रामाणिकैः नाट्यशास्त्रकृद्भिस्तथा मया न कथ्यते। अस्मिन् विषये प्रमाणं प्रदर्शयति यदुक्तम् इमं विषयमभिकल्य प्रामाणिकैः कथितम्—"यस्मात् यतः अभिनयः हि नूनम् अत्र रङ्गद्वारे एव प्राथम्यात् अवतार्य्यते नटैः सूच्यते अतोऽस्मादेव कारणात् इदं रङ्गद्वारम् ज्ञेयं बोध्यम्। यतः अस्मादेव नाटकीयात् अंशात् अभिनय आरभ्यते अतएव अस्य रङ्गद्वारमिति संज्ञा। रङ्गस्य अभिनयस्य द्वारं मुखम् प्रारम्भः इति व्युत्पत्त्या अन्वर्थनाम एव रङ्गद्वारम् ननु तत् कीदृशम्? वाग-ङ्गाभिनयात्मकमिति--वाचा देवतानृपत्यादीनाम् प्रशंसावादरूपेण वाक्येन तथा अङ्गैः नमस्कारप्रदर्शनशक्रंरङ्गभङ्गीविशेषैश्च य अभिनयः स एव आत्मा स्वरूपं यस्य तादृशम् खलु रङ्गद्वारम्। स्तुतिपाठनमस्कार-प्रदर्शनरूपं यत् रङ्गद्वारम् तदेव नाटकस्य सूचनम्। या तु आशीर्व्वचन-संयुक्तकनिरूपा नान्दी सा तु रङ्गद्वारात् पूर्वं प्रथममेव नटैः कर्त्तव्याइति हेतोः महर्षिणा भरतेन अस्य अनुष्ठानविषये निर्द्देशो न कृतः आदेशो न प्रदत्तः। रङ्गद्वारादेव नाटकम् आरभ्यते नान्दी तु तस्मात् प्रागेव

-नटैः कर्त्तव्याइति नाटके नान्दीश्लोकस्य उल्लेखो न विहितः—इति—भावः।

Eng. Tran – The Nandi as already defined by me, is in accordance with the opinion of some authority. In reality, the Puva-ranga has got a division known as Rangadwara. Thus it is stated Since the performance commences, for the first time, from it, so it is called Rangadwaram. (implying thereby that is the very beginning of the performance) which is essentially an acting with speech as well as with body The Nandi as defined above, is to be performed (observed) by actors even before the Rangadwara and hence there is no (separate) injunction for this (Nandi) by the sage (Bharata).

Text—कालिदासादिमहाकविप्रबन्धेषु च—

"वेदान्तेषु यमाहुरेकपुरुषम व्याप्य स्थितं रोदसी, यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः। अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः"। एवमादिषु नान्दी लक्षणायोगात्। उक्तञ्च "रङ्गद्वारमारभ्य कविः कुर्यात्" इत्यादि। अतएव प्राक्तनपुस्तकेषु "नान्द्यन्ते सूत्रधारः" इत्यनन्तरमेव "वेदान्तेषु" इत्यादि श्लोकलिखनं (?) दृश्यते ! यत्र पश्चात् "नान्द्यन्ते सूत्रधार" इति लिखनम (? लिखनम्) तस्यायमभिप्रायः - "नान्द्यन्ते सूत्रधार इदं प्रयोजितवान। इतः प्रभृति मया नाटकमुपादीयते" इति कवेरभिप्रायः सूचित इति।

मित—। अपि च "आशीर्व्वचनसयुक्ता" इत्यादि लक्षणान्विता या नान्दी या कालिदासादिमहाकविरचितेषु केषु केषु पुस्तकेषु दृश्यते। तथाहि कालिदासरचितम् विक्रमोर्व्वशीयेति नाम्ना प्रसिद्धं यत् त्रोटकम् तत्र 'वेदान्तेषु' इत्यादिरूपः यः मङ्गलाचरणश्लोकः दृश्यते तत्र पूर्व्वोक्तायाः

नान्याः लक्षणं न संगच्छते यतः नात्र अष्टपदत्वं न वा द्वादशपदत्वम् सम्भवति। श्लोकपादं खलु पदं विचार्य तथापि अष्टपदत्वं द्वादश-पदत्वं वा नास्ति। अस्य श्लोकस्य व्याख्या-वेदान्तेषु वेदस्य अन्तभागेषु उपनिषत्सु इत्यर्थः रोदसी स्वर्गमर्त्त्यौ व्याप्य आक्रम्य स्थितम् विराजितम् यम् एकपुरुषम् अद्वितीयम् पुरुषम् ईश्वरम् इत्यर्थः आहुः कथयन्ति उपनिषत्-कर्त्तारः ऋषयः इति कर्त्तृपदम् यस्मिन् अद्वितीये पुरुषे अनन्यविषयः न अन्यः अपरः कश्चित् विषयः ग्राह्यपदार्थः वाच्यवस्तु इति यावत् यस्य स इति यस्य विषयः अन्यस्य कस्यचित् अवाचकः न अन्यपदार्थवाचकः इति भावः ईश्वरः ईशनशीलः इति शब्दः यथार्थाक्षरः यथार्थानि अन्वर्थानि विश्वस्य खलु ईशनशीलत्वात् सार्थकनामानि अक्षराणि वर्णाः यस्य तादृशः इति बहुव्रीहिः। विश्वस्य ईशनशीलत्वात् यस्मिन् अद्वितीये पुरुषे अन्यवस्तुनः अवाचकः खलु ईश्वर इति शब्दः यथार्थाक्षरः अन्वर्थनामा दृश्यते इति भावः। यश्च अद्वितीय ईश्वरः नियमितप्राणादिभिः नियमिता पूरककुम्भक रेचक-रूपेण प्राणायामेन यन्त्रिताः प्राणाः प्राणापानसमानो-दानव्यानरूपाः पञ्चप्राणवायवः ये स्तादृशैः प्राणायामेन येषां देहे प्राणादि-वायुगतिः परिचालिता स्तादृशैः मुमुक्षुभिः जनैः अन्तः मनसि मृग्यते अन्विष्यते। साक्षात्काराय इति भावः। तथाहि मनसैवानुद्रष्टव्य इति श्रुतिः। स स्थिरभक्तियोगसुलभः स्थिरया एकान्तिक्या भक्त्या तथा योगेन च सुलभः सुखेन दर्शनीयः। यद्वा स्थिरेण एकान्तिकेन भक्तियोगेन सुलभः सुखेन दर्शनीयः तथाहि श्रीमद्भगवद्गीतायाम् "माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते - (१४।२६)" स्थाणुः महादेवः वः युष्माकम् अभिनयं समवलोकयितुम् आगतानाम् जनानामित्यर्थः निःश्रेयसाय मोक्षाय अस्तु कल्पताम्। मुनिभ्यः मोक्षम् प्रयच्छतु इति भावः। अत्र आशीर्व्वचनसंयुक्ता स्तुतिरपि मङ्गलचरणश्लोकोऽयम् अष्टपदा वा द्वादशपदा इति नाद्याः लक्षणं नात्र संगच्छते। एवम् नाम

असङ्गतिरन्यैरपि महाकविभिः विरचितेषु रूपकेषु अपि दृश्यते। अतएव नायं श्लोकः नान्दी। नान्दी खलु अभिनयारम्भात् प्रागेव नटैः कार्य्या इति तस्याः उल्लेखोऽस्मिन् त्रोटके न दृश्यते। ननु यदि अयं श्लोकः न नान्दी तत् अस्य का संज्ञा. उच्यते—एतत् खलु रङ्गद्वारम् अस्मादेव अभिनयः प्रारभ्यते। रङ्गद्वारम् नाम पूर्व्वरङ्गस्य अङ्गम् इति प्रागेव कथितम्। तथाहि उक्तं च "रङ्गद्वारमारभ्य कविः कुर्य्यात्" इत्यादि। अयमभिप्रायः रङ्गद्वारात् एव आरभ्य कविः नाटकम् विरचयेत् अपिच स्वस्य रूपकस्य निर्व्विघ्नपरिसमाप्तये तथासम्भाव्यमानस्य विघ्नस्य च निवारणाय रङ्गद्वारे (रङ्गद्वारम् यदि बहुभिः श्लोकैः ग्रथितः स्यात् तर्हि प्रथमश्लोके वा) कविः मङ्गलाचरणं कुर्य्यात्। तस्मिन् रङ्गद्वाराङ्गी-भूते मङ्गलाचरणे नान्दीभ्रान्तिः न कार्य्या। या तु नान्दी सा कुशीलवैः अभिनयस्य खलु निर्व्विघ्नपरिसमाप्तये रङ्गद्वाराङ्गीभूतात् मङ्गलाचरणात् प्रागेव कार्य्या तस्याः उल्लेखः रूपके न स्यात् इति सर्व्वमवदातम्। अतएव इममेव नियमम् अनुसृत्य प्राक्तनपुस्तकेषु पूर्व्ववर्त्तिभिः खलु लिपिकारैः अनुलिखितेषु प्राचीनेषु ग्रन्थेषु "नान्द्यन्ते सूत्रधारः" इत्यनन्तरमेव अस्य पश्चादेव "वेदान्तेषु" इत्यादि श्लोकलेखनं रङ्गद्वारश्लोकलेखनं दृश्यते। लिखनमिति पाणिनिविरुद्धम्। अयं भावः—"नान्द्यन्ते सूत्रधारः" नान्द्याः अन्ते अवसाने स्वयमेव नान्दीम् सम्पाद्य तदनन्तरम् सूत्रधारः कविविरचितं प्रथमश्लोकं (यः खलु रङ्गद्वाराङ्गीभूतः मङ्गलाचरणश्लोकः) पठति। किञ्च यत्र (अर्व्वा-चीनकाले अनुलिखितेषु पुस्तकेषु) पश्चात् "वेदान्तेषु" इत्यादिरूपकस्य रङ्गद्वाराङ्गीभूतस्य मङ्गलाचरणश्लोकस्य पश्चात् "नान्द्यन्ते सूत्रधारः" इति लेखनम् दृश्यते तत्र एषु श्लोकेषु नान्दीभ्रान्तिर्न कार्य्या अपि च तादृशस्य लेखनस्य अयम् अभिप्रायः—नान्द्यन्ते नाटके अनुल्लिखितां नान्दीम् स्वयम् सम्पाद्य तदनन्तरम् सूत्रधारः इदं रङ्गद्वाराङ्गीभूतम् कविविरचितम् मङ्गला-चरणरूपम् प्रथमं श्लोकम् प्रयोजितवान् पठितवान्। इतः प्रभृति अस्मात् एव श्लोकात् आरभ्य मया कविना नाटक उपादीयते, अस्मादेवम्

श्लोकात् नाटकस्य आरम्भ इति भावः—इति अयमेव कवेरभि-प्रायः। भासस्यापि नाटके "नान्द्यन्ते ततः प्रविशति सूत्रधारः" इति दृश्यते।

अत्रप्रसङ्गे इदं खलु अवधेयम्। ग्रन्थे अस्मिन् नान्दीमधिकृत्य मतद्वयमुपन्यस्तम्। आदौ परमतं प्रदर्शितं यन्मते नाटकस्य प्रथमे एव आशीर्व्वचनसंयुक्तस्तुतिरूपः अष्टपदी द्वादशपदी वा मङ्गलाचरणश्लोकः स्थास्यति। स श्लोक एव नान्दी। "सूत्रधारः पठेन्नान्दीमिति" कथनात् सूत्रधारः रङ्गप्रदर्शनव्यापारे सम्भाव्यमानस्य विघ्नस्य नायक इति यावत्। तथाहि 'नाटकीयकथासूत्रम् प्रथमम् येन धार्य्यते, रङ्गभूमिम् समाक्रम्य सूत्रधारः स उच्यते'—इति सूत्रधारलक्षणम्।

परमतप्रदर्शनानन्तरम् विश्वनाथः स्वमतंविन्यस्यति- एतन्मते नान्दी श्लोकस्य नाटके उल्लेखो न स्यात्। नाटके अनुल्लिखितम् नान्दीश्लोकम सूत्रधारः स्वाभिरुचिमनुसृत्य पठेत्। अपिच स नाटके पूर्व्वरङ्गस्य एव आदौ कर्त्तव्यः; तथाहि—तत्र पूर्व्वं पूर्व्वरङ्गम् इत्यादि। पूर्व्वरङ्गस्य खलु द्वाविंशतिसंख्याकानाम् अङ्गानाम् मध्ये एकम् प्रधानम अङ्गं रङ्गद्वारम् तस्मादेव रङ्गद्वारात् आरभ्य कविर्नाटके रचनां कुर्य्यात्; अथ नाटके प्रथमतः एव यो मङ्गलाचरणश्लोकः दृश्यते स खलु रङ्गद्वारस्य एव अङ्गीभूतो मङ्गलाचरणश्लोकः, यः कविना आत्मनः रचनाया एव निर्व्विघ्न-परिसमाप्तये रचितः। सूत्रधारस्तु नाटके अनुल्लिखिताम नान्दीम् पूर्वमेव पठित्वा नाटकस्य प्रारम्भसूचकम् इमम रङ्गाद्वाराङ्गीभूतम् मङ्गलाचरणश्लोकं प्रयोजयेत्।

अनयोर्मतयोस्तु सामञ्जस्यम् श्रीरामचरणतर्कवागीशपादादिभिरित्थम् विधीयते—(१) यत्र नाटके एक एव आशीर्व्वचनसंयुक्तस्तुतिरूपो मङ्गलाचरणश्लोकः दृश्यते, तस्मिन् चेत् श्लोके अष्टौ द्वादश वा सुपतिङन्त

रूपाणि पदानि विद्यन्ते अष्टौ द्वादश वा वाक्यानि विद्यन्ते. तर्हि स श्लोकएव नान्दी।

यथा पुष्पमालायाम्, अत्र द्वादशसुपतिङन्तरूपाणि पदानि सन्ति अतएव इयं नान्दी। सा च द्वादशपदा। एवम् अष्टपदा अपि नान्दी कुत्र कुत्रस्यात्।

अपिच अभिज्ञानशकुन्तले 'या सृष्टि स्रष्टुराद्या'' इत्यादि श्लोके अष्टवाक्यानि सन्ति।

अतएव इयं नान्दी। सा व अष्टपदा। एवं कुत्रापि नाटके एक एव मङ्गलाचरणश्लोकः स्यात् स चेद्द्वादशभिः वाक्यैः सनाथः स्यात् तर्हि स शलोकः नान्दी स्यात्।

(२) ननु ईदृशश्लोकश्चेत् नान्दी, तर्हि रङ्गद्वारम् कुत्र? रङ्गदवारम नाम अपरिहार्य्यं यत् इदं पूर्व्वरङ्गस्य प्रधानमङ्गम् अतएव कविः निर्व्विघ्नपरिसमाप्तये मङ्गलाचरणं न्यसेत्। तादृशं रङ्गदवारम् प्रदर्शय। उत्तरं पठति– प्रागुक्तेषु रूपकेषु नान्दी अस्ति, परं रङ्गदारं तु पृथक् नास्ति। तत्र नान्दी एव रङ्गद्वारम्। काकाक्षिगोलोकन्यायेन एक एव शलोकः नान्दी भवति, रङ्गद्वारमपि भवति।

(३) यत्र नाटके एक एव आशीर्व्वचनसंयुक्तस्तुतिरूपो मङ्गलाचरण-श्लोको विद्यते। परम् तत्र श्लोके अष्टौ सुपतिण्डन्तरूपाणि वाक्याणि वा उत द्वादशसुपतिङन्तरूपाणि पदाणि वाक्यानि वा न सन्ति– यथा कालिदासकृते विक्रमोर्व्वशीयत्रोटकस्य 'वेदान्तेषु'' इत्यादि रूपमङ्गलाचरण-श्लोके, तत्र स एव मङ्गलचरणशलोकः रङ्गद्वारम्। तत्र नान्दी न उल्लिखिता। अनुल्लिखिता एव। अनुल्लिखिताम् नान्दीम् यथाभिरुचि पटित्वा सूत्रधारः रङ्गदारस्य अङ्गीभूतम् इमम् मङ्गलाचरण शलोकं प्रयोजयेत्।

४) यत्र नाटकेद्वौ मङ्गलाचरणश्लोकौस्तः, तत्र तयोः प्रथमे यदि अष्टौ दादश वा सुपतिङन्तरूपाणि पदानि व्याक्यानि वा तिष्ठेयुस्तर्हि स श्लोक एव नान्दी, द्वितीयन्तु रङ्गदारम्।

(५) यत्र नाटके द्वौ मङ्गलाचरणश्लोकौस्तः, परम् तयोः प्रथमे अष्ट द्वादश वा सुप्तिङन्तरूपाणि पदानि वाक्यानि वा न सन्ति, तर्हि "श्लोक-पादम् पदं केचिदिति न्यायेन तस्य श्लोकस्य चत्वारः पादास्तथा द्वितीय-श्लोकस्य खलु चत्वारः पादाः एवम् एकत्रीकृत्य सम्भृतान् अष्टपादान् विगणय्य तत्र श्लोकद्वयेन अष्टपदा नान्दी—इति-स्वीक्रियते। परम् तत्र रङ्गद्वारम् पृथक् नास्ति। काकाक्षिगोलकन्यायेन एतौ नान्दीश्लोकौ एव रङ्गद्वारत्वं भजताम्।

(६) यत्र नाटके द्वाभ्याम् अधिकतराः मङ्गलाचरणश्लोकाः दृश्यन्ते, तत्र प्रथमे यदि अष्टद्वादश वा सुप्तिङन्तरूपाणि पदानि वाक्यानि विद्येरन् तर्हि स श्लोक एव नान्दी अन्ये सर्वे तु रङ्गद्वारम् भजन्ते।

(७) किञ्च तत्र यदि प्रथमश्लोके अष्टौ द्वादश वा सुप्तिङन्तपदानि वाक्यानि वा न स्युः-तर्हि श्लोकपादम् एव पदत्वेन उररीकृत्य द्वाभ्याम् श्लोकाभ्याम् अष्टपदा नान्दी भवेत। एताभ्याम् नान्दीश्लोका-भ्याम् अतिरिक्तः यः कश्चित श्लोकः एको वा भवतु द्वौ बहवो वा भवन्तु स रङ्गद्वारम् इति स्वीक्रियते-- इति सर्व्वम् सुस्थितम।

Eng And in the literary productions (dramas) of great poets like Kalidasa etc, (for example's sake) in the following :—

May that Sthanu (Siva), who has been declared in the Vedanta (in the vedantic texts) to be the one being, that pervades the heaven and the earth, in whom the appellation Iswara (the Ruler) implying (referring) to no other has been truly significant (significant in the true sense of the term) and who is sought (searched) after within the (very) self (mind), by aspirants after libera-tion, with the normal vibration of their vital air controlled

and regulated, and who is easy of attainment by those, who firmly adhere to the line of Bhakti (devotion) be for (be a bestower of) your salvation—, the (aforesaid) definition of Nandi fails here (does not tally with such slokas). Moreover, it is stated, the poet should begin (his drama) from the Rangadwara and so forth. And that is why in old manuscripts, the occurence of verses (slokas) like "Vedantesu" i e. the aforesaid one, is noticeable (immediately) after the portion —"The sutradhara (stage-manager) just after having finished the Nandi" And (the fact) that the portion—"The Sutradhara just after having finished the Nandi" is written after (the slokas of the said kind) implies this :—"The Sutradhara read this (sloka forming Rangadwara) after he has observed the (ceremonial) Nandi ; and (along with it) it indicated the intention of the poet that he begins his drama from this portion.

Text - १२। पूर्व्वरङ्गं विधायैव सूत्रधारे निवर्त्तते। प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः। दिव्यमर्त्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः। सूचयेद्वस्तुबीजं वा मुखं पात्रमथापि वा।

मित—। सूत्रधारे नटप्रधाने पूर्व्वरङ्गम् विधाय द्वाविंशतिसंख्यकैः रङ्गैर्युक्तं पूर्व्वरङ्गं समाप्य—किन्तु सर्व्वेषां खलु अङ्गानाम् इदानीं (विश्वनाथस्य आविर्भावकाले) सम्यक् प्रयोगाभावात् पूर्व्वरङ्गस्य प्रधानम् अङ्गम् नान्दीम् तथा रङ्गद्वारम् विधाय, नान्दीश्लोकम् तथा रङ्गद्वार-श्लोकं च पठित्वा इति भावः निवर्त्तते रङ्गमञ्चात् प्रतिष्ठते तदनु तद्वत् सूत्रधार इव सूत्रधारसदृशगुणाकारः सूत्रधारतुल्यः तद्वत्वेषधारी इति यावत् स्थापकः द्वितीयो नटः प्रविश्य रङ्गमञ्चम् उपस्थाय काव्यम् दृश्यकाव्य-प्रतिपाद्यविषयम् आस्थापयेत् (introduces)। ननु कथं तस्य

नटस्य स्थापक इति संज्ञा ? कथयति - काव्यस्यार्थस्य काव्यगतविषयवस्तुनः स्थापनात् स स्थापक इतिउच्यते। किञ्च विश्वनाथस्य आविर्भावकाले पूर्व्वरङ्गस्य सम्यक् प्रयोगो नासीत् अतएव स्थापकः कश्चित् रङ्गमञ्चम् नागच्छति स्म। सूत्रधारः एव वाहुल्येन स्थापकस्य कर्त्तव्य-माचरति स्म।

ननु स्थापकः किं सूचयेत् ? केन वा प्रकारेण सूचयेत् ? उत्तरं पठति— सः तद्रूपः (सन्) दिव्यमर्त्त्यः (तथा) तयोरन्यतरः मिश्रम् सन वस्तु बीजं वा मुखम् अथापि पात्रम वा सूचयेत्—इति श्लोकस्य अन्वयः। व्याख्या - स स्थापकः दिव्यमर्त्त्यः दिव्यं स्वर्गीयं च मर्त्त्यं पार्थिवं च इति दिव्यमर्त्त्यः तद्रूपः तत्तद्रूपः इति भावः। अयमर्थः—स स्थापकः दिव्यरूपःसन देवताजनोचितवेषधारी सन नाटकस्य वस्तु इतिवृत्तम अथवा वीजं नाटकीयकथावस्तुनः मूलं प्रतिपाद्यम् अथवा मुखं श्लेषादिना प्रकृतवृत्तान्तप्रतिपादकम् वाक्यविशेषम अथवा पात्रम, ततः परम् अचिरमेव यो नाटकीयजनः रङ्गमञ्चे आविर्भविष्यति तस्य आगमनम् सूचयेत् विज्ञापयेत्।

Eng. Tran. After having observed the Purva-ranga, the Suttradhara makes his exit, and then entering (immediately after him) the Sthapaka (the Introducer of the subject-matter of the drama) who is equally accomplished (like the sutradhara) introduces the dramatic subject, clad in celestial or earthly attire, in accordance with the drama-concerning celestial beings or earthly gestures and selecting either of the two attires in case the drama treats of both (celestial, and mundane or both), he will either mention the subject-matter (of the drama) or refer

(only) to the (very) seed (of the drama) or utter some lines relative to the main current of the drama or intimate (the immediate arrival of) some dramatic person.

Text--काव्यस्यार्थस्य स्थापनात् स्थापकः। तद्वदिति-सूत्रधारसदृशगुणाकारः। इदानीं पूर्व्वरङ्गस्यसम्यक् प्रयोगाभावादेक एव सूत्रधारः सर्व्वं प्रयोजयतीति व्यवहारः। स स्थापकोदिव्यं वस्तु दिव्यो भूत्वा मर्त्त्यं मर्त्त्यो भूत्वा, मिश्रञ्च दिव्यमर्त्त्ययोरन्यतरोभूत्वा सूचयेत। वस्तु इतिवृत्तम्। यथा उदात्तराघवे "रामोभूर्दिध्रनिधाय काननमगातमालामिवाज्ञां गुरोस्तद्भक्त्या भरतेन राज्यमखिलम् मात्रा सहैवोज्झितम्। तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं प्रोतसिक्तादशकन्धरप्रभृतयो ध्वस्ताः समस्ताः द्विषः।

बीजं यथा रत्नावल्याम्—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तादानीय झटिति घटयति विधिरभिमतमभिमुखीभूतः। अत्र हि समुद्रे वहित्रभङ्गमग्नोत्थिताया रत्नावल्या अनूकूलदैवलालितो वत्सराजगृहप्रवेशो यौगन्धरायणव्यापारमारभ्य रत्नावलीप्राप्तौ बीजम्।

मुखं श्लेषादिनाप्रस्तुतवृत्तान्तप्रतिपादको वागविशेषः। यथा—
आसादितप्रकटनिर्मलचन्द्रहासः प्राप्तः शरत्समय एष विशुद्धकान्तिः।
उत्खाय गाढ़तमसं घनकालमुग्रम् रामो दशास्यमिव सम्भृतवन्धुजीवः॥

पात्रं यथा शाकुन्तले-

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा"।

मित—। ननु स्थापकः वस्तु सूचयेत इति किं नाम वस्तु इति उत्तरं पटति—'वस्तु' इतिवृत्तं घटना इत्यर्थः। नाटकस्य संक्षिप्ता घटनावली (Main currents of the drama)। यथा—उदात्तराघवनाटके

स्थापकः नाटकीयं वस्तु सूचयन काव्यार्थं स्थापितवान्। स च श्लोको 'रामोमूर्दिध्न' इत्यादि। तस्य व्याख्या - रामः गुरोः पितुर्दशरथस्य आज्ञाम निर्वासनादेशं मालामिव अनायासेनैव आनन्देन इत्यर्थः मूर्दिध्न, निधाय स्थापयित्वा काननं दण्डकारण्यम अगात प्रस्थितः। (इ धातो-र्लुङि रूपमिदम्)। तद्भक्त्या तस्मिन् रामे भरतस्य या भक्तिः पूज्यबुद्धिः तस्याः प्रभावात् भरतेन रामभ्रात्रा मात्रा कैकेय्या सह एव अखिलं समस्तम् राज्यं कोशलराष्ट्रम उज्झितं परित्यक्तम। मातरं तथा राज्यं त्यक्तवान भरत इति भावः। अनुगतौ श्रीरामचन्द्रे अनुरक्तौ स्वानाम्ना प्रसिद्धौ सुग्रीवविभीषणौ सुग्रीवः वानरपतिस्तथा विभीषणः राक्षसराजः परां श्रेष्ठाम् सम्पदम् ऐश्वर्यं सुग्रीवपक्षे किष्किन्धाराज्यलाभरूपां विभीषणपक्षे लङ्काधिपत्यलाभरूपां सम्पदं नीतौ श्रीरामेण प्रापितौ वालिनं तथा रावणं च विनाश्य इतिभावः। (एवं च) प्रातिकूल्येन प्रकृष्टरूपेण नितराम उत्सिक्ताः दृप्ताः दर्पोन्मत्ताः इति यावत दशकन्धरप्रभृतयः दशकन्धरः दशग्रीवः रावण इति यावत। स प्रभृतिरादिः येषां ते इति रावणकुम्भकर्ण मेघनादादयः समस्ताः निखिलाः ध्वस्ताः ध्वंसं प्रापिताः श्रीरामेण विनाशिताः इतिभावः।

अयं श्लोकः उदात्तराघवस्य मूलघटनावली संक्षेपेण उपन्यस्यति अतएव अयं खलु अस्तु। स्थापकः इदं वस्तुभूतम श्लोकं पठन नाटकार्थं स्थापयति इति बोद्धव्यम्॥ अपिच स्थापकः बीजं वा सूचयेत्। तत कीदृशम इति दर्शयति श्रीहर्षविरचितायाः रत्नावलीनाटिकाया'—द्वीपादित्यादिना।

अथ स्थापको मुखं वा सूचयेत इति दृष्टान्तेन तत कथयति - मुखं किं नाम? उत्तरं वाचयति-मुखं हि इत्यादिना इत्यर्थघटितशब्दप्रयोगादिना प्रस्तुतवृत्तान्तप्रतिपादकः नाटकस्य यः प्रस्तुतः प्रकृतः वृत्तान्तः घटना तस्य प्रतिपादकः सूचकः वाग्विशेषः स्थापकेन तस्य अभावात् सूत्रधारेण वा, उच्चारितः प्रबन्धविशेषः। कस्यचित् नाटकस्य श्लोकस्य उद्धारेण मुखस्य दृष्टान्तं प्रदर्शयति। श्लोकस्य व्याख्या यथा—आसादितः प्राप्तः

प्रकटः परिस्फुटः निर्म्मलश्च उज्वलश्च चन्द्रहासः चन्द्रस्यकिरणः येन तादृशः। तथा विशुद्धा मेघनिरसनात् उजज्वला सूर्य्यादिज्योतिः पदार्थानां द्युति र्यस्य तादृशः। एवं सम्भृतबन्धुजीवः सम्भृतानि सञ्चितानि स्वाविर्भाव-समये प्रदर्शितानि बन्धुजीवानि बन्धूजीवनाम्ना प्रसिद्धानि (बाँधुली इति वङ्गभाषायाम्) कुसुमानि येन तादृशः। एष शरत्समयः शरत्कालः गाढतमसम् मेघाच्छादनात् मेघावरणात् घनान्धकारम् इति भावः तमः इव कष्टदायकमिति यावत् घनकालं घनानां मेघानां कालं समयं वर्षाकालमिति भावः उत्खाय विनाश्य प्राप्तः अधुना आविर्भूतः। कः इव ? उपमालङ्कारेण दर्शयति रामः रघुनाथः दशास्यम् रावणमिव। कीदृशः रामः ? कीदृशं वा रावणम् ? विशेषणानि योजयति--आरादितः धृतः प्रकटःविकटः भीषण इति यावत् उज्वलः तीक्ष्ण इति भावः चन्द्रहासः तरवारिः येन तादृशः। विशुद्धा रावणविनाशात् प्रसन्ना कान्तिः जानकी यस्य तादृशः। सम्भृता रावणस्य हननेन संरक्षिताः बन्धूनाम् सुग्रीव-विभीषणादीनां जीवाः प्राणाः येन तादृशः रामः। एवं च गाढं प्रबलं तमः तमोगुणस्य कार्य्यम् अज्ञानम् यस्य तादृशम्। तथा उग्रम् भयानकं लोकपीडकमिति यावत् रावणमिव। तत्र श्लेषानुप्राणिता उपमा या श्लिष्टोपमेति कथ्यते तेन श्लिष्टोपमालङ्कारेण नाटकप्रस्तुत-वृत्तान्तम् रामकर्त्तृकं रावणवधम् सूचयति अनेनश्लोकेन स्थापकः। अतः अयं श्लोकः मुखमिति संज्ञां गच्छति।

अथापि पात्रं वा सूचयेत् स्थापकः इति अत्र दृष्टान्त दर्शयति—यथा शाकुन्तले। अनेन श्लोकेन दुष्यन्तरूपस्य पात्रस्य रङ्गमञ्चे प्रवेशः सूत्रधारेण सूचित इति ज्ञेयम्।

Eng. Tran.—The "Sthapaka" is so named, because he introduces the subject-matter of the drama. The word "Tat vat' in the verse implies (that the sthapaka is equal to the sutradhara in minute accomplishments and in form or

appearance (that is dress). Now-a-days, (all the functions of) the Purva-ranga not being properly observed, (that is the Purva-ranga not being properly applied in the commencement of a drama), the Sutradhara himself takes upon himself all the function, he himself takes upon himself all the functions (that are observed) ; that is the Suttradhars does the duty of the sthapaka and others. Sthapaka should introduce the subject-matter (वस्तु))etc., of a drama-dealing with divine figures in the garb of a divine figure himself (i. e. himself being in a divine attire that is the attire that befits a divine figure, he should introduce the subject matter of a drama dealing with divine figures) ; the same of drama treating of human figure, himself in the garb of human beings and that of a mixed drama (i. e. a drama that has both divine and human figures withiu its body) being himself in the attire of either a divine or human figure (as the likes). The word "vastu" in the verse stands for main currents of the drama (which the Sthapaka is to introduce), an example of which is (to be found) in the (drama-going by the name) Udatta-raghava (which runs as follows :—) Rama, having accepted the dictation of his father, just like a piece of garland on his head, went into the forest. And out of devotion unto him, Bharat renounced the entire kingdom together with (i. e. as well as) his mother. The two attendants (followers)

sugriva and Bhibhisana were led to majestic prosperity and the entire folk of the enemy, the infatuated Dasanana (Ravana) and others (of his party) became annihilated.

The seed (बीज) of a drama is in Ratnavali running as follows: "Providence, when propitious, quickly unites its desired object (whensoever he likes to effect the union) by having brought the same from even an island, from even the bottom of an ocean or even from the ends of the quarters of the horizon.

Here (in the present case), the entering (access for shelter) of Ratnavali who was drowned in the ocean due to shipwreck and became subsequently rescued, (i. e. who succeeded in rising up from being drowned in the ocean) into the palace (mansion) of the king of the Vatsas as effected by favourable providence, beginning with the affair (i. e. attempts to effect the union of Ratnavati and Udayana) of Yangandharayana stands as the seed to the acquisition of Ratnavali (by Udayana).

A mukha is a passage (uttered by the Sthapaka) that refers to the main incident of the drama by means of "Slesa" or the like just as (in the following). The autumn has set in—the autumn that has got the light of the moon-bright and brilliant, the autumn which has assumed a clear (charming) or illuminating aspect after having opened the Vandhujiva flowers and (having) crushed the dreary rainy season together with its deep (pitchy)

(gloom), just like Rama who wielded the sharp and dazzling chandrahasha sword whose face was burning with joy and who restored life, as it were, to his allies by having crushed terrible Dasanana (Ravana) in whom the influence of Tamoguna (such as ignorance, infatuation and the like) was mighty.

A Patra is a dramatic person,—the Sthapaka sometimes refers to the immediate arrival of a dramatic person upon the stage is as in Sakuntala (running as follows)—I have been forcibly captivated by the melody of your song, just as the king Dashyanta who has been dragged afar (from his base) by this speedy antelope.

१३। रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः। रूपकस्य कवेराख्याम् गोत्राद्यपि स कीर्त्तयेत्। ऋतुञ्च कञ्चित् प्रायेण भारतीं वृत्तिमाश्रितः।

स स्थापकः। प्रायेणेति क्वचिदृतोरकीर्त्तनमपि। यथा - रत्नावल्याम्।

आश्रित स स्थापकः भारतीम् वृत्तिम् (एषा तु पश्चात् वक्ष्यते) आश्रितः अवलम्ब्य काव्यार्थसूचकैः काव्यस्य अभिनेयस्य दृश्यकाव्यस्य योऽर्थः प्रतिपाद्यवस्तु तस्य सूचकैः ज्ञापकैः प्रकाशकैरिति यावत् मधुरैः श्रुतिसुखकरैः श्लोकैः रङ्गं (लक्षणावृत्त्या) अभिनयं द्रष्टुम् रङ्गचत्वरमागतं जन-समूहम् प्रसाद्य तोषयित्वा (तदनन्तरम्) रूपकस्य तदा अभिनेयस्य दृश्यकाव्यस्य तथा कवेश्च तस्य नाटकस्य रचयितुश्च आख्यां नाम एवं कवेः गोत्रादि, आदिपदेन वासस्थान प्रभृतिकम् कीर्त्तयेत् घोषयेत्। तथा प्रायेण कञ्चित् ऋतुञ्च शरत्कालादिकम् उल्लिखेत्। "प्रायेण" इतिशब्देन ज्ञाप्यते यत् क्वचित् रूपके कदाचित् ऋतोः कीर्त्तनं न दृश्यते यथा—रत्नावल्याम्।

Eng. Trans.—Having pleased the audience with sweet verses, relative to the subject-matter of the drama, he (the sthapaka) should declare the name of the drama together with the name, the family-name and the like of the poet and describe, very often, (the advent of) a particular season adopting all along the Bharati Vritti.

"He" stands for the sthapaka here. The word (प्रायेण) "Very often" implies that in some works the season is not mentioned as in the Ratnavali

Text - भारतीवृत्तिस्तु -

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ॥

संस्कृतबहुलो वाक्प्रधानो व्यापारो भारती ।

मित - । ननु "भारतीं वृत्तिमाश्रितः" इति का नाम भारतीवृत्तिः ? उत्तरं पठति—भारतीवृत्तिः संस्कृतप्रायः संस्कृतबहुलः बाहुल्येन एव संस्कृतशब्दैः संगठित इति भावः, नराश्रयः पुरुषविशेषेण प्रयोज्यः वाग्-व्यापारः वाक्प्रधानोव्यापारः अभिनयः इति यावत्। वाक्वाक्यम् अत्र भारतीवृत्तौ प्राधान्यं भजते, परन्तु अत्र किञ्चित् किञ्चित आङ्गिकाभि-नयस्तथा आहार्य्याभिनयः एवं च सात्त्विकाभिनयोऽपि सम्भवेत। दशरू-पके "नराश्रयः" इत्यत्र नटाश्रय इति पाठः। स एव साधुः इति मन्यामहे वयम्। यतः भारतीवृत्तिः खलु नटाश्रयः एव वाग्यप्रधानोऽभिनयव्यापारः। वृत्तयस्तु चतुर्विधा यथा—कैशिकी, सात्त्वती, आरभटी तथा भारती। अत्र तिस्रः खलु अर्थवृत्तयः एका भारतीवृत्तिरेव शब्दवृत्तिः। उक्तं च नाटकचन्द्रि-कायाम् --तिस्रोऽर्थवृत्तयः प्रोक्ता शब्दवृत्तिस्तु भारती।

Eng. Trans.—The Bharativritti is —(i. e. is defined as follows)—

The Bharati (vritti) is the acting mainly with words

of some particular person (by some actor) the acting consisting mainly of Sankrit words.

Text—तस्याः प्ररोचना वीथी तथा प्रहसनामुखे। अङ्गान्यत्रोन्मुखीकारः प्रशंसातः प्ररोचना।

प्रस्तुताभिनयेषु प्रशंसातः श्रोतॄणाम् प्रवृत्त्युन्मुखीकरणं प्ररोचना। यथा रत्नावल्यां—श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी, लोकेहारि च वत्सराजचरितं नाट्ये च दक्षा वयम्, वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुनर्मद्भाग्योपचयादयं समुदितः सर्व्वो गुणानां गणः।

वीथीप्रहसने वक्ष्येते।—

मित—। तस्याः पूर्व्वोक्तायाः भारती इति आख्यायाः शब्दवृत्तेः प्ररोचना वीथी प्रहसनम् तथा आमुखम् इति चत्वारि अङ्गानि वर्त्तन्ते इति। अस्मिन् प्रसङ्गे—प्रस्तुताभिनयेषु प्रशंसातः नाटककर्त्तुस्तथा नाटकस्य एवं च समवेतानाम् श्रोतॄणाम् सुख्यातिकरणेन उन्मुखीकरणं प्ररोचना। अभिनयदर्शने तेषाम् आग्रहसम्पादनम् प्ररोचनेति कथ्यते। ननु प्रशंसातः इति कस्य कस्य प्रशंसा कार्य्येति न स्पष्टीकृतं विश्वनाथेन नापि दशरूपककृता। नच सुस्पष्टं लिखितं श्रीरूपगोस्वामिपादैः नाटकचन्द्रिकायाम्—"देशकालकथानाम् सभ्यादीनां प्रशंसया। श्रोतॄणामुन्मखीकारः कथितेयं प्ररोचना। 'वीथीप्रहसने' वीथी तथा प्रहसनम् वक्ष्येते स्वप्रसङ्गे अभिधास्येते अधुना तु मया अवशिष्टम् आमुखं लक्षयिष्यते इति भावः।

Eng. Trans.—The same (that is the aforesaid Bharati vritti) has got four parts (i. e. has four divisions or rather consists of four limbs)—such as Prarochana, Vithi, Prahasana and Amukha ; (of these) Prarochana implies the inviting of attention (of the audience to the drama) by an appeal to the praise (of the plot, the drama and such other connected things). Thus Praro-

chana is the effecting of inclination of the audience in the dramatic performance by an appeal to praise such as (found) in the Ratnavali :—

Sriharsa (the author is an excellent (able) poet; the audience too, is an appreciator of merits (is a good judge or critic); the exploits of the king of Vatsas (Udayana) are also very charming amongst the people (very appealing to the people), and we, (on our part) are (very) expert in dramatical performance. In this matter, any one of these (of the said four circumstances) is sufficient (is quite enough) in the acquisition of the desired result (coveted object); and what is to say (when) all of these merits (excellences) have assembled together through ascendancy of my fate (good luck).

Vithi and Prahasana will be defined later on in this chapter.

Text—श्लोकः। नटी विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।

वृत्तिः। सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते। तस्यानुचरः पारिपार्श्विकस्तस्मात् किञ्चिदूनः नटः।

मित—। स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिः चित्रैः वाक्यैः एवम्भूतैः वाक्यैर्विहितम् यत् संलापं, पूर्व्वरङ्गस्य अन्तिमे अंशे नटी विदूषकः पारिपार्श्विको वा सूत्रधारेण सह विधत्ते तदेव आमुखमिति नाम्ना आख्यायते। सा प्रस्तावना अपि कथ्यते।

ननु पूर्व्वरङ्गं विधायैव सूत्रधारो निवर्त्तते, प्रविश्य स्थापकस्तद्वत् काव्यमुत्स्थापयेत्ततः इति स्मरणात्, तत्र आमुखे सूत्रधारस्य उपस्थितिः कुतः? समाधत्ते—अत्र आमुखे सूत्रधारपदेन स्थापक एव ग्रहणीयः, यतः

सोऽपि सूत्रधारसदृशगुणाकारः। तस्य स्थापकस्य अनुचरः अनुयायी तथा तस्मात् स्थापकात् गुणादौ किञ्चित् अल्पमात्रम् ऊनः हीनः नटः पारिपार्श्विकः उच्यते। विदूषकलक्षणं तु - "कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः। हास्यकरः कलहरतिः विदूषकः स्यात स्वकर्म्मज्ञः"। विश्वनाथमते आमुखस्य एव अपरं नाम प्रस्तावना। दशरूपकमतेऽपि तथा। परं श्रीरूपगोस्वामिपादास्तु आमुखं तथा प्रस्तावनां वस्तुद्वयम् मन्यन्ते। तन्मते आमुखस्य लक्षणं तु साहित्यदर्पणानुयायि यथा "सूत्रधारो नटी ब्रूते स्वकार्य्यं प्रतियुक्तितः। प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखमीरितम्। प्रस्तावनातु—"अर्थस्य प्रतिपाद्यस्य तीर्थं प्रस्तावनोच्यते" इति: इदं प्रतिभाति यत् एतन्मते प्रस्तावना पूर्वरङ्गेण एव गृहीता।

अपिच श्रीभासकविविरचिते स्वप्नवासवदत्तम् इत्यादि प्रसिद्धे नाटके आमुखं प्रस्तावना वा नोल्लिख्यते अपि तु "स्थापना" इत्येव संज्ञा दृश्यते। स्थापनेति संज्ञा न दृश्यते साहित्यदर्पणे नापि दशरूपके: श्रीरूपगोस्वामीचरणास्तु कथयन्ति यत केचित् आमुख एव प्रस्तावना स्थापना इति भेदद्वयम् कुर्व्वन्ति तयोः लक्षणं च विदधति। तथाहि नाटकचन्द्रिकायाम् "प्रस्तावनास्थापने द्वे आमुखस्यापरे भिदे" इत्याखण्ड्य स्फुटं केचित्तयोः कुर्व्वन्ति लक्षणम इत्याह।

Eng. Trans.—That (portion of the Purva-ranga) is known as Amukha and also as Prastavana in which the Nati (the main actress consort of the Sutradhara), the clown (jester) or the Pariparsika (an assistant to the Sthapaka) holds with the Sutradhara (that is the sthapaka) himself, a conversation couched up in amazing words that arises out of their own function and that points to the subject that has been taken up (i. e. which is to come next).

The Sthapaka is referred to as Sutradhara—he (Sthapaka) being equal to him (Sutradhara). A pariparswika is a follower of (=an assistant to) the Sthapaka, he being an actor—only a bit inferior to the Sthapaka.

सा च प्रस्तावना पञ्चविधत्वं भजते इति दर्शयति—

Text— श्लोकः। उद्घात्यकः कथोद्घातः प्रयोगातिशयस्तथा। प्रवर्त्तकावलगिते पञ्च प्रस्तावनाभिदाः।

मित । प्रस्तावनाभिदाः प्रस्तावनायाः भेदाः प्रकाराः इति यावत् पञ्च। पञ्चप्रकाराः खलु प्रस्तावनाः भवेयुरित्यर्थः। ताश्च इमाः—उद्घात्यकसंज्ञका, कथोद्घातकसंज्ञका प्रयोगातिशयसंज्ञका, प्रवर्त्तकसंज्ञका, तथा अवलगितसंज्ञका च। अत्र इदम् अवधेयम्

दशरूपके प्रस्तावनाया स्त्रैविध्यमेव स्वीकृतं यथा कथोद्घातः, प्रवृत्तकं (एतदेव विश्वनाथः प्रवर्त्तकं आख्याति) तथा प्रयोगातिशयश्च। परन्तु भारतीवृत्तेः प्ररोचना वीथी प्रहसनम् आमुखम् इति चतुर्णाम् अङ्गानाम् मध्ये यत् वीथीनाम अङ्गं तस्य अपि त्रयोदश अङ्गानि वर्त्तन्ते, तानि एतानि उद्घात्यकः अवलगितम्, प्रपञ्चः, त्रिगतम्, छलम्, वाक्केली, अधिबलं, गण्डः, अवस्यन्दितम्, नालिका, असत्प्रलापः, व्याहारः तथा मृदवम्। एतानि वीथ्यङ्गानि तु आमुखाङ्गानि अपि भवन्ति। उक्तं च दशरूपके "वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्रैव तत् पुनः"। एतानि वीथ्यङ्गानि (यानि आमुखाङ्गानि अपि भवन्ति) लक्षयित्वा दशरूपकृत् कथयति "इति प्रस्तावनाङ्गानि। एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रभृत। प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत्" इति। अत्र प्रसङ्गे श्रीरूपगोस्वामिपादास्तु एवं मन्यन्ते—यथा नाटकचन्द्रिकायाम्—

"त्रीण्यामुखाङ्गान्युच्यन्ते कथोद्घातः प्रवर्त्तकम्। प्रयोगातिशयश्चेति तथा वीथ्यङ्गमामुखम्। उद्घात्यकावलगितसंज्ञकं मुनिनोदितम्"।

अस्य तात्पर्य्यम्—कथोदघातः प्रवर्त्तकम् तथा प्रयोगतिशयश्च इति त्रीणि खलु आमुखस्य अङ्गानि। अपि तु वीथ्याः उदघात्यकः तथा अवलगितम्—इतिद्वे अङ्गे अपि आमुखे योज्ये स्याताम् इति श्रीभरतमुनेरभिप्रायः। विश्वनाथोऽपि एतन्मतं समर्थयति इति पश्चात् दर्शयिष्यते। अपिच विषयमिमम् अधिकृत्य श्रीरूपः कथयति "शृङ्गारप्रचुरे नाट्ययुक्तमामुखमेवहि"। तात्पर्य्यं—शृङ्गाररसप्रधाने नाटके कथोदघातयुक्तं प्रवर्त्तकयुक्तं प्रयोगातिशययुक्तं वा आमुखं कर्त्तव्यम्। तथा प्रस्तावना स्थापना इति आमुखस्य यौ द्वौ भेदौ तन्मते स्तः तयोः प्रस्तावना वीराद्यदभुतादिरसप्रधानेषु नाटकेषु कर्त्तव्या, एवं च हास्यवीभत्सरौद्रादिप्रधानेषु च नाटकेषु स्थापना एव कर्त्तव्या।

Eng. Trans.—Prastavana is of five varieties such as Udghatyaka, Kathodghata, Prayogatishaya, Pravartaka and Avalagita

Text वृत्ति। तत्त्—तासां पञ्चविधानां प्रस्तावनानां मध्ये (आदौ) उदघात्यकः (उदघातकः ?) प्रथमं लक्ष्यते -

श्लोकः। पदानि त्वगतार्थानि तदर्थगतये नराः। योजयन्ति पदैरन्यैः स उदघात्यक उच्यते।

वृत्ति। यथा मुद्राराक्षसे सूत्रधारः—"क्रूरग्रहः स केतुश्चन्द्रमसम्पुर्णमण्डलमिदानीं। अभिभवितुमिच्छति बलात्—"। इति अनन्तरम् 'नेपथ्ये। आः! क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति।" इति॥ अत्र अन्यार्थवन्त्यपि पदानि हृदयस्थार्थगत्या अर्थान्तरे संक्रमय्य पात्रप्रवेशः।

गित—। तादृशी प्रस्तावना एवउदघात्यकउच्यते कथ्यते। [उद्-हन्यते अभिभूयते स्थापकेन (सूत्रधारेण) उच्चारितस्य वाक्यस्य अर्थः प्रविशतः पात्रस्य वचनस्थः अर्थेन इति उद्पूर्व्वात् हन्धातोः कर्मणि वाच्ये ण्यत् प्रत्ययः—ततश्च स्वार्थे कप्रत्ययः। (उदघातक इतिपाठे कर्त्तरि ण्वुल्)।

ननु कीदृशी ? यत्र नगः प्रवेश्यन्तः पात्रविशेषाः अगनार्थानि अगताः अभिप्रायम अलक्षयन्तः अर्थाः येषु तानि, अगतानि पदानि तदर्थगतये तस्य प्रविशतः पात्रस्य योऽर्थः अभिप्रायः तस्य गतये प्राप्तये, तस्य अवधारणाय इति यावत 'अन्यैः पदैः' सूत्रधारेण तस्य सहचरेण वा उच्चारितेभ्यः अन्यैः स्वाभिप्रायसमर्थकैः पदैः योजयन्ति तादृशी प्रस्तावना उद्घात्यकः कथ्यते। अयं भावः सूत्रधारेण तत्सहकर्म्मिणा वा उच्चारितम अन्यार्थं पदं प्रकृताभिनयस्य आरम्भे रङ्गमञ्चे नटः आत्माभिप्रायसमर्थकानां पदानां साहाय्येन आत्याभिप्रायद्योतके तत्र अर्थे पर्य्यवसाययति इति यस्यां प्रस्तावनायाम सा प्रस्तावना उद्घात्यकनाम्नी। वृत्तौ उदाहरणं दर्शयति मुद्राराक्षसनाटकात यथा—तत्र नटीमुद्दिश्य सूत्रधारः पठति इमं श्लोकम्।

अत्र श्लोके अन्यार्थवन्त्यपि अन्यार्थप्रकाशकानि अपि पदानि "क्रूरग्रहःसकेतुः" (राहुः यद्वा मलयकेतुयुक्तः) "चन्द्रमसम्पूर्णमण्डलम्" इति समास शब्दान् हृदयस्थार्थागत्या हृदये चाणक्यस्य चित्ते तिष्ठति योऽर्थः विषयः मलयकेतुना सह मिलितेन क्रूरकर्म्मणा राक्षसेन चन्द्रगुप्तस्य उच्छेद-विषये प्रचेष्टारूपो विषय इत्यर्थः, तस्य अगत्या अप्राप्त्या अबोधकतया इति भावः अर्थान्तरे अभिलषिताऽर्थे परिणमस्य पात्रस्य चाणक्यस्य प्रवेशः।

अत्र उद्घात्यकविषये श्रीरूपस्तु साहित्यदर्पणमेव अनुसरति। परं दशरूपके अस्य विभिन्नं लक्षणं कृतं तद् यथा—"गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा। यत्रान्योऽन्यं समालापो कथोद्घात्यं तदुच्यते।" गूढार्थं पदं तत्पर्य्यायश्च इत्येवं माला प्रश्नोत्तरं च इत्येवं वा माला। द्वयोरुक्तिप्रत्युक्तौ तद् द्विविधम तद्घात्यकम् इति टीकाकारः धनिकः। तत्र आद्यस्य उदाहरणं विक्रमोर्वशयाम्। द्वितीयस्य तु पाण्डवानन्दे।

Eng. Trans.—Udghatyaka is said to be (that form of Prastavana) in which words implying one thing (i.e. used

in one sense) are taken by the people (i. e. by the dramatic person that will immediately appear on the stage) in quite a different sense, with the addition of (some) other words. For instance, in the Mudra-raksasa, the Sutradhara (says) :— "That evil planet Ketu (Rahu) wants to eclipse the full moon by force." Then in the green-room—"Ah ! who is he that attempts at overthrowing Chandragupta, so long as I am living. Here the words expressing a different sense and (consequently) not being in accord with the sense harboured at heart, are taken in a different sense thereby (giving the opportunity to) the arrival of the dramatic person (on the stage).

Text—श्लोकः। सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा। भवेत पात्रप्रवेशश्चेत कथोद्घातः स उच्यते।

वृत्तिः। वाक्यं यथा रत्नावल्यां—"द्वीपादन्यस्मादपि" इत्यादि सूत्रधारेण पठिते—'नेपथ्ये। एवमेतत, कः सन्देहः। "द्वीपादन्यस्मादपि" इत्यादि पठित्वा यौगन्धरायणस्य प्रवेशः। वाक्यार्थो यथा वेण्याम्—"निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनयाः सह माधवेन। रक्तप्रसाधितभुवः क्षतविग्रहाश्च स्वस्थाः भवन्तु कुरुराजसुताः सभृत्याः॥" इति सूत्रधारेण पठितस्य अर्थं गृहीत्वा—'नेपथ्ये। आः दुरात्मन! वृथामङ्गलपाठक! कथं स्वस्थाः भवन्तु मयि जीवति धार्तराष्ट्राः।" ततः सूत्रधारनिष्क्रान्तौ भीमसेनस्य प्रवेशः।

मित। एतादृशी प्रस्तावना कथोद्घात उच्यते। अत्र सूत्रधारस्य वाक्यम् 'सम्पूर्णमेव पठित्वा पात्रं प्रविशति, इति। दृष्टान्तः रत्नावल्यां यथा—तत्र सूत्रधारः पठति—द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दि-

शोऽप्यन्तात्। आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥ इति—सूत्रधारे अस्मिन् श्लोके पठिते सति गृहीतयौगन्धरायणभूमिको नटः नेपथ्ये कथयति "एवमेतत्। कः सन्देहः"—"द्वीपादन्यस्मादपि" इत्यादि सूत्रधारपठितं श्लोकम् अविकलमेव उच्चार्य्य पात्रस्य यौगन्धरायणस्य प्रवेशः। अतएव अत्र प्रथमप्रकार एव कथोद्घातः। द्वितीय प्रकारस्य दृष्टान्तो यथा—वेणीसंहारे सूत्रधरः पठति निर्वाणवैरदहना इति। अस्य व्याख्या=अरीणाम् दुर्य्योधनदुःशासनादीनाम् प्रशमात्, शमः शान्तिभावः अतएव प्रशमात् सन्धिकरणेन शत्रुतां विहाय शान्तिसमाश्रयणात् (हेतौ ५मी) निर्वाणः अवसानं प्राप्तः उपशमितः इति यावत् वैरं शत्रुता एव दहनः येषां तादृशाः पाण्डुतनयाःयुधिष्ठिरप्रभृतयः माधवेन भगवता श्रीकृष्णेन सह नन्दन्तु आनन्दं गच्छन्तु। तथाच कुरुराजसुताः कुरुराजस्य धृतराष्ट्रस्य सुताः दुर्य्योधनप्रभृतयः सभृत्याः भृत्यैः अनुचरैः कर्म्मकरैरित्यर्थः सहिताः स्वस्थाः शत्रुतारूपव्याधेः परिमुक्ताः अतएव सुस्थाः भवन्तु। कथम्? रक्तप्रसाधितभुवस्तथा क्षतविग्रहाश्च सन्तः। रञ्ज धातोर्भावे क्तप्रत्ययेन इदं विशेष्यपदम्। अर्थस्तु अनुरागः। रक्तेन अनुरागेण प्रजानुरागेण आत्मवशं नीता भूः पृथिवी कुरुराष्ट्रम् इत्यर्थः यैस्तादृशाः। तथा क्षतः सन्धिबलात् दूरीकृतः विग्रहः समरो येषां ते इति एवम्भूताः सन्तः। अस्य श्लोकस्य द्वितीयप्रकारः अर्थोऽपि अस्ति परं सोऽर्थः अस्मिन् प्रसङ्गे न उपयोगी इति अत्र न प्रदर्शितः। पश्चात् पताकाप्रसङ्गे दर्शयिष्यते। इति एवम् प्रकारम् सूत्रधारेण पठितस्य श्लोकस्य अर्थं गृहीत्वा नेपथ्ये गृहीतभीमभूमिकः नटः कथयति—आः दुरात्मन्! वृथामङ्गलपाठक! अनर्थकमङ्गलं पठितुम् प्रवृत्तस्त्वम्। यतः मयि चिरशत्रौ भीमसेने सति कथं केन प्रकारेण धार्त्तराष्ट्राः धृतराष्ट्रतनया स्वस्थाः सुखस्थिताः भवन्तु? ततः इति नेपथ्ये उच्चारणात् परं सूत्रधारनिष्क्रान्तौ सत्यां (भावे ७मी) सूत्रधारे रङ्गमञ्चात् प्रस्थिते सति भीमसेनस्य प्रवेशः। अत्र

द्वितीयप्रकारः कथोद्घातः ॥ कथोद्घातेनसह उद्घात्यकस्य अयं भेदः, यत् प्रथमोक्ते प्रविशता पात्रेण सूत्रधारस्य वाक्यं तस्य अर्थं वा अर्थान्तरे न सङ्क्रम्यते। उद्घात्यके तु प्रविशता पात्रेण सूत्रधारवाक्यस्य अर्थः अर्थान्तरे सङ्क्रम्यते।

Eng. Trans.—That (form of Prastavana) is known as Kathotghata, in which the entry of the dramatic figure takes place with repetition of the statement of or with a remark on the meaning of the utterance of the Sutradhara.

(With the repetition of the) statements as in the Ratnavali—"Even from another island" and so forth—being uttered by the Sutradhara—yaugandharayana remarks in the green-room "Yes! such is the case, where is the doubt? (and then) uttering "even from another island" and so forth, enters.

(With a remark on the) meaning of the statement as in the Venisamhara -

May the sons of Pandu with their fire of enmity extinguished through peace with the enemies, rejoice together with Madhava. And may the sons of the King of Kuru, with the kingdom brought under their control through their love or good will (for theirsubject) and with war foregone (or kept aside), rest in peace along with their followers.

Having taken up the meaning of the statement thus uttered (Bhima remarks) in the green room—Ah! You wretch, the reader of a useless panegyric! how can the sons of Dhartarastra rest in peace so long as I am living! Then with the exit of Sutradhara enters Bhimsena.

Text—(श्लोकः) यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते ? तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ।

वृत्तिः । यथा कुन्दमालायाम्—"नेपथ्ये । इत इतोऽवतरत्वार्य्या । सूत्रधारः - कोऽयं खल्वार्य्याह्वानेन साहायकं मे सम्पादयति ? (विलोक्य) कष्टमतिकरुणं वर्त्तते ।

लङ्केश्वरस्यभवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन
निर्वासितां जनपदादपि गर्भगुर्व्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम् ॥
अत्र नृत्यप्रयोगार्थं स्वभार्य्याह्वानमिच्छता सूत्रधारेण "सीतां वनाय परिकर्षति लक्ष्मणोऽयम्"
इति सीतालक्ष्मणयोः प्रवेशं सूचयित्वा निष्क्रान्तेन स्वप्रयोगमतिशयान एव प्रयोगः प्रयोजितः ।

मित । यदि एकस्मिन् प्रयोगे एकस्य खलु विषयस्य आलोचनाप्रसङ्गे अन्यः प्रयोगः अपरस्य विषयस्य अवतारणा प्रयुज्यते क्रियते, तेन द्वितीयविषयस्थस्य अवलम्बेन चेत् यदि पात्रप्रवेशः तदा प्रयोगातिशय इति सञ्ज्ञया अभिहिता प्रस्तावना स्यात् ।

अत्र नृत्यप्रयोगार्थं नृत्यलीलां सभ्येभ्यः प्रदर्शयितुम् स्वभार्याह्वानम् स्वस्य आत्मनः भार्य्यायाः नट्याः आह्वानम् इच्छता "सूत्रधारेण" सीतां वनाय परिकर्षति लक्ष्मणोऽयम्" इति वाक्येन सीतालक्ष्मणयोः प्रवेशं सूचयित्वा ज्ञापयित्वा निष्क्रान्तम् । अतएव तेन स्वप्रयोगम् आत्मना विधातव्यं नृत्यरूपं प्रयोगम् अतिशयानः एव अतिक्रम्य एव प्रयोगः सीतालक्ष्मणयोः प्रवेशरूपो विषयः प्रयोजितः साधित इति अत्र प्रयोगातिशयः ।

ननु स्वप्रयोगमतिक्रम्य पात्रप्रवेशसूचकस्य विषयस्य प्रयोगः प्रयोगातिशयात् अन्येष्वपि चतुर्षु प्रस्तावनाभेदेषु सूत्रधारेण क्रियते इति कथं तेषाम् अपि न प्रयोगातिशयसंज्ञा ? सत्यं तत् । परम् तेषां चतुर्णाम् प्रस्तावनाभेदानाम् स्वप्रयोगम् अतिक्रम्य पात्रप्रवेशसूचकस्य विषयस्य प्रयोगात्

क्ततेऽपि किञ्चित् विशिष्ट लक्षणम् अस्ति। प्रयोगातिशयस्य न तादृशं लक्षणम् दृश्यते। अतएव अस्य एव प्रयोगातिशय इति विशेषसंज्ञा।

"यत्र यत्र (प्रस्तावनायाम् इत्यर्थः) उद्घात्यकादीनां विशेषप्रकाराणां न सम्भवस्तत्र तत्रैव प्रयोगातिशयोनाम प्रस्तावनाप्रकारः इति सिद्धान्तः" इति श्रीहरिदाससिद्धान्तवागीशमहोदयानाम मतम्। परं तु दशरूपके प्रयोगातिशयस्य भिन्नं लक्षणं कृतं तत यथा एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः। पात्रप्रवेशो यत्र व प्रयोगातिशयो मतः।" यथा एष राजेव दुष्यन्त इति।

अयमर्थः यत्र सूत्रधारः "एषोऽयम" इति उपयोगेन उद्बोधकवाक्येन पात्रप्रवेशं सूचयति तत्र प्रयोगातिशयनाम्नी प्रस्तावना। यथा—शाकुन्तले।

श्रीरूपस्तु अत्र अविकलमेव दशरूपकमनुसरति। विश्वनाथस्तु शाकुन्तले कृतां प्रस्तावनाम् अवलगितसंज्ञकां मन्यते इति पश्चात् दर्शयिष्यते।

Eng. Trans.—If in the application of one topic, another topic is introduced, (which thus goes on to supplant the former), through which is effected the entry of the dramatic person, then it is a case of Prayogatisaya (Prastavana)—

As in the Kundamala—

("In the green-room" or dressing room) on this site please alight, Madam, on this site. Sutradhara—who is he that lends me a kind hand (i. e. serves my purpose) by calling the lady? Looking within—Alas! a highly pathetic incident takes place. Here is Laksmana, dragging into the forest, Sita, who, though heavy with child in the womb, has been exiled from the human habitation by Rama, who became perplexed through fear of public scandal, (simply) on the ground that she had to stay long in the house of the King of Lanka.

Here the Sutradhara who was bent on summoning his wife for the exhibition of dancing indicates entry of Sita and Laksmana by saying "Here is Laksmana dragging Sita into exile" and then makes his exit whereby he introduces this topic (the dragging of Sita) in supercession of his own topic (the dancing).

Text- श्लोकः। कालं प्रवृत्तमाश्रित्य सूत्रधृग यत्र वर्णयेत। तदाश्रयश्च पात्रस्य प्रवेशस्तत् प्रवर्त्तकम ॥

वृत्ति। यथा- "आसादितप्रकटे"त्यादि (see ante)। (ततः प्रविशति यथानिर्दिष्टो रामः)।

मित—। यत्र प्रस्तावनायाम् सूत्रधारः प्रवृत्तं वर्त्तमानम् इत्यर्थः कालं शरदादिकम् ऋतुम् आश्रित्य अवलम्ब्य वर्णयेत्, एवं च तदाश्रयश्च तत्कालाश्रयश्च यानि खलु विशेषणानि तानि एव आश्रित्य श्लेषेण श्लिष्टोपमादिना वा लक्ष्यीकृत्य इत्यर्थः पात्रस्य प्रवेशः स्यात तत् प्रवर्त्तकं नाम आमुखम् (प्रस्तावना)। पात्रम् प्रवर्त्तयति रङ्गमञ्चे आकर्षति इति प्रवर्त्तकम्। दशरूपके अपि ईदृशमेव लक्षणं परं तत्र तदधिकतरं स्पष्टीकृतं यथा—कालसाम्यसमाक्षिप्तप्रवेशः स्यात् प्रवृत्तकम प्रवृत्तकालसमानगुण-वर्णनया समाक्षिप्तप्रवेशः सूचितपात्रप्रवेशः प्रवृत्तकम् इति तट्टीकायाम धनिकः! श्रीरूपोऽपि एवं यथा नाटकचन्द्रिकायाम्-"आक्षिप्तः कालसाम्येन प्रवृत्तिः स्यात् प्रवर्त्तकम्"। प्रवर्त्तकं प्रवृत्तकम वा कथ्यते! अस्य दृष्टान्तः यथा—आसादित इत्यादि। अयं श्लोकः प्रागेव मुखस्य वर्णन-प्रसङ्गे उद्धृतः। अत्र श्लिष्टोपमा। दशरूपके अपि अयं श्लोकः दृष्टान्तत्वेन स्थापितः परं अस्य आकरग्रन्थो न वा दशरूपके नापि साहित्यदर्पणे उल्लिखितः। अन्यो दृष्टान्तो यथा केशवचरिते--

उल्लासयन् सुमनसां परितः कलापं संवर्द्धयन् सपदि वैभवमुद्धवस्य
श्रीरं मुनेरपि मनो मदयन् समन्तादानन्दनो मीलति सुन्दरि माधवोऽयं ॥

अत्र न केवलं विशेषणानि एव श्लिष्टानि अपितु विशेष्यपदं "माधव" अपि श्लेषेण वसन्तकालं तथा श्रीकृष्णंव्यनक्ति। दृष्टान्तान्तरं यथा विदग्धमाधवे -

सोऽयं वसन्तसमयः समियाय यस्मिन् पूर्णं तमीश्वरमुपोढनवानुरागम्।
गूढग्रहा रुचिरया सह राधयासौ रङ्गाय सङ्गमयिता निशि पौर्णमासी।

अत्रापि न केवलं विशेषणानि एव श्लिष्टानि अपि तु "वसन्तसमयः" तथा "पौर्णमासी" इति विशेष्ययोः कर्त्तृपदयोर्मध्ये द्वितीये अपि श्लेषस्तेन पौर्णमासीति पदेन पौर्णमासी तिथिः (पूर्णिमादिवसः) तथा भगवती (श्रीकृष्णलीलासाहाय्यकारिणी) देवी पौर्णमासी च व्यज्यते इति टीकाकारः श्रीलविश्वनाथचक्रवर्त्तिपादाः। ततः प्रविशति सपरिजना पौर्णमासी इति च।

प्रवर्त्तकसंज्ञके आमुखे कालसाम्यमेव प्राधान्येन वैशिष्ट्यं भजते। यथा—श्रीकृष्णदासकविराजकृते श्रीचैतन्यचरितामृते पूर्व्वोक्तम् विदग्धमाधवम् अधिकृत्य लिख्यते—"प्रभु कहे कोन मुखे पात्र सन्निधान। राय कहे कालसाम्यप्रवर्त्तक नाम।"

Eng. Trans.--Pravartaka (type of Prastavana) is that in which the Sutradhara describes with reference to the season then continuing through which is indicated the arrival of the dramatic person.

As "Asadita" and so forth (the sloka has been already translated before into English). Then enters Rama as described (in this sloka).

Text—श्लोकः। यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसा'
प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः।

वृत्तिः। यथा शाकुन्तले सूत्रधारो नटीं प्रति "तवास्मि गीतरागेण" इत्यादि। ततो राज्ञः (दुष्यन्तस्य) प्रवेशः।

मित। यत्र प्रयोगे यस्याम् प्रस्तावनायाम् एकत्र एकस्मिन् व्यापारे समावेशात् उपस्थापनात उपन्यासात् सादृशस्य कथनात् अन्यत् कार्य्यं पात्रप्रवेशरूपकार्य्यं सादृशकथने उपमानत्वं प्राप्तस्य पात्रस्य प्रवेशरूपं कार्य्यं साध्यते सम्पाद्यते सूत्रधारेण, बुधैः पण्डितैस्तत आमुखम् अवलगित-मिति नाम्ना संज्ञया ज्ञेयम्। यथा अभिज्ञानशकुन्तलनाटके सूत्रधारो नटीं कथयति 'तवास्मि गीतरागेण हारिणा प्रसभं हृतः। एष राजेव दुष्यन्तः सारङ्गेनातिरंहसा" इति सूत्रधारः आत्मना सह दुष्यन्तं तुलयति ततश्च राज्ञः दुष्यन्तस्य प्रवेशः।

किञ्च इमं दृष्टान्तं सत्प्रयोगातिशयस्य इति दशरूपककृत् धनञ्जय-स्तथा नाट्यचन्द्रिकाकारः श्रीरूपगोस्वामिचरणास्तु मन्यन्ते इति प्रागेवा-स्माभिर्दर्शितम्। प्रवर्त्तके सादृश्यं तु श्लेषेण कथ्यते यतस्तस्य कालसाम्यम् अवश्यं तु श्लेषेण कथ्यते, यतस्तत कालसाम्यम् अवश्य दर्शनीयम्। अत्र श्लेषस्य उपयोगिता नास्ति। अतएव विश्वनाथमते श्लेषेण श्लिष्टोपमया वा कालसाम्यमाश्रित्य सादृश्यकथनस्थले प्रवर्त्तकम्। विना श्लेषेण सादृश्यकथनस्थले तु अवलगितम।

दशरूपककारमते अवलगितं प्राधान्येन वीथ्यङ्गम्। परं तत् आमुखाङ्ग-त्वमपि भजते। तेन ईदृशं लक्षणं कृतम् -

"यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते। प्रस्तुतेऽन्यत्र वा तत् स्याच्चावलगितं द्विधा"। तत्र टीकाकृता आमुखाङ्गत्वेन, अस्य उदाहरणं न दर्शितम्। किन्तु वीथ्यङ्गत्वेन द्विप्रकारस्य अवलगितस्य उदाहरण-द्वयम् उल्लिखितम्।

Eng. Trans.—That (type of) Prastavana in which, through the setting of one thing, some other thing is executed, is to be known by scholars as Avalagita.

As in the Sakuntala, the Sutradhara speaks to the Actress—"By the melodious song of yours" which is charming, I have been forcibly captivated just like this King Dushyanta that has been led afar by the speedy antelope. Then enters the King.

Text—श्लोकः। योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि।

वृत्ति। अत्र आमुखे। उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्यमाणानि।

किन। अत्र आमुखे (यस्य अपरा संज्ञा प्रस्तावना ग्रन्थकारसम्मता तथा दशरूपककर्तोऽपि अभिमता) इतराणि अपि उद्घात्यकात् तथा अवलगितात् अपि अन्यानि अवशिष्टानि एकादशसंख्यकानि वीथ्यङ्गानि, प्रपञ्च त्रिगत छल प्रमुखानि वीथ्या अङ्गानि यथालाभम् योज्यानि कविना रचनीयानि। यथालाभम् इत्यनेन न तेषाम् अवश्यकर्त्तव्यता इति ज्ञापितम्।

अत्र इदम् अवधेयम् –

भारतीवृत्तेश्चतुर्णामङ्गानाम् मध्ये द्वितीयम् अङ्गं वीथी। तस्या अपि त्रयोदश अङ्गानि सन्तीति इति ग्रन्थकारः पश्चात् सोदाहरणं दर्शयिष्यति। अस्माभिस्तु बोधसौकर्यार्थं प्रागेव तानि सितभाषिण्याम् उल्लिखितानि। तेषामङ्गानाम् मध्ये प्रथमम् उद्घात्यकम्। द्वितीयम् अवलगितम्।

दशरूपककारमते आमुखं (प्रस्तावना) त्रिविधम्—कथोद्घातः, प्रवृत्तकम् तथा प्रयोगातिशयः। परं त्रयोदश वीथ्यङ्गानि अपि आमुखाङ्गानि भवितुं शक्नुवन्ति। तत यथा कथोद्घातादिभिः पात्रप्रवेशः सूचितः स्यात् तद्वत् उद्घात्यकादीनाम् त्रयोदशवीथ्याङ्गानाम् मध्ये येन केन अपि एकतमेन पात्रस्य प्रवेशसूचने अपि न दोषः। तथाहि दशरूपके त्रिविधम् आमुखं तथा वीथ्यङ्गानि वर्णयित्वा धनञ्जयः (ग्रन्थकारः)

लिखति—"एषामन्यतमेनार्थं पात्रं चाक्षिप्य सूत्रभृत्। प्रस्तावनान्ते निर्गच्छेत्ततः वस्तु प्रपञ्चयेत्" इति। श्रीरूपगोस्वामिचरणमतेऽपि आमुखं त्रिविधं, परम् भरतमुनिमतं मानयित्वा तत्र उद्घात्यकेन तथा अवलगितेन इति वीथ्यङ्गद्वयेनापि पात्रप्रवेशः सूचितः स्यात्। तथाहि नाटकचन्द्रिकायाम् —"आमुखाङ्गान्युच्यन्ते कथोद्घातः प्रवर्त्तकम्। प्रयोगातिशय श्चेति तथा वीथ्यङ्गयुग्मकम्। उद्घात्यकावलगितसंज्ञकं मुनिनोदितम्"। शृङ्गारप्रचुरं नाट्य एभिरेव पात्रप्रवेशसूचनं युक्तमिति विविच्य श्रीरूपस्तु इतराणि वीथ्यङ्गानि न लक्षयन्ति।

मन्ये तन्मते यन्नाटकं शृङ्गारप्रचुरं न स्यात् तत्र अन्येन अपि वीथ्यङ्गेन पात्रस्य प्रवेशसूचनं न दोषाय इति। विश्वनाथस्तु आदौ श्रीरूपवत् श्रीभरतमुनिमतम् अनुसृत्य प्रस्तावनायाः (आमुखस्य) त्रयाणां भेदानां मध्ये येन केनापि तथा उद्घात्यकेन एवम् अवलगितेन इति वीथ्यङ्गयुग्मकेन अपि पात्रप्रवेशः आक्षिप्तः स्यात् इति विवेचितवान्। पश्चात् दशरूपकमतम् अनुसृत्य लिखति—आमुखे अन्यानि वीथ्यङ्गानि यथालाभं योज्यानि। अस्य लेखनस्य अयम् आशयः यथा पूर्वोक्तैः पञ्चभि पात्रप्रवेशः आक्षिप्यते, एवं च कुत्रचिन्नाटके अवशिष्टानाम् एकादशानां वीथ्यङ्गानाम् मध्ये येन केन अपि पात्रप्रवेशः आक्षिप्तश्चेत् न दोषः। परं शृङ्गारप्रचुरे नाटके तद् भवेदुत न वा इति अस्मिन् विषये विश्वनाथः मौनत्वं भजति।

किञ्च अवशिष्टानि वीथ्यङ्गानि विश्वनाथः वीथीप्रसङ्गे सोदाहरणं प्रदर्शितवान् किन्तु तेषां किमपि आमुखे योजयित्वा तेन पात्रप्रवेशः उदाहृतः न वा विश्वनाथेन नापि दशरूपककृता धनञ्जयेन। परं दशरूपके असत्प्रलाप इति नाम्ना प्रसिद्धस्य वीथ्यङ्गस्य यो दृष्टान्तः कस्मादपि नाटकात् उद्धृतः, मन्ये तत् खलु वीथाङ्गम् आमुखे योजयित्वा तेन च प्रवेशसूचनस्य दृष्टान्तः, अतोऽस्माभिस्तद् उद्धियते—

अर्चिष्मन्ति विदार्य्यवक्त्रकुहराण्यासृक्कतो वासुके—
रङ्गुल्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान्।
एकं त्रीणि नवाष्ट सप्त षडिति प्रध्वस्तसंख्याक्रमा
वाचः क्रौञ्चरिपोः शिशुत्वविकला श्रेयांसि पुष्णन्तु वः।'

अपिच वीथ्यङ्गानि वर्णयित्वा विश्वनाथः लिखति—

"एतानि चाङ्गानि नाटकादिषु सम्भवन्त्यपि वीथ्यामवश्यं विधेयानि विस्पष्टतया नाटकादिषु विनिविष्टान्यपीहोदाहृतानीति"। अनेन अपि ज्ञायते यत् उद्घात्यकात् तथा अवलगितात् अन्यानि अङ्गानि वीथ्याम् अवश्ययोज्यानि परं नाटके नाटकस्य आमुखे इत्यर्थः। तेषाम् विद्यमानता सम्भवति इति। परं न तेषां तत्र अवश्यकर्त्तव्यता अतः सुष्ठुभणितं "योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपीति"।

Eng. Trans.—Here other varieties of vithi may be added as far as practicable, "Here" implies in the Amukha (Prastavana) Varieties (of the vithi) other than Udghatyaka and Avalagita will be described later on.

Text—नव कुट्टस्तु—

"नेपथ्योक्तं श्रुतं तत्र त्वाकाशवचनं तथा। समाश्रित्यापि कर्त्तव्यमामुखं नाटकादिषु। एषामामुखभेदानामेकं कञ्चित् प्रयोजयेत्॥ तेनार्थमथ पात्रं वा समाक्षिप्यैव सूत्रधृक्। प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रयोजयेत्॥ वस्त्वितिवृत्तम्।

मित—। प्रस्तावनाप्रसङ्गं समाप्ति नेष्यन् नवकुट्टमतमवतारयति—तत्र नाटकादिषु तेषु तेषु नाटकप्रभृतिषु रूपकेषु नेपथ्योक्तं नेपथ्ये वेशरचनागृहे अवस्थितेन केनचित् उच्चारितं वाक्यं श्रुतं सूत्रधारेण स्थापकेन वा आकर्णितम् समाश्रित्य अवलम्ब्य तथा आकाशवचनम् आकाशभाषितम्

केन अपि पात्रेण प्रयोजितम् तथा केन उच्चारितमिति अविज्ञातम् अपि समाश्रित्य अवलम्ब्य - अनयोरेकतरम् अवलम्ब्य इति भावः। आमुखम् प्रस्तावना कर्त्तव्या रचयितव्या कविना इति शेषः। अन्यत् सुगमम्। वस्तु इतिवृत्तम् नाटकीयम् अभिनयम् इति यावत् प्रयोजयेत् आरभेत।

Eng Trans —Nakhakutta on his part—(remarks the following):—

In dramas, an Amukha should be formed, as based on some utterance, from the green-room, or from the air (that is supposed to be) heard (by the Sutradhara), one of the (said types of) Amukhas should be used, whereby the Sutradhara will either refer to the subject matter (in the beginning of the drama) or indicate the arrival of the dramatic person and then make his exit at the end of the prastavana; thereafter will begin the actual commencement of the drama The word "vastu" here stands for the story of the drama.

Text इदं पुनर्व्वस्तु बुधैर्द्विविधं परिकल्प्यते। आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम्॥ अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः। तस्येतिवृत्तम् कविभिराधिकारिकमुच्यते।

वृत्तिः। फले प्रधानफले। यथा बालरामायणे रामचरितम्।

मित— । इदं नखकुट्टकारिकायाम् प्रोक्तं वस्तु नाटकगतम् इति वृत्तम् बुधैः पण्डितैः द्विविधं द्विप्रकारम् परिकल्प्यते स्वीक्रियते। कीदृशम्? एकम् तयोः द्विविधयोरेकम् आधिकारिकम् इति संज्ञां गच्छति। अपरम् च प्रासङ्गिकमिति नाम्ना आख्यायते। ननु किम् आधिकारिकम्? कथं वा तस्य तादृशी संज्ञा? उत्तरं पठति—

अधिकारः खलु फले नाटकस्य प्रधानफले मुख्यव्यापारे इति यावत् स्वाम्यम् स्वामित्वम् कर्त्तृत्वमिति यावत्। नाटकस्य यो मुख्यः व्यापारस्तस्य एव फलभोक्तृत्वम् खलु अधिकारशब्देन लक्ष्यते। अतएव अधिकारी अधिकारवान् खलु तत्प्रभुः तस्य मुख्यफलस्य भोक्ता तस्य मुख्यव्यापारस्य नायक एव अधिकारीति शब्देन लक्ष्यते। तस्य एव अधिकारिणः इतिवृत्तम् चरितकथा आधिकारिकम् उच्यते यतः तदेव अधिकारिणा सम्पृक्तम्। यथा- बालरामायणे रामचरितम् एव आधिकारिकम यतस्तदेव चरितं प्रधानफलभोक्तारम् मुख्यव्यापारनायकम् राममाश्रित्य तिष्ठति।

Eng. Trans.—This "Vastu" (the plot of the drama as spoken of by Nakhakutta) is said by scholars (competent authorities) to be of two varieties ; one is known as Adhikarika and the other Prasangika. (The word) Adhikara implies authority over the (main) issue and (consequently) the Adhikari (the owner) is the master (enjoyer) of the same ; and the story, relative to him is said to be Adhikarika.

Text—श्लोकः। अस्योपकरणार्थन्तु प्रासङ्गिकमिपीष्यते।

वृत्तिः। अस्याधिकारिकेतिवृत्तस्य उपकरणनिमित्तं यच्चरितं तत् प्रासङ्गिकम्। यथा (तत्र) सुग्रीवादिचरितम्।

मित। ननु आधिकारिकं वस्तु लक्षितं प्रासङ्गिकं वस्तु किं नाम ? उत्तरं पठति—अस्य आधिकारिकस्य वस्तुनः उपकरणार्थन्तु उपकरणसाधनाय सम्यक् परिपुष्टिसम्पादनाय यच्च नाटकीयं चरितं तत् खलु प्रासङ्गिकं वस्तु इति कविभिरिष्यते स्वीक्रियते। यथा तत्रैव बालरामायणे श्रीरामचन्द्रचरितस्य परिपुष्टिसाधनाय वर्णितं सुग्रीवादिचरितम्। आदिपदेन बिभीषणादयः लक्ष्यन्ते। प्रासङ्गिकम् आनुषङ्गिकमिति भावः। एवंवि-

भागो दशरूपकसम्मतः। तन्मते प्रासङ्गिकस्य पताकाप्रकरीभेदात् द्विविधत्वम् इति।

Eng. Trans—A Prasangika (vastu) is that which is meant for the (proper) development of the Adhikarika (the character regulating the main issue).

That character is (known as) Prasangika which is (meant) for the (full) implementation of the character guiding the main issue, just as the character of Sugriva and the like in the Bala-ramayana.

मित । प्रस्तावनाप्रसङ्गं सम्यग् विविच्य अधुना अन्यानि वस्तूनि लक्षयति ग्रन्थकार.। तत्र आदौ पताकास्थानकं सलक्षणं प्रदर्शयति। पताका इति नाटकीयासंज्ञा खलु द्विविधं वस्तु लक्षयति- तयोरेकस्मिन् अपरस्य भ्रान्तिमंमूदिति। तयोर्भेदसंस्थापनाय पताकाशब्देन लक्षितं प्रथमं वस्तु 'पताकास्थानकम्' इति संज्ञया अभिदधाति ग्रन्थकारः। अधुना तदेव पताकास्थानकं तथा तस्य चतुर्भेदं लक्षयितुम् प्रवृत्तोऽयम्। अपिच केवलम् पताकेति शब्देन पूर्वोक्तप्रासङ्गिकस्य भेदरूपम् यद्वस्तु लक्ष्यते तत्तु पश्चादेव सोदाहरणं दर्शयिष्यते विश्वनाथेन। [यथा "व्यापि— प्रासङ्गिकं वृत्तं पताकाइत्यभिधयते। यथा रामचरिते सुग्रीवादेः— पृः १२६] ।

Text– श्लोकः। पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि।

वृत्तिः। इह नाट्ये।

मित -। ननु किं नाम पताकास्थानकमिति अपेक्षायाम् पताकास्थानकं लक्षयति --

Text– श्लोकः। यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकन्तु तत्॥

मित --। प्राकरणिकस्य भाविनोऽर्थस्य सूचकं पताकावत् भवति इति तत् पताकास्थानकमिति दशरूपकटीकायाम् धनिक। श्रीरूपकृत लक्षणं तु सरलतरं --यथा, अर्थस्य तु प्रधानस्य भाव्यवस्थस्य सूचकम्। यदागन्तुकभावेन पताकास्थानकं हि तत्। यत् खलु भाव्यवास्थस्य

भविष्यति संघटिष्यते या अवस्था तया अवस्थया समेतस्य प्रधानस्य अर्थस्य मुख्यप्रतिपाद्यस्य वस्तुनः आगन्तुकभावेन अतर्कितप्रकारेण सूचकं ज्ञापकम्—तत् हि पताकास्थानकमिति ।

Eng. Trans.—In the dramatic matter, Patakasthanaka should be inserted (given effect to) with careful consideration.

Eng. Trans.—Patakasthanaka is that in which while a differant topic is in consideration, some other thing of like nature is presented in an un-thought of manner (the said other thing being suggested or hinted upon, by the aforesaid different thing).

Text—वृत्तिः । तद्भेदान् आह—

श्लोक । सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः । पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥

वृत्तिः । यथा रत्नावल्याम्—'वासवदत्तेयमिति राजा यदा तत्कण्ठपाशं मोचयति, तदा तदुक्त्या 'सागरिकेयम्' इति प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका ? अलमलमतिमात्रम् साहसेन' इत्यादि । अत्र फलरूपार्थसम्पत्तिः पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्कृष्टा ।

मित—। पताकास्थानकस्य चतुरः भेदान् दर्शयति - इदं खलु प्रथमं प्रथमप्रकारम् पताकास्थानकम् इति अभिज्ञ: परिकीर्त्तिम् अभिहितम् । किम् ? यत्र सहसैव अकस्मादेव अचिन्तितपूर्व्वमेव इत्यर्थ उपचारातिशयात् आविर्भावेन अधिकतरानन्दसम्पादनात् गुणवती उत्कृष्टा अर्थसम्पत्तिः फललाभः स्यात् ।

श्रीरूपेणापि प्रथमपताकास्थानकस्य एतत् लक्षणं स्वीकृतं परं तस्य प्रयोगस्तु तन्मते विभिन्नप्रकारः । तत् यथा ललितमाधवनाटके श्रीराधा

प्रतिविम्बं दृष्ट्वा कथयति—"सोऽयम् जीवितबन्धुरिन्दुवदने भूयः समासादितः"। अत्र प्रतिविम्बे सोऽयं जीवितवन्धुरिति उपचारप्रयोगेन (व्यवहारप्रदर्शनेन इत्यर्थः) भाविनः कृष्णसङ्गमस्य सूचना—सहसार्थसम्पत्तिरूपमिदं पताकास्थानकम्।

Eng. Trans—That is said to bo the first (variety of) Patakasthanaka whoro a better achievement by nature moro delightful, occurs all on a sudden. As in Ratnavali when the king removes the noose from round her neck, taking her to be Vasavadatta, he (suddenly) recognised her as Sagarika, on hearing her voice, (and then said) "How is it? my beloved Sagarika! Away with your too much rashness" and so forth. Here the acquisition of the object (that was yearned for) proves more covetable (is of better stuff) than the former (that was expected), by its very nature.

Text—श्लोकः। वचः सातिशयश्लिष्टं नानाबन्धसमाश्रयम्। पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम्।

वृत्तिः। यथा वेणयां सूत्रधारः—"रक्तप्रसाधितभुवः क्षतविग्रहाश्च।

स्वस्थाः भवन्तु कुरुराजसुताः सभृत्याः॥"

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेतृमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानकम्।

मित—। इदं द्वितीयं द्वितीयप्रकारम् पताकास्थानकं परिकीर्तितम्। किं तत्? उच्यते यत्र सातिशयश्लिष्टम् अतिशयेन सह वर्त्तमानम् इति सातिशयम्। सातिशयं यथा तथा श्लिष्टम् न केवलं एकस्मिन् एव शब्दे श्लेषः अपि तु एकाधिके शब्दे श्लेषो वर्त्तते—इत्येवं द्योतयति

सातिशयपदम्। अतएव एकाधिकार्थप्रतिपादनपरैः एकाधिकैरेव पदैः समन्वितम् इत्येव अर्थः। तथा नानाबन्धसमाश्रयं नाना बन्धाः बिशेषणपद्योजना समाश्रयः समावेशः यत्र तादृशम्। एकाधिकविशेषण-पदेन विशेषितम् इत्यर्थः। वचो वाक्यं वर्त्तते यत्र तदिति। श्रीरूपस्तु नानावन्धसमाश्रयम् इत्यत्र "काव्यवन्धरसाश्रय" मिति पठति। काव्य-वन्धस्य रसेन युक्तमित्यर्थः। अयमेव पाठः साधीयाम् प्रतिभाति। अयं विचारः— वचः सातिशयश्लिष्टम् इति कथनात् कुत्रश्लेषः स्वीक्रियते " विशेषणे, बिशेष्ये उभयत्र वा " न किञ्चित् स्पष्टतः कथितं विश्वनाथेन। परमत्र प्रसङ्गे "रक्तप्रसाधितभुव" इत्यादि यदुदाहरणं प्रदर्शितं तत्र विशेषणे एव श्लेषो दृश्यते। अतएव अस्य उदाहरणस्य बलात "बच." इत्यादेरयमर्थः आयाति - यत्र सातिशयश्लिष्टम् वचः - अनेकार्थ प्रति पादनपराणि एकाधिकानि बिशेषणानि यत्र इति। परं तथा सति "नानावन्धसमाश्रयम्" इत्यस्य अंशस्य "अनेकबिशेषणसम्बन्धविशिष्टम्" इति श्रीमद्भिः हरिदाससिद्धान्तवागीशैः कृतः (अस्माभिरपि स्वीकृतश्च) अर्थः निरर्थकः स्यात्। बिशेषणानाम् सद्भाव "वचः" इत्यादिना तत्र आक्षिप्तत्वात्- इति इयम् खलु समस्या अत्र उदेति। अस्याः समाधानं तु द्विधा भवितुम् शक्यम्। प्रथमम्— नानावन्धसमाश्रयम् इत्यस्य पूर्व्वोक्तम् अर्थं बिहाय अर्थान्तरं स्वीक्रियताम्। तद् यथा— नाना विविधाः वन्धाः वृत्तान्तानि समाश्रयाः उल्लेखणीया यत्र श्लेषेण इति। श्लिष्टैः विशेषणपदैः यत्र एकाधिका घटना अक्षिप्यते इति। परम् अनेन अर्थेन प्रदर्शितस्य दृष्टान्तस्य सङ्गतिः कष्टेन एव साध्यते।

द्वितीयम् --"वचः" इत्यादिना विशेषणे विशेष्ये बा यत्र कुत्रापि श्लेषः स्यात्। प्रदर्शितं दृष्टान्ते विशेषणं श्लिष्टं, विशेष्ये श्लेषोनास्ति इति सत्यम्। परं यत्र विशेष्ये श्लेषः तत्रापि एकाधिकानां श्लिष्टविशेषणानाम् आवश्यकता अपरिहार्य्या इति एतत् नानावन्धसमाश्रयमिति अनेन दृढी-क्रियते। काव्यवन्धरसाश्रयमिति श्रीरूपकृतं पाठे काव्यप्रबन्धस्य नाटक-

वस्तुन. यः रस अङ्गीभूतः रसस्तेन एव रचितं सातिशयश्लिष्टं वचः इति अर्थः। स एवाथः सुन्दरतरः। अस्य पताकास्थानकस्य उदाहरणं यथा वेणीसंहारे। उदाहृतश्लोकस्तु कथोद्‌घातप्रस्तावनाप्रसङ्गे पूर्णरूपेण उद्धृतः—अत्र तु प्रयोजनसाधनाय अंशतः उद्धि्रयते। अस्य व्याख्या - रक्तेन अनुरागेण प्रसाधिता स्वायत्तीकृताः भूः राष्ट्रम् यैस्तादृशाः। तथा क्षतः सन्धिवलात् तिरोहितः विग्रहः समरः येषां तादृशाः। सभृत्याः कुरुराजसुता स्वस्थाः सुस्थमनसः भवन्तु। अत्र श्लेषेण प्राप्तोऽर्थः यथा—रक्तेण रुधिरेण प्रसाधिता अक्षिना भू धरणी यैस्तादृशाः। तथा क्षता. समरास्त्रेण भिन्नाः विग्रहाः शरीराणि येषां तादृशाः सभृत्याः कुरुराजसुता स्वस्थाः रणमृत्युम् प्राप्य स्वर्गस्था. स्वर्गगामिनः इति यावत् भवन्तु। 'अत्र' अस्मिन् उदाहरणे "रक्तादीनाम् "रक्तम् विग्रह. एवं च स्व इति पदत्रयाणाम् "रुधिर शरीरार्थहेतुक श्लेषवलेन" रक्तशब्दस्य रुधिरम्, विग्रह-शब्दस्य शरीरम् एवं च स्व इत्यस्य स्वर्ग इति अर्थकरणात् उत्थितो यः श्लेषस्तस्य वलात् "वीजार्थप्रतिपादनात्" नाटकस्य यो वीजार्थः भीमसेनस्य क्रोधोद्रेकेण सञ्जात. युधिष्ठिरस्य रणोद्योगरूपस्तस्य सूचनात् 'नेतृमङ्गलप्रतिपत्तौ' नेतुर्नायकस्य युधिष्ठिरस्य (भीमसेनस्य इति वा यतः वेणीसंहारेधीरोद्धतो भीमसेन एव नायक) "मङ्गलप्रतिपत्तौ" भविष्यद्राज्यप्राप्तिरूप—शुभसूचने सत्यां द्वितीयं पताकास्थानकम्। अत्र पताकास्थानकस्य सामान्यलक्षणस्य संगतिस्तु इत्थम् – नाटकीयप्रतिनाय-कस्य दुर्योधनस्य सन्धिवलात् अर्द्धराज्यलाभरूपे मङ्गलमयेऽर्थे चिन्तिते सति (इति यत्रार्थे चिन्तितेऽन्यस्मिन् इत्यस्य संगतिः) आगन्तुकेन भावेन भीमसेनक्रोधोद्रेकरूपेण तल्लिङ्ग भविष्यति राज्यलाभप्रापणे मङ्गलचिह्नेन चिह्नितः अन्योऽर्थः युधिष्ठिरस्य समरोद्योगरूपोऽर्थः अत्र प्रयुज्यते इति। पताकास्थानके भविष्यत खलु अर्थस्य सूचनम् आवश्यकम्। श्रीरूपेणनापि ऽत्र प्रसङ्गे भविष्यदर्थसूचनरूपम् उदाहरणं स्वकृतात् ललितमाधवनाटकात् नाटकचन्द्रिकायाम् उद्धृतम्।

Eng. Trans.--That is said to be the second (type of) Patakasthana, where the pointing statement consists of words with double meanings couched up in (qualifying) adjectives. As in the Venisamhara—The Sutradhara (reads)—May the sons of the king of the Kurus together with their partisans (adherants) rest in peace in their territory brought under control through conciliation with (the apprehension of) the war avoided. (The second meaning-) May the sons of the king of the Kurus with their adherents besmear the earth with the blood of their bodies wounded (in battles) and (there after) depart for the next world. Here the words such as "Rakta" (and vigraha) admit of double meanings or entendres implying "blood" and "body" (respectively) and thereby indicating the substance of the maincurrent (the "vija" of the drama), predicts the (future) prosperity of the hero and hence it is an instance of the Patakasthana of the second type

N. B.--The substance of the main current of the drama is the martial enterprise of King Yudhisthira, given effect to by Bhima's ire inflamed by the acceptance of the second meaning by him (Bhima) that plays the part of a new factor (आगन्तुक भाव) ।

Text- श्लोकः । अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ।

वृत्तिः । लीनम् अव्यक्तार्थं, श्लिष्टेन सम्बन्धयोग्येन अभिप्रायान्तर-प्रयुक्तेन प्रत्युत्तरेण उपेतम्, सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम् । यथा वेण्यां द्वितीयेऽङ्के --

कञ्चुकी—देव भग्नं भग्नं । राजा -केन ? कञ्चुकी—भीमेन । राजा—कस्य ? कञ्चुकी—भवतः । राजा --आः किं प्रलपसि ?

कञ्चुकी (सभयम्)—देव! ननु ब्रवीमि भग्नं भीमेन भवतः।
राजा—धिक! वृद्धापसद! कोऽयमद्यते व्यामोहः। कञ्चुकी-देव!
न व्यामोहः। सत्यमेव—

भग्नं भीमेन भवतो मरुता रथकेतनम्। पातितं किङ्किणीजालबद्धा-क्रन्दमिवक्षितौ। अत्र दुर्य्योधनोरुभङ्गरूप- प्रस्तुतसंक्रान्तम् अर्थोपक्षेपणम्।

मित--। इदं। खलु। तृतीयं (पताकास्थानकम्) उच्यते कथ्यते। किं तत्? यत् तु लीनम् एवं च अर्थोपक्षेपकं भवत्। लीनं तथा सविनयं तथा श्लिष्टप्रत्युत्तरोपेतं एवं च अर्थोपक्षेपकं भवेत्। लीनम् इति व्याचष्टे—अव्यक्तार्थम्। अव्यक्तः न सुस्पष्टः अर्थः प्रतिपाद्यविषयः यस्मिन् तदिति अविस्पष्टप्रतिपाद्यविषयम् इति लीनशब्दस्य अर्थः। सविनयम् इति व्याख्याति- नी धातोरच् प्रत्यये नय इति स्यात्। विशिष्टः विशेषेण वा नयः इति विनयः निश्चय इतिभावः। विनयेन निश्चयेण निश्चयप्रगत्या विशेषेण निश्चयस्य प्राप्तिः अवधारणम् इति भावः) इति यावत् सहितं सम्पद्यते जायते यत् तादृशम्। श्लिष्टप्रत्युत्तरो—पेतमिति- श्लिष्टं श्लेषसमन्वितं यत् प्रत्युत्तरं तेन उपेतं युक्तम्। वस्तु-विषयात् अतिरिक्तोयोऽप्रस्तुतविषयस्तेन सह सम्बन्धं सम्पर्कम् स्थापयितुम् योग्यं समर्थं श्लेषशब्दार्थद्वारेण इति भावः यत् अभिप्रायान्तरं वक्तुरन्योऽभिप्रायः तेन प्रयुक्तं यत् प्रत्युत्तरं तेन उपेतं समन्वितम्। एवं यत् अर्थोपक्षेपकं अर्थस्य नाटकीयप्रधानविषयस्य उपक्षेपकम् स्यात् तदिति।

उदाहरणं यथा वेणीसंहारस्य द्वितीयेऽङ्के—भीमेन- भयानकेन। श्लेषार्थः—भीमसेनेन अयं भाव—प्रदर्शिते दृष्टान्ते कञ्चुकिना विहितम् प्रत्युत्तरम् अस्ति। भीमेन—अत्र श्लेषः। भयानकेन इति कञ्चुकिनः आशयः- परं तु भीमसेनेन इति दुर्य्योधनेन अवबोधनम्। अतएव एतत् प्रत्युत्तरं श्लिष्टम्। अपिच भयङ्कर इत्यर्थद्योतकेन भीमपदेन

अपेक्षितं विशेष्यपदं (पश्चात् श्लोके उल्लिखितं मत्ता इति पदम् इत्यर्थः) अत्र नास्ति। अतएव अत्र अस्पष्टार्थत्वात् लीनत्वम्। एवं च "भवतः" इत्यत्रापि केन सह पदम् इदम् अन्वेति इति अस्पष्टीकरणाभावात् लीनत्वम्। किञ्च "सत्यमेव" इति कथनात् विशेषनिश्चयप्राप्त्या सविनयत्वम्। एवं च दुर्य्योधनस्य उरुभङ्गरूपस्य अर्थस्य (नाटकीयस्य प्रधानविषयस्य) उपक्षेपणात् सूचनात् अर्थोपक्षेपकत्वम्। अतएव श्लोकोक्तं लक्षणं तेन सह संगतिवशादत्र तृतीयं पताकास्थानकम्। सामान्यलक्षणेन च सह अस्य संगतिरस्ति, सा तु एवम्भूता–अस्मिन् प्रसङ्गे रथकेतनभङ्गरूपे अन्यस्मिन् अर्थे चिन्तिते सति आगन्तुकेन (आगामिना इत्यर्थः) गदायुद्धरूपभावेन तल्लिङ्गोऽन्योऽर्थः भग्नत्वचिह्नेन चिह्नितः दुर्य्योधनस्य उरुभङ्गरूपोऽर्थः प्रयुक्त इति अस्य पताकास्थानकत्वम्।

श्रीरूपस्तु दशरूपकमतम् अनुसृत्य एतत् त्रिविधं पताकास्थानकम् इति सामान्य संज्ञया, तथा वक्ष्यमाणं चतुर्थप्रकारं तु तुल्यविशेषणमिति संज्ञया अभिदधाति। तुल्यसंविधानम् तुल्येतिवृत्तमिति दशरूपकटीकायां धनिकः।

Eng. Tran.—That is said to be the third (type of) Patakasthanaka which has got a reference to the main current of the drama (i. e. which anticipates in a way the principal incident of the drama), which is (couched up) in a form not very clear and is endowed with replies admitting of double meaning or entendre, and which ends in a definite assurance (i. e. firm determination of the fact by the man who gives the reply).

The word "Lina" (in the text) implies one which does not appear in a clear form as far as the meaning of the same is concerned; the word "slistapratyuttoropetam" in the sloka means which consists of replies,

intended for (the conveyance of) a different idea but capable (at the same time) of bearing upon the main incident of the drama and (the word) "Savinayam" stands for what is effected with a particular determination or conclusion, and such is the third Patakasthana. As in the second act of the Veni (Samhara)—

The Chamberlain—your Majesty ! broken.

The king—By whom ?

Ch.—By Bhima (by a terrible or hard ... .., and also by Bhimasena).

King.—Of whom ?

Ch.—Of your Majesty.

King.—Ah ! What do you prattle ?

Ch.—(with fear) your Majesty ! I say that by Bhima (a hard gale or by Bhimasena) has been torn your.........

King. Fie on you ! you old fool ! how has confusion (bewilderment) come upon you to-day.

Ch.—Your Majesty ! (there is) my bewilderment ! it is a fact (that).

By a hard (terrible) gale has been torn and thrown upon the ground, the flag of your chariot, as it were with a cry, raised by the (ringing of the) small bells (attached to the same). Here there is an anticipation (of the principal incident), in as much as—the topic in hand bears upon the same in the shape of the breaking of the thigh of Duryyodhana.

Text—श्लोकः। द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्।

वृत्तिः। यथा रत्नावल्यां—

उद्दामोत्कलिकाविपाण्डुररुचिं प्रारब्धजृम्भां क्षणा-
दायासंश्वसनोद्गमैरविरलैरातन्वतीमात्मनः।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्य ति मुखं देव्याः करिषाम्यहं।
अत्र भाव्यर्थः सूचितः।

मित -। तत् खलु परम् तृतीयात् परम् चतुर्थमित्यर्थ. अपिच परम् उत्कृष्टम् पताकास्थानकम्। किम्? द्व्यर्थः काव्ययोजितः सुश्लिष्टः प्रधानार्थान्तराक्षेपी (यो) वचनविन्यास इति अन्वयः। प्रधानार्थान्तरापेक्षी इत्यपि पाठः कुत्रचित् दृश्यते। द्वौ अर्थौ यस्य स द्व्यर्थः। अर्थद्वयम् प्रकाशयन् वचनविन्यासः वाक्योपस्थानम्। स तु काव्ययोजितः सुसम्बद्धभावेन एव निवेशितः—न तु असम्बद्धभावेन। ननु द्वाभ्याम् अर्थाभ्याम् सह काव्यस्य कीदृशः सम्बन्धः? समाधत्ते सुश्लिष्टः सु शोभनरूपेण एव श्लिष्टः श्लेषयुक्तः। एकेन अर्थेन सह प्रस्तुत विषयः (प्रासङ्गिकविषयः) अन्वेति—द्वितीयेन सह तु अप्रस्तुतविषयः। स तु अप्रस्तुतविषयः कः? उत्तरयति—प्रधानार्थान्तराक्षेपी।

यस्मिन् प्रसङ्गे द्व्यर्थ वचनविन्यासः अस्ति, तम् प्रसङ्गम् अतिक्रम्य यदि स वचनविन्यासः श्लेषलब्धेन द्वितीयेन अर्थेन काव्यस्य मूलीभूतम् विषयम् सूचयति—तर्हि चतुर्थं पताकास्थानकम् स्यात् इति भावः। यथा रत्नावली नाटिकायाम्—श्लोकस्य अन्वय.। उद्दामोत्कलिकाम् विपाण्डुर-रुचिम् प्रारब्धजृम्भाम् अविरलैः श्वसनोद्गमैः क्षणादात्मनः आयासम् आतन्वतीं समदनाम् अन्याम् नारीमिव उद्दामोत्कालिकां विपाण्डुररुचिम् प्रारब्धजृम्भाम् अविरलैः श्वसनोद्गमैः क्षणादात्मनः आयासम्

आतन्वतीम् इमाम् उद्यानलताम् अद्य पश्यन् अहम् ध्रुवं देव्याः (वासव-दत्तायाः) मुखं कोपविपाटलद्युतिं करिष्यामि। अत्र विशेषणानि श्लिष्टानि एकेन अर्थेन नारीं तथा अपरेण अर्थेन च उद्यानलतां विशेषयन्ति। अतएव विशेषणनाम् उभयपक्षे तुल्यरूपेण प्रयुक्तत्वात् अस्य पताका-स्थानकस्य तुल्यविशेषणम् इति संज्ञा दशरूपके कृता। श्रीरूपगोस्वामि चरणेन अपि सा स्वीकृता। दशरूपके अपि एष एव श्लोकः उदाहृतः।

'अत्र' अस्मिन् श्लोके "भाव्यर्थः" भावी भविष्यति संघटिष्यमानः अर्थः विषयः "सूचितः" ज्ञापितः। तथाहि "उद्दामोत्कलिका"—दि विशेषणैः विशेषिताम् अन्याम् नारीमिव—इत्यत्र यद्वस्तु उत्प्रेक्षितं—तदेव पश्चात् यथार्थतः घटिष्यते यतः नायकः उदयनः पश्चात् "उद्दामोत् कलिका" दि विशेषणविशिष्टां आत्मनि (उदयने) समर्पितचित्तां सागरिकां प्रणयभराकुलेन नयनेन द्रक्ष्यति तच्च विज्ञाय वासवदत्ताया. मुखं क्रोधेन रक्तवर्णं भविष्यति। अतः सुष्ठूक्तम् अत्र भावी अर्थः सूचित इति। अस्य श्लोकस्य चतुर्थपताकास्थानकस्य विशेषलक्षणेन सहसङ्गतिस्तु एवम्प्रकारा—अत्र विशेषणानि द्वौ अर्थौ प्रकाशयन्ति अतः अस्मिन् श्लोके द्व्यर्थविन्यासः। स तु काव्ययोजितः यतः स नाटिकायाः वस्तुना सार्द्धं सुसंबद्धः—न तु उद्भटरूपः। तथा अयं सुश्लिष्टः श्लेषसनाथः यतः एकेन अर्थेन उद्यानलतादर्शनम् संबध्नाति द्वितीयेन च श्लेषलब्धेन अर्थेन नाटिकायाः मूलविषयम् राजकर्त्तृकसागरिकादर्शनम् सूचयति अतएव अयं प्रधानार्थान्तराक्षेपी यतोऽयम् प्रधानम् नाटिकाया. मूलप्रतिपाद्यं अर्थान्तरम् उद्यानलतादर्शनात् अपरम् राजकर्त्तृकसागरिकादर्शनरूप—विषयम् आक्षिपति व्यनक्ति इति भावः। ननु राजकर्त्तृकं सागरिका-दर्शनरूपम् एव वस्तु नाटिकायाः प्रधानार्थः इति कथं ज्ञायते? उच्यते पश्चात् वक्ष्यमाणे नाटिकालक्षणे इदं पठ्यते—"नवानुरागा कन्याऽत्र नायिका नृपवंशजा। संप्रवर्त्तेत नेताऽस्याम् देव्यास्त्रासेन

शङ्कितः"—अनेनैव ज्ञायते यत् नायकेन नृपेण प्रधानमहिषीत्रासशङ्कितेन नवानुरागायाः कन्यायाः नायिकायाः अनुसरणम् एव नाटिकायाः मूल-प्रतिपाद्यम्। पताकास्थानकस्य यत् सामान्यलक्षणं तेन सह अस्य श्लोकस्य संगतिस्तु इत्थं ज्ञेया—नवमालिकादर्शनरूपे तथा तस्मादेव हेतोः वासव-दत्तामुखस्य कोपविपाटलद्युति करणरूपे अर्थे चिन्तिते सति आगन्तुकेन (पश्चाद्भाविना इति भावः) भावेन सागरिकया सह प्रणयरूपेणभावेन तल्लिङ्गोन्योऽर्थः दर्शनचिह्नेन चिह्नितः विषयान्तरः—आग्रहभरेण तथा सकामहृदयेन सागरिकानिरीक्षणरूपः इत्यर्थः तथा तेन च वासवदत्ता-मुखस्य कोपविपाटलद्युति-करणरूपश्चार्थः प्रयुज्यते इति अनेन प्रकारेण। अस्य पताकास्थानकस्य दृष्टान्तान्तरं तु ललितमाधवे पञ्चमे अङ्के अस्ति; तच्च श्रीरूपेण नाटकचन्द्रिकायामुक्तम् तत्रैव च द्रष्टव्यम्।

ननु "द्व्यर्थो वचनविन्यासः सुश्लिष्टः" इत्यनेन वचनेन चतुर्थपताकास्थानके श्लेषसद्भावस्य आवश्यकता। एवं च "वचः सातिशयश्लिष्टम्" इत्यनेन द्वितीयपताकास्थानकेऽपि श्लेषसद्भावस्य प्रयोजनीयता—तर्हि उभयोर्भेदः कुत्र? उच्यते "प्रधानार्थान्तराक्षेपी इत्यनेन एव द्वितीयात् चतुर्थस्यभेदः सूचितः। चतुर्थे तु श्लेषशब्देन अर्थेन नाटकस्य मूलप्रतिपाद्यस्य आक्षेपः स्यात् यथा दृष्टं पुर्व्योक्ते श्लोके। द्वितीये तु न मूलप्रतिपाद्यं वस्तु तस्य अङ्गीभूतम् किमपि अप्रधानं श्लेषशब्देन अर्थेन सूच्यते। यथा द्वितीयस्य दृष्टान्तः 'रक्तप्रसाधित भूवः' इत्यादिकः तत्र नाटकस्य मूलप्रतिपाद्यं तु युधिष्ठिरस्य राज्याभिषेकः। स तु श्लेषशब्देन अर्थेन न सूच्यते—सूच्यते हि तस्य राज्यप्राप्तेर्हेतुमूलं भीमसेनक्रोधेन उपबृं-हितः युधिष्ठिरस्य उत्साह एव इति द्वितीयचतुर्थयोर्भेदः स्पष्ट—इति व्याख्यातानि चत्वारि पताकास्थानकानि। "प्राकरणिकस्य भाविनोऽ-र्थस्यसूचकम् रूपम् पताकावद् भवतीति पताकास्थानकम्"—इति पताका-स्थानवर्णिते संज्ञायाः सार्थकता प्रदर्शिता दशरूपकटीकाकृता ग्रन्थकार-भ्रात्रा धनिकेन।

Eng. Tran.—The next (the fourth and a very fine one) Patakasthanaka is that wherein lies a statement, admitting of double meaning or entendre, inserted within (the body of) the drama, (in a befitting manner), the (said) double (entendre) etendre being well balanced referring, in as much as, to the main current of the drama (which, it thus anticipates).

Thus in the Ratnavali—

To-day, casting my eyes upon the garden-creeper which is in blossoms all over, and (consequently) presents a white spectacle, having (thus) set to opening, and which exhibits its fatigue for a moment, due to its being instantly wavered by the breeze, the creeper that coils round a Madanaplant, just like (upon) a female (other than Vasavadatta) that pines deeply being seized by cupid (i. e. overcome by Love), and has waxed pale in her complexion that has set her on to yawning and betrays her lassitude, for a moment, through constant drawing of (deep) sighs, I shall certainty render the face of my queen (Vasavadatta) crimson or red with wrath.

Here is indicated (anticipated) the incident to take place in future.

Text—वृत्तिः। एतानि चत्वारि पताकास्थानांनि क्वचिन्मङ्गलार्थम् क्वचिदमङ्गलार्थमपि सर्व्वसन्धिषु भवन्ति। काव्यकर्त्तु रिच्छावशाद्भूयोऽपि भवन्ति। यत् पुनः केनचिदुक्तं—"मुखसन्धिमारभ्य सन्धिचतुष्टये क्रमेण भवन्ति" इति तदन्ये न मन्यन्ते। एषामत्यन्तमुपादेयानाममनियमेन सर्व्वत्रापि सर्व्वेषामपि भवितुम् युक्तत्वात् ॥

मित—। एतानि पूर्व्वोक्तानि चत्वारि पताकास्थानानि क्वचित् कस्मिंश्चित् अमङ्गलार्थम् नायकस्य अमङ्गलं सूचयितुम् अङ्गलानि, क्वचित्

कुत्रचिद्वा अमङ्गलार्थम् नायकस्य अशुभं ज्ञापयितुम् प्रवृत्तानि सन्ति अनियमेन मुखप्रतिमुखादिसर्व्वसन्धिषु अपि भवन्ति प्रयुज्यन्ते। काव्यकर्त्तुः नाटककृतः इच्छावशात् भूयोऽपि पुनरपि भवन्ति एकम् पताकास्थानकम् एकाधिकवारम् प्रयुज्यते। अनेन चत्वारि पताकास्थानकानि चतुर्भ्योऽपि वारेभ्यः अधिकवारम् प्रयुक्तानि स्युः। तत्र नायकस्य मङ्गलसूचकान्येव पताकास्थानकानि चतुर्षु दृष्टान्तेषु प्रदर्शितानि, अमङ्गलसूचनार्थम् प्रयुक्तस्य पताकास्थानकस्य उदाहरणं श्रीरूपकृते ललितमाधवे अस्ति। भवभूतिकृते उत्तररामचरितेपि अस्ति—"रामः .... यदि परमसह्यस्तु विरहः। (प्रविश्य) प्रतिहारी देव! उपस्थितः"। (अस्माभिस्तु प्राकृतपाठम् परित्यज्य अत्र संस्कृतपाठः एव उत्थापितः बोधसौकर्य्यार्थम्)। अत्र अचिरभाविनिर्व्वासनं सीतादेव्याः सूचयदिदम् पाताकास्थानकम् नायकस्य श्रीरामस्य अमङ्गलमपि ज्ञापयति इति अमङ्गलार्थमिदं प्रयुक्तम्। परमतं दूषयति—यत् पुनः केचित् नाट्यशास्त्ररचयितारः कथितवन्तः—"मुखसन्धिमारभ्य सन्धि—चतुष्टये क्रमेण भवन्ति" इति। तदन्ये विश्वनाथप्रभृतयः न मन्यन्ते न स्वीकुर्व्वन्ति। तर्हि किम् एषाम् मतम्? उच्यते—"एषाम्" चतुर्व्विधानामपि पताकास्थानकानाम् "अत्यन्तमुपादेयानाम्" अनियमेन एव "सर्व्वत्रापि" सर्व्वेषु अपि (पञ्चसु इत्यर्थः) सन्धिषु "सर्व्वेषामपि" चतुर्णामपि पताकास्थानकानाम् "भवितुम् प्रयोगम् विधातुम् "युक्तत्वात्" न्याय्यत्वात्। यस्मिन् कस्मिन्नपि सन्धौ यस्य कस्य अपि पताकास्थानकस्य प्रयोगः स्यात् इति भावः।

Eng. Tran.—These four Patakasthanakas which, on some occasions, indicate good (in future) and portend evil on others, may be (used) in all the sandhis. They (i. e. one and the same variety of Patakasthanaka) may be repeated (i. e. used more than once on different

occasions) in accordance with the desire of the author of the drama ; what has been declared by some (authorities) namely, that they (the four Patakasthanakas) are used, one after another, in the four sandhis beginning with the Mukhasandhi, is not taken into accouut (tolerated) by others (i. e. other authorities) ; it being (perfectly) legitimate that highly agreeable as they (the four Patakasthanakas) are, they i. e. all of them may exist everywhere (i. e. in all the five sandhis of a drama), without any restriction.

Text—श्लोकः। यत् स्यादनुचितं वस्तु नायकस्य रसस्यवा।
विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत् ॥

वृत्तिः। अनुचितम् इतिवृत्तम् यथा, रामस्य छद्मना वालिवधः। तच्च उदात्तराघवे नोक्तमेव, वीरचरिते बाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः।

मित—। नायकादि चरित्राङ्कनम् द्विधा सम्भवेत् आदर्शरूपेण (idealistic), तथा वास्तवरूपेण (realistic) च। आदर्शरूपेण एव नायकस्य चरित्रोद्घाटनम् कर्त्तव्यम् इति संस्कृतनाट्यशास्त्रप्रणेतृनाम् मतम्। तन्मतम् अनूद्य विश्वनाथः उपदिशति—यद् वस्तु यद् खलु इतिवृत्तम् नायकस्य अनुचितम् अकर्त्तव्यम् स्यात् तस्य करणे नायको महच्चरित्र इति आदर्शस्य हानिः स्यात्। नायकेन यथार्थत एवं आचरितम् यत् कर्म्मं तस्य महत्त्वस्य परिपन्थि, यत् तस्य आदर्शत्वप्रदर्शने असङ्गतं स्यादिति भावः—तथा यत् खलु वृत्तम् रसस्य शृङ्गारादिनवरसानाम् मध्ये कस्यापि रसस्य विरुद्धम् स्यात्—तस्मिन् रसे यादृशम् वस्तु उपयुक्तम् किञ्चिद्वस्तु यदि तादृशम् उपयोगि न स्यादपितु तस्य विपरीतमेव भवेत्—तर्हि तत् तादृशम् वस्तु ग्रन्थकारेण परित्याज्यम् वर्ज्जयितव्यम् न उल्लेखनीयम् इति यावत्—वा अथवा तत् वस्तु अन्यथा अन्यरूपेण कविः

प्रकल्पयेत् प्रदर्शयेत्। तद्वस्तु तेनैव प्रकारेण वर्णयेत् येन नायकस्य चरित्रेणसह तस्य न कापि असङ्गतिः प्रत्युत सामञ्जस्यमेव स्यादितिभावः। यथा रामेण छद्मना गुप्तभावेन वालिवधः—स तु रामचरित्रस्य महत्त्वम् विरुणद्धि एवं च तस्य आदर्शस्य प्रदर्शने विघ्नं साधयति अतएव तत् इतिवृत्तम् मायुराजेन विरचिते उदात्तराघवनाटके नोक्तमेव प्रत्युत परित्यक्तम् इत्यर्थः। एतत् खलु "परित्याज्यम्" इत्यस्य उदाहरणम्। "अन्यथा प्रकल्पयेत्" इत्यस्य दृष्टान्तं दर्शयति—महाकविश्रीभवभूतिविरचिते महावीरचरिते रावणसौहृदेन वाली रामवधार्थम् आगतः (ततः स्वयमेव) रामेण हतः इति (अनेन प्रकारेण) रामचरित्रस्य महत्त्वेन सह यथा अविरोधः स्यात् तथा इदं वस्तु अन्यथा कृतम् अन्यप्रकारेण चित्रितम् इति।

एवं यत् खलु रसस्य विरुद्धं स्यात् तदपि नोल्लेखनीयम् अन्यप्रकारेण वा प्रकल्पनीयम्—एतयोरेकतरस्य अकरणे दोषस्य उत्पत्तिर्भवेत्—स च दोषः पश्चात् सप्तमे परिच्छेदे विश्वनाथेन वक्तव्यः। अत्र प्रसङ्गे श्रीरूपः कथयति—"अविरुद्धं यत् वृत्तम् रसाभिव्यक्तयेऽधिकम्। तथाप्यन्यथये-द्धीमान न वदेद्वा कदाचन"। यतः "अपारे काव्यसंसारे कविरेव प्रजापतिः। यथास्मै रोचते विश्वं तथेदं परिवर्त्तते। शृङ्गारीचेत् कविः जातं रसमयं जगत्। वीतरागश्चेत् नीरसं सर्वमेव तत्। व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया" इत्यादिधन्यालोकोक्तम् आनन्दवर्द्धनाचार्य्यैः प्रतिपादितम्॥

Eng. Tran.—What incident is improper for (the character of) a hero or what militates against some (particular) sentiment, should be avoided or depicted in (quite) a different light. (The case of) an improper incident is the assasination (killing in secret) of Bali by Rama—which has not thus been stated in the Udatta-

raghava ; (and) in the Viracharita, Bali rushed to kill Rama but was (in his turn) killed by Rama (himself) and thus it (the said incident) has been depicted in a differeut perspective.

Text—श्लोकः । अङ्केष्वदर्शनीया या वक्तव्यैव च सम्मता । या च स्याद्वर्षपर्य्यन्तम् कथा दिनद्वयादिजा ॥ अन्या च विस्तरा कथा सूच्या साथौपक्षेपकैर्बुधैः ।

वृत्तिः । अङ्केष्वदर्शनीया कथा युद्धादिकथा ।

मत — । नाटके वस्तुनः द्विधा विभागः कर्त्तव्यः । स च यथा सूच्यं तथा असूच्यं वस्तु । असूच्यमपि दृश्यत्वश्रव्यत्वभेदेन द्वैविध्यं भजते । तथाहि दशरूपके—द्वेधाविभागः कर्त्तव्यः सर्व्वस्यापीह वस्तुनः । सूच्यमेवभवेत किञ्चिद् दृश्यश्रव्यमथापरम । श्रीरूपोऽपि—वस्तुसर्वं द्विधा सूच्यमसूच्य-मितिभेदतः । ननु को नाम सूच्यः विषयः ? उच्यते—नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः इति दशरूपके, रसहीनम् भवेद् यत्तु वस्तु तत् सूच्य-मुच्यते इति नाटकचन्द्रिकायाम् । यत् खलु रसहीनम् वस्तु सूच्यं, तत् केन प्रकारेण सूच्यम् ? तस्य सूचनस्य किं वा कारणम् इति विवेचयति श्रीमान् विश्वनाथः—या कथा अङ्केषु अदर्शनीया अङ्कमध्ये प्रदर्शयितुम् अयोग्या तथाहि "दुराह्वानं बधोयुद्धं राज्यदेशादिविप्लवः" इत्यादिना प्रोक्तानि यानि खलु वृत्तानि अङ्ककलेवरे प्रवेशयितुम् निषिद्धानि अतएव कविना न रचयितव्यानि अथच या कथा वक्तव्या अवश्यमेव वाच्या इति सम्मता बुधानाम् अभिमता—यतः तेषामनुल्लेखे सति पूर्व्ववृत्तान्तेन सह परवृत्तान्तस्य संगति र्दुघटा भवेत् ; अपि च या कथा यत् वृत्तम् दिनद्वयादिजा वर्ष-पर्य्यन्तं व्याप्ता वा स्यात् । दिनद्वयेन तस्मात् अधिकेन वा दिनेन निष्पन्ना या कथा । एवं च अन्या श्लोकेऽस्मिन् अपरा विस्तरा एकाङ्कव्यापिनी अपि सुविस्तृता या कथा, ततः सर्वा एव बुधैः कविभिः अर्थोपक्षेपकैः वक्ष्यमाणैः पञ्चप्रकारैः [illegible] । परिस्टनीया । तथाहि अ[illegible]

उक्तम्, नानेकदिननिर्वर्त्यकथया सम्प्रयोजितं इति, तेन अङ्के एकाधिकदिवसनिष्पन्नायाः कथायाः प्रवेशो निषिद्धः। तथा नातिविस्तर—इति एकदिनव्यापिन्या अपि विस्तृतायाः एवं च विस्तृतिवशादेव रसहीनायाः कथाया अङ्कमध्ये प्रवेशनम् . निषिद्धम्। नथाहि पूर्वापर-सामञ्जस्यरक्षणाय ईदृशी दिनद्वयात् आरभ्य पूर्णम् संवत्सरम् व्यापृता कथा अथवाएकदिनव्यापिनी अपि अन्याविस्तरा कथा, अपिच 'दूराह्वानम्" इत्यादिना अङ्ककलेबरे निवेशनायोग्या कथा या अवश्यं वक्तव्या स्यात् तर्हि बक्ष्यमाणानाम् पञ्चविधानाम् अर्थोपक्षेपकानाम् विष्कम्भकादीनां मध्ये कमपि अवलम्ब्य सा कथा सूच्या इति भावः।

Eng, Tran.—What incident is not to be inserted (i, e. not prescribed for delineation) in the (body of an) act but what is intended to be described (as a necessity) what incident covers a period of two or more days extending up to a year ; and what tale is an extensive one (even though it covers a single day), should be indicated, by wise writers, by means of Arthopaksepakas like Vishkambhaka etc. (to be enumerated ahead).

Incidents not to be presented in the body of an act, refer to battles and the like (as said before),

Text—श्लोकः। वर्षादूर्ध्वन्तु यद्वस्तु तत् स्याद्वर्षादधोभवम्।

वृत्तिः। उक्तंहि मुनिना—

> अङ्कच्छेदे कार्यं मासकृतं वर्षसञ्चितं वापि।
> तत् सर्व्वं कर्त्तव्यं वर्षादूर्द्धं न तु कदाचित्॥

एवञ्च चतुर्दशबर्षव्यापिनमपि रामवनबासे ये ये बिराधवधादयः कथांशाः, ते ते वर्षवर्षावयवदिनयुग्मादीनामेकतमेन सूचनीया न विरुद्धाः।

मित—। ननु "या च स्याद्वर्षपर्य्यन्तं कथादिनद्वयादिजा" इति निर्देशेन द्विनद्वयादारभ्य वर्षं यावत् निष्पन्नं वृत्तम् अर्थोपक्षेपकैः सूचनीयम्। परं रामायणमहाभारतादिषु पुराणेषु च वहनि खलु वृत्तान्तानि सन्ति यानि खलु वर्षात् अधिक एव काले घटितानि; तेषां केन प्रकारेण नाटककलेवरे निवेशनं स्यात्? उत्तरं पठति - यत् वस्तु यन्नाम वृत्तं वर्षात् ऊर्ध्वम् एकस्मात् संवत्सरात् अधिकं एव काले संघटितम् इति रामायणादिषु प्रोक्तम् तत् तत् खलु वृत्तं वर्षाद् अधोभवम् पूर्णसंवत्सरात् न्यूनतरं एव समये संघटितम् इति एतत् कृत्वा अर्थापक्षेपकैः सूचनीयम् इति भावः। एतस्य मतस्य समर्थनं श्रीभरतमुनिसम्मतिं दर्शयति—"उक्तं" निर्दिष्टं हि "मुनिना" श्रीभरतेन भारतीयनाट्यशास्त्रस्थदशमे त्रयस्त्रिशत्संख्यकश्लोके इति भावः। स च श्लोकः उद्ध्रियते श्रीमता विश्वनाथेनात्र-अङ्कच्छेदे इत्यादि।

Eng. Tran. What incident has (actually) happened after (the lapse of) a year, should be taken or stated as to have occured within (the compass of) a year. Thus it has been asserted by the sage what has occured in a month or in a year should be inserted at the end of an act (i. e, in one of the five Arthopakshepakas); but all other incidents that have taken place after (the expiry of) a year, should never be described as such (i. e. should not be desbribed as to have taken place after the passing away of a year). Thus the incidents such as the killing of Viradha that happend during Ram's exile covering a period of fourteen years, should be indicated as to have happend within a year, a part of year, or a couple of days and the like, and thus they will not militate against the rules of drama or dramaturgy.

Text—श्लोकः। दिनावसाने कार्य्यं यद्दिनेनैवोपपद्यते। अर्थोपक्षेपकैर्वाच्यमङ्कच्छेदं विधाय तत्॥

मित।—यत् कार्य्यं नाटकीयो वृत्तान्तो दिनेन एव एकेन दिवसेन उपपद्यते निष्पन्नतया कीर्त्त्यते तत् वृत्तं दिनावसाने वाच्यम् दिनस्य अवसाने परिणतभागे एव निष्पन्नम् इति एवंरूपेण दर्शयितव्यम्। ननु कुत्र दर्शनीयम्? किम् अङ्कस्य एव कलेवरे? उत्तरयति—नहि नहि, अङ्कच्छेदं विधाय अर्थोपक्षेपकैः (तत् वाच्यम्)। अङ्कस्यछेदं परिसमाप्तिं विधाय कृत्वा तदनन्तरं रचितैः अर्थोपक्षेपकैरेव वाच्यम्। पञ्चविधानाम् अर्थोपक्षेपकाणाम् मध्ये एकतरम् विरचय्य तादृशं सम्पूर्णदिननिष्पन्नम् कार्य्यं दिनस्य परिणामे एव निष्पन्नम् इति एतद्रूपेण एव तत्र अर्थोपक्षेपके वर्णनीयम् इति सरलार्थः। एवम्विधस्य वृत्तान्तस्य अङ्ककलेवरे सन्निवेशनं स्यात् इति ज्ञेयम। अतएव सुष्ठुक्तं श्रीरूपेण अङ्कलक्षणप्रसङ्गे—"दिनार्द्ध दिनयोर्योग्यवस्तुना परिकल्पितः।"

Eng. Tran. What incident is said to have taken a (complete) day for its consummation (or completion), is to be described as to have occurred at the end (at the declining part) of the day, by means of (one of the five) Arthapaksepakas (Viskkambhaka etc.) after having put an end to the Act (on hand).

Text-" वृत्तिः। के ते अर्थोपक्षेपका इत्याकाङ्क्षायामाह—

श्लोकः। अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ-स्यादङ्कमुखमित्यपि॥

मित। पञ्चप्रकाराः खलु अर्थोपक्षेपकाः। ते यथा विष्कम्भकः, प्रवेशकश्च तथा चूलिका अङ्कावतारः अथ अङ्कमुखम् इति। अर्थमङ्ककलेवरे सन्निवेशायोग्यं विषयम् उपक्षिपन्ति ज्ञापयन्ति सूचयन्तीति यावत्, ये ते अर्थोपेक्षपका इति व्युत्पत्तिः। अर्थान् सरसवृत्तान्तान् उपक्षिपन्ति उपस्थापयन्तीति अर्थोपक्षेपकाः इति दर्पणटीकायाम् कुसुमप्रतिमायाम् श्रीहरिदास सिद्धान्तवागीशमहोदयः। "विशेष विशेष अर्थ वा नटेर मनोभाव

प्रकाश पाय बलिया इहार नाम अर्थोपक्षेपक' इति नाटकचन्द्रिकायाम् श्रीलरासविहारीसांख्यतीर्थचरणाः। परन्तु नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः "तथा अर्थोपक्षेपकैः सूच्यं पञ्चभिः" इति च दशरूपके। एवं "रसहीनं भवेद् यत्तु वस्तु तत् सूच्यमुच्यते"—तथा अर्थोपक्षेपकैरेतत् सूचयेत् सुष्टु पण्डितः" इति च नाटकचन्द्रिकायाम्। एनयोर्मतम् पर्य्यालोच्य ज्ञायते यत् अर्थोपक्षेपके सरसवृत्तान्तस्य उपस्थापनम् न स्यात अपि तु नीरसस्य तथा अनुचितस्य वस्तुविस्तरस्य एव। अतएव अस्माभिः सिद्धान्तवागीशस्य व्याख्याम् उपेक्ष्य—अर्थम् अङ्ककलेवरे सन्निवेशनायोग्यं वस्तु उपक्षिपन्ति इति एवम्भूता व्याख्या कृता।

Eng. Tran.—To answer the question—which or what are these Arthopakshepakas, the author says :—Five are Arthopaksepakas ; these five are—Visakambhaka, Praveshaka, Chulika, Ankavatara and Anka-mukha.

Text—श्लोकः। वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तुविष्कम्भ आदावङ्कस्य दर्शितः। मध्येन मध्यमाभ्याम् वा पात्राभ्याम् समप्रयोजितः। शुद्धः स्यात् तु सङ्कीर्णो नीचमध्यमकल्पितः॥

वृत्तिः। तत्र शुद्धो यथा मालतीमाधवे श्मशाने कपालकुण्डला। सङ्कीर्णो यथा रामाभिनन्दे क्षपणककापालिकौ।

मित—। तथाहि नाटकचन्द्रिकायाम् "भवेद्विष्कम्भको भूतभाविवस्त्वंशसूचकः"। विष्कम्भाति अन्तरालवर्त्तिनः वृत्तान्तस्य सूचनं कृत्वा पूर्व्ववृत्तान्तं परवृत्तान्तेन सह संलगयति इति विपूर्व्वात् स्कम्भधातोर्ण्वुल् प्रत्ययः—स च विष्कम्भकः कदापि उत्तमेन नाटकीयपात्रेण प्रयोजितः न स्यात्—प्रयोजितः स्यात् हि मध्यमेन नीचेन (अधमेन) वा पात्रेण। अनेन अस्य द्वैविध्यं दर्शयति-स विष्कम्भः शुद्धः स्यात् शुद्धविष्कम्भकः इति भवेत्—यदि स मध्येन एकेन एव पात्रेण, वा अथवा मध्यमाभ्याम् पात्राभ्याम् द्वाभ्याम् एव मध्यमश्रेणीभुक्ताभ्याम् सम्प्रयोजितः अभिनीतः

स्यात्। एवं च स विष्कम्भस्तु सङ्कीर्णः मिश्रः स्यात् सङ्कीर्णविष्कम्भकः अथवा मिश्रविष्कम्भकः भवेत् यदि स नीचमध्यमकल्पितः। एकजातीय-मध्यपात्रकल्पितः विष्कम्भकः शुद्धः—तथा विभिन्नजातीयपात्रकल्पितः विष्कम्भः सङ्कीर्णवा मिश्र इति उभयोर्भेदस्तु स्पष्ट एव। शुद्धस्य उदाहरणं—यथा मालतीमाधवप्रकरणे श्मशाने कपालकुण्डला। अत्र एकेन मध्यम-पात्रेण प्रयोजितः विष्कम्भकः। सङ्कीर्णस्य दृष्टान्तो यथा रामाभिनन्दे नाटके मध्यमेन क्षपणकेन तथा नीचेन कापालिकेन प्रयोजितः विष्कम्भकः। "मध्यमाभ्याम् वा पात्राभ्याम्"—इत्यत्र वा शब्दस्य अनुक्तसमुच्चय एव अर्थं इति स्वीकृत्य मध्यमैर्बहुभिः पात्रैर्वा सम्प्रयोजितो विष्कम्भकः शुद्धः स्यात् इति मन्यन्ते श्रीहरिदाससिद्धान्तवागीशाः। श्रीरूपचरणैरपि एवं यथा "शुद्धःकेवलमध्योऽयमेकानेककृतो भवेत्" इति नाटकचन्द्रिकायाम्। दशरूपकेऽपि दृश्यते "एकानेककृतः शुद्धः"; परं अस्य टीकाकृत् धनिकः एतन्न मन्यते यतः अस्यांशस्य ईदृशी टीका तेन कृता—"एकेन द्वाभ्याम् शुद्धो भवति" इति। किञ्च "आदावङ्कस्य दर्शित" इत्यनेन प्रथमादपि अङ्कात् प्रागेव विष्कम्भस्य सन्निवेशो न दूषणीयः। दृष्टान्तो यथा रत्नावली-नाटिकायाम्।

Eng. Tran.—A Viskambha (—ka) is an indicator of that portion of the (dramatic) story which intervenes between what has gone and what is to come, (i. e. it is a connecting link between the past and the future incidents that constitute or form the body of the whole story of the drama)—couched up in brief words and set in the (very) beginning of an act. It is termed "Pure" when played on by middle-class men; and "Mixed" when played on by one middle-class and another low-class man.

An instance of the former (Pure) is in the Malati

Madhava wherein Kapala-Kundala is in the cremation ground. As for "Mixed"—it is in Ramabhinanda played on by a Ksapanaka and a Kapalıka (नीचपात्र) ।

Text—अथ प्रवेशकः—

श्लोकः। प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भकेयथा ॥

वृत्तिः। अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः। वेणयामश्वत्थामाङ्के राक्षसमिथुनम्।

मित—। प्रवेशकं लक्षयति—अनुदात्तोक्त्या= गम्भीरत्वात् देवभाषात्वात् वा उदात्ता संस्कृतभाषा। तस्याः अन्या अनुदात्ता प्राकृतभाषा। अनुदात्ता=प्राकृतभाषा। अनुदात्ता या उक्तिः प्राकृतभाषानिबद्धा वाणी तया उपलक्षितः, यद्वा अनुदात्तस्य नीचस्य उक्तिःतया इति उपलक्षणे तृतीया, यद्वा प्रयोजित इत्यस्याः क्रियायाः करणे तृतीया। प्राकृतभाषानिबद्धया वाणयालक्षितः नीचपात्रप्रयोजितः नीचेन अधमेन निम्नश्रेणीभुक्तेन इति यावत्। पात्रेण नाटकीयजनेन किञ्च सामान्येन निर्देशात् नीचाभ्याम् पात्राभ्याम् वा नीचैः पात्रैर्वा प्रयोजितः अभिनीतः तथा अङ्कद्वयान्तः अङ्कद्वयस्य अन्तः मध्ये विनिवेशितः प्रवेशकः विज्ञेयः बोध्यः। शेषं प्रवेशकलक्षणस्य अवशिष्टः भागः यथा यादृशः विष्कम्भके—तादृशः। तथाविष्कम्भकवत् अयमपि संक्षिप्तार्थः एवं च वृत्तवर्त्तिष्यमानानां कथांशानाम् निदर्शकः। "अनुदात्तोक्त्या नीचपात्रप्रयोजितः" इति इदमेव वैशिष्ट्यं विष्कम्भकात् प्रवेशकं पृथककरोति। इति द्वयोरङ्कयोर्मध्ये अस्य अवस्थितिः—अतएव प्रथमाङ्के प्रवेशको न स्यात् यतः 'प्रथमाङ्कात् पूर्व्वम् नास्ति अङ्कान्तरम्। प्रवेशस्य दृष्टान्तो यथा वेण्यां वेणीसंहारनाटके अश्वत्थामाङ्के अश्वत्थाम्नः वीरत्वप्रकाशके तृतीये अङ्के राक्षसमिथुनं राक्षसमिथुनेन अभिनीतोऽशः। भासस्वप्ननाटके द्वितीयेऽपि एवम्।

Eng. Tran.—Pravesaka is to be known as played by persons of inferior order in colloquial language between

the two acts: its other characteristics are the same as those of Viskambhaka.

By the statement "between two acts", is implied its prohibition in the first act. An example (of Pravesaka) is (the part played by) the Rakhsasa twin in the Aswathama act or third Act of the Venisamhara.

Text—वृत्तिः। अथ चूलिका—

श्लोकः। अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका।

वृत्तिः। यथा वीरचरिते चतुर्थाङ्कादौ—"(नेपथ्ये) भो भो वैमानिकाः, प्रवर्त्तन्ताम् रङ्गमङ्गलानि इत्यादि, "रामेण परशुरामः जितः" इति नेपथ्ये पात्रैः सूचितम्।

मित—। अनन्तरप्राप्तां चूलिकां लक्षयति जवनिका तिरस्करिणी (curtain), तस्याः अन्तः अभ्यन्तरम् इति अन्तर्जवनिका (गजदन्तादि)। तत्र संस्थैः अवस्थितैः जवनिकायाः अभ्यन्तरे एव—न तु रङ्गमञ्चे—अवस्थितैः पात्रैः अर्थस्य अङ्ककलेवरे निवेशनायोग्यस्य नीरसस्य तथापि अवश्यमेव वक्तव्यस्य वस्तुनः सूचना विज्ञापनं खलु चूलिका। नेपथ्य-पात्रेणार्थसूचनं चूलिका इति दशरूपकटीकायां धनिकः। किञ्च अन्तर्जवनिकासंस्थैरित्यत्र वहुवचनेन ज्ञाप्यते यत् चूलिकायाः अभिनेतृणाम् सर्व्वेषामेव पात्राणाम् जवनिकायाः अन्तराले एव उवस्थितिः भवेत्। एतदेव स्पष्टीकृतवान् श्रीरूपः—यथा नाटकचन्द्रिकायाम् - पात्रैर्यवनिकान्तःस्थैरदृश्यैर्यातु निर्मिता। आदावङ्कस्यमध्ये वा चूलिका नाम सा भवेत्। तेन यत्र कस्यचित् पात्रस्य जवनिकान्तराले अवस्थितिः—कस्यचिद्वा रङ्गमञ्चे तत्र चूलिका न स्यात्। अतएव अभिज्ञानशकुन्तले दुर्व्वाससः शापव्यापारः विष्कम्भकः एव न तु चूलिका यतस्तत्र दुर्व्वाससः एव जवनिकायाः अन्तराले अवस्थितिः—परन्तु अन्ययीः अनसूयाप्रियंवदयोः रङ्गमञ्चे अवस्थितिः—अपि च श्रीरूपस्य "आदावङ्कस्य मध्ये वा" इति

लक्षणेन ज्ञायते यत अङ्कस्य आदौ, तथा अङ्कयोर्मध्ये च चूलिकायाः सद्भावः तेन प्रथमाङ्केऽपि चूलिका स्थातुं शक्नुयात्। चूलिकादृष्टान्तो यथा भवभूतिकृते महावीरचरितनाटके चतुर्थाङ्कस्य आदौ—नेपथ्ये जवनिकायाः अन्तराले कथोपकथनं भवति। यथा—भो भो वैमानिकाः! प्रवर्त्तन्ताम् साध्यन्ताम् रङ्गमङ्गलानि—

कृशाश्वान्तेवासी जयति भगवान् कौशिकमुनिः
सहस्रांशोर्वंशो जगति विजयि क्षत्रमधुना।
विनेता यत्रारे जगदभयदानव्रतधरः
शरण्यो लोकानां दिनकरकुलेन्दुर्विजयते।

इत्यनेन रामेण परशुरामोजितः इति नेपथ्यस्य आदौ—पात्रैरेव सूचितम्। अन्यदृष्टान्तो यथा—उत्तररामचरिते द्वितीयाङ्कस्य आदौ—(नेपथ्ये) स्वागतं तपोधनायाः। (ततः प्रविशति तपोधना) इति नेपेथ्यपात्रेण बासन्तिकया आत्रेयीसूचनात् अत्रांशे चूलिका।

Eng. Tran.—Chulika is that which indicates (reveals) some incident through (the agency of) persons behind the scene. As, in the beginning of the fourth act of Vira charita—"(Behind the scene) Oh! aeronauts! (oh! you skyrovers! perform the auspicious theatrical actions and so forth; here the fact that Parsurama has been defeated by Rama is revealed by persons (that remain) behind the scene.

अथ अङ्कावतारः—

Text—श्लोकः। अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः॥
यत्राङ्कोवतरत्येषोऽङ्कावतार इति स्मृतः॥

वृत्तिः। यथा अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावत्तीर्णः।

मित—। अयं खलु अर्थोपक्षेपकः अङ्कावतार इति नाम्ना प्रसिद्धः इत्यर्थः। दृष्टान्तो यथा, अभिज्ञानशकुन्तलनाटके—पञ्चमाङ्कस्य अवसाने तथापात्रै राजश्यालरक्षिपुरुषद्वयधीवरैः सूचितः प्रयोजितः अर्थोपक्षेपकः। सः अङ्गविशेष इव अङ्गीभूतः इव अवतीर्णः आविर्भूतः। अयं भावः—पञ्चमाङ्कस्य अवसाने, तथा राजश्यालादिभिः प्रयोजितः अर्थोपक्षेपकः राज्ञः दुष्यन्तस्य शकुन्तलायाः कृते अनुशयं घोषयति. स च अनुशयः षष्ठाङ्के पूर्णरूपेण चित्रितः—अतएव षष्ठाङ्कः अर्थोपक्षेपकसूचितवृत्तान्तोपजीवी तेन इदं वक्तुम शक्यते यत् षष्ठाङ्कः पञ्चमाङ्कान्ते अवस्थितस्य अर्थोपक्षेपकस्य अङ्गविशेष इव नाटके सन्निविष्टः अतः सोऽर्थोपक्षेपकः अङ्कावतारः इति संज्ञां गच्छति।

Eng. Tran.—That is said to be Amkavatara.—wherein, of course at the end of an act (i. e. of the previous act) is indicated the (subject-matter of the) act following, which thus appears as a part of the same (i. e. Ankavatara).

द्रष्टव्यम्—श्लोकस्थितान् शब्दान् अनुसृत्य अस्माभिरीदृशी व्याख्या कृता। परमस्य व्याख्यान्तरम् अपि सम्भवति तदनुयायी इंलण्डीयानुवादश्च प्रदर्श्यते। यथा—अङ्कान्ते कस्यचिदङ्कस्य अवसाने पात्रैः यः अङ्कः सूचितः स एव अङ्कावतार इति स्मृतः। तदङ्कस्थ अङ्कावतार-नाम्ना विवक्षितस्य तस्य अर्थोपक्षेपकस्य अविभागतः अङ्गीभूतः इव अङ्कः परवर्त्ती अङ्कः अवतरति आविर्भवति। यथा शाकुन्तले पञ्चमाङ्कस्य अवसाने पात्रैः सूचितः अर्थोपक्षेपकः। तस्य एव अङ्गविशेष इव षष्ठाङ्कः अवतीर्णः, यतः स एव षष्ठाङ्कवृत्तान्तस्य उपजीव्यत्वं भजति। इयमेव व्याख्या साधीयसीति मन्यामहे।

Eng. Tran.—Ankavatara is that which is indicated (revealed or played) by (dramatic) persons, at the end of an act and which connects the act following, as if a part of its own.

As in the Abhijnana Sakuntalam-it is indicated by persons at the end of the fifth act, The sixth act appears as it were, a part of it.

Comp—"अङ्कान्तरे अथवाङ्के निपतति यस्मिन् प्रयोगमासाद्य वीजार्थ-
युक्तियुक्तो ज्ञेयो अङ्कावतारोसौ"—Bharata।

Text—वृत्तिः। अथ अङ्कमुखम्—

श्लोकः। यत्र स्यादङ्के एकस्मिन्नङ्कानाम् सूचनाखिला। तदङ्क-मुखमित्याहुर्वीजार्थख्यापकञ्चतत्।

वृत्तिः। यथा—मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भुरिवसुप्रभृतीनाम् भाविभूमिकानाम् परिक्षिप्तकथाप्रवन्धस्य च प्रसङ्गात् सन्निवेशं सूचितवत्यौ।

मित—। अत्र यस्मिन् क्षेत्रे एकस्मिन् अङ्के अङ्कानां सर्व्वेषाम् अपरेषाम् अङ्कानाम् अखिला सम्पूर्णा सूचना विज्ञापना स्यात्--एकस्मिन्नेव अङ्के सर्व्वेषाम् अपरेषाम् अङ्कानाम् मूलप्रतिपाद्यं वस्तु सूचितं स्यात् इति भावः तत् "अङ्कमुखम्" आहुः, तत् च अङ्कमुखम् वीजार्थख्यापकम् भवेत्। "अल्पमात्रं समुद्दिष्टं वहुधा यत् विसर्पति। फलस्य प्रथमो-हेतुर्बीजम् तदभिधीयते" इति लक्षणाक्रान्तं वीजम् (पश्चात् कथयिष्यते), नाटकस्य यत् मूलतः एव प्रतिपाद्यं वस्तु तदत्र अङ्कमुखे सूचितं स्यादिति भावः। उदाहरणं यथा मालतीमाधवप्रकरणे प्रथमाङ्कस्य "आदौ"। श्रीरूपोऽपि अङ्कमुखस्य एवं प्रकारं लक्षणं स्वीकरोति। अस्य दृष्टान्ता-न्तरं तु श्रीरूपकृते ललितमाधवे अस्ति। तत्र प्रथमाङ्के गार्गी तथा पौर्णमासी सर्व्वेषामेव अङ्कानाम् मूलप्रतिपाद्यं संक्षेपेण सूचितवत्यौ। परं धनञ्जयकृते दशरूपके अस्य विभिन्नं लक्षणं दृश्यते। धनञ्जयस्य भ्राता धनिकः प्रोक्तस्य ग्रन्थस्य स्वकृतटीकायाम् समवलोकाख्यायाम् तल्लक्षणं विवृतवान्। श्रीमान् विश्वनाथस्तु स्वयमेव तन्मतम् अत्र आलोचयति।

Eng. Tran.—That is said to be ankamukham wherein is done the summary of all the acts of a drama in a single act ; it is an indicator of the very seed (बीज) of the drama. As in the Malati-madhava, in the beginning of the first act, Kamandaki and Avalokita indicated in passing, the sum and substance of the whole story concerning Bhurivasu and others in whose roles, actors are to appear afterwards.

Text—अथ दशरूपकमतमवतारयति—

श्लोकः। अङ्कान्तपात्रैर्वाङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्।

वृत्तिः। अङ्कान्तपात्रैरङ्कान्ते प्रविष्टैः पात्रैः। यथा—वीरचरिते द्वितीयाङ्कान्ते—

"(प्रविश्य) सुमन्त्रः। भगवन्तौ वशिष्ठविश्वामित्रौ भवतः सभार्गवानाह्वयतः।

इतरे ·क्व भगवन्तौ ? सुमन्त्रः—महाराजदशरथस्यान्तिके।

इतरे—तत् तत्रैव गच्छावः।" इत्यङ्कपरिसमाप्तौ "ततः प्रविशन्ति उपविष्टा वशिष्ठविश्वामित्रपरशुरामाः"—

इत्यत्र पूर्व्वाङ्कान्ता एव प्रविष्टेन सुमन्त्रपात्रेण शतानन्दजनककथाविच्छेदे उत्तराङ्कमुखसूचनादङ्कास्यमिति। एतच्च धनिकमतानुसारेणोक्तम्। अन्ये तु "अङ्कावतारेणैवेदं गतार्थम्" इत्याहुः।

मित—। इदं लक्षणं "वा" इत्यंशवर्त्ति, दशरूपके दृश्यते "यथा" इत्यारभ्य "अङ्कास्यमिति यावत् नट्टीकायाम् धनिक-कृतायाम् दृश्यते। "वा" अथवा अत्र पूर्व्वलक्षणेन सह विकल्पः। अङ्कान्ते एव पात्रम् अङ्कान्तपात्रम्। अङ्कस्य अवसाने प्रविष्टैः पात्रैः छिन्नाङ्कस्य छिन्नः पूर्व्वस्मादङ्कात् विश्लिष्टः अङ्कः परवर्त्तीयोऽङ्कस्तस्य अर्थस्य विषयवस्तुनः सूचनात् प्रकाशनात् अङ्कास्यं भवेत्। विश्लिष्टस्य उत्तराङ्कमुखस्य सूचनं तद्बलेन उत्तराङ्कावतारोऽङ्कास्यम्" इति धनिकः। दृष्टान्तः यथा श्रीभवभूति

विरचिते महावीरचरिते इतरेषामुवाक्येन अङ्कस्य अवसाने सति "ततः प्रवशन्ति" इत्यत्र पूर्व्वाङ्कान्तस्य अन्ते कृतप्रवेशेन सुमन्त्ररूपेण नाटकीय-पात्रेण शतानन्दस्य तथा जनकस्य कथाविच्छेदे सति उत्तराङ्कस्य मुखस्य-परवर्त्तिनः अङ्कस्य प्रारम्भस्य सूचनं प्रकाशनम् कृतं तेनायमंशः अङ्कास्यमिति आख्यायते। परं धनिकस्य इदं मतं सर्व्वे तु न स्वीकुर्व्वते। यतः "इदम्" प्रोक्तं उदाहरणम् अङ्कावतारेण एव अङ्कावतारस्य लक्षणेन एव गतार्थम्—अतः प्रोक्ते स्थाने अङ्कावतार एव विद्यते। यद्वा "इदम्" अङ्कमुखस्य एतत् लक्षणं अङ्कावतारेणव गतार्थं प्राप्तविषयम् अन्तर्भुक्तम् इति यावत्।

Eng. Trans.—Or, Amkasya (Amkamukha) occurs, when the subject-matter of the act to follow is indicated by dramatic persons at the end of the previous act.

By dramatic persons at the end of the (previous) act implies "by dramatic persons, that appear at the end of the (previous) act ; as in the Viracharita at the end of the second act -(entering) Sumantra—The venerable Vasistha and Viswamitra summon you all (together) with Bhargava.

Others.—Where are their venerable selves ?

Sumantra.—By the side of the King Dasaratha.

Others.—Then we shall go there —" Thus at the end of the act, "Then enter Vasistha, Viswamitra and Parasurama", in this portion, the beginning of the following act, in the continuance of the conversation of Satananda and Janaka, is indicated by the dramatic person Sumantra, entering at the end of the former act, and hence here is (a case of) Amkasya. This is said, in accordance with the assertion of Dhanika (in Dasarupaka Tika), Others remark—"This is incorporated in amkavatara."

Text—श्लोकः। अपेक्षितं परित्यज्य नीरसं वस्तु बिस्तरम्। यदा सन्दर्शयेच्छेषमामुखानन्तरम् तदा। कार्य्यो विष्कम्भको नाट्ये आमुखाक्षिप्त-पात्रकः।

वृत्तिः। यथा रत्नावल्यां यौगन्धरायणप्रयोजितः।

मित—। अत्र दशारूपकमतमनुसृत्य विषम्भकादिरचनप्रणाली प्रदर्श्यते। श्लोकोऽयम् दशरूपकेऽपि अंशतः दृश्यते। तथाहि—आदौ विष्कम्भकं कुर्य्यादङ्कं वा कार्य्ययुक्तितः इति दशरूपके। ननु आदौ यत्र विष्कम्भक एव रचयितव्यस्तत्र कः खलु नियमः? उत्तरं पठति—अपेक्षितम् इत्यादिना। ननु नीरसं वस्तु अर्थोपक्षेपकैरेव सूच्यमिति प्रागेव उक्तम्। यदा अपेक्षितम् नाट्यवस्तुनः सम्पक्प्रकाशनाय आकाङ्क्षितं नीरसम् विरक्तिजनकं (अतएव सूच्यं) वस्तु विस्तरम् वृत्तान्तबाहुल्यं परित्यज्य शेषं नीरसस्य वस्तुविस्तरस्य अवशिष्टांशः - यस्य अकथने नाटकीयस्य वस्तुनः सम्यक् परिस्फुटनं न स्यात् तादृशम् अवश्यवक्तव्यम् नीरसवस्तुबाहुल्यस्य अंशविशेष इति भावः सन्दर्शयेत् नाटकरचयिता सूचयितुम् इच्छेत्, तदा कविना नाट्ये स्वकृते रूपके आमुखानन्तरं प्रस्तावनायाः परमेव बिष्कम्भकः रचयितव्यः अपि च येन पात्रेण विष्कम्भकः अभिनेयः स्यात् तस्य आगमनं तु आमुखेनैव सूचनीयं इति भावः। दृष्टान्तोयथा रत्नावलीनाटिकायाम् प्रस्तावनायाः परमेव यौगन्धरायणेन अभिनीतः विष्कम्भको दृश्यते। तत्र यौगन्धरायणोक्त प्रवेशस्तु "ननु अयं मे यवीयान भ्राता गृहीतयौगन्धारयाणभूमिकः प्राप्तएव" इति आमुखेनैव आक्षिप्तः।

Eng. Trans.—When is left out an unpleasant big topic that demands to be recounted, and (for this) only a portion of which is (actually) recounted, then it is to be done in the drama through a Viskambhaka immediately following the Amukha—the Amukha itself pointing to

the entrance of the actor running the Viskambhaka. As in the Ratnavali the Viskambhaka run by Yaugandharayana.

[N. B.—As both विष्कम्भ and विष्कम्भक are seen, so derive also as—विष्कभ्नातीति विष्कम्भः पचाद्यच्। स एव विष्कम्भकः, स्वार्थकः। ण्वुल् gives विष्कम्भक only]

द्रष्टव्यम्।—केचित्तु "विष्कम्भः" इति उपलक्षणेन प्रवेशकादेरपि ग्रहणम् स्वीकुर्व्वन्ति।

तेन तन्मते आदौ विष्कम्भकवत् क्वचित् प्रवेशकादयः अपि स्युरिति।

Text—श्लोकः। यदा तु सरसं वस्तु मूलादेव प्रवर्त्तते। आदावेव तदाङ्कः स्यादामुखाक्षेपसंश्रयः।

वृत्तिः। यथा शाकुन्तले।

मित—। ननु आमुखात् परं कुत्र आदौ विष्कम्भकः रचयितव्यः—तत् ज्ञातम्। अधुना कथय आमुखात् अनन्तरं कुत्र आदौ अङ्क एव रचयितव्यः इति जिज्ञासाम् प्रतिवक्ति—यदा तु मूलादेव प्रथमादारभ्य एव सरसं रसमयं वस्तु प्रवर्त्तते तदा आमुखाक्षेपसंश्रयः आमुखेन प्रस्तावनया एव आक्षिप्तपात्रप्रवेशसूचना अङ्कः (न तु विष्कम्भकः) आदौ अग्रे आमुखात् अव्यवहितपरमेव इत्यर्थः स्यात्, नाटककारः रचयेत्। दृष्टान्तो यथा शाकुन्तले अभिज्ञानशकुन्तलनाटके। तत्र 'एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा" इति आमुखेन आक्षिप्तपात्रप्रवेशः अङ्कः आमुखादनन्तरमेव प्रवर्त्तते। नाट्यवस्तु अपि तत्र सरसम्। (अयं श्लोकः अविकलमेव दशरूपकात् गृहीतः)।

Eng. Tran. When an attractive subject-matter has its start from the very beginning, then an act should be

at first (i. e. immediately after the Prologue) set, the entrance of the actor therein, being referred to by the Amukha (Prologue) itself. As in our Sakuntalam.

Text—श्लोकः। विष्कम्भकाद्यैरपि नो वधो वाच्योऽधिकारिणः। अन्योन्येन तिरोधानं न कुर्य्याद्रसवस्तुनोः॥

वृत्तिः। रसः शृङ्गारादिः। यदुक्तं धनिकेन (?)--

'न चातिरसतो वस्तु दूरं विच्छिन्नतां नयेत्। रसं वा न तिरोदध्याद्वस्त्वलङ्कारलक्षणैः'।

मित। विष्कम्भकाद्यैरपि—विष्कम्भकप्रवेशकप्रभृतिभिः अर्थोपक्षेपकैरपि अधिकारिणः "अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः" इत्यनेन प्रधानफलभागिनः नायकस्य नायिकायाः वा वधो निधनं मरणं वा नो वाच्यः कविना न उल्लेखणीयः। का कथा अङ्केन। तत्र "दूराह्वानं वधो युद्धम्" इत्यादिना वधप्रदर्शनं पूर्व्वत एव निषिद्धम्। अयमाशयः - "दूराह्वानं वधो" युद्धमित्यादिना अङ्ककलेवरे यस्य कस्यापि वधप्रदर्शनं न कार्य्यम्। विष्कम्भकप्रभृतिभिः पञ्चभिरर्थोपक्षेपकैः प्रतिनायकस्य अन्यस्य वा वधः प्रदर्श्येत यथा वीरचरिते बालिवधः—परं नाट्यकथायाः प्रधानफलभाजः नायकस्य वधप्रदर्शनं नायिकायाः वा मरणवर्णनम् विष्कम्भकाद्यैरपि न कार्य्यम्। उक्तं हि पश्चात् "रसविच्छेद हेतुत्वात् मरणं नैव वर्ण्यते। वर्ण्यते यदि प्रत्युज्जीवनं स्याददूरतः" इति। नाट्याश्रयिणः शृङ्गारादिरसस्य एवं च वस्तुनः नाटकीयकथावस्तुनः "अन्योन्येन" परस्परद्वारा, रसेन वस्तुनः तथा वस्तुना रसस्य इति भावः तिरोधानम् अभिभवं न कुर्य्यात् न विदध्यात्। तथाहि रसमुपेक्ष्य (रसस्य उद्दीपनाम् परित्यज्य इत्यर्थः) केवलनाटकीयकथावृत्तं न वर्णयेत् तथा सति रसहीनत्वात् तद्वृत्तान्तः शुष्कः भवेत्। एवं च इदं खलु वस्तुना रसस्य तिरोधानम्। तदा तद्वृत्तं नीरसं स्यात्। इदमेव वस्तुना रसस्य तिरोधानम्। एवं च नाटकीयकथावस्तु सम्यक् अवर्णयित्वा तस्य कथा-

वस्तुनः अंशविशेषमेव अवलम्ब्य रसस्य नितराम् उद्दीपनं न कार्य्यम्—तथा सति घटनावैचित्र्यस्य अभावेन तद्रसोद्दीपनं मनोहारि न स्यात्। इदं नाम रसेन वस्तुनः तिरोधानम्। एतदद्वयमपि न कार्य्यम् अपि तु नाटकीय-कथावस्तु सर्व्वत्रैव रसमण्डितं कृत्वा क्रमतो वर्णयेत् इति भावः। अत्र विषये दशरूपकं प्रमाणयति यदुक्तं धनिकेन इति। प्रमाद एवायम। नोक्तं धनिकेन अपि तु धनिकस्य ज्यायसा भ्रात्रा धनञ्जयेन, यतः स एव दशरूपकस्य रचयिता धनिकस्तु तस्य टीकाकारः। श्लोकोऽयं दशरूपकस्य मूले एव दृश्यते। अस्य अन्वयः अतिरसतो वस्तु दूरं विच्छिन्नतां न नयेत्। यद्वा रसतो वस्तु अतिदूरं विच्छिन्नतां न नयेत्। (एवं च) वस्त्वलङ्कार-लक्षणैः रसं वा न तिरोदध्यात। अस्य व्याख्या मुद्रिते दशरूपके "अति रसत" इति कृतसमासं पदं दृश्यते। तदनुसृत्य अस्माभिः श्लोकस्यास्य प्रथमांशस्य प्रथमप्रकारोऽन्वयः कृतः। तथा श्रीहरिदाससिद्धान्तवागीश-सम्पादिते साहित्यदर्पणे "अति रसत" इति अकृतसमासं पदद्वयं दृश्यते तदनुसृत्य अस्माभिः द्वितीयप्रकारोऽन्वयः कृतः। परं मन्यामहे वयं प्रथमोक्तः पाठ एव साधीयान्। अथ प्रथमान्वयानुसारिणी व्याख्या—अतिशयितः बाहुल्यं गतः रसः शृङ्गारादिरिति अतिरसः। तमाश्रित्य इति अतिरसात्। ल्यब् लोपे पञ्चमी। ततः पञ्चमीस्थाने तस्। तेन अतिरसतः रसबाहुल्यवशात निरन्तरं रसस्य उद्दीपनात् इति भावः, वस्तु नाटकीय-कथावृत्तं दूरम् अत्यन्तम् विच्छिन्नतां व्यवहितत्वं तिरोधानमिति यावत् न नयेत न प्रापयेत नाट्यकारः इति। "अति" शब्दात् तु इदं ज्ञाप्यते यत् उपस्थिते प्रयोजनविशेषे वस्तु किञ्चिन्मात्रम उपेक्ष्य कविः पाठकानां दर्शका-नाम् वा चित्तरञ्जनार्थम् रसप्रकटने कथञ्चित् पक्षपातित्वं दर्शयितुम् शक्नुयात। एवं च 'वस्त्वलङ्कारलक्षणैः वस्तु नाटकीयकथावृत्तम् लक्षणया तस्य वर्णनम् तथा तस्य वर्णने पक्षपातित्वम्। अलङ्काराः उपमादयः काव्यालङ्कारास्तथा भावशोभादयः योषिदलङ्काराः तेषां चिह्नैः तेषां सन्निवेशनैरिति भावः 'रसं न तिरोदध्यात्' रसास्वादनस्य हानिं न

साधयेत्। तथाहि वस्तुवर्णने पक्षपातित्वं दर्शयन् एवं च अलङ्कार-सन्निवेशने निपुणताम् प्रकटयितुम् इच्छन् नाट्यकारः कदापि रसस्य एतादृशम् अभिभवम् न साधयेत् येन तस्य रसस्य आस्वादने विघ्नः आपतेत् इति भावः। वस्त्वलङ्कारलक्षणैः कथासन्ध्यङ्गोपमादिलक्षणभूषणादिभिरिति दशरूपकटीकायाम् धनिकः। श्रीरूपोऽपि एतदङ्गीकरोति। तथाहि तस्य नाटकचन्द्रिकायाम् अयं साहित्यदर्पणश्लोकः (विष्कम्भकाद्यैरिति श्लोकः) अविकलमेव उद्धृतो दृश्यते।

Eng. Tran.—The death or murder (or killing of the hero (also of the heroine) of drama, should not be shown even in the Viskambhaka and the like. Also, the subject-matter (of the drama) as well as the Rasa (the sentiment) should not allowed to subdue each other. The word "Rasa" refers to the Erotic and other sentiments. Thus the topic has been stated by Dhanika (?) in the following way :—

Through too much (i. e. undue) importance or attachment to Rasa (sentiment), the subject-matter should not be dragged afar—(that is to say, relegated to a subordinate position)); neither. the sentiment should be subdued (i. e. rendered un-important), through partiality for the subject matter or through the insertion (i. e. setting) of rhetorics (and other descriptions).

N. B.—The gist of the above assertion may be summed up as follows—Proportionate importance should be attached to the subject-matter of the drama as well as to the sentiment excited therein, so that the two may run in harmonious co-operation. Undue importance or over importance should not be attached to either, since *in that*

case, the one is sure to over-ride the other and thereby mar the beauty as well as the concord of the drama."

Text—श्लोकः। वीजं बिन्दु पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च ज्ञात्वायोजग यथाविधि ॥

वृत्तिः। अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः।

मित -। ननु "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्" इति अधुना नाटकस्य पञ्चसन्धयः क्रमेण वाच्याः। अतएव सन्धीनाम् उल्लेखात् तान् पदार्थान विवृणोति। तथाहि उक्तं श्रीरूपचरणैः -"एकैकस्यास्त्ववस्थायाः प्रकृत्याचैकयैकया। योग-ःसन्धिरिति ज्ञेयो नाट्यविद्याविशारदैः"। अयमाशयः एकया एकया अवस्थया तथा एकया एकया प्रकृत्या योग एव सन्धिः। अतएव अवस्था तथा प्रकृतिश्च सन्धिं घटयतः। अतः सन्धेः प्रागेव अवस्थास्तथा प्रकृतयः लक्षणीयाः। तयोर्मध्ये आदौ प्रकृतिमेव लक्षयति श्रीमान् विशवनाथः। प्रकृतिरित्यस्य कोऽर्थः? हेतुरित्यर्थः। कस्य हेतुः? अर्थस्य प्रयोजनसिद्धेरेवहेतुः अतएव ताः प्रकृतयः इति कथ्यन्ते यतस्ताः मूलप्रयोजनस्य सिद्धिहेतवः। तास्तु अर्थप्रकृतयः पञ्चप्रकारा नाट्यकथायाः पञ्चविषयत्वात इति बोध्यम्। उक्तं च नाटकचन्द्रिकायाम—'पाञ्चविध्यात कथायास्तु प्रकृतिः पञ्चधा स्मृताः। ताश्च एताः—बीजं, विन्दुः, पताका, प्रकरी तथा कार्य्यम्'। एताः पञ्च अर्थप्रकृतयः नाटकस्य मूलप्रयोजनसिद्धिहेतवः। ज्ञात्वा यथाविधि नाट्यशास्त्रविधानमनुसृत्य योज्याः कविना रूपककलेवरं सन्निवेशयाः। दशरुपकेऽपि एवं पञ्चप्रकृतयः लक्ष्यन्ते।

Eng. Trans.—The five Arthaprakriti (so named because they serve the main purpose of the drama)—namely Vija, Vindu, Pataka, Prakari and Karyya should be learnt (and taken into account) and placed properly (in the body of the drama).

Arthaprakriti (is so named because it) implies the cause serving the (main) purpose (of the drama).

Text—तत्र वीजम्—

मित। पञ्चसंख्यकानाम् अर्थप्रकृतीनाम् मध्ये प्रथमप्राप्तं वीजं लक्षयति—

Eng. Trans—Among these the Vija (is first defined as follows)—

Text—श्लोकः। अल्पमात्रं समुद्दिष्टं वहुधा यत् विसर्पति
फलस्य प्रथमो हेतु र्वीजं तदभिधीयते ॥

वृत्तिः। यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो यौगन्धरायणव्यापारः। यथा वा वेण्याम् द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः।

मित--। यत् यन्नाम वस्तु अल्पमात्रं समुद्दिष्टम् किञ्चित परिमाणमेव आदौ प्रकटितं यत पश्चात बहुधा अनेकप्रकारं विसर्पति विस्तारं भजति विविधकार्य्यकारणसंघातम् आसाद्य अनेकप्रकारं विस्तृति लभते इति भावः, फलस्य नाटकीयवस्तुनः यत् चरमं लक्ष्यं तस्य प्रथमः हेतुः मुख्यम् तथा आदिकारणं तत् वस्तु वीजम् अभिधीयते कथ्यते। यत खलु मुख्यनाटकीयकार्यम तस्य कारणमेव वीजमितिवोध्यम। उक्तं हि श्रीरूपैः "यत्तु स्वल्पमुपक्षिप्तम् बहुधा विस्तृति गतम्। कार्य्यस्य कारणं धीरैस्तद्वीजमिति कथ्यते"। तच्च वीजं नाटकीयस्य मुख्यकार्य्यस्य साधकम्। उक्तं हि धनिकेन "स्तोकोद्दिष्टः कार्य्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवत् बीजम्"। दृष्टान्तो यथा रत्नावलीनाटिकायाम् - तत्र वत्सराजेन रत्नावल्याः प्राप्तिरेव मुख्यं नाटकीयं कार्य्यम्। तत्र मुख्यं कारणं दैवानुकूल्यलालितः यौगन्धरायणव्यापारः। अयं भावः कौशाम्बीम् आगच्छती रत्नावली समुद्रे यानभङ्गेन निमग्नाऽभूत्। दैवानुकूल्येन एव केनचित् कौशाम्बीनिवासिना वणिजा सा उद्धृता

यौगन्धरायणहस्तेन्यस्ता च। यौगन्धरायणस्तु तां वत्सराजान्तःपुरे निवेशितवान्। अयं यौगन्धरायणव्यापारः आमुखात् अनन्तरं विष्कम्भके अल्पमात्रमेव समुद्दिष्टः, यथा यौगन्धरायणः--"कः सन्देहः। द्वीपादन्यस्मादिति पठति - इत्यादिना "प्रारम्भेऽस्मिन् स्वामिनी वृद्धिहेतौ"—इत्यन्तेन। अतएव अयमेव अंशे बीजम् इदं हि पश्चात् वहुधा विस्तृतिं गच्छन् अन्ते वत्सराजरत्नावली - परिणयरूपे चरमफले पर्य्यवस्यति। दि्वतीयदृष्टान्तः--यथा वेणीसंहारनाटके - कौरवाणां विनाशान्ते द्रौपद्याः केशसंयमनमेव मुख्यं नाटकीयं फलम्। तस्य प्रथमहेतुभूतो भीमसेनस्य क्रोधेन उपचितः (उद्दीपितः) युधिष्ठिरस्य उत्साह एव बीजम्। "तच्च (बीजम्) महाकार्य्यावान्तरकार्यहेतुभेदादनेकप्रकारमिति" दशरूपकटीकायाम् धनिकः !

Eng. Trans.—What is (at first) mentioned in summary but what (subsequently) undergoes various developments and what (thus) constitutes the primary cause of the ultimate main object (of the drama), is said to be vija, As in Ratnavali (where) the matter referred to by Yaugandharayana (or better the undertaking of yaug.) favoured by Divine Grace—forms the root cause of the attainment of Ratnavali by Vatsaraja ; Or as in the Venisamhara—where the enthusiasim of Yudhisthira—encouraged by the wrath of Bhimsena forms the root case of the braiding of the hair of Draupadi.

Text—श्लोकः। अवान्तरार्थ-विच्छेदे विन्दुरच्छेदकारणम्।

वृत्तिः। यथा—रत्नावल्यामनङ्गपुजापरिसमाप्तौ कथार्थविच्छेदे सति "उदयनस्येन्दोरिवोद्वीक्षते" इति सागरिका श्रुत्वा (सहर्षम्) "कथं एसो सी उदअणणरिन्दो" इत्यादिरवान्तरार्थहेतुः।

मित—। इतः पूर्व्वमुक्तमस्माभिर्यत् बीजं खलु धनिकमते महाकार्य्या-वान्तरकार्य्यहेतुभेदात् अनेकप्रकारम् इति। तत्र अवान्तरकार्य्यबीजम् यस्य खलु अपरा संज्ञा विन्दुरिति लक्षणं तथा दृष्टान्तमपि अविकलमेव दशरूपकात् उद्धृतवान् श्रीमद् बिश्वनाथः। कथम् अस्य विन्दुरिति संज्ञा? विन्दुर्जले तैलबिन्दुवत् प्रसारित्वात् इति धनिकः। अथ लक्षणव्याख्या-अवान्तरार्थविच्छेदे अवान्तरः आनुषङ्गिकः योऽर्थः वस्तु आनुषङ्गिकम् अथच प्रयोजनसाधकं यद्वस्तु इत्यर्थः तस्य विच्छेदे तस्य समाप्तौ, यद्वा तेन कृते यथार्थविच्छेदे अवान्तरार्थस्य परिसमाप्तौ कथार्थविच्छेदे सति इत्यर्थः। अस्मिन् कल्पे अवान्तरार्थकृतः विच्छेदः इति शाकपार्थिवादि-त्वात् समासः। अयमेव कल्पः साधीयान् इति मन्यामहे। तत् यन्नाम वस्तु अच्छेदकारणम् अच्छेदस्य—अनन्तरमेव भाव्यम् यत्कार्य्यम् तेन सह सम्पर्कस्य इति यावत् कारणं हेतुः स एव विन्दुरिति उच्यते। तथाहि प्रासङ्गिकफलेन प्रधानफले विच्छिन्ने सति यत् वस्तु प्रधानफलस्य पूर्व्वापर-संयोगधारां रक्षति स एव विन्दुः। उक्तं च श्रीरूपचरणैः "फले प्रधाने बीजस्य प्रसङ्गोक्तैः फलान्तरैः, विच्छिन्ने यदविच्छेदकारणं विन्दुरिष्यते" इति। दृष्टान्तो यथा रत्नावलीनाटिकायाम् तत्र वासवदत्तया कृतम् यदनङ्ग-पूजनं तत् खलु अवान्तरप्रयोजनं यतस्तत्रैव सागरिका उदयनं प्रथमं पश्यति परम् स एव उदयन इति अविज्ञाय तम् मूर्त्तिमन्तं मदनं मन्यते। ततः तस्याः पूजायाः परिसमाप्तौ सत्यां कथाविच्छेदः भवति, यतः नाटि-कायाः या मूलकथा उदयनसागरिकयोः (सागरिका एव रत्नावली) प्रणयः—तस्य आविर्भावः परिस्फुटो न जातः। अतएव कथाविच्छेदे सति अनन्तरभाव्यं यत् कार्य्यं रत्नावल्या सह उदयनस्य प्रणयरूपम् तस्य अच्छेदसाधकं वस्त्वेव विन्दु र्भवति।

Eng. Trans—Vindu is that which preserves the continuity of the main story (of the drama) when it is disrupted by incidental topics. As in the Ratnavali where,

with the conclusion of the cupid-worship, the main story undergoes disruption, (and the continuity of the main story is then, presented by) the following namely, hearing, that "the princess look up to Udayana as it were up to the Moon" Sagarika remarks cheerfully—How is it that he his Udayana—which is the seed of the remaining portion (of the drama, and hence stands here as the Vindu).

Text—श्लोकः। व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते।

वृत्तिः। यथा - रामचरिते सुग्रीवादेः, वेण्याम् भीमादेः, शाकुन्तले विदुषकस्य चरितम्।

मित—। प्रासङ्गिकं व्यापिवृत्तम् पताका इति अभिधीयते इति योजना। प्रासङ्गिकं किम ? "प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः" इति दशरूपके धनञ्जयः! यत खलु नाटकीयवृत्तं परप्रयोजनं (नायकप्रयोजनमित्यर्थः) साधयेत् च स्वप्रयोजनं साधयति तत प्रासङ्गिकम् इति भावः। तत्र प्रासङ्गिकम इतिवृत्तं द्विविधं - पताका तथा प्रकरी। तत्र आदौ पताकां लक्षयति--यत् खलु प्रासङ्गिकम् इतिवृत्तं व्यापि वाहुल्येन एव नाटककलेवरम् व्याप्नोति इति यावत् सा पताका। "दूरं यदनुवर्त्तते प्रासङ्गिकं सा पताका" इति धनिकः। उक्तं च नाटकचन्द्रिकायाम् 'यत , प्रधानोपकरणं प्रसङ्गात् स्वार्थमृच्छति। सा पताकाबुधैः प्रोक्ता याचामात्यवृत्तवत्'। भरतेनाप्युक्तम् - "यद्‌वृत्त हि परार्थं स्यात् प्रधानस्योपकारकम्।. प्रधानवच्च कल्पेत-सा पताकेति कीर्त्तिता"।

Eng. Trans.—The story (or the doings of one which is incidental (i. e. dependent on the story of the hero) but (at the same time) extensive is said to be Pataka. As the story of Sugriva and others in the drama based on

the story of Rama ; the story of Bhima and others in the Venisamhara ; the story of the clown in the Sakuntala.

Text—श्लोकः। पताकानायकस्य स्यान्न स्वकीयफलान्तरम्। गर्भ सन्धौ विमर्शे निर्व्वाहस्तस्य जायते ॥

वृत्तिः। यथा सुग्रीवादेः राज्यप्राप्त्यादिः। यत्तु मुनिनोक्तम्—

"आगर्भाद्वाविमर्शाद्वा पताका विनिवर्त्तते।" इति, तत्र

"पताकेति। पताका नायकफलम्, निर्बहणपर्य्यन्तमपि पताकायाः प्रवृत्तिदर्शनात्" इति व्याख्यातम् अभिनवगुप्तपादैः।

मित। प्रागेवोक्तं यत् नाट्यवस्तु द्विप्रकारम् आधिकारिकम् तथा प्रासङ्गिकम्। प्रासङ्गिकमपि पताका तथा प्रकरीभेदात् द्विप्रकारम्। तत्र आधिकारिकं खलु नायकचरितम् तच्च ननमेव फलपर्य्यन्तताम् नीयमानं सत् अभिव्यापि अतिव्यापि भवति? उक्तं हि दशरूपके—"तन्निर्वर्त्यमभिव्यापि वृत्तम् स्यादाधिकारिकम्।" प्रासङ्गिकं खलु परप्रयोजनम् (नायक-प्रयोजनम्) साधयदेव स्वप्रयोजनं साधयति इत्यपि प्रागेवोक्तम्। तत्र प्रासङ्गिकयोर्मध्ये या पताका सा च "प्रकरी" इत्यस्मात् अधिकतरम् व्यापि इति पश्चात् वक्ष्यते। परं सा (पताका) आधिकारिकात् खलु न्यूनतरं व्यापि इति एतत् प्रतिपादयितुम् श्लोकम् अवतारयति—पताका इत्यादिना। "पताका" प्रासङ्गिकं यदाभिवृत्तम् किञ्चिद्व्यापि सत् पताका इति सञ्ज्ञां गच्छति या "नायकस्य" नाटकस्य यो नेता अधिकारी इति नामान्तरेण च आख्यायते, तस्य सम्बन्धे (तस्य नायकस्य इति सम्बन्ध-सामान्ये षष्ठी) स्वकीयफलान्तरं स्वकीयम् पताका-सम्पृक्तं यत् अन्यत् नायकफलात् अपरं फलं न स्यात्। नायकस्यखलु यत् फलम् तस्मात् फलात् अन्यत् किञ्चित् स्वात्मनः फलम् नायकस्य सम्बन्धे पताका न साधयति इति भावः। यद्वा पताकानायकस्य इति एकमेव समस्तं पदं तथा सति इयं हि व्याख्या—"पताकानायकस्य" व्यापि यत् प्रासङ्गिकवृत्तम् पताका इति कथ्यते तत् खलु यम् जनम् अधिकृत्य प्रवर्त्तते तस्य,

स्वकीयम् आत्मसम्बन्धि फलान्तरम् नायकफलात् अन्यत् किञ्चित् फलं न स्यात्। नायकफलमेव मुख्यतः साधकम् गौणतः आत्मफलम् एव साधयति पताकानायकः इति भावः। अतएव पताका आधिकारिकवृत्तमिव व्यापिनी न स्यात्। ननु कीदृशं तर्हि तस्याः व्यापकत्वं कस्मिन्नंशे वा तस्या स्थितिः? उच्यते—"गर्भे सन्धौ "पञ्चानां सन्धीनाम् मध्ये यस्तृतीयः सन्धिः गर्भसन्धिरित्युच्यते तत्र अथवा यश्चतुर्थसन्धिः विमर्श (विमर्श) सन्धिरित्याख्यायते तत्र "तस्य" पताकानायकस्य यत् किञ्चित् स्वकीयं फलं यत् फलम् नायकफलापेक्षया गौणमेव तादृशस्य फलस्य निर्व्वाहः परिसमाप्तिर्जायते। यथा—रामचरितम् अधिकृत्य विरचिते नाटके सुग्रीववृत्तान्तं पताका यतस्तत् खलु नायकस्य श्रीरामस्य एव फल-साधकम्। परं तस्य पताकानायकस्य यत् किञ्चित् स्वकीयम् अवान्तर-फलं सुग्रीवस्य राज्यप्राप्तिरूपं तत् खलु गर्भसन्धिमध्ये एव परि-समाप्तम्।

यत्तु मुनिता नाट्यशास्त्रप्रणेत्रा श्रीभरतेन उक्तं—"आगर्भाद्वाविमर्शाद्वा पताका विनिवर्त्तते। कस्माद् यस्मान्निबन्धोऽस्या परार्थः परिकीर्त्त्यते" इति। अस्य व्याख्या—गर्भात् आ गर्भसन्धिसमाप्तिं यावत् सा पताका अवस्थाय निवृत्ता भवति। पञ्चमस्तथा अन्तिमः यः सन्धिर्निर्व्वहणसन्धिः उपसंहारसन्धिरिति च आख्यायते तं सन्धिं यावत् पताका न आकृष्यते इति भावः। "कस्मात्?" केन हेतुना? "यस्मात्" यतः अस्याः पताकायाः "निबन्धः नाटककलेबरे सन्निवेशः परार्थः नायकार्थः एव परिकीर्त्तते इति अनेनैव हेतुना। अयमत्र प्रसङ्गः—नाटकस्य नायकः योऽधिकारीति कथ्यते तस्य चरितम् चरमफलपर्य्यन्तम् आकृष्यते अतएव निर्व्वहणसन्धौ (यत्र नाटकस्य समाप्तिर्भवति) एव तस्य समाप्तिः। तथा यस्तु पताकानायकः—तस्य चरितस्य मुख्यं फलं खलु नायकफल-साधनम्—गौणफलं तु आत्मफलसाधनम्। अतएव मुख्यतः नायकफल—साधकत्वात् तस्य अपि चरितम् निर्व्वहणसन्धिं यावत् नीयते इति इदं

तथाम् युक्तिवलात् आपतति, तथा प्रसिद्धेषु नाटकेष्वपि इदम् अवलोव ;
परं तस्य (पताकानायकस्य) यत खलु आनुषङ्गिकं स्वकीयफलसाधनं
तत् तु गर्भसन्धौ विमर्शसन्धौ वा समाप्तिं गच्छति—न तु कदापि
निर्व्वहणसधिं यावत् आकृष्यते। अत्र दृष्टान्तो यथा—रामचरिते पताका-
नायकस्य सुग्रीवस्य राजप्राप्तिरूपम् आनुषङ्गिकं स्वकीयं फलं गर्भसन्धौ
समाप्यते एवं च पताका-नायकान्तरस्य विभीषणस्य राजप्राप्तिरुपम्
आनुषङ्गिकं स्वकीयं फलं विमर्शसन्धौ अवसानमेति। परम् रामकार्य्य-
साधक यत सुग्रीवचरितं—तन्तु निर्व्वहणसन्धिं यावत् नेतुं शक्यत इति
एतत् खलु श्रीमतो विश्वनाथस्य मतम्।

ननु एतन्मतं प्रामाणिकं चेत् तर्हि कथं नाट्याशास्त्राचार्य्येण श्रीभरतेन
उद्धृतश्लोके विहितं यत "पताका गर्भसन्धौ विमर्शसन्धौ वा निवृत्ता"
भवति? तस्य समाधानं साधयितुम् प्रागुक्तस्य श्लोकस्य नाट्याशास्त्रटीका-
कृता श्रीअभिनवगुप्तेन कृतं व्याख्यानम् (यत् खलु व्याख्यानमस्य मतं
समर्थयति) उद्धरति—तत्र इत्यादिना। "पताकेति" श्रीभरतश्लोके
दृश्यमानं पताका इति पदम्। नायकफलं नायककार्य्यसाधकं—नूनं
पताकायाः नायककार्य्यसाधकत्वम् एव मुख्यत्वेन स्वीकृतम्। कथम्?
"निर्व्वहणपर्य्यन्तमपि" निर्व्वहण सन्धिं यावत् पताकायाः प्रवृत्तिदर्शनात्
स्थायित्वदर्शनात् इति; अयं भावः पताकायाः मुख्यत्वेन नायकफल-
साधकत्वं—अतएव नायकफलं साधयन्ती पताका निर्व्वहणसन्धिम्
यावत् आकृष्यते। परं पताकायाः यत् आनुसङ्गिकम् स्वकीयफलसाधनं
तस्य समाप्तिर्गर्भसन्धौ विमर्शसन्धौ वा भवेत् इति हि समाधानम्।

Eng. Tran—The character figuring as Pataka does not serve, in the main, special purpose of his own; and hence the special purpose of the Pataka if any, is finished either in the Garbha sandhi or in the Vimarsa sanhi. As—for example. the acquisition of kingdom by Sugriva and others.

True, the sage has prescribed that the Pataka ceases in the Garbha-sandhi or in the Vimarasa-sandhi ; but here (the commentator) Abhinabha Gupta has adduced the following explanation ; Pataka serves the purpose of the hero (of the drama) and as such it is sometimes seen to extend even upto the Nırvahana-sandhi.

Text—श्लोकः। प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरीमता।

वृत्तिः। यथा कुलपत्यङ्के रावणजटायुसंवादः।

मित। पताका इति प्रथमप्रकारं प्रासङ्गिकं व्याख्यातम्। द्वितीयं प्रकरीत्याख्यातं विवृणोति। यत् खलु द्वितीयं प्रासङ्गिकवस्तु सा प्रकराति कथ्यते, या तु पताकावत् अधिकदेशव्यापिनी न स्यात् अपितु नाटकसन्धौ एकांशे एव स्थिता, अतएव सा प्रकरी प्रदेशस्थं चरितम्। उक्तं हि दशरूपके—"प्रकरी च प्रदेशभाक्।" व्याख्यातं च धनिकेन "यदल्पं सा प्रकरी" इति। दृष्टान्तो यथा—कुलपत्यङ्के रावणस्य जटायुषः-संवादः।

Eng. Trans.—A (comparatively) small character dependent (more or less) on the hero, is said to be a Prakari. As in the Kulapati act—the dialogue incident between Ravana and Jatayu.

Text—श्लोकः। प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम्।

मित—। प्रकरी प्रादेशिकं चरितम्। तच्च यम् जनमधिकृत्य प्रवर्त्तते स खलु प्रकरीनायकः। यथा सीताहरणकाले यत् रावणस्य जटायुसंवादरूपं वृत्तम्।

अत्रायं विचारः—एकं प्रासङ्गिकम् चरितं पताका। सा तु न भवति नायकचरितमिव नाटकस्य आद्यन्तव्यापिनी परम् सा नाटकस्य अधिकं देशं व्याप्नोति तथा क्वचित् निर्वहणसन्धिं यावत् अपि तिष्ठति। द्वितीयं

प्रादेशिकंचरितं प्रकरी, सा तु एकदेशव्यापिनी अतएव नाटकस्य एकस्मिन्नेव सन्धौ तिष्ठति।

Eng. Tran.—The figure (character) posing as Prakari serves no purpose of his own (save and except that of the hero).

Text—श्लोकः। अपेक्षितन्तु यत् साध्यमारम्भो यन्निबन्धनः। समापनन्तु यत्सिद्ध्यै तत् कार्य्यमिति सम्मतम्।

वृत्तिः। यथा रामचरिते रावणवधः।

मित यत् साध्यम् अपेक्षितं (तथा) यन्निबन्धनः आरम्भः (एवं च) यत् सिद्ध्यै समापनम् तत् कार्य्यमिति (बुधैः) सम्मतम्। साध्यं साधनीयम् नाटकस्य मुख्यमेव उद्देश्यमिति कृत्वा प्रतिपादनीयम् यत् वस्तु अपेक्षितम् अभिलषितम् इष्टम् इति यावत्। यद्वा—यत् अपेक्षितम् यत् (च) साध्यमिति योजना। तथा सति अयमर्थः यत् वस्तु अपेक्षितम् आकाङ्क्षितम् एवं च तद्वस्तु साध्यम् मुख्यत्वेन प्रतिपाद्यम्। किञ्च यन्निबन्धनः यदुद्देशकः आरम्भः नाटकस्य प्रवृत्तिः, तथा यत्सिद्ध्यै—यस्य एव वस्तुनः सिद्धये साधनाय समापनम् विविधावान्तरोपायावलम्बनम्। यद्वा यत्सिद्ध्या इति पाठः—तथा सति अयमर्थः, यस्य वस्तुनः सिद्ध्या समापनेन समापनं नाटकस्य समाप्तिः, तन्नाम वस्तु कार्यमिति नाट्यशास्त्रविद्भिः सम्मतम् अभिप्रेतम्। समग्रेण नाटकीयवस्तुना यत् खलु प्रतिपादयितुम् इष्टम् तदेव कार्य्यम् इति सारः। उक्तं च श्रीरूपेण - 'वस्तुनस्तु समस्तस्य साध्यं कार्य्यमिति स्मृतम्"। यथा रामचरिते रावणवधः यतः स एव मुख्यत्वेन तत्र प्रतिपादनीयः। एवं च ललितमाधवे श्रीराधिकया साकं श्रीमाधवस्य मेलनमेव कार्य्यम्। This is called कार्य्य, the fifth variety of अर्थप्रकृति।

तत् खलु कार्य्यम् इतिवृत्तस्य फलमेव तच्च धर्मकामार्थरूपमिति दशरूपके। उक्तं हि तत्र—कार्य्यं त्रिवर्गस्तच्छुद्धमेकानेकानुबन्धि च। तत्र धनिकः—धर्म्मार्थकामाः फलम्। तच्च शुद्धम् एकैकम् एकानुबन्धम् द्वित्रानुबन्धं वेति।

Eng. Tran.—What is desired to be accomplished, for which end in view the drama sets on to function, and for the achievement of which (end), are adopted means is said to be Karyya—as the killing of Ravana in a drama concerning the exploits of Rama.

N. B.—In this connection Srirupa deals with some interesting aspects of karyya and we quote here his assertions with necessary elucidation—

१। प्रधानमङ्गमिति च तत्त्स्याद्विविधं पुनः। प्रधानं नेतृचरितं व्यापिकृष्णस्यचेष्टितम्। अत्र टीका—तत्कार्य्यं द्विप्रकारं यथा प्रधानं अङ्गं च। प्रधानं हि नायकस्य चरित तच्च समग्रं नाटककलेवरं व्याप्नोति यथा ललितमाधवे श्रीकृष्णचरितम्।

२। नायककार्यकृदङ्गंस्यात् नायकेतरचेष्टितम्। नित्यं पताकाप्रकरी चाङ्गं बीजादयः क्वचित्। टीका - नायकप्रयोजनसाधकम् नायकात् अपरस्य चरितं हि अङ्गम्। पताका तथा प्रकरी सर्व्वदैव अङ्गम् भवति। बीजप्रभृतयः अपि कुत्रचित् क्षेत्रे अङ्गानि भवन्ति।

३। वीजत्वात् बीजमादौस्यात् फलत्वात् कार्य्यमन्ततः। तयोः सन्धानहेतुत्वात्मध्ये बिन्दुं मुहुः क्षिपेत्। यथायोगं पताकायाः प्रकर्य्याश्च निवेशनम्।

Text—श्लोकः। अवस्थाः पञ्च कार्य्यस्य प्रारब्धस्यफलार्थिभिः। आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।

मित—। श्लोकोऽयमविकलकेव दशरूपकात् उद्धृतः। फलार्थिभिः कार्य्यस्य फलम् लब्धुम् इच्छुभिः, प्रारब्धस्य कार्य्यस्य पञ्च अवस्थाः सम्भवन्ति, ते यथा—आरम्भः, यत्नः प्राप्त्याशा, नियताप्तिस्तथा फलागमश्च। कार्य्यस्य एताः खलु पञ्च अवस्थाः नायकादीनां क्रियावशादेव भवन्तीति-

बोध्यम्। उक्तं हि श्रीरूपैः "कार्य्यस्य पञ्चधावस्था नायकादिक्रिया-वशात्" इति।

Eng. Tran.—Of the undertaking, resorted to by persons desirous of reaping the fruit thereof (i. e. of achieving the desired result), there are five Avasthas i. e. phases ; they are Arambha, Yatna, Praptyasha, Niyatapti and Phalagama.

Text—वृत्तिः। तत्र—

मित—। तासाम् पञ्चसंख्यकानाम् अवस्थानाम् मध्ये प्रथमप्राप्तम् आरम्भम् लक्षयति।

श्लोकः—भवेदारम्भ औत्सुक्यम् यन्मुख्यफलसिद्धये।

वृत्तिः। यथा रत्नावल्याम्—रत्नावल्यन्तःपुरनिवेशार्थं यौगन्धरायण-स्यौत्सुक्यम्। एवं नायकनायिकादीनामपि औत्सुक्यम् आकरेषु बोद्धव्यम्।

मित—। मुख्यं नाटकस्य प्रधानं यत् फलम् तस्य सिद्धये सम्पादनाय यत् औत्सुक्यम् कस्यापि नाटकीयप्रधानपात्रस्य व्यग्रता स आरम्भो भवेत्। आरम्भो हि कार्य्यस्य प्रथमा सूचना। अत्र धनिकमते औत्सुक्यपदेन न केवलम् कार्य्यसाधनविषयिनी इच्छा एव व्यज्यते अपितु तत्साधनाय अध्यवसायोऽपि। उक्तं हि तेन "अवलोके",—"इदमहम् सम्पादयामि इत्यध्यवसायमात्रमारम्भ इत्युच्यते" इति। श्रीरूपमते न केवलम् अध्या-वसायः अपि उद्योगोऽपि। अस्य आरम्भस्य दृष्टान्तो यथा—रत्नावलीनाटि-कायाम् रत्नावलीं राज्ञः उदयनस्य अन्तःपुरे स्थापयितुम् यौगन्धरायणस्य औत्सुक्यम्! अयम् भावः—रत्नावल्या सह उदयनस्य परिणय एव नाटकस्य मुख्यं फलम्। स च परिणयः परस्परप्रणयमुखेन एव सम्पाद्यः। स च प्रणयः अन्योन्यदर्शनं विना व साध्यते? एवम् च अन्योन्यदर्शनं खलु उदयनस्य अन्तःपुरे रत्नावल्याः स्थानलाभं विना न सम्भवति, अतएव

उदयनस्य अन्तःपुरे रत्नावल्याः स्थानलाभ एव नाटकीयस्य प्रधानवस्तुनः सूचना। तत्र च नाटकीयस्य अन्यतमप्रधानपात्रस्य यौगन्धरायणस्य यत् औत्सुक्यम् स एव नाटकीयस्य कार्य्यस्य आरम्भनाम्नी प्रथमावस्था। उदयनस्य रत्नावली-पणियरूपस्य खलु कार्य्यस्यसिद्धिः यौगन्धरायणसंज्ञके सचिवे आयत्ता इति कार्य्यस्य आरम्भावस्था तत्र नाटिकायाम् यौगन्धरायण-मुखेन दर्शितः।

एवं च नायकेन सह संगन्तुम् नायिकाया औत्सुक्यं तथा नायिकया सह संगन्तुम् नायकस्य अपि औत्सुक्यम् वहुषु नायक-नायिका मेलनरूपस्य कार्य्यस्य आरम्भावस्था भवति। यथा ललितमाधवे नाटके मुखसन्धौ राधामाधवयोरन्योन्यसङ्गमाय व्यवसायः आरम्भः। एवमन्यत्रापि वोध्यम्।

Eng. Tran.—Eagerness for the fruition of the main purpose (i. e. for the achievement of the principal object of the drama) is (said to be) Arambha i. e. the beginning. As in the Ratnavali—the eagerness on the part of Yaugan-dharayana to place Ratnavali in (Udayana's) harem (is the beginning of the main object of the drama). In like manner the eagerness (yearning) of heroes and heroines are to be learnt from their original sources i. e. in different dramas.

N. B.—The aforesaid eagerness followed in its turn by determination which itself being followed by some sort of exertion for the undertaking constitutes the Arambha (or the beginning) phase of the Karyya, that is the main theme of the drama ; and this Arambha may be pertain-ing to either the hero, or the heroine or some other

principal figure on their behalf as is the case in the Ratnavali etc.

Text—श्लोकः। प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।

वृत्तिः। यथा रत्नावल्यां—"तहवि ण अत्थि अण्णो दंशणोवाओत्ति जधा तधा आलिहिअ जधासमीहिदं करइस्समम्" (=तथापि नास्ति अन्यो दर्शनोपाय इति यथा तथा आलिख्य यथासमीहितं करिष्यामि – इति संस्कृतानुवादः)—इत्यादिना प्रतिपादितो रत्नावल्याश्चित्रलेखनादि वंत्सराजसङ्गमोपायः। यथा च रामचरिते समुद्रवन्धनादिः।

मित—। अथ प्रयत्नं वक्ष्यति—'प्रयत्नः तु"। अत्र तु इत्यव्ययम्, आरम्भात् प्रयत्नस्य पार्थक्यप्रदर्शनार्थम् इति बोध्यम्। फलावाप्तौ फलस्य नायकेन नायिकया वा लब्धस्य नाटकस्य यत् मुख्यं फलं तस्य प्राप्ति-विषये अतित्वरान्वितः अत्यन्तया त्वरया औत्सुक्येन अन्वितः युक्तः प्रणोदित इति यावत् व्यापारः चेष्टाविशेषः। त्वराशब्दस्य औत्सुक्यमेवार्थोऽत्र। उक्तं हि श्रीरूपेण—यत्नस्तुतत्फलप्राप्तावौत्सुक्येन तु वर्त्तनम्। अत्र दशरूपके धनञ्जयः—प्रयत्नस्तु तत्प्राप्तौ व्यापारोतित्वरान्वितः।

Eng. Tran.—exertion urged by eagerness for the achievement of the principal object (of the drama) is called Prayatna. As in Ratnavali—"And yet there is no other way of meeting him and hence I shall draw his picture and then do what I like"—and by this text is stated the drawing of (Udayana's) picture by Ratnavali and so forth, which serve as the means to her meeting (i. e. union with) the King of the Vatsas. As also the binding and bringing of the ocean under control and the like in Ramacharita.

Text—श्लोकः। उपायापायशङ्काभ्याम् प्राप्त्याशा प्राप्तिसम्भवः॥

वृत्तिः। यथा रत्नावल्याम् तृतीयेऽङ्के वेशपरिवर्त्तनाभिसरणादेः सङ्गमो-

पायाद्वासवदत्तालक्षणापायशङ्कया च अनिर्द्धारितैकान्तसङ्गमरूपफलप्राप्तिः प्रत्याशा। एवमन्यत्र।

मित—। लक्षणश्लोकमिदं दशरूपकात् उद्धृतम्। उपायस्य फललाभाय यो हेतुस्तस्य सद्भावात् तथा या अपायशङ्का फललाभविषये सम्भावितः विघ्नस्तस्यापि च भावात् प्राप्तिसम्भवः प्राप्तेः फललाभस्य सम्भवः सम्भावना सा प्राप्त्याशा इति कथ्यते। अत्र धनिकः—"उपायस्य अपायशङ्कायाश्च भावात् अनिर्द्धारितैकान्ता फलप्राप्तिः प्राप्त्याशा।" अनिर्द्धारितः अनिश्चितः एकान्तः एकपक्षः—(फल-लाभो भवेत उत न वा इति अन्यतरः पक्षः इत्यर्थः) यस्याम् तादृशी खलु फलप्राप्तिः प्राप्त्याशा। अयं भावः—उपायो वर्त्तते अतएव फललाभो भवेत् इति निश्चयो न स्यात्। तथा—अपायो वर्त्तते अतएव फललाभो न भवेत् इति अयमपि निश्चयो न स्यात् इति अनिश्चितैकपक्षा फलप्राप्तिरेव प्राप्त्याशा। श्रीरूपस्तु-स्वप्रयोजन सिद्धेः सम्भावना एव प्राप्त्याशा इति मन्यते। उक्तं तेन-प्राप्त्याशा तु निजार्थस्य सिद्धिसम्भावना मता।" श्रीभरतोऽपि एवम्। उक्तं हि नाट्यशास्त्रे "ईषत् प्राप्तिर्यदा काचित् फलस्य परिकल्प्यते। भावमात्रेण तं प्राहु र्विधिज्ञाः प्राप्तिसंभवम्"। प्राप्तिसंम्भव प्राप्त्याशा इत्यर्थः। यथा—रत्नावलीनाटिकायाम् तृतीयेऽङ्के वेशपरिवर्त्तनाभिसरणादेः इति। बासव दत्तायाः वेशं परिधाय रत्नावली (सागरिका) उदयनम् अभिससार इति गृहीतवासवदत्तावेशायाः रत्नावल्याः उदयनम् प्रति अभिसार एव उदयनेन सह तस्याः सङ्गमस्य उपायः—तथा वासवदत्ता यदि अकालवातावली इव अत्र आगत्य सङ्गमविघ्नम् जनयेत् इति वासवदत्तारूपोयोऽपायस्तस्य शङ्कया उदयनेन सह रत्नावल्या सङ्गमरूपा या पलप्राप्तिः सा तु अनिर्द्धारितैकान्ता अनिश्चितैकपक्षा—अतएव इयं प्राप्त्याशा। अत्र "अनिर्द्धारिता अनिश्चिता संशयिता या एकान्ते रहसि वत्सराजसङ्गमरूपफलस्य प्राप्तिस्तस्याः प्रत्याशा" इति व्याख्यातं श्रीमता हरिदाससिद्धान्तबागीशेन। परम् "एकान्त" इति पदस्य ईदृशी व्याख्या न साध्वी। अस्मत्कृत

व्याख्या एव साधीयसी दशरूपकसम्मतत्वात्। "एवमन्यत्र"—एवम्प्रकारम् उदाहरणम् अन्यत्रापि द्रष्टव्यमिति भावः। यथा ललितमाधवे "गर्भसन्धौ राधायाः सत्राजिति समर्पणेन कृष्णस्य ललिताशङ्खचूडरत्नादिलाभादिना सम्भावनायोग्यत्वात् प्राप्त्याशा" इति नाटकचन्द्रिका।

Eng. Tran.—Praptyasha is understood to be the chance of the achievement of the desired result (i. e. the main object of the drama), the chance being favoured with (proper) means (to the end), but being (at the same time) confronted with difficulties also. As in the Ratnavali in the third act, the Praptyasha is the chance of the desired result in the shape of union (of Ratnavali with Udayana) which is yet uncertain due to the presence of both the means in the shape of changing the dress (by Ratnavali i. e. presenting herself as Vasavadatta) and there-after approaching (of Ratnavali to Udayana) as well as the obstacle in the shape of (possible and sudden appearance of) Vasavadatta. Such examples are to be searched for in other dramas also.

Text—श्लोकः। अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता।

वृत्तिः। अपायाभावान्निर्द्धारितैकान्तफलप्राप्तिर्नियताप्तिः। यथा रत्नावल्यां राजा—"देवीप्रसादनं त्यक्त्वा नान्यमत्रोपायं पश्यामि" इति देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता।

मित्र। श्लोकोऽयं प्रायश एव अविकलं दृश्यते दशरूपके। 'तु" इत्यव्ययेन उपायापायमिश्रितायाः प्राप्त्याशायाः, अपायवर्जितायाः नियताप्तेः पार्थक्यं सूचयति ग्रन्थकारः।

व्याख्या—अपायस्य विघ्नादेः अभावतः अविद्यमानत्वात् दूरीकरणात् इति भावः निश्चिता नियता प्राप्तिः फलसिद्धिरेव नियताप्तिः। वृत्तिव्याख्या—अपायाभावात् निर्द्धारिता निश्चिता तथा एकान्ता एकपक्षमाश्रिता फलसिद्धिमेवाश्रिता अतएव संशयरहिता इति यावत् फलप्राप्तिः फललाभः एव नियताप्तिः। उक्तं च श्रीरूपैः—"नियताप्तिरविघ्नेन कार्य्यसंसिद्धिनिश्चयः।" नाट्यशास्त्रे च—"नियतां तु फलप्राप्तिं यदा भावेन पश्यति। नियतां तां फलप्राप्तिं सगुणाः परिचक्षते" इति।

Eng. Tran.—Niyatapti is the sure achievement of the result through the removal of obstacles. As in the Ratnavali the King :—"Save and except the winning of the satisfaction of my Queen, I find no other means (alternative) in this matter—" by this the obstacle in the shape of the Queen is removed through the winning of her satisfaction and thereby is indicated the sure attainment of the desired result (i. e. the King's union with Ratanavali).

Text—श्लोकः। सावस्था फलयोगः स्याद् यः समग्रफलोदयः।

वृत्ति। यथा रत्नावल्याम् रत्नावलीलाभःचक्रवर्त्तित्वलक्षणफलान्तरलाभसहितः। एवमन्यत्र।

मित— । पञ्चानाम् अवस्थानाम् मध्ये या पञ्चमी अवस्था फलागम इति संज्ञया प्रसिद्धा तां लक्षयति—सा अवस्था फलयोगः फलागमः इति आख्यातः स्यात् यत्र खलु समग्रफलोदयः—समग्राणाम् अभिलषितानाम् सर्व्वेषाम् एव फलानाम् उदयः आविर्भावः। यस्याम् अवस्थायाम् सर्व्वेषाम् एव इष्टानां फलानाम् प्राप्ति र्भवति सा अवस्था फलयोगः फलागम इति वा कथ्यते। उक्तं च श्रीरूपेण—'निजाभीष्टफलावाप्तिर्भवेदेव फलागमः" इति। दशरूपके अपि—"समग्रफलसम्पत्तिः फलयोगो यथोचितः"।

श्रीमरतो नाठ्यशास्त्रे अपि—"अभिप्रेतं समग्रं च प्रतिरूपम् क्रियाफलम्, इतिवृत्ते भवेद् यस्मिन् फलयोगः प्रकीर्त्तितः" इति। दृष्टान्तो यथा—रत्नाबली नाटिकायाम्—चतुर्थे अङ्के उदयन कर्त्तृकः रत्नाबलीलाभः। स लाभः राज-चक्रवर्त्तित्वरूपं यत् अन्यत् फलं तेनैव फलेन अन्वितः।

Eng. Tran.—That (particular) Avastha is (known as) Phalayoga (i. e. Phalagama) wherein accrues the entire result (as desired). As in the Ratnavali wherein occurs the winning of Ratnavali (by Udayana), along with the acquisition of head-ship or sovereignty over the Princely order. Such (examples) are to be (found) in other works (as in Vira-chrita--सीतालाभसहितो रावण-बधादिः)।

Text—श्लोकः। यथासंख्यमवस्थाभिराभिर्योगात्तु पञ्चभिः। पञ्चधैवेति-वृत्तस्य भागाः स्युः पञ्चसन्धयः॥

मित—। अथ सन्धिं प्रस्तौति—एताः खलु पञ्चावस्थाः अनुक्रमेण सर्व्वस्य एव कार्य्यस्य भवन्ति। उक्तं हि मुनिना "सर्वस्यैव हि कार्य्यस्य प्रारब्धस्य फलार्थिभिः। एताश्च अनुक्रमेणैव पञ्चावस्था भवन्ति हि।" आभिः पञ्चभिः अवस्थाभिः यथासंख्यम् यथाक्रमम् योगात् इतिवृत्तस्य नाटकीयस्य वृत्तान्तस्य पञ्चधा एव पञ्चप्रकाराः एव भागाः स्युः। ते एव भागाः पञ्चसन्धयः इति कथ्यन्ते। अयमाशयः—पञ्च खलु अर्थ-प्रकृतयः—बीजविन्दुरित्यादयः। एवं च पञ्च खलु अवस्था आरम्भ-यत्नइत्यादयः। "अर्थप्रकृतिनां पञ्चनाम् यथासंख्येन अवस्थाभिः पञ्चभि-र्योगात् यथासंख्येन एव वक्ष्यमाणा मुखाद्याः पञ्चसन्धयो जायन्ते" इति धनिकः; उक्तं च धनञ्जयेन—" अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः यथासंख्येन—जायन्ते मुखाद्याः पञ्चसन्धयः" इति। श्ररूपेणापि—"एकैक-स्यास्त्ववस्थायाः प्रकृत्या चैकयैकया योगः सन्धिरिति ज्ञेयो नाठ्य-

विद्याविशारदैः"। तथाहि वीजम् इति अर्थप्रकृत्या सह आरम्भ इति अवस्थाया योगेन उद्भूतो यो नाटकीयः भागः—मुखसन्धिरिति नाम्ना ख्यातः प्रथमः सन्धिः। बिन्दुरिति अर्थप्रकृत्या सह यत्न इति अवस्थायाः योगेन सम्भूतो नाटकीयः भागः प्रतिमुखसन्धिरिति ख्यातो द्वितीयः सन्धिः। पताका इति अर्थप्रकृत्या सह प्राप्त्याशा इति अवस्थायाः योगेन सञ्जातो नाटकीयोभागोगर्भसन्धिरिति। प्रकरी इति अर्थप्रकृत्या सह नियताप्तिरिति अवस्थायाः योगात् प्राप्तो नाटकीयो भागो विमर्शसन्धिरिति प्रख्यातश्चतुर्थः सन्धिः। एवं कार्य्यम् इति अर्थप्रकृत्या सह फलयोग इति अवस्थायाः मेलनेन लब्धो नाटकीयो भागो निर्व्वहणसन्धिः उपसंहारसन्धिरिति वा विश्रुतः पञ्चमः सन्धिः। अयम् खलु सामान्यनियमः—परम् "पताकायास्त्ववस्थानं क्वचिदस्ति न वा क्वचित्। पताकया विहीने तु वीजविन्दू निवेशयेत्—" इति नाटकचन्द्रिका।

Eng. Tran.—The Subject-matter (i. e. the plot of a drama) undergoes fivefold divisions (known as) the five sandhis through the respective combination of the aforesaid five Avasthas.

N. B.—From the assertion of Dasarupaka and Natyachandrika (as referred to in our Mitabhasini), it is clear that the five-fold divisions of the subject-matter of a drama known as the five sandhis owe their origin to the combination of five Avasthas with five Arthaprakritis—the combination of one Avastha with one Arthaprakriti gives rise to one sandhi. This is but an analysis of sandhi ; the definition of the same comes next.

Text—वृत्तिः। तल्लक्षणमाह—

मित—। पूर्व्वस्मिन् श्लोके सन्धेरुद्भवप्रणालीवर्णनमुखेन तस्य विश्लेषणं साधितम्। अथ परस्मिन् श्लोके सन्धेर्लक्षणं कथयति—

श्लोकः। अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति।

वृत्तिः। एकेन प्रयोजनेनान्वितानां कथांशानाम् अवान्तरैकप्रयोजन—सम्बन्धः सन्धिः।

मित । पूर्व्वस्मिन् श्लोके सन्धिस्वरूपं निर्णीतम् अधुना सन्धेः सामान्यलक्षणं वक्ति। अयं श्लोकस्तथा तस्य इयं वृत्तिश्च अविकलमेव दशरूपकात् उद्धृता। एकान्वये सति अन्तरैकार्थसम्बन्धः सन्धिरिति योजना। अस्य व्याख्या - एकः मुख्यः यो अन्वयः सम्बन्धः तस्मिन् सति। विभिन्नैः खलु अङ्कैः योजितं यत् नाटकीयम् वृत्तम् मूलप्रयोजनम् इति स्वीक्रियते तस्य मूलप्रयोजनस्य सिद्धये कर्त्तव्ये अङ्गानाम् (कथाङ्गानाम् इत्यर्थः) समन्वये सति इति भावः। योऽअन्तरैकार्थसम्बन्धः अवान्तरार्थसम्बन्धः—मूलप्रयोजनस्य घटकत्वात् कथांशानाम् अवान्तर-प्रयोजनस्य सम्बन्धः स एव सन्धिः। वृत्तिव्याख्या—एकेन प्रयोजनेन—नाटकस्य चरमफलरूपम् यत् एवम् मुख्यं प्रधानमिति भावः प्रयोजनम् उद्देश्यं तेन अन्वितानां तेन सम्पृक्तानाम् नाटकीयकथावस्तुनः बिभिन्ना-नाम अङ्गानाम् अवान्तरैकप्रयोजनसम्बन्धः अवान्तरं मुख्यस्य अङ्गीभूत-त्वात् गौणम् यत् एकम् प्रयोजनम् तेन प्रयोजनेन सह कथांशानाम् सम्बन्धः सन्धिरिति कथ्यते। स्पष्टीकृतमिद तथ्यं नाटकचन्द्रिकायाम् श्ररूपगोस्वामिचरणैर्यथा मुख्यप्रयोजनवशात् कथाङ्गानाम् समन्वये। अवान्तरार्थसम्बधः सन्धानरूपकः।'

अत्र श्रीरासविहारिसांख्यतीर्थकृतः वङ्गानुवादः—"प्रधानप्रयोजन-वशातः कथाङ्गसकलेर समन्वय अवान्तरप्रयोजनेर ये सम्बन्ध ताकेइ सन्धि कहे, इहा सन्धानरुपा अर्थात् उभयेर संयोगकारी।"

अत्र प्रसङ्गे श्रीमान् हरिदासः सिद्धान्तवागीशः दृष्टान्तं प्रदर्शयति यथा "मालतीमाधवे प्रथमाङ्कात् द्वितीयाङ्कसमाप्तिं यावत् एको मुखनामा सन्धिः। तत्र हि मालतीमाधवयो विवाहरुपमुख्यप्रयोजनं प्रति तयोः परस्परानुरागएव घटकः इतिमुख्यप्रयोजनघटकसम्बन्धसद्भावः तदुभयानु-

रागस्यैकान्तरप्रयोजनसत्तासम्बन्धसद्भावश्च इति अनुसन्धेयम् ।" तथान्यत्र—
मुख्यप्रयोजनवशात्तथाङ्गानां समन्वये । अवान्तरार्थसम्बन्धः सन्धिः
सन्धानरुपतः ।"

अतएव इदमेव आयाति—यत् सन्धौ द्विविधस्यवस्तुनः सद्भावः यथा मूलप्रयोजनघटकानाम् कथांशानाम् सम्बन्धस्य—(एकान्वये सति इत्यनेन एतत् विज्ञाप्यते), तथा अवान्तरैकप्रयोजनसम्बन्धस्य च (अन्तरैकार्थसन्बन्ध इति अनेन इदं प्रकाश्यते) सद्भावः। तेनैवहि प्रस्तावना खलु सन्धेर्वहिंभूता - यतस्तत्र यद्यपि मूख्यवृत्तान्तसूचनरुपः अवान्तरैकप्रयोजनसम्बन्धः अस्ति, तथापि तत्र मूलप्रयोजनघटकानां कथांशानान् परस्परान्वयो नास्ति।

Eng. Tran.—Sandhi is the connection—i. e. the denomination sandhi stands for the connection that co-ordinates (i. e. links up) the incidental purposes with the different parts (i. e. stages) of the main story (i. e. the main current) of the drama—the parts (i. e. stages) themselves being (as a matter of fact) co-ordinate with one another to serve the main purpose (that constitutes the aim of the drama). [Compare Brahman's connection with entire creation, in the line of Gita "मयि सर्वमिदं प्रोतं सूत्रे मणिगणाइव"] ।

N. B.—The definition and the exposition thereon have been taken verbatim from the Dasarupaka. Both of them are concise and consequently abstruse. The author himself has not elaborated this. We, however, have tried, our level best, to clear the idea, quoting copiously from different authorities, and in the matter of the English translation we have given a free translation of the sloka and the Vritti taken together—otherwise it would have

been un-intelligible to our readers—had we translated them separately and literally.

Text—वृत्तिः। तद्भेदान् आह—

मित—। तस्य सन्धेः भेदान् पञ्चभेदान् इत्यर्थः कथयति ग्रन्थकारः।

Eng. Tran.—The author proceeds now to speak of the five varieties of Sanhi.

Text श्लोकः। मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।
इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ॥

मित—। मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिस्तथा उपसंहृतिः (उपसंहारसन्धिः) इति पञ्च सन्धेः पञ्चभेदाः स्युः। क्रमात् एतेषाम् लक्षणमुच्यते। दशरुपके विमर्शस्थले अवमर्श इति दृश्यते।

Eng. Tran.—Mukha, Pratimukha, Garbha, Vimarsa and Upasamhara—these are the five varieties of Sandhi: they are being serially-defined ahead.

Text—वृत्तिः। यथोद्देशम् लक्षणमाह—

मित—। मुखम् प्रतिमुखम् इति एकैकम् गृहीत्वा क्रमेण तेषाम् सन्धीनाम् लक्षणम् निर्दिशति विश्वनाथः।

Eng. Tran.—The definitions (of the said five sandhis) are being serially stated below.

श्लोकः। यत्र वीजसमुत्पत्तिर्नानार्थरससम्भवा
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥

वृत्तिः। यथा—रत्नावल्यां प्रथमेऽङ्के।

मित—। यत्र नानार्थरससम्भवा प्रारम्भेण समायुक्ता वीजसमुत्पत्तिस्तन्मुखं परिकीर्त्तितम्—इति योजना। यत्र यस्मिन् सन्धौ वीजस्य "अल्पमात्रं समुद्दिष्टं बहुधा यत् विसर्पति, फलस्य प्रथमो हेतुर्बीजं तदभिधीयते" इति लक्षणाक्रान्तस्य नाट्यकथावस्तुनः सूचकभागस्य समुत्पत्ति-

राविर्भावः। साउत्पत्तिःकीदृशी ? नानार्थरसम्भवा—नाना बहुविधैः अर्थैः वृत्तान्तैः तथा रसैः शृङ्गारादिभिः च सम्भवः सम्बन्धो यस्याः तादृशी। विविधार्थसंयुक्ता तथा विविधरससमपृक्ता बीजसमुत्पत्तिरिति भावः। इयं खलु श्रीहरिदाससिद्धान्तवागीशकृता व्याख्या। परम् समबलोकाख्यायाम् दशरुपकटीकायाम् धनिकेन अस्य व्याख्यान्तरं कृतम्। तद् यथा—'बीजानाम्उत्पत्तिः अनेकप्रकारप्रयोजनस्य रसस्य च हेतुः मुखसन्धिरिति व्याख्येयम्। तेन अत्रिबर्गफले प्रहसनादौ रसोत्पत्तिहेतोरेव वीजत्वम्।"पुनरपि कीदृशी ? प्रारम्भेण, मुख्यफलसिद्धये औत्सुक्यं प्रारम्भ इति आरम्भसंज्ञकया कार्य्यस्य प्रथमावस्थया समायुक्ता संमिश्रिता इति। तथाहि मुखसन्धा नाटकीयकथावस्तुनः वीजस्य न्यासः तथा विविधप्रयोजनस्य रसस्य च हेतुत्वम्, एवं प्रारम्भसंज्ञका कार्य्यस्य प्रथमावस्था च विवृता भवेयुरिति। एतत् च त्रिविधं वस्तु मुखसन्धेः द्वादशभिरङ्गैः परिकल्पितं स्यात्। उक्तं हि धनिकेन—"अस्य च वीजारम्भार्थयुक्तानि द्वादशाङ्गानि भवन्ति" इति। दृष्टान्तो यथा –रत्नावलीनाटिकायाम् प्रथमे अङ्के--यत्र वत्सराजसागरिकयोः परिणयमेलनरूपस्य फलस्य प्रथमोहेतुः यत् वीजं परस्परानुरागरूपं तत् विवृतम्॥ किञ्च तद्बीजं मुखसन्धौ तस्य द्वादशभिरङ्गैः परिकल्पनम् इति एतत् मुखसन्धेरङ्गवर्णनप्रस्तावे पश्चात् दर्शयिष्यते। दृष्टान्तान्तरम् यथा ललितमाधवे-तत्र श्रीराधामाधवयोः प्रेमवीजसमुद्भवः मुखसन्धिः सुष्ठुरूपेण एव सूचितः। अत्र श्रीरूपकृतलक्षणं यथा—मुखं वीजसमुत्पत्तिर्नानार्थरससम्भवा। अत्र तु द्वादशाङ्गानि वीजारम्भानुरोधतः इति नाटकचन्द्रिका।

Engl. Trans.—That (sandhi) is said to be the Mukha (sandhi)—wherein germinates the seed (of the plot of the drama) attended by various incidents and sentiments (or better—together with the germination of sentiments that serves various purposes), and exhibiting the Prarambha (stage of the karyya).

Text—श्लोकः। फलप्रधानोपायस्य मुखसन्धिनिवेशिनः। लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तत् ॥

वृत्तिः। यथा –रत्नावल्याम् द्वितीयेऽङ्के वत्सराजसागरिका-समागमहेतोरनुरागवीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसङ्गताविदूषकाभ्याम् ज्ञायमानतया किञ्चिल्लक्ष्यस्य वासवदत्तया चित्र-फलकवृत्तान्तेन किञ्चिदुन्नीयमानस्योद्देशरूप उद्भेदः।

मित—। यत्र यस्मिन्सन्धौ मुखसन्धिनिवेशिनः मुखसन्धौ निवेशिनः मुखसन्धौ आविर्भूय अवस्थितस्य फलप्रधानोपायस्य फलस्य नाटकीयस्य मुख्यप्रयोजनस्य यः प्रधानोपायः मूलहेतुः नाट्यकथावीजम् इति यावत्, लक्ष्यालक्ष्य इव लक्ष्यश्चासौ अलक्ष्यश्चेति– किञ्चित् वा लक्ष्यः ज्ञायमानः स्फुटतया वोध्यमानः किञ्चित् वा अलक्ष्यः न स्पष्टतया ज्ञायमानः, अपितु केनचित् लिङ्गेन अनुमेयः इति एवमूभूत उद्भेदो भवति तत् खलु प्रतिमुखम्। प्रतिमुखसन्धौ खलु मुखसन्धिन्यस्तस्य वीजस्य अंशतः लक्ष्यत्वम् अंशेन च अलक्ष्यत्व परम् केनापि उपायेन अनुमेयत्वम्– इति बोध्यम्। उक्तं हि धनिकेन—"तस्य वीजस्य किञ्चित् लक्ष्यः किञ्चिदलक्ष्यइवोद्भेदः प्रकाशनं तत्प्रतिमुख्यम्।" दृष्टान्तो-यथा रत्नावल्याम्। तच्च दृश्यादृश्यरूपतया बीजस्य प्रकाशनं प्रतिमुखसन्धौ विन्दुरिनि अर्थप्रकृते स्तथा प्रयत्न इति कार्य्यस्य उपगमात् त्रयोदशभिरङ्गैः परिकल्पितं भवति इति पश्चात् बक्ष्यते। तथाहि नाटकचन्द्रिकायाम्—'भवेत् प्रतिमुखं दृश्यादृश्यवीज-प्रकाशनम्। विन्दुप्रयत्नोपगमादङ्गान्यस्य त्रयोदश।"

Eng. Tran.—Pratimukha (sandhi) is that in which the principal instrument of the aim (i. e. the primary means to the end of the drama). which (in the form of the seed) has been inserted (i. e. sewn) in the Mukha Sandhi undergoes development which is (partially) noti-

ceable (and partially not) i. e. which becomes perceptible to some extent only (to some persons) and remains in part imperceptible, only to be inferred. As in the second act of the Ratnavali—where the seed in the shape of love which serves as the cause i. e. stands as the means to the end—the end being the conjugal union of Vatsaraja and Sagarika, and which has been set in the first act, undersoes developmont by way of circulation which is partially perceptible being known by Susangata and Vidusaka and partially inferrable by Vasavadatta through the (agency of the) picture-plate affair.

Text—श्लोकः। फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन। गर्भो यत्र समुद्भेदोह्रासान्वेषणवान् मुहुः॥

वृत्तिः। फलस्यगर्भीकरणात् गर्भः। यथा रत्नावल्यां द्वितीयेऽङ्के— "सुसङ्गता—सहि! अदक्खिणा दाणिं सि तुमं, जा एवं भट्टिणाहत्थेण गहिदा वि कोवं न मुञ्चसि" इत्यादौ समुद्भेदः, पुनर्वासवदत्ताप्रवेशो ह्रासः। तृतीयेऽङ्के—"तद्वार्त्तान्येषणाय गतः कथं चिरयति वसन्तकः -इत्यन्वेषणम्। विदूषकः—'ही ही भो! कोसम्वीरज्जलम्भेण वि ण तादिशो पिअवअस्सस्स परितोसो, जादिसो मम सआसादो पिअवअणं सुणिअ भविस्सदि" इत्यादी उद्भेदः। पुनरपि वासवदत्ताप्रत्यभिज्ञानात् ह्रासः। सागरिकायाः सङ्केतस्थानागमने अन्वेषणम्। पुनर्लतापाशकरणे उद्भेदः।

मित—। अथ गर्भसन्धिं लक्षयति। कथं तस्य तादृशी आख्या इति पृच्छायाम् कथयति—फलस्य मुख्यप्रयोजनस्य गर्भीकरणात् आभ्यन्तरीकरणात् मुख्यरूपेण प्रकाशनात् इति यावत् गर्भः इति आख्या। श्लोकव्याख्या—यत्र यस्मिन् तृतीयेसन्धौ प्राक्पूर्वं प्रतिमुखसन्धौ इति यावत्

किञ्चन कथञ्चित् अंशतः इति भावः उद्भिन्नस्य प्रकाशं गतस्य लक्ष्यालक्ष्य-रुपतया स्तोकोद्भिन्नस्य इति यावत् फलप्रधानोपायस्य मुख्यप्रयोजनम् उद्दिश्य प्रवर्त्तमानस्य प्रकृष्टसाधनस्य वीजस्य इति भावः समुद्भेदः सम्यक्प्रकाशनम् एवेति स गर्भसन्धिः। ननु स वीजस्य समुद्भेदः कीदृशः? किं स उद्भेदः अपायादिरहितः यत् एकान्तो भवेत्? तथा सति तत्रैव हि नाट्यवस्तुनः अवसानं जायते। उत्तरं पठति—नहि नहि। न तादृशः—अपितु मुहुः वारंवारम् एव ह्रासान्वेषणवान् स उद्भेदः। ह्रासः विघ्नादि-सद्भावात् स्पष्टम् उद्भिन्नस्य मुख्यप्रयोजनस्य तिरोभावः। अन्वेषणम्—तस्य अनुसन्धानं अपायनिरुपणोपायान्वेषणं तेन च तस्य प्राप्तिश्च। गर्भे वारं वारं खलु एवम् घटते - अतएव गर्भे खलु मुख्यप्रयोजनस्य सिद्धि र्न एकान्ता अपितु अनिर्द्धारितैकान्तफलप्राप्ताशात्मिका इति वोध्यम्।

अत्र प्रसङ्गे धनिकेनोक्तं यथा "प्रतिमुखसन्धौ लक्ष्यालक्ष्यरुपतया स्तोकोऽद्भिन्नस्य वीजस्य यविशेषोद्भेदपूर्व्वकः सान्तरायो लाभः। पुन-र्विच्छेदः, पुनः प्राप्तिः, पुनर्विच्छेदः, पुनश्च तस्यैव अन्वेषणं वारं वारं सोऽनिर्द्धारितैकान्तफलप्राप्त्याशात्मको गर्भसन्धिरिति"। कार्य्यस्य या प्रथमावस्था आरम्भसंज्ञका—या मुखसन्धौ न्यस्यते, या द्वितीयावस्था यत्न इत्याख्या सा प्रतिमुखे या च प्राप्त्याशा (प्राप्तिसम्भवः) सा तु अस्मिन् गर्भसन्धौ एवम् अर्थप्रकृतीनां तृतीया या पताका तस्यापि अत्र सम्भवः। तस्या एव पताकाया अनुरोधात् गर्भसन्धिः द्वादशभिरङ्गैः परिकल्पितः। स्यात्। उक्तं हि श्रीरुपेण "दृष्टादृष्टस्य वीजस्य गर्भोह्रासान्वेषणात्। द्वादशाङ्गो भवेदेव पताकांशानुसारतः।" दशरूपकमते तु पताकायाः सद्भावः कुत्रचित् स्यात् कुत्रचित् वा न स्यात्। परं प्राप्त्याशातु अवश्यमेव गर्भसन्धौ स्थास्यति। उक्तं हि धनञ्जयेन—"गर्भस्तु दृष्टादृष्टस्य बीजस्या-न्वेषणं मुहुः। द्वादशाङ्गः पताका स्यान्नवा स्यात् प्राप्तिसम्भवः"। रत्नावल्याः उदाहरणमिदं तु प्रदर्शितं धनिकेन—तृतीयेऽङ्के वत्सराजस्य वासवदत्तालक्षणापायेन तद्वेषपरिग्रहसागरिकाभिसरणोपायेन च विदूषक-

मन्वसा सागरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तया विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनरपायनिवारणोपायान्वेषणम्—"नास्ति देवीप्रसादनां मुक्त्वा अन्य उपाय" इति ।

Eng. Tran.—Garbha (sandhi) is that, in which the primary means to the end (of the drama) which has been, to some extent, illuminated previously (in the Pratimukha Sandhi), undergoes elaboration, very often attended by decay (due to obstacles) and an attempt to do away with the same (through the removal of obstacles, the cause of the decay—मुहुः ह्रासान्वेषणवान्) ।

Garbha (i. e. Garbha Sandhi) is so named, because herein is centralised the aim (i. e. the end, the main point) of the drama (or in other words, it is here in the third sandhi that the seed of the drama attains visible development and thereby the plot attains maturity). As in the second act of the Ratnavali, Susangata—My friend! unkind art thou! as you do not bid good-bye to your anger even now when you are caught hold of in the hand by the Lord—with these there appears the illumination (of the plot). Then it vanishes with the entrance of Vasavadatta. In the third act—there is (an attempt at) re-illumination by the following (statement)—why is loitering Vasantaka who has been despatched to fetch her (Sagarika's) news. Vidusaka (then says)—Ho! Ho! My friend will have such contentment at the hearing of the good news from me as has not been ensured by the requi-

sition of the kingdom of Kausambhi—here is (again) a case of re-illumination. Then there occurs a case of disappearance when the lady (expected to be Sagarika) is recognised (in her stead) as Vasavadatta. (Again) there is re-illumination when Sagarika makes her way to tryst. Again there is re-illumination with the binding (of Sagarika) with a noose of creepers (by Vasavadatta as it publicly betrays mutual love of the King and Sagarika).

Text—श्लोकः। यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः। शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः॥

वृत्तिः। यथा—शाकुन्तले चतुर्थाङ्कादौ—"अनसूया—पिअंवदे! जइ वि गान्धव्वेण विवाहेण निव्वुत्तकल्लाणा पिअसही सउन्तला, अनुरूव-भत्तिभाइनी सम्वुत्तेत्ति निव्वुदं मे हिअअं, तह वि एत्तिअं चिन्तणिज्जं, इत्यत आरभ्य सप्तमाङ्कोपक्षिप्तात् शकुन्तलाप्रत्यभिज्ञानात् प्रागर्थसञ्चयः शकुन्तलाविस्मरणरूपविघ्नालिङ्गितः।

मित। यत्र यस्मिन् सन्धौ मुख्यः प्रधानः (? प्रधानं) फलोपायः फलसाधकः पदार्थः गर्भतः गर्भसन्ध्यपेक्षया अधिकः उद्भिन्नः उद्भासितः—गर्भे मूलप्रयोजनसाधकं वीजरूपं वस्तु यादृक्षम् उद्भासितं, तस्मात् अपि अधिकतरम् उद्भासितं यस्मिन् सन्धौ, अपिच स फलप्रधानोपायः गर्भतोअधिकमुद्भिन्नोऽपिशापाद्यैः अभिसम्पातप्रभृतिभिः (आदिपदेन व्यसनं प्रलोभनं क्रोधश्च ग्राह्याणि) सान्तरायः कृतविघ्नः अपायमण्डितः इति यावत् स सन्धिः विमर्श इति आलङ्कारिकैः स्मृतः। विमृश्यते नाटकीय-पात्रैः कर्त्तव्यं पर्यालोच्यते अस्मिन् सन्धौ इति विमर्शः। अस्य अवमर्श इति संज्ञा दशरूपके। स च अवमर्श (पर्य्यालोचनं) क्रोधेन व्यसनात् विलोभनात् वा भवति। उक्तं हि श्रीरूपेण—यत्र प्रलोभनक्रोधव्यसनाद्यैः

विमृश्यते, बीजवान् गर्भनिर्भिन्नः स विमर्श इतीर्यते। दृष्टान्तो यथा अभिज्ञानशकुन्तलायाम् चतुर्थाङ्कस्य आदौ यत्र अनसूया कथयति—प्रियंवदे। यद्यपि गान्धर्व्वेण विवाहेण निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्त्तृभागिनी संवृत्ता इति निर्वृत्तं मे हृदयं, तथापि एतावत् चिन्तनीयम्" इत्यंशादारभ्य सप्तमाङ्के उपक्षिप्तः (कविना उपन्यस्तः) स दुष्यन्तेन शकुन्तलायाः, प्रत्यभिज्ञानरूपव्यापारः, तस्मात् प्राक् संघटितः अर्थसञ्चयः (व्यापारसमूहः) राज्ञो शकुन्तलायाःविस्मरणरूपेण विघ्नेन आलिङ्गितः संश्लिष्ठ इति अयमेवांशः विमर्शसन्धिः। स च शकुन्तलाविस्मरणरूप-विघ्नः दुर्व्वाससः क्रोधोत्पन्नेन उत्पादितः इति। तथाहि शकुन्तलया यह राज्ञः चरम-मेलनरूपो यो मुख्यः पदार्थः तस्य यः प्रधानोपायः शकुन्तलानयनाय राज्ञा दूतप्रेषणरूपः—स तु दुर्व्वाससः क्रोधजनितेन शापेन आविर्भूतेन शकुन्तलाविस्मरणरूपेण अन्तरायेण आच्छादितः इति लक्षणसङ्गतिः ज्ञेया। अपिच "रत्नावल्यां चतुर्थेऽङ्के अग्निविद्रवपर्य्यन्तो वासवदत्ताप्रसक्त्या निरपायरत्नावली—प्राप्त्यवसायात्मा विमर्शो दर्शितः" इति धनिकः। अपरं उदाहरणं यथा वेणीसंहारे षष्ठेऽङ्के दुर्योधनरुधिराक्त भीमसेनापगम-पर्य्यन्तः। अथ सा चतुर्थी अर्थप्रकृतिः प्रकरी इति कथ्यते तथा कार्य्यस्य सा चतुर्थी अवस्था नियताप्तिरिति स्मर्यते, तयोः खलु अस्मिन् चतुर्थे सन्धौ (विमर्शसन्धौ) सद्भावः। तयोरेव आनुगुण्यात् अस्य सन्धेः त्रयोदश अङ्गानि सम्भवन्ति, तानि च पश्चात् कथ्यन्ते।

Eng. Tran.—Vimarsa is said to be that, in which the primary means to the end has emanated exuberantly from the Garbha but is (at the same time) confronted with difficulties accruing out of curse and the like. As in Sakuntala, in the beginning of the fourth act where Anasuya (says to her friend in the following way)—Priyamvada ! though the auspicious nuptual ceremony of

our dear friend Sakuntala has been solemnised in accordance with Gandharva rites, and (though) she has been united in wed-lock with a suitable husband—a fact that ensures satisfaction of my heart, yet this much too, is such as deserves consideration"—the affair, beginning from this (portion) and extending up to the recognition of Sakuntala set in the seventh act, is beset with obstacles in the shape of the forgetting of Sakuntala (and hence forms the Vimarsa sandhi of the drama).

Text—श्लोक। वीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्। एकार्थमुपनायन्ते यत्रनिर्वहणं हि तत्॥

वृत्तिः। यथा वेण्याम्—"कञ्चुकी (उपसृत्य सहर्षम्) महाराज! वर्द्धसे। अयं खलु भीमसेनो दुर्य्योधनक्षतजारुणीकृतसर्व्वशरीरो दुर्लक्ष्यव्यक्तिः "इत्यादिना द्रौपदीकेशसंयमनादि-मुखसन्ध्यादिवीजानां निजनिजस्थानोपक्षिप्तानाम् एकार्थप्रयोजनम्। यथा वा शाकुन्तले सप्तमाङ्के शकुन्तलाभिज्ञानात् उत्तरोऽर्थराशिः।

मित—। यथायथम् विप्रकीर्णाः वीजवन्तः मुखाद्यर्थाः यत्र सन्धौ एकार्थम् (ऐकार्थ्यमिति दशरूपकधृतः पाठः) उपनीयन्ते तत् निर्वहणमिति योजना। यथायथम् यथारीति नाट्यशास्त्रसम्मतं नियमम् अनुसृत्य इति भावः विप्रकीर्णाः विक्षिप्ताः स्वेषु स्वेषु स्थानेषु उपन्यस्ताः मुखाद्यर्था मुखादिषु मुखे प्रतिमुखे गर्भे विमर्शे च अवस्थिताः अर्थाः विषयाः मुखादिषु चतुर्षु सन्धिषु प्रतिपादितानि वस्तूनि—बीजवन्तः बीजसंयुताः प्राक्कथित लक्षणेन अन्विताः—यत्र यस्मिन् सन्धौ एकार्थम् एकः मुख्यः एव अर्थः विषयः मुख्यविषयम् उपनीयन्ते प्राप्यन्ते नाटकस्य मुख्यविषये एव ते मुखाद्यर्था यत्र पर्य्यवसन्ति, यद्वा एकार्थम् मुख्यप्रयोजनम् नाट्यवस्तुनः

चरमफलरूपं महाप्रयोजनं उपनीयन्ते स एव निर्व्वहणसन्धिः, तस्यैव संज्ञान्तरम् उपसंहारसन्धिरितिबोध्यम्। मुखादिषु चतुर्षु सन्धिषु उपन्यस्ताः विषयाः खलु निर्व्वहणसन्धौ नाटकीयकथावस्तुनः चरमफलरूपम् यत् मुख्यप्रयोजनम् तेन सह अन्विताः सन्तः मुख्यप्रयोजनस्य एव साधकाः भवन्तिं इति भावः। अस्य चतुर्दश अङ्गानि पश्चात् वक्ष्यन्ते। उपसंहार सन्धेः दृष्टान्तो यथा वेणीसंहारे अन्तिमे अङ्के यत्र काञ्चुकीयः युधिष्ठिर-मभिगम्य सहर्षम् कथयति—"महाराज! वर्द्धसे! श्रीवृद्धिं लभते भवान्—(यतः) अयं खलु भोमसेनः दुर्योधनस्य क्षतजेन उरूभङ्गजनितेन रुधिरेण अरुणीकृतं लोहितीकृतं सर्व्वं शरीरं यस्य तादृशः अतएव दुर्लक्ष्य-व्यक्तिः असौ भीमसेन इति सहसा न ज्ञायते अपितु पर्य्यालोचनेनैव ज्ञायते इति भावः—इत्यादिना अंशेन द्रौपदीकेशसंयमनादि, यावत् शत्रवः न निपातं यान्ति, तावत् केशवन्धनं द्रोपदीन करिष्यति, निपातं गतेषु शत्रुषु एव भीमः द्रौपद्याः केशवन्धनं करिष्यति इति अनेन प्रकारेण द्रोपदी केशबन्धनादयः ये ये विषयाः—आदिपदेन शत्रुनिपातराज्यलाभ प्रभृतयः— तेषां विषयाणाम् यानि मुखसन्ध्यादिषु अवस्थितानि बीजानि भीमसेनक्रोधेन उपबृंहितानि युधिष्ठिरस्य उत्साहनादिरूपाणि—तेषां मुखसन्ध्यादिबीजानाम् निजनिजस्थानोपक्षिप्तानाम् स्वेषु स्वेषु स्थानेषु उपन्यस्तानाम् एकार्थप्रयोजनम् एकार्थे द्रौपदीकेशवन्धनरूपे मुख्ये विषये एव प्रयोजनम् उपकरणम्। अपरदृष्टान्तो यथा अभिज्ञानशकुन्तलायाम् —सप्तमे अङ्के, तत्र राजकर्त्तृकं शकुन्तलायाः यत् प्रत्यभिज्ञानम् तस्मात् उत्तरं संघटितं वृत्तान्तं दुष्यन्तेन सह सपुत्रायाः शकुन्तलायाः मेलनरूपं तथा मारीचस्य आशीर्व्वादलाभादिरूपञ्च। दृष्टान्तान्तरं यथा रत्नावल्यां "सागरिकारत्नावलीवसुभूतिबाभ्रव्यादीनामर्थानां मुखसन्ध्यादिषु प्रकीर्णानां वत्सराजैककार्य्यार्थत्वम्"। वसुभूतिः—(सागरिकां निर्व्वर्ण्य अपवार्य्य) बाभ्रव्य, सुसदृशीयं राजपुत्र्या—इत्यादिना दर्शितमिति निर्वहणसन्धिरिति धनिकः

Eng. Trans.—Nirvahana (Sandhi) is that in which the topics which are relative to the seed (of the drama), and are set in four sandhis such as the Mukhasandhi etc in order, are made to serve the primary purpose (i. e. the chief aim of the drama). As in the Veni (Samhara)—The Chamberlain (Having approached, gladly)—your Majesty! Prosper, (my congratulations)! This is Bhimsena but not discernible as such (since) his body is red all over with the blood oozing out from the wound of Duryyodhana—with this and then what follows, the seed-topics set in the Mukha and other sandhis—such as the locking of the curls of Draupadi and the like which are thus lodged in their proper places serve the common (that is the main) purpose ; or as in Sakuntala, in the seventh act, the topics following the recognition of Sakuntala.

Text—वृत्तिः। एषाम् अङ्गान्याह—

मित—। पूर्व्वमेवोक्तमस्माभिः पुनरपि स्पष्टार्थम् उच्यते यत् मुखं प्रतिमुखं गर्भं विमर्शं निर्व्वहणमिति पञ्च सन्धयः। तत्र मुखे प्रथमार्थ-प्रकृतेः बीजस्य तथा कार्य्यस्य प्रथमावस्थायाः प्रारम्भस्य सद्भावः। स च द्वादशभिरङ्गैः परिकल्पितः। एवं प्रतिमुखे बिन्दुरिति अर्थप्रकृतेः यत्न इति कार्य्यावस्थायाः सद्भावः— स च त्रयोदशभिरङ्गैः आविर्भावितः। गर्भे पताकायाः प्राप्त्याशायाश्च अवस्थितिः—सा च द्वादशभिरङ्गैः प्रकाशिता। विमर्शे प्रकरी इत्यस्य नियताप्तिरित्यस्य च अवस्थानं तच्च त्रयोदशभिरङ्गैः परिव्यक्तम्। निर्व्वहणे कार्य्यमित्यस्य फलागमस्य च सत्ता

सा च चतुर्दशभिरङ्गैः सुविन्यस्ता स्यात् इति। अधुना तानि अङ्गानि यथाक्रमम् सलक्षणम् निर्दिशति श्रीमान् विश्वनाथः –

Eng. Trans.—The parts (i. e. component parts) of these (sandhis) are now being spoken of by our author.

Text—श्लोकः। उपक्षेपः परिकरः परिन्यासो विलोभनम्। युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे।

मित—। मुखे मुखसन्धौ एतानि उपक्षेपप्रभृत्तीनि द्वादश अङ्गानि भवन्ति।

Eng. Trans.—In Mukha (sandhi), the (component) parts are the following—Upakshepa, Parikara, Parinyasa, Vilobhana, Yukti, Prapti, Samadhana, Vidhana, Paribhavana, Udhbeda, Karana and Bheda.

Text—वृत्तिः। यथोद्देशम् लक्षणमाह –

मित –। एकैकशः एषाभ् द्वादशानामङ्गानाम् लशणानि वक्ति ।

Eng. Trans.—The definitions of these are being said in serial order.

Text—श्लोकः। काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः।

वृत्तिः। काव्यार्थः इतिवृत्तलक्षणं प्रस्तुताभिधेयः। यथा वेण्यां भीमः—लाक्षागृहानल-विषान्न-सभाप्रवेशैः, प्राणेषु वित्तनिचयेषु च नः प्रहृत्य। आकृष्य पाण्डववधू परिधानकेशान्; स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ?॥

मित—। उपक्षेपणम् आदौ नाट्यकारेण उपस्थापनम् इति उपक्षेपः। स कीदृशः ? काव्यार्थस्य काव्यस्य नाटकस्य योऽर्थः प्रतिपाद्यविषयः तस्य समुत्पत्तिः बीजाकारेण प्रथमोपस्थापनम् उपक्षेपः इति नाट्यशास्त्राचार्य्यैः स्मृतः कथितः। तथाहि बीजम् इति अर्थप्रकृतेः न्यास एव उपक्षेपः इति

बीजम्‌ः। उक्तं दशरूपके—बीजन्यास उपक्षेपः इति। श्रीधनिकेनापि—उपक्षेपस्तु बीजस्य सूचनं कथ्यते बुधैः। नाटकीयकथावस्तुनः बीजस्य प्रथमसूचनमेव उपक्षेप इति सरलार्थः। अत्र वेणीसंहारस्य यः काव्यार्थः पाण्डवैः प्रतिशोधग्रहणार्थः कौरवविजयरूपः, तस्य प्रथमसूक्तं अतएव अयमंशः उपक्षेपः। यथा वा "रत्नावल्यां—द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोप्यन्तात्। आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः--इत्यादिना यौगन्धरायणो वत्सराजस्य रत्नावलीप्राप्तिहेतुभूतमनुकूलदैवं स्वव्यापारं बीजत्वेनोपक्षिप्तवान् इति उपक्षेपः।—इति धनिकः।

Eng. Tran. Upakhepa is said to be that which introduces the main theme of the drama (—which is known as Kavyartha). The word Kavyartha stands for the main theme (the principal subject-matter) of the drama which is (really) the point at issue, as in Venisamhara—How can the sons of Dhritarastra rest in peace, so long as I am living, the sons of Dhritarastra who have struck us in respect of our life and property by setting fire to the house of lac, by administering poison and by taking us to the (Royal) court, and also by dragging the hair and garment of the wife of the Pandavas.

Text—श्लोकः। समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः।

वृत्ति। यथा तत्रैव—

"प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभिर्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम्।
जरासन्धस्योरः स्थलमिव विरूढम् पुनरपि, क्रुधा भीमः सन्धिं विघटयति यूयं घटयत॥

मित—। समुत्पन्नस्य प्रागेव जातस्य अर्थस्य नाटकीयवस्तुनः बीजस्य इति भावः बाहुल्यं बहुलीकारः पूर्व्वापेक्षया अधिकतया आविर्भावः इति यावत् पुनः तु परिकरः इति मुखस्य सन्धिरेव ज्ञेयः बोध्यः।

अन्यो दृष्टान्तो यथा रत्नावल्यां—"अन्यथा क्व सिद्धादेशप्रत्ययजनित प्रार्थितायाः सिंहलेश्वरदुहितुः समुद्रे प्रवहनभङ्गमग्नोत्थितायाः फलकासादनम्।" इत्यादिना "सर्व्वथा स्पृशन्ति स्वामिनमभ्युदया" इत्यन्तेन बीजोत्पत्तेरेव बहुलकरणात् परिकरः" इति धनिकः।

Eng. Tran.—Parikara is but to be known as the expansion of the subject-matter that has already been called into existence. As therein (in Veni)—The enmity with the Kurus that has continued (all along) is (solely) relative to me—even from my childhood; Neither the venerable (brother), nor Kiritin nor yourselves have anything to do with it. Now, out of wrath, Bhim tears (the turns of) the patched up peace just as the breast of Jarasandha. Rejoin (or defend) it (if you can).

Text —श्लोकः। तन्निष्पत्तिः-परिन्यासः।

वृत्तिः। यथा तत्रैव

चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानावनद्धघनशोणित-शोणपाणि रुत्तंसयिष्यति कचांस्तव देवि भीमः॥ अत्र उपक्षेपो नाम इतिवृत्तलक्षणस्य काव्याभिधेयस्य संक्षेपेणोपक्षेपणमात्रम्। परिकरस्तस्यैव बहुलीकरणम्। परिन्यासस्ततोऽपि निश्चयापत्तिरूपतया परितो हृदये न्यसनम् इति एतेषां भेदः।

मित—। लक्षणमिदं दशरूपकात् अविकलम् एव गृहीतम्। तस्य बीजस्य निष्पत्तिः निश्चयापत्तिः निश्चयेन हृदये उपस्थितिरिति परिन्यासः कथ्यते। तथाहि नाटकचन्द्रिकायाम्—बीजनिष्पत्तिकथनम् परिन्यास

इतीर्य्यते। अथ पूर्व्वोक्तानाम् त्रयाणाम् भेदः प्रदर्श्यते—तत्र यस्तु उपक्षेप इति कथ्यते स तु इतिवृत्तलक्षणस्य कथास्वरुपस्य इति यावत् काव्यीभिधेयस्य काव्यस्य दृश्यकाव्यस्य योऽभिधेयः प्रतिपादनीयः—तस्य, नाटके प्रतिपाद्ये यद्वस्तु तस्य इति सरलार्थः संक्षेपेण उपक्षेपणमात्रम् सूचन—मात्रम्। तस्यैव खलु बहुलीकरणम् परिकरः। परिन्यासस्तु ततोऽपि परिकरादपि निश्चयापत्तिरूपत्तया—निश्चयेन या आपत्तिः प्राप्तिःआविर्भावः इति यावत्-तस्याः भावः' इति निश्चयापत्तिरुपतया निश्चयरुपेण आविर्भावत्वेन परितो हृदये न्यसनम् चित्तस्य सर्वत्र एव स्थापनमिति भावः। अस्य यथा वेणीसंहारे उदाहरणम्—उत्तंसयिस्यति=विभूषयिष्यति। अत्र दुर्योधनस्य उरुभङ्गरुपस्य काव्यार्थस्य निश्चयेन हृदये न्यसनात् परिन्यासः। दृष्टान्तान्तरं यथा रत्नावल्यां—"प्रारन्भेऽस्मिन् स्वामिनोवृद्धिहेतौ" (रत्ना १।७) इत्यादि श्लोकेन यौगन्धरायणः स्वव्यापारदैवयोर्निष्पत्तिमुक्तवान् इति परिन्यासः इति धनिकः।

Text—अङ्गत्रयाणां पौर्व्वापर्य्यं प्रदर्शयति—

वृत्तिः। एतानि चाङ्गानि उक्तेनैव पौर्व्वापर्य्येण भवन्ति। अङ्गान्तराणि त्वन्यथापि।

मित—। एतानि पूर्व्वोक्तानि त्रीणि अङ्गानि अवश्यमेव पौर्व्वापर्य्यमवलम्ब्यतिष्ठन्ति, तद् यथा—आदौ उपक्षेपस्ततः परिकरस्ततः परिन्यासः। अपरेषाम् खलु अङ्गानाम् एतादृशम् पौर्व्वापर्य्यं नास्ति, यदृच्छया तानि निवेष्टव्यानि।

Eng. Tran.—Parinyasa is the firm determination, relative to main theme (primary object) of the darma. As there, too—Venerable Lady, Bhima will braid your hair with his hands turned red with Duryodhana's blood, rendered solid after having expanded and deposited—Duryodhana whose two thighs would be pulverised

by the strokes of terrible club, wavered on him with my hands moving to and fro.

Here in this connection—Upakṣepa stands for the short introduction of the subject-matter that forms the main theme of the kavya (drama). Parikara implies expansion of the same. Parinyasa is the entertaining fully at heart (of the same) with firm determination and thus lies the difference of these. These parts appear in (the manner of) the aforsaid succession; (whereas) all other parts (Anga) may come otherwise also—i. e. without any hard and fast order of succession.

Text – श्लोकोः। गुणाख्यानं विलोभनम्।

वृत्तिः। यथा तत्रैव—द्रौपदी—णाध! किंदुक्कर' तुए परिकुविदेण। यथा वा मम चन्द्रकलायाम् चन्द्रकलावर्णने—"सेयम्, तारुण्यस्य विलासः" इत्यादि। यत्तु शाकुन्तलादिपु "ग्रीबाभङ्गाभिरामम्" इत्यादि मृगादिगुणवर्णनं तद्बीजार्थसम्बन्धाभावान्नसन्धयङ्गम्। एवम् अङ्गान्तराणामपि ऊह्यम्।

मित—। गुणस्य नायकस्य नायिकाया वा उत्कर्षस्य आख्यानम् वर्णनम्—एकस्य गुणकीर्त्तनेन अपरस्य चित्ताकर्षणम् इतिभावः तत् विलोभनम् इति कथ्यते। अतः सुष्ठूक्त' श्रीरुपेण—नायकादिगुणानां यद्वर्णनं तद्विलोभनमिति। दृष्टान्तः—यथा वेणीसंहारे द्रौपदी 'नाथः कि दुष्कर' त्वया कुपितेन। अत्र द्रौपद्या भीमस्य वीर्य्यत्र-प्रशंसया दुर्य्योधनादीनां वधे प्रलोभनोद्दीपनात् विलोभनम्। यथा वा ग्रन्थकारस्य चन्द्रकलायां नायिकायाः चन्द्रकलायाः एव बर्णन-प्रसङ्गे 'सा इयम्! तारुण्यस्य यौवन-शोभायाः बिलासः लीलास्थलम् इत्यादौ नायिकायाम् नायकस्य आत्मनः एव अभिलाषप्रतिपादनात् विलोभनम्। यथा बा

रत्नावल्यां "अस्तापास्तसमस्तभासि" (१।२३) इत्यादौ वैतालिकमुखेन चन्द्रतुल्यवत्राजगुणवर्णनया सागरिकायाः समागमहेत्वनुरागवीजानुगुण्येनैव विलोभनाद्विलोभनमिति धनिकः। किञ्च अभिज्ञानशकुन्तले ग्रीवाभङ्गाभिराममित्यादिश्लोके न नायकस्य गुणकीर्त्तनम् न वा नायिकायाः—अपितु कस्यचित् आश्रममृगस्य एव। तस्य गुणकीर्त्तनेन सह तद्वीजार्थसम्बन्धाभावात् तस्य नाटकस्य यः वीजार्थः मूलीभूतं वस्तु तस्य सम्पर्कराहित्यात् "ग्रीभभङ्गाभिरामम्" इत्यादि न खलु विलोभनमितिनाम सन्ध्यङ्गं भवति। एवम् अनयैव दिशा अङ्गान्तराणाम् अन्येषाम् सन्ध्यङ्गानाम् वीजार्थसम्बन्धः ऊह्यः अवश्यमेव ज्ञेयः। अन्यथा तानि कदापृयेव "गीवाभङ्गाभिरामम्" इतिवत् सन्ध्यङ्गानि न भवन्ति।

Eng. Tran.—Vilobhana is the (capturing of others by the) describing of the excellence or merit. As therein too —Draupadi=my Lord what is impossible if you be angry? Or as in my Chadrakala in the course of the description of Chadrakala—It is she, the exhibition of youthfulness and so forth.

There is the description and others of the beauty of the deer and others in the sloka "Grivabhamgavirama"— in the Abhijnana Sakuntala and others—but it forms no part of the sandhi (viz vilobhana is a part of the Mukha sandhi) due to its being unconnected with the main topic of the drama. This is to be known or inferred in the case of others also.

Text—श्लोकः। सम्प्रधारणमर्थानां युक्तिः।

वृत्तिः। यथा—वेण्यां सहदेवो भीमं प्रति—आर्य्य! किं महाराजसन्देशः अव्युत्पन्न एव आर्य्येण गृहीतः" इत्यतः प्रभृति यावद्भीमवचनम्।

" युष्मान् ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षयः। न लज्जयति दाराणां सभायां केशाकर्षणम्।

नित। अर्थानाम् प्रयोजनानाम् सम्प्रधारणम् सम्यक् निर्णयः एव युक्तिरिति कथ्यते। तथाहि श्रीरूपैः—सम्यक् प्रयोजनानां हि निर्णयोयुक्तिरिष्यते। दृष्टान्तो यथा—वेणीसंहारे भीमं प्रति सहदेवो वक्ति—आर्य्य! किं महाराजसन्देशः युधिष्ठिरनिर्द्देशः अवुद्यतूपज एव अविचारित एव आर्य्येण भवता गृहीतः—इति अस्मात् स्थानादारभ्य भीमवचनं यावत् न्यस्तोऽंशो युक्तिः। तत् यथा—(श्लोकव्याख्या) क्रोधात् शत्रुकुलक्षयः दुर्य्योधनादीनां विनाशः लोके समाजे युष्मान् ह्रेपयति लज्जयति। परं सभायां कौरवसभायां दाराणां भार्य्यायाः द्रौपद्याः (दुःशासनकृतं) केशाकर्षणं न लज्जयति युष्मान् इति भावः। अत्र रिपुवंशविनाशस्य एव प्रयोजनतया अवधारणात् युक्तिः। दृष्टान्तान्तरं यथा रत्नावल्यां यौगन्धरायणस्य उक्तिः—मयाऽपि चैनां देवीहस्ते सबहुमानं निक्षिपता युक्तमेवानुष्ठितम्। कथितं च मया यथा— बाभ्रव्य कञ्चुकी सिंहलेश्वरामात्येन वसुभूतिना सह कथं कथमपि समुद्रात् उत्तीर्य्य कोशलोच्छित्तये गतस्य रुमण्वतो घटितः" इत्यनेन सागरिकायाः अन्तः पुरस्थायाः वत्सराजस्य सुखेन दर्शनादिप्रयोजनावधारणात् बाभ्रव्यसिंहलेश्वरामात्ययोः स्वनायकसमागमहेतु प्रयोजनत्वेनावधारणात् 'युक्तिरिति धनिकः।

Eng. Tran.—Yukti is the final ascertaining of the object (in view). As in Veni-Sahadeva to Bhima "Venerable sir ; how is it that the message of His Majesty has been accepted by you without having read the significance therein, from this up to the statement of Bhima— The destruction of the enemy's family is putting you to shame in human society—but the dragging of the wife

by the hair in the court does not cause your shame (in any way).

Text—श्लोकः। प्राप्तिः सुखागमः।

वृत्तिः। यथा तत्रैव—"मथ्नामि कौरवशतं समरे न कोपात्" इत्यादि श्रुत्वा द्रौपदी (सहर्षम्) णाघ! अस्सुदपूब्भं क्खुएदं वअणं ता पुणोपुणो भण।

मित—। सुखस्य आगमः कस्यचित् पात्रस्य नायकस्य नायिकायाः वा सुखसंप्राप्तिः प्राप्तिरिति कथ्यते। यथा नाटकचन्द्रिकायाम्—प्राज्ञैः सुखस्य संप्राप्तिः प्राप्तिरित्यभिधीयते। दृष्टान्तो यथा वेणीसंहारे-मथ्नामि कौरवशतं समरे न कोपात् दुःशासनस्य रुधिरं न पिबाम्युरस्तः संचूर्णयामि गदया न सुयोधनोरु- सन्धिं करोतु भवतां नृपतिः पणेन इति भीमस्य वचनं श्रुत्वा सानन्दा द्रौपदी आह—नाथ! अश्रुतपूर्व्वं खलु एतत् वचनं तत् पुनः पुनः भण। दृष्टान्तान्तरं यथा रत्नावल्यां—सागरिका। (श्रुत्वा सहर्षं परिवृत्य सस्पृहं पश्यन्ती) कथमयं स राजा उदयनो यस्मैअहम् तातेन दत्ता। तत् पर-पोषणदूषितम् मे जीवितम् एतस्य दर्शनेन बहुमतं सञ्जातम्। इति सागरिकायाः सुखागमात् प्राप्तिरिति धनिकः।

Eng. Tran.—Prapti implies acquisition of happiness. As therein, too ; shall I not pulverise hundred Kauravas, out of warth in battles—and so forth, hearing which Draupadi says gladly,—my Lord such words I have never heard before and hence please repeat those.

Text—श्लोकः। वीजस्यागमनं यत्तु तत्समाधानमुच्यते।

वृत्तिः। यथा तत्रैव—(नेपथ्ये) भोः भोः विराटद्रुपदप्रभृतयः श्रूयताम्—यत् सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृतं यद्विस्मर्तुमपीहितं शमवता शान्तिं कुलस्य इच्छता। तद्द्यूतारणिसम्भृतं नृपसुता-कशाम्बराकर्षणैः क्रोधजेनातिरिदं महत्कुरुवने यौधिष्ठिरं जृम्भते॥ अत्र

"स्वस्था भवन्ति मयि जीवति" इत्यादि बीजस्य प्रधाननायकाभिमतत्वेन सम्यगाहितत्वात् समाधानम्।

मिञ्च—। बीजस्य आगमनम् पुनराधानम् इति भावः यत् तत् तु समाधनम्। उक्तं हि श्रीरुपैः—बीजस्य पुनराधानां समाधानमिहोच्यते। बीजागमः समाघनमिति दशरुपकम्। यथा बेणीसंहारे एव—युधिष्ठिरस्य उक्तिः। श्लोकव्याख्या—इदं यत् क्रोधज्योतिः कोपवह्निः सत्यव्रतभङ्गभीरुमनसा, सत्यव्रतं कृतस्य यः पालनरूमः नियमः तस्य भङ्गः स्यात् इति भीरु इति अस्मिन् विषये भीतं मनः यस्य तादृशेन सत्यपालनभङ्गकातरचित्तेन इत्यर्थः युधिष्ठिरेण यत्नेन महत्यापि प्रचेष्टया मन्दीकृतं तथा शमवता सत्त्वगुणाधिवयशालिना शान्तिभावप्रवणेन इत्यर्थः एवं कुलस्य कौरवकुलस्य शान्तिं युद्धे विनाशाभावात् मङ्गलं तथा श्रीवृद्धिम् इच्छता (मया युधिष्ठिरेण) विस्मर्त्तुम् अपि ईहितं चेष्टितं—तत् खलु क्रोधज्योतिः—कीदृशः? द्यूतारणिसम्भृतं द्यूतं पाशाक्रीड़ा तदेव अरणिः तस्मात् सम्भृतं प्रज्वलितं—पाशक्रीड़ारुपकाष्ठात् प्रज्ज्वलितम् एवं नृपसुतायाः नृपस्य द्रुपदस्य या सुता द्रौपदी तस्याः केशानां कचानां तथा अम्बरस्य (दुःशाशनकृत) आकर्षणैः सन्धुक्षितम् इत्यर्थः तादृशं महत् विपुलं क्रोधज्योतिः। कस्य? युधिष्ठिरस्य इदम् इति यौधिष्ठिरम् एवम्भूतं क्रोधज्योतिः (अधुना) कुरुवने जृम्भते प्रसरति कुरुकुलमेव वनं तत् दग्धुम् विसर्पति इति भावः। अत्र "स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः" इति भीममुखे न्यस्तस्य आदिबीजस्य प्रधानबीजस्य अधुना प्रधाननायकाभिमतत्वेन युधिष्ठिरेण अनुमोदितमिति अनेन प्रकारेण सम्यक आहितत्वात् पुनरपि दृढ़तया स्थापितत्वात् अत्र समाधानम्।

अत्र वेणीसंहारस्य समाधानम् अवलम्ब्य धनिकस्य तु अयं विचारः—यथा भीमः—भवतु, पाञ्चालराजतनये, श्रूयताम् अचिरेणैव कालेन—चञ्चद्भुजभ्रमित इत्यादि श्लोकः। (श्लोकस्तु अस्मिन् ग्रन्थे पूर्व्वमेव

द्रष्टव्यः)। इत्यनेन वेणीसंहारहेतोः क्रोधबीजस्य पुनरुपादानात् समाधानम्। श्रीमान् विश्वनाथस्तु श्लोकमिमम् तथा तदङ्गीभूतम् अंशम् परिन्यासस्य अन्तर्भुक्तं कृतवान् इति पूर्व्वमेव अस्माभिर्दृष्टम्। दृष्टान्तान्तरं धनिकेन रत्नावल्याः उद्धृतम् यथा, सागरिका (स्वगतं)–सारिका तावत् मया सुसङ्गतायाः हस्ते समर्पिता। प्रेक्षितुं च मे कुतूहलं। तत् अलक्षिता प्रेक्षिष्ये।–इत्यनेन वासवदत्ताया रत्नावलीवत्सराजयोः दर्शनप्रतीकारात् सारिकायाः सुसङ्गतार्पणालक्षितंप्रेक्षणेन च वत्सराजसमागमहेतोर्बीजस्योत्पादनात् समाधानमिति।

Eng. Tran.—Samadhana is the re-affirming of the very seed of the drama. As—there (in the green-room) Hear Oh Kings Drupada, Virata and others !

Yaudhisthira fire of wrath—

The fire of wrath of that which is produced from the log in the shape of the game at dice, and has been agitated (stirred up) by the dragging of the hair and garment of the princess—the huge fire of wrath that was with (great) efforts slackened by me—being afraid of (as my mind was afraid of) the breach of faith (i. e. break of the vow once taken or promised) and that was desired to be forgotten by me with a peaceful turn of the mind intent on the peace of the family is now spreading (making its way) into the forest in the shape of the Kuru dynasty.

Here the principal seed that was sown by the expression "They will remain in peace—as long as I am living !" has now been approved of by the main character of the drama and firmly laid thereby—and so it is Samadhana.

Text—श्लोकः। सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्।

वृत्तिः। यथा बालचरिते—

"उत्साहातिशयं वत्स, तव बाल्यञ्च पश्यतः।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः॥

यथा वा मम प्रभावत्याम्—"नयनयुगासेचनकम्" इत्यादि।

मित—। सुखेन दुःखेन च कृतः विहितो योऽर्थः विषयस्तद्विधानमिति कथितम्। सुखदुःखकारिणी उक्तिरेव विधानमितिभावः। उक्तं हि दशरूपके—विधानं सुखदुःखकृत्। श्रीरूपेणापि–सुखदुःखकरं यत्तु तद्विधानं बुधाः विदुः। दृष्टान्तः बालचरिते श्रीराममुद्दिश्य परशुरामः कथयति - हे वत्स! तव उत्साहातिशयम् एवं च तव बाल्यं पश्यतः आलोचयतः मम मनः हर्षविषादाभ्याम् युगपदेव आक्रान्तम् अधिकृतम्। दृष्टान्तान्तरं ग्रन्थकारस्य प्रभावतीनाटिकायाम् "नयनयुगासेचनकम्" इत्यादिना चित्तस्य युगपदेव आनन्दसन्तापयोराविर्भावात् विधानम्। अपरं च यथा मालती-माधवप्रकरणे प्रथमेऽङ्के "यान्त्या मुहु रित्यादि श्लोके (मालती माधवम् –१।३२)। अत्र मालत्यवलोकनस्यानुरागस्य समागमहेतो र्वीजानुगुण्येनैव माधवस्य सुखदुःखकारित्वाद्विधानमिति धनिकः। अपरं च वेणीसंहारे (प्रथमे अङ्के) भीमः—ननु पाञ्चालराजतनये। किमद्यापि अलीकाश्वासनया—"भूयः परिभवक्लान्तिलज्जाविधुरितानननम्,

अनिःशेषितकौरव्यं न पश्यसि वृकोदरम्"॥–इति संग्रामस्य सुखदुःखहेतुत्वात् विधानमिति धनिकः।

Eng, Trans.—Vidhana is the statement that gives birth to simultaneous weal and woe.

As in the Balacharita—"My boy, seeing the excessive enthusiasm of yours together with your tender age, my mind is being simultaneously seized with joy and sorrow. Or as in my Prabhavati—"that which does sprinkle the eyes" and so forth.

Text - श्लोकः। कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना।

वृत्तिः। यथा वेण्याम्—द्रौपदी "युद्धं स्यान्नवेति" संशयाना तूर्य्य-शब्दानन्तरम्—णाध! किं दाणिं एसो पलअजलहरत्थणिदमन्थरो खणे खणे समरदुन्दुभी ताडीअदि।

मित –। 'रम्यवस्तु समालोके लोलता स्यात् कुतूहलम्'। कुतूहलम् उत्तरं प्रधानं येषां तादृशः वाचस्तु परिभावना कथिता। कुतूहलपदेन अत्र कुतूहलजनकः विस्मयः बोध्यः। तेन कुतूहलजनकविस्मयोत्पादिका वाक् एव परिभावना इति सरलार्थः। तथाहि—श्रीरूपः, श्लाघ्यैश्चित-चमत्कारो गुणाद्यः परिभावना। दशरूपके अपि एवम्—यथा, परिभावो अद्भुतावेशः। यथा वेणीसंहारे द्रौपदी युद्धम् भयिष्यति उत न वा इति संशय आसीत्। अनन्तरं तूर्य्यध्वनिमाकर्ण्य कथयति—"नाथ किमिदानीम् एव प्रलयजलधरस्तनितमन्थरः क्षणे क्षणे समरदुन्दुभिस्ताड्यते।" रसावेशात् द्रौपद्या परिभावना इति धनिकः। दृष्टान्तान्तरं रत्नावल्यां—यथा सागरिका (दृष्ट्वा सविस्मयं) कथं प्रत्यक्ष एव अनङ्गः पूजां प्रतीच्छति। अहमपि इह स्थिता एव एनम् पूजयिष्यामि इत्यनेन वत्सराजस्य अनङ्ग-रूपतयापह्नवादनङ्गस्य च प्रत्यक्षस्य पूजाग्रहणस्य लोकोत्तरत्वात् अद्भुतर-सावेशः परिभावना इति धनिकः।

Eng. Tran.—Paribhavana is the utterance that produces curiosity. As in Veni-Draupadi, doubting as to whether the war will come about or not says after having heard the sound of the drum—my Lord! how is it that the war-drum with its roar as grave as that the clouds of the doomsday—is being beaten off and on!

श्लोकः। बीजार्थस्य प्ररोहः स्यादुद्भेदः।

वृत्तिः। यथा तत्रैव द्रौपदी। णाध! पुणवि तए समासाद-

इदव्या।— भीमः, भूयः परिभवक्लान्तिलज्जाविधुरिताननम्। अनिः-शेषितकौरव्यं न पश्यसि वृकोदरम् ॥

मित । बीजार्थस्य "अल्पमात्रं समुद्दिष्टम्" इत्यादि प्रागेव उक्तं लक्षणं वीजम्। वीजीभूतो योऽर्थः विषयः वीजीकृतविषयः इत्यर्थः तस्य प्ररोहः उद्घाटः उद्भेदः स्यात् इति। तथाहि श्रीरूपगोस्वामिनः— बीजस्य तु य उद्घाटः स उद्भेद इति स्मृतः। तथाहि धनञ्जयः उद्भेदो गूढ़भेदनम्। दृष्टान्तेषु यथा वेणीसंहारे द्रौपदी कथयति नाथ पुनरपि त्वया समासादयितव्या। भीमः प्रतिवक्ति—भूयः इत्यादि। श्लोकव्याख्या— परिभवेन दुर्य्योधनादिकृतेन अपमानेन या क्लान्तिः ग्लानिस्तया तथा परिभवोत्पन्नया लज्जया च विधुरितं विह्वलीकृतम् आननम् यस्य तादृशम् तथा अनिःशेषिताः समूलम् अविनाशिताः कौरव्याः येन तादृशम् वृकोदरम् त्वम् भूयः पुनरपि न पश्यसि न द्रक्ष्यसीति। भविष्यत्सामीप्ये लट्। अत्र अरातिनिधने उत्साहरूपस्य वीजस्य उद्घाटनम् अतएव अयं प्ररोहः उद्भेदः। धनिकेन तु अयं प्रसङ्गः विधाने पठित इति अस्माभिर्विधानव्याख्यानावसरे तत् प्रागेव प्रदर्शितम्। एवं च "यत् सत्यव्रतभङ्गभीरुमनसा" इत्यादि योंशः श्रीमता बिश्वनाथेन समाधाने गृहीतः स एव धनिकेन अत्र उद्भेदे गृहीतः। दृष्टान्तान्तरं यथा रत्नावल्यां वत्सराजस्य कुसुमायुध-व्यपदेशगूढ़स्य वैतालिकवचसा "अस्तापास्त" (१।२३) इत्यादिना "उदयनस्य" इत्यन्तेन बीजानुगुण्येनैव उद्भेदनात् उद्भेद इति धनिकः।

Eng. Tran.—Udbheda is the germination of the seed of the drama. As therein, too, Draupadi—my Lord! Shall I be again approached by you? Bhima, you will not again (i. e. in future) see Vrikodara with his face wry with shame and exhaustion (dejection) due to insults till he has not finished the Kauravas (Kauravyas).

Text श्लोकः। करणं पुनः प्रकृतार्थसमारम्भः।

वृत्तिः। यथा तत्रैव—देवि! गच्छामो वयमिदानीं कुरुकुलक्षयाय इति।

मित । किं नाम खलु करणमिति लक्षयति। करणं पुनः प्रकृतार्थः प्रकृतः प्रस्तुतो यो विषयस्तस्य समारम्भः। तथाहि श्रीरुपैः—"प्रस्तुतार्थं—समारम्भः करणं परिचक्षते"। दशरुपकेऽपि—"करणं प्रकृतारम्भः"। दृष्टान्तो यथा वेण्यां—"तत् पाञ्चालि! गच्छामो वयमिदानीं कुरुकुलक्षयाय। सहदेवः—आर्य्यं, गच्छाम इदानीं गुरुजनानुज्ञाता विक्रमानुरुपमाचरितुम्।" इत्यनेनानन्तराङ्कप्रस्तूयमानसंग्रामारम्भणात् करणमिति धनिकः। दृष्टान्तान्तरं यथा रत्नावल्याम्—"नमस्ते कुसुमायुध! तत् अमोघदर्शनो मे भविष्यति इति दृष्टम् यत् प्रेक्षितव्यम्। तत् यावत् न कोऽपि माम् प्रेक्षते तत् गमिष्यामि"। इत्यनेनानन्तराङ्कप्रकृतनिर्व्विघ्नदर्शनारम्भणात् करणमिति धनिकः।

Eng. Tran.—Karana is the setting in or starting of the real undertaking. As therein, too,—Queen! now we depart for the destruction of the Kuru dynasty,

Text—श्लोकः। भेदः संहतिभेदनम्।

वृत्तिः। यथा तत्रैव—अत एवाद्य प्रभृति भिन्नोऽहं भवद्भ्यः। केचित्त "भेदः प्रोत्साहना" इति वदन्ति।

मित—। संहतेः संघातस्य भेदनम् एव भेदः। सम्मिलितात् जनसमूहात् कस्यचित् पृथक्भवनम् एव भेदः इति सरलार्थः। यथा वेण्यां—अद्य प्रभृति अहम् भवद्भ्यः भिन्नः इति पाण्डव-संहतेः भीमस्य भेदकथनात् अत्र भेदः। अथ भेदशब्दस्य अर्थान्तरं दर्शयति—केचित् इत्यादिना। अत्र केचित् इत्यनेन दशरुपककृत् धनञ्जय एव उद्दिष्टः—यतस्तत्रैव एवम् लक्षणं दृश्यते—यथा, "भेदः प्रोत्साहना मता"। श्रीरुपस्तु उभयमतमेव उपन्यस्तवान्—यथा नाटकचन्द्रिकायाम्—"बीजस्योत्तेजनं भेदो यद्वा संघातभेदनम्।

प्रशंसया प्रोत्साहनेन वा वीजस्य उत्तेजनं खलु भेदः अथवा संघात-भेदनम् एव भेदः इति भावः। तत्र प्रोत्साहनस्य उदाहरणं यथा वेणयाम्—
भीमः—अयि सुक्षत्रिये,

अन्योन्यास्फालभिन्नद्विपरुधिरवसासान्द्रमस्तिष्कपङ्के
मग्नानांस्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ ।
स्फीतासृक् पानगोष्ठोरसदशिवशिवातूर्य्यनृत्यत्कवन्धे
संग्रामैकार्णवान्तःपयसि विचरितुम् पण्डित्ताः पाण्डुपुत्राः ॥

इत्यनेने विषण्णायाः द्रौपद्याः क्रोधोत्साहवीजानुगुणयेनैव प्रोत्साहनात् भेद इति धनिकः। (अत्र ऋषिकथितं लक्षणं यथा—"संघातभेदनार्थो यः स भेद इति कीर्त्तितः")।

Eng. Trans.—Bheda is the defection of one from the group or the party. As therein, too—Therefore, since this very day, I have parted my ways from you. Some affirm that Bheda implies encouraging.

Text—वृत्तिः। अथ प्रतिमुखाङ्गानि—

श्लोकः। विलासः परिसर्पश्च विधृतं तापनं तथा
नर्म्म नर्म्मद्युतिश्चैव तथा प्रगमनं पुनः।
विरोधश्च प्रतिमुखे तथा स्यात् पर्य्युपासनम्
पुष्पम् वज्रमुपन्यासो वर्णसंहार इत्यपि ॥

मित—। प्रतिमुखे विलासप्रभृतीनि अङ्गानि त्रयोदशसंख्यकानि भवन्ति।

Eng. Trans.—Vilasa, Parisarpa, Vidhrita, Tapana, Narma, Narmadyuti, Pragamana, Virodha, Paryyupasana Puspa, Vajra, Upanyasa and Varna-Samhara—these (thirteen) parts (subsidiaries or angas) are to exist in Pratimukha sandhi.

Text—वृत्तिः। तत्र—

मित—। तेषाम् अङ्गानाम् मध्ये प्रथमस्य लक्षणमादौ क्रियते। अत्र इदंवी'यं—प्रतिमुखसन्धौ विन्दुः इति अर्थप्रकृतेस्तथा यत्नः प्रयत्नः इति वा नाम्ना प्रसिद्वायाः कार्य्यस्य अवस्थायाः सद्भावः। ताभ्यामनुप्राणितान्येव त्रयोदश अङ्गानि अत्र सन्ति। तथाहि श्रीरूपैः- बिन्दुप्रयत्नोपगमादङ्गान्यस्य त्रयोदश। घनिकोऽपि—"अस्य च पूर्व्वाङ्कोपक्षिप्तविन्दुरूपवीजप्रयत्नार्थानुगतानि त्रयोदशाङ्गानि भवन्ति" इति।

Eng. Trans -- Amongst these—

Text—समीहा रतिभोगार्था विलास इति कथ्यते।

वृत्तिः—। रतिलक्षणस्यभावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषोबा तदर्था समीहा विलासः। यथा शाकुन्तले—"कामं प्रिया न सुलभा, मनस्तु तद्भावदर्शनाश्वासि। अकृतार्थेऽपि मनसिजे रतिमुभय प्रार्थना कुरुते।

नित । भुज्यते उपभुज्यते सम्भोगकाले कायेन, विप्रलम्भे च मनसा इति कर्म्मणिवाच्ये भुज्घातोर्घञि सिद्वम् भोग इति पदम्। तेनैव हि अस्य भोग्यपदार्थ इत्येवार्थः। स च पुरुषपक्षे प्रमदा, प्रमदापक्षे च पुरुषः। रतिभोगार्था इति रतिलक्षणस्य रतिर्मनोऽनुकुलार्थे मनसः प्रवणायितमिति लक्षणात् रतिस्तु कस्मिन् अपि जने अनुरागः। सा एव लक्षणं चिह्नं तादात्म्यं यस्य तादृशस्य, अनुरागरूपस्य इत्यर्थः भावस्य हेतुभूतः कारणीभूतः यो भोगः भोग्यपदार्थः प्रमदा—पुरुषपक्षे रमणी, रमणीपक्षे च पुरुषो वा, तदर्था तद्विषया तयोर्मध्ये एकतरमेव अवलम्व्यस्थिता समीहा प्रचेष्टा कायिकी मानसी वा विलासः इति कथ्यते। दृष्टान्तो यथा अभिज्ञानशाकुन्तलायाम् अत्र दुष्यन्तस्य शाकुन्तलायाम् समीहा— सा एव विलासः।

ननु समीहा इत्यस्य लिप्सा एव अर्थः इति श्रीमान् हरिदाससिद्धान्तवागीशः। परम् समीहा तु प्रचेष्टा—या तु मानसी तथा कायिकी अपि

भवेत्। उक्तं हि श्रीरूपेण विलासः सङ्गमार्थस्तु व्यापारः परिकीर्त्तितः। दशरूपकेऽपि एवम्—यथा रत्यर्थेहा विलासः स्यात्। दृष्टान्तो यथा रत्नावल्याम्, सागरिका—हृदय! प्रसाद! प्रसीद! किमनेन आयास-मात्रफलेन दुर्लभजनप्रार्थनानुबन्धेन" इत्युपक्रम्य "तथापि आलेख्यगतम् तं जनं कृत्वा यथासमीहितं करिष्यामि। तथापि तस्य नास्ति अन्यो दर्शनोपाय इति—इत्येते वत्सराजसमागमरतिम् चित्रादिजन्याम् उद्दिश्य सागरिकायाश्चेष्टा प्रयत्नोऽनुरागबीजानुगतो विलास इति।

Eng. Trans.—Vilasa is the attempt or effort, taken with regard to the object of Love. As in Sakuntala—I admit, that my beloved is not easily accessible but noticing her expression of love, my mind finds assurance; though cupid has not yet succeeded, yet mutual prayer (for union) goes on continuing (augmenting) the love.

Text— श्लोकः। इष्टनष्टानुसरणं परिसर्पश्च कथ्यते।

वृत्तिः। यथा—शाकुन्तले, राजा। भवितव्यमत्र तया। तथाहि—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्।
द्वारेऽस्य पाण्डुसिकते पदपंक्तिर्दृश्यतेऽभिनवा॥

मित—। इष्टस्य अभिप्रेतवस्तुनः नष्टस्य नाशात्गतस्य अनुसरणम् खलु परिसर्पः कथ्यते। अदर्शनं प्राप्तस्य नायकस्य नायिकया, अथवा तादृश्याः नायिकायाः नायकेन अन्वेषणमेव परिसर्प इति भावः। दृष्टान्तो यथा शाकुन्तले—अदर्शनं प्राप्ताया नायिकायाः शकुन्तलायाः अन्वेषणाय व्याकुलो राजा तस्याः पदपङ्क्तिं वीक्ष्य कथयति—अभ्युन्नतेति। अत्र राज्ञा शकुन्तलया अन्वेषणम् तेन हि परिसर्पः। अपरो दृष्टान्तो यथा रत्नावल्याम्—सारिकावचन—चित्रदर्शनाभ्याम् सागरिकानुरागबीजस्य दृष्टनष्टस्य "क्वासौ क्वासौ" इत्यादिना वत्सराजेनानुसरणात् परिसर्प इति धनिकः। धनञ्जयस्तु "इष्टनष्ट" स्थाने "दृष्टनष्ट" इति पठति। यथा दशरूपके "दृष्टनष्टानुसर्पणम्

परिसर्प" इति। श्रीरूपचरणास्तु—नष्टबीजस्य स्मृतिरेव परिसर्प इति अभिप्रैति। यथा नाटकचन्द्रिकायाम्—स्मृतिर्नष्टस्य बीजस्य परिसर्प इति स्मृतः।

Eng. Tran.—Parisarpa is the following up or adopting of the desired (beloved) object that remains out of sight. As in Sakuntala—the King surely she must be here—Since—At its very entrance—which is brown (white) with sand is visible a fresh line of foot-steps—a bit raised in the front but pressed down in the hind portion—due to the weight of her hips.

Text— श्लोकः। कृतस्यानुनयस्यादौ विधृतं त्वपरिग्रहः।

वृत्तिः। यथातत्रैव—अलंवो अन्तउरबिरहपज्जस्सुएण राएसिणा उवरूद्धेण।' केचितु "विधृतं स्यादरतिः" इति वदन्ति।

मित—। नायकेन नायिकाया वा आदौ प्रथमम् एव कृतस्य साधितस्य वा बिहितस्य अनुरोधस्य, अनुरोधस्य अपरिग्रह नायिकया नायकेन वा अस्वीकृतिस्तु विधृतम्। यथा शाकुन्तले- शकुन्तलापरिग्रहाय सखीभ्याम् दुष्यन्ते बिहितस्य अनुनयस्स वैफल्यम् आशङ्क्य शकुन्तला सखीभ्याम् कथयति - अलं वः अन्तःपुरविरहपर्य्युत्सुकेन राजर्षिणा उपरूद्धेन। अत्र शकुन्तलीयाः कृते सखीभ्याम् दुष्यन्ते विहितस्य अनुनयस्य अद्यापि दुष्यन्तेन अस्वीकारात् (अपरिग्रहात्) विघृतम्। केचित् (यथा धनञ्जयः) विधृतं स्यात् अरतिः इति मन्यन्ते। अरतिस्तु अरुचिः। परं दशरुपके विधूतम इति दीर्घ पाटो दृश्यते—यथा "विधूतं स्यादरतिः।" दृष्टान्तो यथा रत्नावल्याम्—सागरिका—सखि। अधिकं मे सन्तापो बाधते। (सुसङ्गता दीर्घिकातो नलिनीदलानि मृणालिकाश्चानीयास्या अङ्गे ददाति) सागरिका--(तानि क्षिपन्ती) सखि! अपनय एतानि। किम् अकारणे आत्मानम् आयासयसि? ननु भणामि—

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।

प्रियसखि! विषमं प्रेम! मरणं शरणम् वरमेकम्।—इत्यनेन सागरिकाया वीजान्वयेन शीतोपाचारविधूननात् विधूतम् (विधुतमपि पाठः)। यथा च वेणीसंहारे भानुमत्या दुःखप्रदर्शनेन दुर्य्योधनस्यानिष्ट-शङ्कया पाण्डवविजयशङ्कया वा रतेः विधूननम् इति धनिकः। अत्र विधूननम् प्रत्याख्यानम्। श्रीरूपस्तु एषां लक्षणम् कृतवान् "विधूतम् कथित दुःखमभीष्ठार्थानवाप्तितः। अथवानुनयादीनां विधूत' स्यात् निराकृतिः।" अथवा अनुनयादीनाम् निराकृतिः प्रत्याख्यानमेव विधूतम्। एतत् साहित्यदर्पणसम्मतम्। दशरूपकधृतो रत्नावलीद्वष्टान्तः तु "शातोपचार विधूननात्" दुःखमेव प्रकटयति इति श्रीरूपकृतलक्षणेन सह तस्य असङ्गतिर्नास्ति।

Eng. Tran.—Vidhrita is the non-acceptance (repudiation) of the first made entreaty. As therein, too,—"away with your entreating the Royal sage that is pining for the separation from the ladies of the inner appartments (of his palace). Some opine that Vidhrita (also Vidhuta) implies dislikes.

Text—श्लोकः। उपायादर्शनं यत्तु तापनं नाम तद्भवेत्।

वृत्तिः। यथा रत्नावल्यां सागरिका—

दुर्लभजनानुरागो लज्जा गुर्व्वी परवश आत्मा। प्रियसखि! विषमंप्रेम मरणं शरणं नु वरमेकम्॥

मित—। उपायस्य अभीष्टेन सह मेलनस्य तेन च चित्त-क्लेशनाशनस्य कस्यचित् उपायस्य अदर्शनम् मनसा सम्यक् विचार्य्य अपि अप्राप्तिः खलु तापनं नाम प्रतिमुखसन्धेरङ्गम्। दष्टान्तो यथा—रत्नावल्यां उदयनेन सह मेलनस्य कमपि उपायम् अपश्यन्ती सागरिका सुसङ्गतां कथयति—प्रियसखि! सुसङ्गते! लभेजने (उदयने) मे अनुरागः। तम् अभिसत्तुमपि न पारयाम्यहं यतः गुर्व्वी महती लज्जा। तथा आत्मा मम

देहोऽपि परवशः वासवदत्ताधीनः, अहमपि न स्वतन्त्रा—अतएव स्वेच्छया, किमपि कर्त्तुम् न समर्था। अतएव विषमं कठिनं प्रेम—तेन अधुना तस्मिन् प्रेम्नि काठिन्यमुपस्थितम्। अतएव यतस्तेन प्रियतमेन साकम् मेलनस्य कमपि उपायं न पश्यामि तेन अधुना मे मरणं खलु एकमेव शरणम् इति विवेचयामि। अत्र उदयनेन सह मेलनस्य उपायादर्शनात् तापनम्। धनञ्जयस्तु तापनम् न स्वीकरोति, यत् स्थाने "शमम्" पठति। यथा दशरूपके—तच्छमः शमः इति। तस्या अरतेरुपशमः शमः। यथा रत्नावल्याम्—राजा। वयस्य, अनया लिखितोहमिति यत् सत्यमात्मनि अपि मे वहुमानस्तत् कथं न पश्यसि। इति प्रक्रमे सागरिका (आत्मगतम्) हृदय, समाश्वसिहि। मनोरथोऽपि ते एतावतीं भूमिं गतः—इति किञ्चिदरत्युपशमात् शम इति धनिकः। श्रीरूपगोस्वामिनस्तु आदौ धनञ्जयमतमुल्लिखन्ति यथा नाटकचन्द्रिकायाम्—'अरतेः शमनं धीरैः शम इत्यभिधीयते। ततः ललितमाधवस्य चतुर्थाङ्कात् दृष्टान्तम् प्रदर्श्य पश्चात् साहित्यदर्पणमतं प्रस्तौति यथा 'अपठित्वा शमं कश्चित् पठत्यत्र तु तापनम्।' (कश्चित् श्रीमान् विश्वनाथ एव)। अस्यापि दृष्टान्तं ललितमाधवस्य तृतीयाङ्कात् प्रदर्शितवन्तः श्रीरूपचरणाः।

Eng. Tran.—Tapana is the non-finding of any way or means (that may lead to a union with the desired object).

As in Ratnavali where Sagarika (says)—My beloved friend; My love has been fixed on a person an access to whom is very difficult—(a person difficult to approach); Supreme is my coyness (nervousness) whereas my (very) self is subject to another (person). Thus the love has now grown to be a critical one (or the love is unequal or better the love is not equally balanced, and hence), the

sole course (left for me) is death (i. e. the only way open to me is to embrace or court or espouse death).

Text– श्लोकः । परिहासवचो नर्म्म ।

वृत्तिः । यथा रत्नावल्याम्, सुसङ्गता—सहि ! जस्य किदे तुमं आअदा, सोऽयं दे पुरदो चिट्ठदि । सागरिका—(साभ्यसूयम्) जस्य किदे अहम् आअदा ? सुसङ्गता अयि अण्णसंकिदेण ! नं चित्तफलअस्स ।

मित—। अत्र लक्षणम् दशरूपकादेव गृहीतम् । परिहासवचः परिहासप्रधानं यत् वचनम् तत् नर्म्म इति । उक्तं हि नाटकचन्द्रिकायाम्, परिहासप्रधानं यद्वचनं नर्म्मतद्विदुरिति । दृष्टन्तो यथा रत्नावल्याम्—अत्र बीजान्वितं परिहासवचनं नर्म्म इति धनिकः ।

Eng. Trans.—Narma is the statement made by way of jest, (i. e. utterances involving jest fall within the category of Narma). As in Ratnavali—Susangata (says) My friend ! here in your front stands he for whose sake you have come.

Sagarika (jealously)—For whose sake have I come ?

Susangata—Oh you misunderstand me ! Well for the picture-plate.

Text– श्लोकः ।*धृतिस्तु परिहासजा नर्म्मद्युतिः—

वृत्तिः । यथा तत्रैव—सुसङ्गता । सहि । अदक्खिणा दाणिं सि तुमं जा एव्वम् भट्टिणा हत्थावलम्बिदा वि कोवं ण मुञ्चसि ।

सागरिका । (सभ्रूभङ्गमीषद्विहस्य) सुसङ्गते ! दाणिं वि कीलिदुं ण विरमसि ॥ केचित्तु "दोषस्याच्छादनं हास्यं नर्म्मद्युतिः" इति वदन्ति ।

मित। परिहासजा परिहासादेव उत्पन्ना, कृते अपि परिहासे धृतिः धैर्य्यं तु नर्म्मद्युतिरिति कथ्यते। धनञ्जयमते नर्म्मजा द्युतिरेव धृतिः। यथा दशरूपके "धृतिस्तज्जाद्युतिर्मता" इति। अस्य टीकायाम् धनिकस्तु पूर्व्वोक्तमेव रत्नावलीदृष्टान्तम् उद्धृत्य लिखति "अनेन अनुरागबीजोद्घाटनान्वयेन धृतिर्नर्म्मजा द्युतिरिति दर्शितमिति। श्रीरूपगोस्वामिनस्तु बाहुल्येन धनञ्जयमतमनुसृत्य पश्चात् साहित्यदर्पणमतेन सह तस्य सामञ्जस्यम् विदधति यथा नाटकचन्द्रिकायाम्—"नर्म्मजाता रुचिः प्राज्ञैर्नर्म्मद्युतिरुदीरिता" इति। अत्र रुचिपदेन द्युतिरेव बोध्या।

अथ अत्र भरतमुनिमतमुपन्यस्यति ग्रन्थकारः "केचित्" इत्यनेन। दोषस्य स्वकृतापराधस्य आच्छादनम् आच्छादकम् आवरकमित्यर्थः हास्यं नर्म्मद्युतिरिति केचित् वदन्ति। तथाहि दृश्यते भारतीयनाट्यशास्त्रस्य दशरूपे उनविंशाध्याये—"दोषप्रच्छादनार्थं तु हास्यं नर्म्मद्युतिः स्मृतम्" इति। काव्येन्दुप्रकाशेप्येवम् "नर्म्मद्युतिः कोपगुप्तिः", ।

[* अत्र "द्युतिस्तु" इत्यपि पाठो दृश्यते, परं 'धृतिस्तु" इत्येव साधीयान्]।

Eng. Tran.—Narmadyuti implies patience arising out of jest, that is, patience even though there be jest; (or in other words—Narmadyuti stands for the gravity on the part of a person even though he or she be laughed to scorn or put to jest). As in the selfsame work—Susangata (says)—My friend, now very perverse art thou as you do not bid good bye to your wrath even though you are caught hold of in the hand by the King.

Sagarika (smiling a little with the knitting of her eye-brow) Susangata ! even now you do not cease from your playful pranks with me.

Text—श्लोकः। प्रगमनं वाक्यं स्यादुत्तरोत्तरम्।

वृत्तिः। यथा विक्रमोर्व्वश्याम्—"उर्व्वशी। जअदु जअदु महाराअ। राजा—मया नामजितं यस्य त्वया जय उदीर्य्यते"। इत्यादि।

मित—। उत्तरोत्तरम् वाक्यं परस्परालापप्रकाशकम् अन्योन्य-वचनम् प्रगमनं स्यात्। एवम्भूता वाक्यावली मूलवस्तुप्रकटनाय एव इति बोध्यम्। दृष्टान्तो यथा विक्रमोर्व्वश्याम्। मूलवस्तु अत्र प्रकटतां याति, अत्र वाक्यश्रेण्याम्—तेन मूलवस्तुसूचकम् इदम् उत्तरोत्तरं वाक्यम् प्रगमनम्। तथाहि दशरूपके—उत्तरा बाक् प्रगमनम्। तथा रत्नावल्यां विदूषकः—भो वयस्य! दिष्ट्या वर्द्धसे। राजा—(सकौतुकम्) वयस्य! किमेतत्। विदूषकः—इदं खलु तत् यत् मया भणितम् त्वमेवात्रालिखितः। कोऽन्यः कुसुमायुधव्यपदेशेन निह्नूयते, इत्यादिना—

परिच्युतस्तत् कुचकुम्भमध्यात् किम् शोषमायासि मृणालहार। न सूक्ष्मतन्तोरपितावकस्य तत्रावकाशो भवतः किमु स्यात् "इत्यनेन राज-विदूषकसागरिका - सुसङ्गतानामन्योन्यवचनेनोत्तरोत्तरानुरागबीजोद्घाटनात् प्रगमनमिति धनिकः। "उत्तरोत्तरवाक्यन्तु भवेत् प्रगमनं पुनरिति" श्रीरूप-कृतलक्षणम्। मन्दारमकरन्देपि—"तस्यानुरागबीजस्य उत्तरोत्तरभाषणैः प्रकाशनं प्रगमनम्"।

Eng. Trans.—Pragamana is a series of conversational utterances—(relative to the main current of the drama). As in vikramorvasi—Urvasi (says)—May your Majesty prosper (or vi*ctory* be to your majesty). King, truly I have won or prospered as my victory is being declared by you (or victory really lies to me, who is thus declared victorious by you).

Text—श्लोकः। विरोधो व्यसनप्राप्तिः।

वृत्तिः। यथा चण्डकौशिके—राजा—नूनमसमीक्ष्यकारिणा मया अन्धेनेव स्फुरच्छिखाकलापो ज्वलनः पद्भ्याम् समाक्रान्तः।

मित—। व्यसनस्य विपदः प्राप्तिः समागमः विरोध इति कथ्यते। तथाहि "व्यसनं विपदि भ्रंशे दोषेकामजेकोपजे" इत्यमरः। दृष्टान्तो यथा चण्डकौशिके—अत्र विश्वामित्रस्य क्रोधम् उत्पादयन् राजा हरिश्चन्द्र आत्मानम् निन्दति—नूनम् निश्चितम् असमीक्ष्यकारिणा मया अन्धेन इव स्फुरच्छिखाकलापः ज्वलनः वह्निः पद्भ्याम् चरणाभ्याम् समाक्रान्तः स्पृष्टः। यथा अन्धः अपश्यन्नेव प्रदीप्तम् शिखाशालिनं हुताशनम् पादेन मथ्नाति तद्वत् अहमपि किञ्चित् अविचार्य्यं एव विश्वामित्रेण सह विरोधं कृतवान् इति विश्वामित्रात् हरिश्चन्द्रस्य विपत्प्राप्तिस्तेन चात्र विरोधः। तथाहि उक्तं श्रीरूपैः—यत्र व्यसनमायाति विरोधः स निगद्यते इति.। अत्र विरोध-स्थले निरोधं पठति धनञ्जयः। यथा दशरूपके—"हितरोधो निरोधनम्" इति। हितस्य मङ्गलस्य रोधः निरोधनं स्यादिति बोध्यम्। दृष्टान्तो यथा रत्नावल्याम्—

राजा—धिङ् मूर्ख।

प्राप्ता कथमपि दैवात् कण्ठमनीतैव सा प्रकटरागा
रत्नावलीव कान्ता मम हस्तात् भ्रंशिता भवता।

इत्यनेन वत्सराजस्य सागरिका समागमरूपहितस्य वासवदत्ताप्रवेश-सूचकेन विदूषकवचसा निरोधात् निरोधनमिति धनिकः।

Eng. Trans.—Virodha implies the befalling of danger. As in Chandakausika, King—Inconsiderate as I have been, I have undoubtedly trampled under foot, just like a blind fellow, the fire with glowing flames.

Text—श्लोकः। कृतस्यानुनयः पुनः स्यात् पर्य्युपासनम्।

वृत्तिः। यथा रत्नावल्याम्—विदूषकः। भो! मा कुप्प! एसा हि कदलीघरन्तरं गदा—इत्यादि।

मित—। कृतस्य अपराधस्य प्रक्षालनाय इत्यर्थः पुनः अनुनयः प्रसादनम् पर्य्युपासनं स्यात्। केनचित् दोषेण कोपितस्य जनस्य अनुनय

एव पर्य्युपासनमिति भावः। उक्तं श्रीरूपैः—रुष्टस्यानुनयो धीरैः पर्य्युपासन—मीरितमिति। भरतोपि—"क्रुद्धस्यानुनयो यस्तु भवेत्तत् पर्युपासनम्"।

Eng. Tran.—Paryyupasana is the entreaty made for some offence.

As in Ratnavali—The clown or jester (says)—Oh! please do not be angry (with me). Certainly she has flown or gone into the plantain arbour.

Text—श्लोकः। पुष्पं विशेषवचनं मतम्।

वृत्तिः। यथा तत्रैव राजा (हस्ते गृहीत्वा स्पर्शं नाटयति)।

विदूषकः—भो! वअस्स! एपा अपुव्वा सिरी तुए समासादिदा।

राजा—वयस्य! सत्यम्—

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः। कुतोऽन्यथा स्रवत्येष स्वेदच्छद्मामृतद्रवः॥

मित—। पुष्पं नाम अङ्गं हि विशेषवचनम्। विशेषः उत्कर्षः। विशेष-सूचकं बचनम् उत्कर्षप्रकाशकम् वाक्यम् पुष्पं मतम् काव्यविद्भिरभिप्रेतम्। तथाहि दशरूपके—पुष्पं वाक्यं विशेषवत्। नाटकचन्द्रिकायामपि—"सविशेषाभिधानम् यत् पुष्पं तदिति संज्ञितम् 'इति'। दृष्टान्तो यथा रत्नावल्याम्।

Eng. Tran.—Puspa is said to be some statement, alluding to excellence, (i. e. to the excellence of the hero or the heroine). As therein, too—The king (catching hold of Sagarika's hand, acts touching her i. e. acts the derivation of pleasure from the very touch of Sagarika) Vidusaka—My friend! you have come by a novel Sree.

King—True ! my friend.

She is Sree—her palms too, are the leaves of the Parijata—otherwise wherefore does ooze out nectar in liquid form in the shape of drops of perspiration.

Text—श्लोकः। प्रत्यक्षनिष्ठुरं वज्रम्।

वृत्तिः। यथा तत्रैव—राजा। कथमिहस्थोहम् त्वया ज्ञातः ?

सुसंगता—ण केवलं तुमं समं चित्तफलएन। ता जाव गदुअ देवीए णिवेदइस्सं।

मित। प्रत्यक्षं साक्षादेव निष्ठुरं परुषभाषणं वज्रमिति उच्यते। तथाहि नाटकचन्द्रिकायाम्—वज्रं तदिति विज्ञेयं साक्षान्निष्ठुरभाषणम्। दृष्टान्तो यथा रत्नावल्याम्। प्रत्यक्षनिष्ठुराभिधानं वज्रमिति धनिकः।

Eng. Trans.—Vajra is the utterance which is directly (really) harsh (cruel). As therein too, King—How have you known that I am here ?

Susangata—Not only yourself (your Majesty) but everything including the picture-plate incident. Now let me go and relate the matter to the Queen.

Text—श्लोकः। उपन्यासः प्रसादनम्।

वृत्तिः। यथा तत्रैव—सुसङ्गता—भट्ठुण, अलं सङ्काए। मए वि भट्टिनीए पसादेण कीलिदं जेव एदिहिं। ता किं कण्णाभरणेण। अदोवि मे गुरुअरो पसादो एसो, जं तुए अहं एत्थ आलिहिदत्ति कुविदा मे पिअसही सागरिआ, एसाज्जेव पसादीअदु।

केचित्तु "उपपत्तिकृतोयोऽर्थ उपन्यास स कीर्तितः" इति वदन्ति—उदाहरन्ति च तत्रैव—'अदिमुहरा खुसा गव्भदासी' इति।

मित—। प्रसादनम् कोपितस्य मनस्तुष्टिसाधनम् उपन्यास इति कथ्यते। दृष्टान्तो यथारत्नावल्याम्। तत्र राजा सुसङ्गताम् तोषयितुम् तस्य

कर्णाभरणं प्रदातुमिच्छति—तद्विज्ञाय सुसङ्गता प्रतिवक्ति—महाराज ! अलं शङ्कया। अहं सर्व्वम् वासवदत्तायै निवेदयिष्यामीति भयेन अलम्। मयाऽपि भर्त्रेग वासवदत्तायाः प्रसादेन प्रश्रयेण एतैः एतादृशैः वचनैः क्रीड़ितमेव रहस्यं कृतमेव। तत् किं कर्णाभरणेन मह्यम् कर्णाभरणप्रदानेन ? अतोऽपि कर्णाभरणादपि मे गुरुतरः श्रेयान् प्रसादः अनुग्रहः एषः। को नाम सोऽनुग्रहः ? उच्यते—यत् त्वया, हे सुसङ्गते त्वया अहम् सागरिका अत्र चित्रफलके उदयनस्य पार्श्वे आलिखिता चित्रिता इति अनेन कुपिता माम् उद्दिश्य कोपं गता मे प्रियसखा सागरिका—एषा सागरिका एव त्वया प्रसाद्यताम्—तस्या एव प्रसादजननेन मम परितोषो भवेदिति सरलार्थः।

"अनेन सुसङ्गतावचसा सागरिका मया लिखिता, सागरिकया च त्वमिति सूचयता प्रसादोपन्यासेन बीजोद्भेदात् उपन्यास इति धनिकः"। अत्र मतान्तरं न्यस्यति—केचित्तु केचिन्नाट्यशास्त्रकृतः वदन्ति यत् "योऽर्थः यो विषयः उपपत्तिकृतः उपपत्त्या युक्त्या कृतः प्रतिपादितः स एव उपन्यास इति कीर्त्तितः कथितः। अयमेव अर्थ श्रीभरतमुनिसम्मतः—यथा भारतीय नाट्यशास्त्रस्य दशमरुपके—

'उपपत्तिकृतो योऽर्थ उपन्यासस्तुसः स्मृतः" इति। श्रीरूपगोस्वामिनस्तु इमम् एव मतं साधीयांसम् मन्यन्ते—यथा नाटकचन्द्रिकायाम्— "युक्तिभिः सहितो सोऽर्थ उपन्यास स इष्यते"। पश्चात् तत्र "केचित् उपन्यासः प्रसादनम् इति वदन्ति" इत्यनेन साहित्यदर्पणमतम् उपन्यस्तम्।

Eng. Trans—Upanyasa is the propitiating of one—(either the hero or the heroine)—by the other. As therein, too. Susangata—your Majesty! away with your apprehension (fear). Through the grace of the Queen, I have only played (i. e, made a fun) ; what is then the

use of offering the ear-ring? A greater favour will be done unto me, if you propitiate my dear friend Sagarika who has been angry with me—as I have drawn her pic ture (in the picture-plate).

Text—श्लोकः। चातुर्वर्ण्योपगमं वर्णसंहार इष्यते।

वृत्तिः। यथा महावीरचरिते तृतीये अङ्के—

परिषदियमृषीणामेषवीरो युधाजित्, सच नृपतिरमात्यैः लोमपादश्च वृद्धः। अयमविरतयज्ञो ब्रह्मवादी पुराणः प्रभुरपि जनकानामङ्ग। भोः! याचकस्ते॥ इत्यत्र ऋषिक्षत्रादीनां वर्णानाम् मेलनम्॥ अभिनव-गुप्तपादास्तु—"वर्णशब्देन पात्राणि उपलक्ष्यन्ते। संहारो मेलनम्" इति व्याचक्षते। उदाहरन्ति च रत्नावल्यां द्वितीयेऽङ्के—अदीवि मे अअंगरुअरो पसादो इत्यादेरारभ्य णं हत्थे गेह्णिअ पसादेहिणम। राजा "क्वासौ क्वासौ" इत्यादि।

मित—। चातुर्व्वर्ण्यस्य ब्राह्मणक्षत्रियवैश्यशूद्राणाम् उपगमनम् उपस्थितिः एकत्र समागमः वर्णसंहार इति कथ्यते। दृष्टान्तो यथा—महावीरचरिते इयं ऋषीणाम् मुनीनां परिषत् सभ। एष वीरो युधाजित् इति नाम्ना प्रसिद्धः भूपतिः। अमात्यैः सचिवैः सह वृद्धः वर्षीयान् नृपतिः लोमपादश्च अङ्गराजश्च अत्र वर्त्तते। तथा अयम् अपि जनकानां जनक-कुलानां प्रभुः राजा सीरध्वजनामा—कीदृशः सः? अविरतयज्ञः अविरतः सर्व्वदा एव विततः यज्ञः यागः येन तादृशः—सदैव यागकर्म्मणि निरतः इत्यर्थः, तथा पुराणः प्रवीणः ब्रह्मवादी उपनिषत्प्रचारकः ब्रह्मज्ञः इति भावः। अङ्ग, भोः परशुराम। ते एते सर्व्वे एव जनाः याचकाः प्रार्थिनः तव समीपे शान्तिमेव प्रार्थयन्ते इत्यर्थः। अत्र ऋषिक्षत्रादीनां वर्णानां मेलनम्। 'अनेन ऋषिक्षत्रियामात्यादीनाम् संगतानां वर्णानां वचसा रामविश्वासशंसिनः परशुरामदुर्नयस्याद्रोहयाचकद्वारेणोपक्षेपनात् वर्णसंहार इति धनिकः। अत्र भरतमुनिकृतलक्षणं यथा—"चातुर्व्व-

र्णं याभिगमनं वर्णसंहार इष्यते"। अस्य व्याख्यायाम् श्रीअभिनवगुप्त पादेन यत् मतान्तरं प्रकटितं तदत्र उल्लिखति ग्रन्थकारः—अत्र लक्षणे लिखितः यो वर्ण इति शब्दस्तस्य अर्थस्तु पात्राणि नाटकीयजनाः इति अभिनवगुप्तपादाः मन्यन्ते। वर्णानाम् नाटकीयव्यक्तानाम् संहारो मेलनम् इति तेन कृता व्याख्या। तेन प्रदर्शितम् उदाहरणं तु रत्नावल्याः गृहीतम्—यथा द्वितीये अङ्क—"अतोऽपि मे गुरुतरः प्रसादः" इत्यस्मादारभ्य ननु हस्ते गृहीत्वा करं धारयित्वा प्रसादय एनां सागरिकाम् इति सुसङ्गतया, उक्तेरनन्तरं "क्वासौ क्वासौ" कुत्र सा सागरिका इति राज्ञः उक्तिं यावत्। अत्र राजविदूषकसागरिका—सुसङ्गतानां पात्राणाम एकत्र समागमात् वर्णसंहार इति अभिनवगुप्तपादानाम् आशयः। श्रीरूपस्तु अत्र साहित्यदर्पणमतमनुसरति।

Eng. Tran.—Varna-Samhara is the assemblage or congregation of the varnas (i. e. of the four castes)

As in the third act of Mahaviracharita—"Oh ! all of these i.e., the congregation of the sages, this heroic Yudhajit, the old King Lomapada with all his ministers—as well as this chief of the Janakas the old propounder of the Upanishads and the holder of sacrifices—stand as supplicants to you"—here thus there is the assemblage of sages and Khsattriyas. The venerable Abhinava Gupta explains by saying that the world Varna implies (dramatic) personage and Samhara stands for assemblage ; and he cites here an illustration from the second act of Ratnavali—from "A greater favous than this" upto "please catch hold of her hand and (thereby) propitiate her ; then the king (says) "where is she—where is she" etc.

द्रष्टव्यमत्र—कथितानि त्रयोदशप्रतिमुखसन्धेरङ्गानि ; एतेषां लक्षण-पर्य्यालोचनया इदं प्रतिभाति यत् प्रायश एव एतानि तादृशे एव रूपके सम्भवन्ति यत्र शृङ्गाररस एव अङ्गी, यतः एतेषां बहूनि एव शृङ्गाररसे एव उपयोगितां भजन्ते। परं विरोधस्तथा वर्णसंहारश्च शृङ्गारात् अन्यस्मिन्नेव रसे सम्भवतः इति ग्रन्थकारोद्धृतेन दृष्टान्तेन स्पष्टीकृतम्। दशरूपके विरोधस्थले निरोध इति दृश्यते तस्य उदाहरणमपि तत्र शृङ्गाररसे एव प्रदर्शितम्। श्रीरूपगोस्वामिचरणास्तु विरोधमेव पठन्ति परं तस्य उदाहरणं शृङ्गाररसे एव ललितमाधवात् प्रदर्शितवन्तः।

किञ्च सर्व्वाण्येव अङ्गानि सर्व्वत्र स्थास्यन्ति इति न नियमः—एतेषां कतिपयानामपि सद्भावे तथा अपरेषाम् असद्भावे न कापि हानिः—यतः रसव्यक्तिम् अपेक्ष्य एव अङ्गानां निवेशनं विधेयम् ; कथयिष्यति च पश्चादेव श्रीमान्विश्वनाथः यत्—

"रसव्यक्तिमपेक्ष्यैषामङ्गानां सन्निवेशनम्।
न तु केवलया शास्त्रस्थितिसम्पादनेच्छया"। इति।

श्रीरूपोऽपि नाटकचन्द्रिकायां वक्ति—

"रसभावानुरोधेन प्रयोजनमवेक्ष्य च
साफल्यम् कार्य्यमङ्गानामित्याचार्य्याः प्रचक्षते।"

अत्र धनिकः—एतानि च त्रयोदश प्रतिमुखाङ्गानि मुखसन्ध्युपक्षिप्तबिन्दु लक्षणावान्तरबीज-महाबीज-प्रयत्नानुगतानि विधेयानि। एतेषां च मध्ये परिसर्प-प्रशम-वज्रोपन्यास-पुष्पाणाम् प्राधान्यम्। इतरेषां यथासम्भवं-प्रयोग इति। प्रशमस्थाने विश्वनाथस्तापनं पठति इति प्रागेव अस्माभिः प्रदर्शितम्।

एवं धनिकमते परिसर्पादीनाम् पञ्चाङ्गानां प्राधान्यम्—इतरेषाम् च अप्राधान्यम्। अस्य मतस्य समालोचनप्रसङ्गे श्रीरूपस्तु नाटकचन्द्रिकायाम् इत्यम् लिखितवान्—

"केषाञ्चिदेषामङ्गानाम् वैफल्यं केचिदूचिरे।
दशरूपककारादयस्तत् सर्व्वेषाम् न सम्मतम्॥"

Text—अथ गर्भाङ्गानि—

श्लोकः। अभूताहरणं मार्गो रूपोदाहरणे क्रमः।
संग्रहश्चानुमानञ्च प्रार्थना क्षिप्तिरेव च।
त्रोटकाधिवलोद्वेगा गर्भेस्युर्विद्रवस्तथा॥

मित—। अभूताहरणम् इत्यादीनि गर्भसन्धेः त्रयोदश अङ्गानि भवन्ति। दशरूपककृत् प्रार्थनां तथा विद्रवं वर्जयति। संभ्रमं संयोजयति। श्रीरूपोऽपि तथा। एवं तन्मते द्वादशाङ्गानि। इति प्रागुक्तम्।

Eng. Tran.—In the Garbha (sandhi), there are the following :—

Abhutaharana, Marga, Rupa, Udaharana, Krama Sangraha, Anumana, Prarthana, Khsipti, Trotaka, adhivala, Udvega and Vidrava.

मित—। अथ गर्भसन्धेरङ्गानि वर्णयति ग्रन्थकृत्। गर्भसन्धौ गर्भस्य समुद्भेदः स च मुहुः ह्रासान्वेषणवान् इति पूर्व्वमेव ग्रन्थकारेण प्रदर्शितं। अस्मिन् सन्धौ पताका इति अर्थप्रकृतेस्तथा प्राप्त्याशा इति अवस्थायाश्च सद्भावः—ताभ्याम् अनुप्राणितानि त्रयोदश अङ्गानि अस्मिन् गर्भसन्धौ समुभवेयुः। मतान्तरे द्वादशाङ्गानि। तथाहि नाटकचन्द्रिकायाम्—"दृष्टादृष्टस्य वीजस्य गर्भोह्रासान्वेषणात्। द्वादशाङ्गो भवेदेव पताकांशानुसारतः। श्रीरूप मते तथा दशरूपके गर्भसन्धेर्द्वादश अङ्गान्मेव इति प्रागेव दर्शितम्। परं पताकायाः सद्भावः कुत्रचित् भवेत् कुत्रचिद्वा न। उक्तं हि श्रीरूपेण "पताकायास्त्ववस्थानं क्वचिदस्ति नवा क्वचित्। पताकया विहीने तु वीजविन्दू निवेशयेत्। परं प्राप्त्याशायाः सद्भावः अत्र अवश्यमेव स्यात्। यथा दशरूपके—"गर्भस्तु दृष्टनष्टस्य वीजस्यान्वेषणं मुहुः द्वादशाङ्गः पताका-

स्यान्नवा, स्यात् प्राप्तिसम्भवः"। अस्मिन् प्रसङ्गे टीकाकारः धनिकः—प्रतिमुखसन्धौ लक्ष्यालक्ष्यरूपतयास्तोकाद् भिन्नस्य बीजस्य सविशेषोद्भवपूर्व्वकः सान्तरायो लाभः पुनर्व्विच्छेदः पुनः प्राप्तिः पुनर्व्विच्छेदः पुनश्च तस्यैवान्वेषणं वारं वारं सोऽनिर्द्धारितैकान्तफलप्राप्त्याशात्मको गर्भसन्धिरिति। तत्र चौत्सर्गिकत्वेन प्राप्तग्राशायाः अनियमं दर्शयति पताका स्यान्नवा" इत्यनेन। प्राप्तिसम्भवस्तु स्यादेवेति दर्शयति च इति।

Text—श्लोकः। तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्।

वृत्तिः। यथा वेण्याम् अश्वत्थामाङ्के—

अश्वत्थामा हत इति पृथासूनुनास्पष्टमुक्त्वा, स्वैरं शेषे गज इति पुनः व्याहृतं सत्यवाचा। तच्छ्रुत्वासौ दयिततनयः प्रत्ययात्तस्य राज्ञः शस्त्राण्याजौ नयनसलिलंचापि तुल्यं मुमोच॥

मित—। अभूतस्य अघटितस्य वस्तुनः आहरणं प्रकाशनम् इति अभूताहरणं, तच्च नूनमेव अलीकम्—अतएव अस्य तु एवम्भूतं लक्षणम् यथा—तत्र तेषाम् अङ्गानाम् मध्ये अभूताहरणम् इति नाम्ना प्रसिद्धमङ्गं व्याजाश्रयम् कपटाश्रितं कापट्यानुप्राणितम् इति यावत् वाक्यं वचनम् मतं बुधैः सम्मतम्। तथाहि श्रीभरतमुनिकृतं लक्षणम्—"कपटाद्याश्रयं वाक्यमभूताहरणं विदुः"। तत्र आदिपदेन कपटस्य सादृश्यं भजमानस्य अपि ग्रहणम् इति मन्यामहे वयम्। अथ श्रीरूपकृतलक्षणं यथा—"अभूताहरणं तत् स्यात् वाक्यं यत् कपटाश्रयम्" इति। दृष्टान्तो यथा अश्वत्थमप्रधाने वेणीसंहारस्य तृतीयेऽङ्के—तत्र युधिष्ठिरेण अश्वत्थामा हत इति गज इति अलीकभाषणम्—।

धनञ्जयस्तु "अभूताहरणं छद्म" इति लक्षणं कृतवान्। तत्र दृष्टान्तं प्रदर्शयति धनिकः—"यथा रत्नावल्यां" साधुरे अमात्यवसन्तक! साधु! अतिशयितस्त्वया अमात्यो यौगन्धरायणः अनयासन्धिविग्रहचिन्तया" इत्यादिना प्रवेशकेन गृहीतवासवदत्तावेषायाः सागरिकायाः वत्सराजाभि,

सरणं छद्म विदूषकसुसङ्गताकृतकाञ्चनमालानुवादद्वारेण दर्शितमिति अभूताहरणम् ।

Eng. Tran.—Abhutaharana is a statement that indulges in trickery (i. e. that is full of or impregnated with some un-truth).

As in the Aswathama act in Veni :—

The son of Pritha very distinctly declared that Aswathama had been killed and after that (i. e. then) he uttered silently (the word) "Elephant" Hearing this Drona gave up weapons etc.

Text—श्लोकः । तत्वार्थकथनं मार्गः ।

वृत्तिः । यथा चण्डकौशिके—राजा । भगवन् ।

गृह्यतामर्जितमिदं भार्यातनयविक्रयात् । शेषस्यार्थे करिष्यामि चण्डालेअप्यात्मविक्रयम् ॥

मित—। तत्त्वार्थस्य यथार्थस्य निश्चितरुपस्य वस्तुनः, कर्त्तव्यतया निर्द्धारितस्य पदार्थस्य, हृद्गततथ्यस्य वा कथनं प्रकटनम् मार्ग इति कीर्त्त्यते । तथाहि दशरुपके—मार्गस्तत्वार्थकीर्त्तनम् । मार्गस्तत्वार्थकथनमिति श्रीरुपः ।

Eng. Trans.—Marga is the disclosing of what has been determined or what lies in the heart. As in Chanda-Kausika—

King—Venerable Sir ! Please aceept this which has been earned through the selling away of my wife and child : and for the rest I shall sell my ownself even unto a Chandala.

Text—श्लोकः । रूपं वाक्यं वितर्कवत् ।

वृत्तिः। यथा रत्नावल्यां राजा—मनः प्रकृत्यैवचलं दुर्लक्ष्यञ्च तथापि मे। कामेनैतत् कथं विद्धं समं (युगपत्) सर्व्वैः शिलीमुखैः॥

मित —। श्रीरूपस्य लक्षणमपि एकम्। रूपम् वितर्कवद्वाक्यमिति धनञ्जयः। एवम् स्यात् उत इदम् स्यात्, कथं वा तत्स्यात् इति वितर्कसमन्वितं (वितर्कगर्भं) वचनं रूपमिति कथ्यते। दृष्टान्तो यथा रत्नावल्याम्। तत्र सागरिकामुद्दिश्य कामेन विद्धः उदयनः वक्ति—मनस्तु प्रकृत्यैव स्वभावेन चलं चञ्चलम्। अतः तस्य वेधनं दुष्करम्। तथा दुर्लक्ष्यञ्च—एवं तत् हि मनः महता कृच्छेन एव लक्ष्यीक्रियते—अतः तस्य वेधनं दुष्करतरम् तथापि भेत्तुम् अशक्यमेतत् मनः कथम् कामेन सर्व्वैः पञ्चभिरित्यर्थः शिलीमुखैः वाणैः युगपदेव विद्धम्? कामस्य पञ्चवाणा स्तेषाम् प्रभावाः तापनशोषणादयः सर्व्वे एव युगपत् मयि उद्यन्तीति भावः अतः कथम् कामः एतत् कर्त्तुम् अशक्नोत् इति वितर्कगर्भं वाक्यम्—तेनात्र रूपम् स्यात्।

Eng. Tran.—Rupa is a statement involving guessing (or presenting alternatives). As in the Ratnavali—

King—Mind is by nature fickle or restless as well as difficult to mark out ; then how has it been pierced by cupid with all his shafts simultaneously ?

Text—श्लोकः। उदाहरणमुत्कर्षयुक्तं वचनमुच्यते।

वृत्तिः। यथा अश्वत्थामाङ्के—

योयः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनाम् चमूनाम्
योयः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्याम् गतो वा।
यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्॥

मित। उत्कर्षयुक्तम् कस्यचित् जनस्य उत्कर्षख्यापकम् आत्मनो वा उत्कर्षख्यापकम्, कस्यचित् विषयस्य वा उत्कर्षख्यापकम् वचनम्

उदाहरणम् उच्यते। सोत्कर्षवचनं यत्तु तदुदाहरणम् मतमिति श्रीरूपः। सोत्कर्षं स्यादुदाहृतिरिति दशरूपके धनञ्जयः। दृष्टान्तो यथा—वेणीसंहारे अश्वत्थामा स्ववीर्य्यम् इत्थं ख्यापयति—। अत्र अश्वत्थाम्ना स्ववीर्य्यख्यापनात् उत्कर्षयुक्तं वचनं कृतं तेनात्र उदाहरणम्। अपरस्य उत्कर्षख्यापनात् उदाहरणम्—यथा ललितमाधवे पञ्चमाङ्कस्य ऊनत्रिंशत् संख्यके श्लोके गरुडेण "चन्द्रावलीरूपोत्कर्षकथनम् उदाहरणम्" इति नाटकचन्द्रिका। कस्यचित् विषयस्य उत्कर्षख्यापनेन उदाहरणं यथा रत्नावल्याम्—विदूषकः (सहर्षम् ही ही भोः। कौशाम्वीराज्यलाभेनापि न तादृशो वयस्यस्य परितोष आसीत्, यादृशो मम सकाशात् प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि। इत्यनेन रत्नावलीप्राप्तिवार्त्ताऽपि कौशाम्बीराज्य लाभात् अतिरिच्यते इति उत्कर्षाभिधानात् उदाहृतिरिति धनिकः।

Eng. Tran.—Udaharana is a statement that bespeaks of the excellence (of some person or thing. or matter)

As in the Aswathama act (of Venisamhara)—Mad with rage as I am, I am the destroyer of any one who, is one of the Pandava forces and happens to be armed out of pride, or who belongs to the Panchala family be he a child or advanced in age or lying in his mother's womb, or who is to be an eye-witness of that (heinous) act or who stands against me as long as I move in the battle field—even if he himself be the destroyer of the worlds.

Text—भावतत्त्वोपलब्धिस्तु क्रमः स्यात्। यथा शाकुन्तले—

राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियमवलोकयामि। तथाहि उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन।

मित—। भावतत्त्वोपलब्धिस्तु क्रम इत्यभिधीयते इति श्रीभरतमुनिः।

भावः यथा, निर्विकारात्मके चित्ते भावः प्रथमविक्रिया इति—स एव तत्त्वं वस्तु। हृदयनिहितस्य भाववस्तुनः बहिः प्रकाशनम् तत् इति ज्ञेयम्। तस्य उपलब्धिः नायकेन नायिकया वा अवगतिः क्रम इति कथ्यते। दृष्टान्तो यथा—अभिज्ञान शकुन्तलायाम्—तत्र शकुन्तलायाः नायिकायाःराजानम् प्रति निहितस्य भावस्य बहिः प्रकाशनं, तत् राज्ञा उपलभ्यते—यथा राजा कथयति—विस्मृत- निमेषेण निमेषरहितेन चक्षुषा एकदृष्ट्या इत्यर्थः प्रियाम् शाकुन्तलाम् अवलोकयामि तत् खलु स्थाने युक्तमेव इत्यादि।

धनञ्जयस्तु क्रमस्य द्विविधं लक्षणं कृतवान्—तत्र द्वितीयप्रकारम् यथा दशरूपके—"भावज्ञानमथापरे" इति धनिकेन अस्य उदाहरणं रत्नावल्या एव प्रदर्शितं—यथा तस्याः तृतीयाङ्कस्य एकादशश्लोकात् आरभ्य "इह तदभ्यस्त्येव बिम्बाधरे" इति त्रयोदशश्लोकसमाप्तिं यावत् वासवदत्तया- वत्सराज भावस्य ज्ञातत्वात् क्रमान्तरम् इति (=क्रमान्तरं द्वितीयप्रकारः क्रमलक्षणम्)। प्रथमप्रकारलक्षणम् तु एवम्—"क्रमः सञ्चिन्त्यमानाप्तिः"। सञ्चिन्त्यमानस्य वस्तुनः प्राप्तिरित्यर्थः। दृष्टान्तो यथा—रत्नावल्याः तृतीये अङ्के—विदूषकः (आकर्ण्य) भवति सागरिके, एष प्रियवयस्यस्त्वामेव उद्दिश्य उत्कण्ठानिर्भरं मन्त्रयते। तन्निवेदयामि तस्मै तवागमनम्— इत्यनेन वत्सराजस्य सागरिकासमासममभिलषत एव भ्रान्तसागरिकाप्राप्तिरिति क्रम इति धनिकः। श्रीरूपोऽपि एवम्। यथा नाटकचन्द्रिकायाम् "भावज्ञानं क्रमो यद्वा चिन्त्यमानार्थसङ्गतिः इति।

Eng. Trans.—Krama is the realisation of the internal loving attitude (of one by the other). As in Sakuntala—

King—It is (quite) proper that I am gazing at my beloved (one) with my eyes that know no twinkling. Thus engaged in composing the sentences as she is, her face with one of her creeperlike eyebrow (a bit) raised,

betrays (exhibits) her love for me through her cheeks covered over with horripilation.

Text—श्लोकः। संग्रहः पुनः सामदानार्थसम्पन्नः-

वृत्तिः। यथा रत्नावल्याम्—राजा। साधु वयस्य! इदन्ते पारितोषिकम्। (इति कटकं ददाति)।

मित—। संग्रहं लक्षयति यथा—साम सान्त्वनं तथा दानम् अर्पणं। ताभ्याम् योऽर्थः विषयः सम्पन्नः साधितः स्यात् स एव संग्रहः। यद्वा—साम सान्त्वनं तत्-संयुक्तं तन्निमित्तं वा यत् दानम् धनादीनाम् अर्पणम् तेन योऽर्थः योऽभिलषितः विषयः सम्पन्नः संसाधितः स एव संग्रहः। तथाहि श्रीरूपकृतं लक्षणम्—सामदानार्थसंयोगः संग्रहः परिकीर्त्तितः। "सामदानोक्तिः संग्रहः" इति धनञ्जयः।

Dng. Tran.—Samgraha is what is effected by conciliation and concession or gift. As in the Ratnavalı—King, Bravo! my friend! This is the reward for you (with this, he offers a bracelet).

Text—श्लोकः। लिङ्गादूहोऽनुमानना।

वृत्तिः। यथा जानकीराघवेनाटके -

रामः—लीलागतैरपि तरङ्गयतो धरित्रीम् आलोकनैर्नमयतो जगतां शिरांसि। तस्यानुमापयति काञ्चनकान्तिगौरकायस्य सूर्य्यतनयत्वमधृष्यताञ्च।

मित—। साध्यंसाधनं तथा पक्षः इति न्यायशास्त्रसम्मतं अनुमितौ तत्त्रयम्। पर्व्वतो वह्निमान् इत्यत्र धूमदर्शनेनैव पर्व्वते वह्नेरनुमानम्। अतएव अत्र धूमः लिङ्गम् (हेतु) वह्निः साध्यं पर्व्वतश्च पक्षः। लिङ्गस्तु यस्य अस्तित्वम् साध्यस्य अस्तित्वं विना न स्यात। लिङ्गात् साधनात् ऊहः साध्यस्य ज्ञानम् अनुमानता अनुमानम् इति कथ्यते। कस्यचिद्वस्तुनश्चिह्नदर्शनेन तस्यैवानुमानम् अनुमानता इति कथ्यते इति सरलार्थः। दृष्टान्तो यथा जानकीराघवे नाटके श्रीरामः कथयति—

तत्र लीलागतेन धरित्री चालनम् तथा आलोकनेन जगन्मूर्द्धनमनम् लिङ्गद्वयेन (हेतुद्वयेन साधनद्वयेन इत्यर्थः) लक्ष्मणस्य सूर्य्यकुलोद्भवत्वस्य तथा अधृष्यत्वस्य अनुमानादनुमानमिति। अपरं उदाहरणं यथा रत्नावल्याम् तृतीयेअङ्के यत्र राजा कथयति--

समारूढा प्रीतिः प्रणयबहुमानात् प्रतिदिनं व्यलीकं वीक्ष्येदं कृतमकृतपूर्व्वं खलु मया प्रिया मुञ्चत्यद्यस्फुटमसहना जीवितमसौ प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति - इत्यत्र प्रकृष्टप्रेमस्खलनेन सागरिकानुरागजन्येन वासवदत्तायाः मरणाभ्यूहनम् अनुमानमिति धनिकः।

Eng. Trans.—Anumana is the inferring from some sign or characteristic. As in the drama Janakiraghava—Rama (says)—

A body as fair as the gold as he has, his birth in the solar race, together with this his unassailable prowess can be inferred from his dalliance—like gait that moves the earth and from the casting of his eyes that cause the heads of the world-people to bend down.

Text—श्लोकः। रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्।

वृत्तिः। यथा रत्नावल्याम्—"प्रिये! सागरिके!

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भास्तम्भनिभम् तथोरु युगलं बाहू मृणालोपमौ।
इत्याह्लादकराखिलाङ्गि, रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय॥

इदञ्च प्रार्थनाख्यमङ्गम्। यन्मते निर्वहणे इह भूतावसरत्वात् प्रशस्तिनामाङ्गं नास्ति तन्मतानुसुरेणोक्तम्। अन्यथा अङ्गानाम् पञ्चषष्ठित्वप्रसङ्गात्।

मित—। न धनञ्जयो दशरूपके, न वा तस्य भ्राता धनिको दश-रूपकस्य समवलोकसमाख्यायाम् टीकायाम्, नापि श्रीरूपगोस्वामिचरणः नाटक-चन्द्रिकायाम् प्रार्थना नाम गर्भसन्ध्यङ्गमुररीकरोति। दशरूपके नाटक-चन्द्रिकायाम् च गर्भसन्धेर्द्वादश एव अङ्गानि दृश्यन्ते—अत्र तु प्रार्थनया सह त्रयोदश। अस्यकारणम् अग्र एव प्रदर्शयिष्यति श्रीमान् विश्वनाथः। श्रीभारतीय नाटेग्तु प्रार्थना दृश्यते तस्य लक्षणं तु एवम्—'रतिहर्षोत्-सवार्थानां प्रार्थना प्रार्थना भवेत्'। एतदेव लक्षणम् अत्र ग्रन्थकारेण गृहीतम्। रतिः सम्भोगः हर्षः प्रीतिः, उत्सवः प्रमोदजनकव्यापारः। तेषाम एकतमानाम् सर्व्वेषाम् वा प्रार्थनं नायकेन नायिकायाः नायिकया वा नायकस्य याचनम् एव प्रार्थना इति नाम गर्भसन्धेरङ्गं भवेत्। दृष्टान्तो यथा रत्नावल्याम्। तत्र सागरिकया सह निर्ज्जने मीलित्वा राजा तां प्रति कथयति हे प्रिये! सागरिके। तव मुखं शीतांशुः सुस्पष्टम् शीतकरश्चन्द्र एव। तव दृशौ नयने उत्पले साक्षात् नीलकमले एव. करौ हस्ततलद्वयं तु पद्मानुकारि कमलदलानुकारिणौ तव करतलद्वयं तु कोमल-कमलदलमिव मनोरमम् इति भावः। तव ऊरुयुगलम् रम्भास्तम्भनिभम् कदलीदेहतुल्यं, तथा बाहू हस्तौ भुजदण्डौ मृणालोपमौ मृणालसदृशौ नलिनीदलौ इव अभिरामौ इति यावत्। इति इत्थम् अनेन प्रकारेण हे आह्लादकराखिलाङ्गि! हे आनन्ददायकसर्व्वशरीरे! आह्लादकराणि अखिलानि अङ्गानि यस्याः सा इति। सम्बोधने पदमिदम्। एहि मम समीपम् आगच्छ। आगत्य तु त्वम् रभसात् वेगात् शीघ्रम् दृढम् वा माम् निःशङ्कम् निर्भयम् आलिङ्ग्य आश्लिष्य (मम) अनङ्गतापविधुराणिअनङ्ग-सन्तापेन कातराणि अङ्गानि निर्व्वापय शीतलय। उदयनकर्तृकम् सागरिकायाः नायिकायाः रतिप्रार्थनम्—अत एवात्र प्रार्थना। एवं हर्षस्य प्रार्थनायामपि तथा उत्सवस्य च प्रार्थनायामपि प्रार्थना स्यात्। हर्षस्य उत्सवस्य वा प्रार्थनायां नायकेन नायिकया वा याचनम् अवश्य मृभावीति नियमो न स्यादिति मन्यामहे।

इयञ्च प्रार्थनानाम गर्भसन्धेरङ्गम् न सर्वसम्मतम्। अपितु येषाम् मते निर्व्वहणसन्धौ प्रशस्तिः इति नाम अङ्गं न विद्यते तेषामेव सम्मतं, तन्मतमेव अनुसृत्य अत्र उल्लिखितम्। ननु कथम् तन्मते प्रशस्ति नास्ति इति उत्तरं पठति इह "भूतावसरत्वात्" इत्यनेन। इह गर्भसन्धौ भूताव-सरत्वात् प्राप्तस्थानत्वात् प्रार्थनेतिरूपेण अवस्थितवात्। ननु स्वीकृत्यापि प्रार्थनाम् प्रशस्तेरुरीकरणे को दोषः? उच्यते—सन्ध्यङ्गानि चतुःषष्ठि-संख्यकानि इति नियमितानि। एवं प्रार्थना प्रशस्तिरितिअनयोः स्वीकरणे पञ्चषष्ठितमम् जायेत अङ्गानाम्—तेनैव हि एकस्य एव अस्तित्वम् स्वीकरणीयम्। श्रीभारतीयनाट्यशास्त्रेतु प्रार्थना प्रशस्तिरिति द्वयमपि दृश्यते—द्वयोरपि लक्षणं तत्र कृतम्।

Eng. Tran.—Prarthana is solicitation for sexual pleasure, for satisfaction or for some amusement or festivity.

As in the Ratnavali (King says)—My darling Sagarika your face is a veritable moon ; your eyes are indeed blue lotuses ; your palms imitate lotus-leaves ; your two thighs are like the body of a bannana and your arms are like lotus-stalks—thus gladdening are all your limbs and hence come—offer me a deep embrace without any fear (of detection) and thereby cool my limbs that are afflicted with love-heat.

This Anga (part or limb of the Garbha sandhi) known by the name Prarthana has been mentioned here in accordance with the theory of those who opine that there is no such Anga as Prasasti in the Nirvahana sandhi—the (purpose of the) same being served

here (or better the same being referred to here in the Garbha sandhi—under the caption Prarthana)—otherwise the Angas go on numbering sixty-five (sixty-four being the fixed number for the Angas and it will be wrong to raise it, and hence this compromise) ; but both Prarthana and Prasasti are to be found in the work of sage Bharata.

Text—श्लोकः। रहस्यार्थस्यतूद्भेदः क्षिप्तिः स्यात्।

वृत्तिः। यथा अश्वत्थामाङ्के—

एकस्यैव विपाकोऽयं दारुणोभुवि वर्त्तते। केशग्रहे द्वितीयेऽस्मित् नूनं निःशेषिताः प्रजाः॥

मित। रहस्यः गूढः योऽर्थः तस्य उद्भेदः प्रकटता तु क्षिप्तिरिति कथ्यते। अत्र रहस्यार्थ इत्यनेन तदानीमपि स्फुटमप्रकटः गर्भवीज एव प्रतीयते। तथाहि दशरुपके—गर्भवीज समुद्भेदादाक्षेपः परिकीर्त्तित इति, श्रीरुपेणापि उक्तं—गर्भवीज समुत्क्षेपमाक्षेपम् परिचक्षते। आक्षेपस्तु क्षिप्तेरभिन्न इति बोध्यम्। दृष्टान्तो यथा बेणीसंहारे—अश्वत्थाम-विक्रमवहुले तृतीयेऽङ्के। तत्र श्लोकव्याख्या—एकस्य एव केशग्रहस्य दुःशासनकर्तृकद्रौपदीकेशाकर्षणस्य अयं दारुण कठिनः विपाकः नर-संक्षयकारि कुरुक्षेत्रसमररूपः इत्यर्थः भुवि भारतेवर्षे वर्त्तते। अस्मिन् केशग्रहे धृष्टद्युम्नेन द्रोणाचार्य्यस्य केशग्रहे कृते इत्यर्थः नूनमवश्यमेव प्रजाः निखिलाः जनाः निःशेषिताः समूपूर्णं विनाशिताः भावः। अत्र वेणीसंहा-रस्य वस्तु गर्भवीजः द्रौपदीकेशग्रहणफलरूपेण कौरवानां नाशस्तथा द्रोणाचार्य्यकेशग्रहणपरिणामरूपेण पाण्डवसैन्यानां क्षवः—स एवात्र समुद्भिन्नः। स च गर्भवीजः तदानीमपि समग्रुद्भिन्नः नासीत्—अनेनैव वचसा उद्भिन्न इति इदं क्षिप्तिरिति।

दृष्टान्तान्तरं यथा रत्नावल्यां—"राजा। वयस्य! देवीप्रसादनं

मुक्त्वा नान्यमत्रोपायं पश्यामि। पुनः क्रमान्तरे—"सर्व्वथा देवीप्रसादनं प्रति निष्प्रत्याशीभुता स्म। पुनः "तत् किमिहस्थितेन देवीमेव गत्वा प्रसादयामि"—इत्यनेन देवीप्रसादायत्ता सागरिका समागमसिद्धिरिति गर्भवीजोद्भेदादाक्षेप क्षिप्ति इति धनिकः।

Eng. Tran—Ksipti is the revelation of the secret i. e. of the central theme or scheme. As in the Aswathama act (of the Venisambara)—

The fatal consequenes of one केशग्रह is seen here in the world ; and due to the taking of hair in a second case, the entire population will be doomed.

N. B.—The first seizing of hair concerns Draupadi—and the second pertains to Dronacharyya ; in the first case the man responsible for this crime is Dushsasana—and in the second Dhristadyumna.

Text— श्लोकः। त्रोटकं पुनः संरब्धवाक् [तोटकमित्यपि पाठः]।

वृत्तिः। यथा चण्डकौशिके कौशिकः-आः पुनः कथमद्यापि न सम्भृताः स्वर्णदक्षिणाः।

मित—। संरब्धस्य क्रोधान्वितस्य वाक्वचनं त्रोटकमिति उच्यते। यद्वा संरब्धं क्रोधः। सम्पूर्वकात् रभ् धातोर्भावे क्तप्रत्ययः। तत् अस्य अस्ति इति अर्शआदिभ्योऽच प्रत्ययः—न संरब्धम् क्रोधयुक्तं। तादृशं वचनं क्रोधकरम् इति भावः। तथाहि श्रीरुपः—वचः संरम्भि तोटकम्। धनञ्जयस्तु "संरब्धं तोटकं वचः। तथा संरब्धवचनं यत्तु तोटकं तदुदाहृतम् इति लक्षणद्वयेन क्रुद्धस्य वचनं तथा क्रोधयुक्तं बचनम् इति उभावेव अर्थौ प्रदर्शितवान्। दृष्टान्तो यथा चण्डकौशिके—तत्र क्रुद्धः कौशिकः (विश्वामित्रः) राजानम् हरिश्चन्द्रमुद्दिश्य वक्ति कथमद्यापि मे सुवर्ण—दक्षिणाः राज्ञा न सम्भृताः इति। राज्ञा दातुं प्रतिश्रुताः सुवर्णदक्षिणाः

अद्यापि न आनीता इति क्रुधान्वितस्य विश्वामित्रस्य वचनमत्र त्रोटकं। अपरो दृष्टान्तो यथा रत्नावल्याम्—वासवदत्ता (उपसृत्य) आर्य्यपुत्र। युक्तमिदं। सदृशमिदं। (पुनः सरोषं) आर्य्यपुत्र उत्तिष्ठ। किमद्यापि अभिजातया सेवया दुःखम् अनुभूयते। काञ्चनमाले। एतेनैव पाशेन बद्धा नय एनं दुष्टब्राह्मणम्। एतामपि दुष्टकन्यकाम् अग्रे कुरु—इत्यनेन वासवदत्तासंरब्धवचसा सागरिकासमागमान्तराय—भूतेन अनियतप्राप्तिकारणं तोटकमुक्तमिति धनिकः।

श्रीरूपधनञ्जयौ त्रोटकस्थाने तोटकमिति पठतः। स एव पाठः मुनिसम्मत—यथा भरतनाट्यशास्त्रे—संरम्भवचनप्रायं तोटकम् तु इति संज्ञितम्।

Eng. Tran.—Trotaka (Totaka) is the assertion of an angry person (or an assertion that betrays anger). As in Chanda-Kausika - Kausika (says)—Ah ! how is it that the gold (coins) due to me, have not been yet accumulated or procured ?

Text—श्लोकः। अधिबलमभिसन्धिश्छलेन यः।

वृत्तिः। यथा रत्नावल्याम्—काञ्चनमाला। भट्टिनि, इअं सा चित्तमालिआ, ता जाव वसंतअस्स सण्णं करोमि इत्यादि।

मित। छलेन कपटेन योऽभिसन्धिः अभिप्रायः वञ्चनाभिप्रायः इत्यर्थः तदेवाधिबलं प्रोक्तम्। तथाहि श्रीरूपः—बुधैरधिबलं प्रोक्तं कपटेनाधिवञ्चनम्। अधिबलम् अभिसन्धिरिति दशरूपकम्। दृष्टान्तो यथा रत्नावल्याम्—काञ्चनमाला। भर्त्ति इयं सा चित्रमालिका। यावत् वसन्तकस्य संज्ञां करोमि (इति छोटिकां ददाति) इत्यादिना वासवदत्ताकाञ्चनमालाभ्याम् सागरिकासुसङ्गतावेशाभ्याम् राजविदूषकयोरभिसन्धीयमानत्वाद-धिबलमिति धनिकः।

अत्र "नटेन कपटेन नरवम्मनमधिवलम्" इति नाटकचन्द्रिका। अत्र ग्रन्थान्तरमतम् तु अन्यविधं। तत् दशरूपके दर्शितं यथा—तोटकस्यान्यथा-भावं ब्रुवतेऽधिवलं बुधाः। परं पूर्व्वमेव मतं मुनिसम्मतं यथा भरत-नाट्यशास्त्रे—कपटेनाभिसन्धानं ब्रुवतेऽधिवलं बुधाः इति।

Eng. Tran.—Adhivala is the secret intention to cheat. As in Ratnavali-Kanchanamala (says)—Queen ! this is the picture-house (or painting house) ; then let me make signs to Vasantaka.

Text—श्लोकः। नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः।

वृत्तिः। यथा वेण्याम्—

प्राप्तावेकरथारूढ़ौ पृच्छन्तौ त्वामितस्ततः। स कर्णारिः स च क्रूरः वृककर्म्मा वृकोदरः।

मित। नृपादिना जनिता उत्पादिता भीतिर्भयम् उद्वेग इति कथ्यते। अत्र आदिपदेन शत्रुचौरादयः ग्राह्याः—यथा नाटकचन्द्रिकायाम्—शत्रु चौरादिसम्भूतं भयमुद्वेग उच्यते। धनञ्जयमते शत्रुकृत्यभीतिरेव उद्वेगः। यथा दशरूपके—उद्वेग अरिकृता भीतिः। मुनिरपि—भयं नृपादि-दस्यूत्थमुद्वेगः परिकीर्त्तितः इति। तत्र शत्रोः भीते दृष्टान्तो यथा, वेणी संहारे—प्राप्तावेक इति। श्लोकव्याख्या—स कर्णारिः अर्ज्जुन स्तथास क्रूरः निष्ठुरः वृककर्म्मा व्याघ्रवत् हिंस्राचारी इत्यर्थः वृकोदरः भीमसेनः एकरथारूढ़ौ एकमेव रथम् अध्यासीनौ इतस्ततः त्वाम् पृच्छन्तौ क्व आस्ते दुर्य्योधन इति समन्तात् जिज्ञासमानौ प्राप्तौ उपस्थितौ। तत्र शत्रुभ्याम् भीमार्ज्जुनाभ्याम् दुर्य्योधनस्य भीतिरुत्पन्नेति उद्वेगः। अपरो दृष्टान्तो यथा रत्नावल्याम्—सागरिका (आत्मगतम्) "कथम् अकृत-पुण्यया मया आत्मन इच्छया मर्त्तुमपि न प्रार्थ्यते" इत्यनेन वासवदत्तायाः सागरिकायाः भयमिति उद्वेग इति धनिकः।

Eng. Tran.—Udvega is the fear or apprehension

originating from a king or the like. As in the Venisamhara—That (noted) foe (rival) of Karna as well as the cruel Vrikodara who acts like a leopard—have arrived, sitting in a single chariot and enquiring about you all around.

Text—श्लोकः। शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः।
वृत्ति। यथा—कालान्तककरालास्यं क्रोधोद्धूतं दशाननम्।
विलोक्य वानरानीके सम्भ्रमः कोऽप्यजायत ॥

मित—। 'शङ्कया' मम अनिष्टं स्यादिति आशङ्कया, तथा 'भयेन' भविष्यति अप्रतिविधेयं किञ्चित् आपतेत् इति भीत्या, एवं त्रासेन कृतः जनितः यः सम्भ्रमो मानस-व्यस्तता स एव विद्रव (इति बुधानाम्) मतः अभिप्रेतः। धनञ्जयस्तु विद्रवस्य संभ्रम इति संज्ञां ददाति—यथा दशरूपके—शङ्कात्रासौ च सम्भ्रमः। श्रीरूपोऽपि, यथा नाटकचन्द्रिकायाम्—शत्रुव्याघ्रादिसम्भूता शङ्का स्यादिह सम्भ्रमः। अत्र इदं बोध्यं—सम्भ्रमस्य कारणं शङ्का भयं त्रासश्च। शङ्कायाश्च कारणं किम्? दशरूपककृता साहित्यदर्पणकृता च न कथितं—परं श्रीरुपस्तदपि कथयति—शत्रु इत्यादिना। शत्रुः व्याघ्रप्रभृतयः एव शङ्कायाः कारणं। भयं तथा त्रासं श्रीरुपस्तु न गणयति—यतस्तौ शङ्कया सह प्रायेण समार्थौ एव। अतएव तेनात्र उक्तं—शङ्का स्यादिह सम्भ्रमः। अथ मुनिलक्षणं—नृपाभिभयसंयुक्तं सम्भ्रमो विद्रवः स्मृतः। अतो मन्यामहे सम्भ्रम इति स्थले सम्भव इति पाठस्तु लिपिकरप्रमादकृतः।

अस्य दृष्टान्तं दर्शयति "कालान्तक" इत्यादिना। तथा रत्नावल्यां—विदूषकः (पश्यन्) का पुनरेषा। ('ससम्भ्रमं') कथम् देवी वासवदत्ता आत्मानं व्यापादयति। राजा—(ससम्भ्रमम् उपसर्पन्) क्वासौ! क्वासौ!—इत्यनेन वासवदत्ताबुद्धिगृहीतायाः सागरिकायाः मरणाशङ्कया सम्भ्रम इति।

"एतानि द्वादशगर्भाङ्गानि प्राप्त्याशाप्रदर्शकत्वेन उपनिबन्धनीयानि। एषां च मध्ये अभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम्। इतरेषां यथासम्भवम् प्रयोगः" इयि धनिकः।

Eng. Trans.—Vidrava is trepidation due to apprehension or fear. As—Beholding Dasanana whose faces were as grim as those of the Lord of Death at the time of universal destruction and who was trembling in anger, the monkey-army was seized with a sort of trepidation.

Text—वृत्तिः। अथ विमर्शाङ्गानि—

मित—। विमर्श इति चतुर्थ सन्धिः। तत्र प्रकरी इति अर्थप्रकृतिस्तथा नियताप्तिरिति अवस्थायाश्च सद्भावः। ताभ्याम् अनुप्राणितानि त्रयोदश अङ्गानि अत्र सम्भवन्ति। उक्तं हि श्रीरुपेण—"प्रकरी नियताप्त्यनुगुणगाद्त्राङ्गकल्पनम्" इति। दशरूपकटीकायाम् धनिकः लिखति—"अवमर्शनम् अवमर्श पर्य्यालोचनम्। तच्च क्रोधेन वा व्यसनाद्वा विलोभनेन वा भवितव्यम्। अनेनार्थेनेत्यवधारितैकान्तफलप्राप्त्यवसायात्मा गर्भसन्धुद्भिन्नबीजार्थसम्बन्धो विमर्शोऽवमर्शः। यथा रत्नावल्याम् चतुर्थेऽङ्के अग्निविद्रवपर्य्यन्तो वासवदत्ताप्रसत्त्या निरपायरत्नावलीप्राप्त्यवसायात्मा विमर्शो दर्शितः" इति।

Eng. Trans.—Now some of the Angas (13 Angas) of Vimarsa sandhi are being stated—

Text—श्लोकः। अपवादोऽर्थसम्फेटो व्यवसायो द्रवो द्युतिः।
शक्तिः प्रसङ्गः खेदश्च प्रतिषेधो विरोधनम्। १०० ॥
प्ररोचना विमर्शे स्यादादानं छादनं तथा।

मित—। विमर्शे विमर्शसन्धौ अपवादप्रमुखीनि त्रयोदश अङ्गानि सन्ति। तत्र कमलाकरस्तु खेदं प्रतिषेधं तथा छादनं न पठन्ति। किन्तु छलनं तथा विचलनम् एव पठन्ति। श्रीरूपोऽप्येवम्—परं से कलहं

तथा विचलनस्थाने विचलनमेव पठन्ति। श्रीमुनिमते तु अङ्गानि इमानि—अपवादः, संफेटः, अभिद्रवः शक्तिः, प्रसङ्गः, व्यवसायः, द्युतिः, खेदः निषेधः, विरोधनम्, आदानम्, छादनम्, प्ररोचना च इति त्रयोदश। "तत्र एतेषाम् अपवादशक्तिव्यवसाय प्ररोचनादानानि प्रधानानि" इति धनिकः। [भाष्यमते तु सदा प्रधानमिति स्यात्—"तदा तिलाः प्रधानम्" इति प्रयोगात्]।

Eng. Trans.—In the Vimarsa sandhi the following angas exist—Apavada, Sampheta, Vyavasaya, Drava, Dyuti, Sakti Prasanga, Kheda, Pratishedha, Virodhana, Prarochana, Adana and Chhadana.

[N. B.—These are in perfect keeping with Prakari and Niyatapti as said in Tika above].

Text—श्लोकः। दोषप्रख्यापवादः स्यात्।

वृत्तिः। यथा वेणयाम्—"युधिष्ठिरः पाञ्चालक! क्वचिदासादिता तस्य दुरात्मनः कौरव्यापसदस्य पदवी? पाञ्चालकः—न केवलं पदवी स एव दुरात्मा देवीकेशपाशस्पर्शपातकप्रधानहेतुरुपलब्धः।

मित। दोषस्य कस्यचित् जनस्य नायकस्य नायिकायाः प्रतिनायकस्य अपरस्य वा दोषस्य प्रख्या प्रख्यापनम् एवअपवादः स्यात्। उक्तं हि मुनीन्द्रेण—दोषप्रख्यापनं यत् स्यात् सोऽपवादः प्रकीर्त्तितः इति। दृष्टान्तो यथा वेणी-संहारे पाञ्चालकं धृष्टद्युम्नं पृच्छति राजा युधिष्ठिरः— क्वचिदिति प्रश्ने। किं दृष्टा कुरुप्रधानस्य दुर्य्योधनस्य पदवी पन्थाः—येन मार्गेण स पलायितः स मार्गः इत्यर्थः आसादितः प्राप्तः विज्ञातः इति यावत्? प्रतिवक्ति पाञ्चा-लकः— न केवलं पदवी अपितु स एव दुष्टात्मा दुर्य्योधनः—यः देव्याः द्रौपद्याः केशपाशस्पर्शः केशपाशग्रहणं तस्मात् उत्पन्नं यत् पातकं पापम्, यद्वा केशपाशस्पर्शरुपं यत् पातकम्, तत्र प्रधानहेतुः मूलकारणं प्रचोदकत्वात्—उपलब्धः अस्माभिः गृहीतः। केशपाशस्पर्शस्तु दुःशासनेन कृतः परम् तस्य प्रणोदकत्वात् दुर्य्योधन एव तत्र मूलकारणम् इति भावः। दुष्टः

कौरव्यापसदः कुरुकुलाधमः। अत्र "कुत्सितानि कुत्सनैरिति" वा समासः। शोभनाः केशाः केशपाशा—अत्र "प्रशंसावचनैश्च" इति समासः। अत्र दुर्य्योधनस्य दोषप्रख्यापनादपवादः इति धनिकः। दुर्य्योधनस्तु प्रतिनायकः। अन्यो दृष्टान्तो यथा रत्नावल्यां—राजा—अहो निरनुरोधा मयि देवी—अनेन वासदत्तादोषप्रख्यापनादपवादः इति धनिकः। वासवदत्ता तु नायिका। ललितमाधवात् अक्रूरस्य एव क्रौर्य्यकीर्त्तनरूपस्य अपवादस्य दृष्टान्त उद्धृतो नाटकचन्द्रिकायाम् श्रीरूपेण। अक्रूरस्तु प्रधानपात्रविशेषः परं न स नायकः प्रतिनायको वा।

Eng. Tran.—Apavada is the declaration of some one's demerits. As in the Venisamhara—Yudhisthira (asks)—Panchalaka ! have you found any trace to that wicked base fellow of the Kuru family ? Panchalaka—not only the trace, but the wicked fellow himself—who is the main cause of or mainly responsible for the crime in the shape of (or arising out) of the seizing of the fine hair of the queen (Draupadi), has been captured

Text—श्लोकः। सम्फेटो रोषभाषणम्।

वृत्तिः। यथा तत्रैव राजा—अरे रे मरुत्तनय! वृद्धस्य राज्ञः पुरतो निन्दितमपगात्मकर्म श्लाघसे? शृणुरे—

कृष्णाकेशेषु भार्य्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षम् भूपतीनाम् मम भुवनपते राज्ञया द्यूतदासी।
तस्मिन् वैरानुबन्धे वद किमपकृतम् तैर्हता ये नरेन्द्राः
बाह्वोर्वीर्य्यातिभारद्रविणगुरुमदं मामजित्वैव दर्पः॥

भीमः। (सक्रोधम्) आः पाप—

राजा। आः पाप इत्यादि।

मित—। रोषेण क्रोधेन भाषणं कथनम् इति रोषभाषणम्। क्रोध-प्रकाशिका उक्तिरिति यावत्। स एव सम्फेटः। उक्तं हि मुनीन्द्रेण रोषग्रथितवाक्यन्तु सम्फेटः परिकीर्त्तितः। दृष्टान्तो यथा वेणीसंहारे—भीमं प्रति राजा दुर्य्योधनः वक्ति—अरेरे मरुत्तनय। वायुपुत्र। अनेन सम्बोधनेन भीमसेनस्य जन्म उद्दिश्य कटाक्षं करोति दुर्य्योधनः इति बोध्यं। वृद्धस्य राज्ञः धृतराष्ट्रस्य पुरतः अग्रतः निन्दितम् गर्हितम् अपि आत्मकर्म्म आत्मना साधितं स्वजनविनाशादिरूपं कार्य्यम् श्लाघसे प्रशंससि? शृणुरे—

इयं श्लोकनिबद्धा उक्तिस्तु भीमं तथा अर्ज्जुनमुद्दिश्य दुर्य्योधनस्य एव। कृष्टा इत्यादि—

भुवनपतेः धरित्रीनाथस्य सार्व्वभौमस्य इत्यर्थः मम दुर्य्योधनस्य एव आज्ञया आदेशेन भूपतीनाम् प्रत्यक्षं मम राजसभास्थितानां सामन्तराजानां समक्षम् द्यूतदासी द्यूतेन जिता अतएव अस्माकम् दासीभूता द्रौपदी या तव हे अर्ज्जन तव, तथा पशोः पशुसदृशस्य तव भीमसेनस्य इति, तथा तस्य राज्ञः युधिष्ठिरस्य एवं च तयोः नकुल-सहदेवयोः भार्य्या सहधर्म्मिणी केशेषु कृष्टा केशान् गृहीत्वैव सभाप्राङ्गनमानीता दुःशासनेन इति भावः। यूयम् च पञ्च खलु पतयः तस्य प्रतीकारे अशक्ताः आसन् तदा इति यूयं हीनाः तथा पञ्चपतिकत्वात् द्रौपदी च स्वैरिणी इव इति तात्पर्य्यम्। तस्मिन् वैरानुबन्धे तेनैव प्रकारेण उत्पन्नायाम् खलु शत्रुतायाम् सत्याम् ये नरेन्द्राः भूपतयः हताः युस्माभिः मारिताः ते नरेन्द्रैः किम् युस्माकम् अपकृतम् इति तद्वद कथय। न किमपि अनिष्टम् युष्माकम् ते राजानः कृतवन्तः निर्द्दोषास्ते वृथैव युष्माभि र्हताः इत्यर्थः। बाह्वोः भुजयोः वीर्य्यस्य बलस्य अतिभारः अतिशय एव द्रविणं श्रद्धेयत्वात् धनम् तेन गुरु विशालः मदः अभिमानः यस्य तादृशम् माम् दुर्य्योधनम् अजित्वा अपराजित्य एव युष्माकम् दर्पः अहङ्कारः इति घृणितमेतत्। अत्र दुर्य्योधनस्य रोषभाषणम् तेनचात्र सम्फेटः। अन्यच्च वेणीसंहारस्य एव

षष्ठे अङ्के दशमे श्लोके तथा त्रयोदशे श्लोके "भीमदुर्योधनयोरन्योन्य रोषभाषणाद्विजयबीजान्वयेन सम्फेटः" इति धनिकः। दृष्टान्तान्तरं ललितमाधवस्य सप्तमे अङ्के द्वितीयश्लोके द्रष्टव्यं—तत्र कंसं प्रति गुरु-रोषोक्त्या सम्फेटः।

Eng. Tran.—Sampheta is the statement uttered in wrath. As in the same work—

King—Ho you son of the wind-god ! Thou art boasting of your culpable feat before the old king. Hear ! By the order of myself the Emperor, the wife of yours, as well as of your brutal brother and also of that King and of the two as well—the wife that was converted into a slave won at dice, was dragged by the hair, before (the very eyes of) the princes : thus originated the enmity ; and (now) please tell what offence was committed by those princes that have been killed by you ? You boast without defeating me who am highly proud of the wrath in the shape of the excessive prowess (strength) of the arms.

Text—श्लोकः। व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः।

वृत्तिः। यथा तत्रैव भीमः—

निहताशेषकौरव्यः क्षीबो दुःशासनासृजा
भङ्क्ता दुर्योधनस्योर्वोर्भीमोऽयं शिरसा नतः॥

मित—। व्यवसायं लक्षयति। प्रतिज्ञा दृढतया स्थिरीकरणम्। हेतुः कारणं, ताभ्याम् सम्भवति इति स तादृश उद्यम इति कस्यचित् व्याख्या। परं हेतुस्तु कस्य इति न स्पष्टीकृतम्। प्रतिज्ञा लक्षणया प्रतिज्ञापालनं।

सा एव हेतुः कारणं तस्मात् सम्भवति प्रसरति यः स एव व्यवसायः। व्यवसायस्तु तादृशी उक्तिः या प्रतिज्ञापालनरूपात् हेतोः निःसरतीति एतादृशीं व्याख्याम् साध्वीं मन्यामहे। दृष्टान्तो यथा—वेणीसंहारे अत्र भीमेन यत् प्रणतिकरणम् तस्य हेतुस्तु निखिलकौरववधादि—प्रतिज्ञापालनम्। तेनात्र व्यवसाय इति भावः। इदं खलु व्यवसायलक्षणं श्रीमुनीन्द्रसम्मतम्। धनञ्जयस्तु व्यवसायस्य लक्षणान्तरं विधत्ते, यथा दशरूपके—व्यवसाय स्वशक्त्युक्तिः इति।

यथा रत्नावल्याम् ऐन्द्रजालिकः—

"मम प्रतिज्ञैषा भणामि हृदयेन यद्वाञ्छसि द्रष्टुम्।

तत्ते दर्शयामि स्फुटं गुरोर्मन्त्रप्रभावेण" इत्यनेन—ऐन्द्रजालिको मिथ्याभिसंभ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिकादर्शनानुकूलां स्वशक्तिमाविष्कृतवान्। यथा वा वेणीसंहारे—

"नूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा, बध्यते केशपाशस्ते स चास्याकर्षणे क्षमः—इत्यनेन युधिष्ठिरः स्वदण्डशक्तिमाविष्करोति—इति धनिकः।

श्रीरूपस्तु आदौ दशरूपकसम्मतं लक्षणं करोति—तद् यथा नाटकचन्द्रिकायाम् "व्यवसायस्तु सामर्थ्यप्रख्यापनमुदीर्य्यते" इति। पश्चात्तु तेन साहित्यदर्पणसम्मतं लक्षणमपि उपन्यस्तम्। उभयलक्षणस्यापि दृष्टान्तः तेन ललितमाधवस्य सप्तमात् अङ्कात् उद्धृतः।

Eng. Tran.—Vyavasaya is said to be (is to be known) as arising out of (the fulfilment of) the vow. As in that book (venisamhara)—Bhima—Here salutes you Bhima, who has exterminated all the Kurus, being wild with (the sipping of) Dushasana's blood, and who is the breaker of Duryyodhana's thighs.

Text—श्लोकः। द्रवो गुरुव्यतिक्रान्तिः शोकवेगादिसम्भवा।

वृत्तिः। यथा तत्रैव—युधिष्ठिरः—भगवन्। कृष्णाग्रज सुभद्राभ्रातः।

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणांन धर्मो, रूढं सख्यं

तदपि गणितं नानुजस्यार्ज्जुनेन।

तुल्यः कामं भवतु भवतः शिष्ययोः स्नेहबन्धः, कोऽयं

पन्था यदसि विमुखः मन्दभाग्ये मयि त्वम्॥

मित—। शोकस्य वेगः आधिक्यं। शोकवेगादिसम्भवा शोक-वेगात् एवं आदिपदेन क्रोधवेगश्च बोद्धव्यः; तस्माद् उत्पन्ना गुरोः पूज्यस्य जनस्य व्यतिक्रान्तिः व्यतिक्रमः मर्य्यादालङ्घनं हि द्रव इति नाम विमर्शसन्धेरङ्गम्। परं येन केनापि गुरुमर्य्यादालङ्घनेन गुरु तिरस्कारेण वा द्रवः स्यात्। उक्तं हि श्रीमुनीन्द्रेण—गुरुव्यतिक्रमो यस्तु विज्ञेयोऽभिद्रवस्तु सः। दशरुपकेऽपि—द्रवो गुरुतिरस्कृतिः। द्रवो गुरु-तिरस्क्रिया इति श्रीरुपः। दृष्टान्तो यथा वेणोसहारे वलदेवं प्रति युधिष्ठिरस्य उक्तौ।

श्लोकव्याख्या—अधर्ममाश्रित्य दुर्योधनस्य उरुभङ्गं कृतवान् भीमः। तदालोक्य वलदेवः भीमं शासितुम् उद्यतः। तदा वलदेवं शमयितुम् युधिष्टिरो वक्ति—हे भगवान्! कृष्णाग्रज! सुभद्राभ्रातः। इत्यादि।

Eng. Trans.—Drava is the reproach extended to a superior person due to the exuberance of grief, and the like.

As therein, too, Yudhisthira (says) Lord! elder brother of Krishna! cousin to Subhadra! you have ignored (not thought of in your mind) affection for kinsmen as well as the duty of a Ksattriya; neither you have counted the deep-rooted friendship of your younger

brother with Arjuna. Admitted that your affection should be equal for both the disciples of yours ; but what is this attitude of yours that you have turned your face from me an ill-fated fellow.

Text—श्लोकः। तर्ज्जनोद्वेजने प्रोक्ता द्युतिः।

वृतिः। यथा तत्रैव दुर्य्योधनं प्रति कुमारवृकोदरेण उक्तम्—
जन्मेन्दोर्विमलेकुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासन-कोष्णशोणित-मधुक्षीवं रिपुं मन्यसे।
दर्पान्धो मधुकैटभद्विषिहराबप्युद्धतं चेष्टसे।
त्रासान्मे नृपशो! विहाय समरं पङ्केऽधुना लीयसे॥

मित—। तर्ज्जनं कस्यचिदुपरि आस्फालनं तथा उद्वेजनम् कस्यचित् उद्वेगजननं खलु द्युतिः प्रोक्ता। दशरूपकेऽपि एवं यथा—तर्ज्जनोद्वेजने द्युतिः। श्रीरूपोऽपि एवम्। श्रीमुनिलक्षणं तु वाक्यमाघर्षणकृतम् द्युतिस्तज्ज्ञैरुदाहृतम्! आघर्षणकृतम् तर्ज्जनादिसंवलितम् इत्यर्थः। [द्युत+कि (इ)=द्युति। or दिव+क्तिन्, वाहुल्कात् विकल्पेन ह्रस्वश्च]।

Eng. Tran.—Dyuti is the chastising and threatening (of one by another). As therein too, (where) Prince Vrikodara said to Duryyodhana—you declare that you are born in the noble line of the moon ; you wield the club till to-day. Count me intoxicated with the wine of Duhsasana's warm blood an antagonist ; behave rashly towards Hari, the slayer of Madhu and Kaitabha, blind with pride as you are. And notwithstanding all this you, a beast among men ! hide yourself in the mud, running away from battle—through fear of me (being afraid of me).

Text—श्लोकः। शक्तिः पुनर्भवेत् विरोधस्य प्रशमनम्।

वृत्तिः। यथा तत्रैव—

कुर्व्वन्त्वाप्ताः हतानां रणशिरसि जना भस्मसात् देहभारान्
(देहभारान्)

अश्रून्मिश्रम् कथञ्चिद्ददतुजलममी वान्धवा वान्धवेभ्यः।

मार्गन्ताम् ज्ञातिदेहान् हतनरगहने खण्डितान्
गृध्रकङ्कैः

अस्तं भास्वान् प्रयातः सह रिपुभिरयं संह्रियन्ताम् वलानि॥

मित—। शक्तिस्तु विरोधस्य कलहस्य प्रशमनम्। परं विरुद्धस्य जनस्य कोपोपशमनेऽपि शक्तिःस्यादिति दशरूपकस्याभिप्रायः। एवञ्च विरुद्धयोः ज्ञानयोरपि सामञ्जस्यसाधने शक्तिः स्यात् इति नाटकचन्द्रिका मतम्।

Eng. Tran.—Sakti is the removal of conflict.

As in the same work :—

Let the relatives burn the bodies of those, that have been killed in the van of the battle. Let the friends offer water mixed up with tears (by way of libation) to their friends. Let the corpses of kinsmen (or relatives), torn to pieces by vultures and kankas, be searched out amongst the heaps of human bodies. The sun has gone down together with our enemies and so let the forces be withdrawn.

Text—श्लोक। प्रसङ्गो गुरुकीर्त्तनम्।

वृत्तिः। यथा मृच्छकटिकायाम् (? मृच्छकटिके)—चाण्डालकः। एसो खु सागलदत्तस्स सुदो अज्जविस्सदत्तस्स णत्तिअ चारुदत्तो वावादिदुम

वज्झट्ठाणं णिज्जइ ; एदेण किल गणिआ वसन्तसेणा सुवण्णलोहेन वावादिदेत्ति ।

चारुदत्तः—मखशतपरिपूतं गोत्रमुद्भासितं यत्
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम निधनदशायां वर्त्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ।

इत्यनेन चारुदत्तवधाभ्युदयानुकूलप्रसङ्गात् गुरुकीर्त्तनमिति प्रसङ्गः ।

मित—गुरु यत्कीर्त्तनं घोषणम् तदेव प्रसङ्गः । परं गुरूणाम् पितृपितामहादीनाम् कीर्त्तनम् इत्येव व्याख्या साधीयसी । उक्तं हि मुनीन्द्रेण—प्रसङ्गश्चैव विज्ञेयो गुरूणाम् परिकीर्त्तनम् इति । श्रीमान् विश्वनाथस्तु लक्षणमिदं तथा उदाहरणञ्च अविकलमेव दशरूपकात् गृहीतवान् । तत्रापि गुरूणाम् कीर्त्तनमिति ईदृशी व्याख्या समर्थितेति मन्यामहे ।

Eng. Trans.—Prasanga is some important bold declaration or better Prasanga is the utterance of the names of superiors (in connection with some assertion or declaration).

As in the Mrichhakatika—

Chandalaka—Here is Charudatta—son of Sagardatta and grandson of venerable Viswadatta being led to be executed. He is said to have killed the courtesan Vasantasena out of greed for gold.

Charudatta—The family of mine which was formerly illuminated by hundreds of sacrifices, as well as by dense (densely planted) huge road-trees or temples and also by

the utterances of the vedic texts in public, is now at the time of my death, being proclaimed with my crimes, in the place of proclamation (घोषणायाम्) by unworthy fellows.

By this—the bold mentioning of the names of superiors, in connection with the death as well as of prosperity of Charudatta is done (in a suitable way), and so it is a case of Prasanga.

Text—श्लोकः। मनश्चेष्टासमुत्पन्नः श्रमः खेद इतिस्मृतः।

वृत्तिः। मनःसमुत्पन्नो यथा माल्तीमाधवे (उत्तरचरितस्य च तृतीयाङ्के)—

दलति हृदयं गाढोद्वेगो द्विधा न तु भिद्यते, वहति विकलः कायो मोहं, न मुञ्चति चेतनाम्।
ज्वलयति तनुमन्तर्दाहः करोति न भस्मसात्, प्रहरतिविधिर्मर्म्मच्छेदी न कृन्तति जीवितम्॥

एवं चेष्टासमुत्पन्नोपि (यथा स्वप्नवासवदत्ते प्रथमाङ्के ब्रह्मचारिणः भ्रमणजनितखेदः)।

मित—। मनःसमुत्पन्नः चिन्तादिमानसव्यापारात् सञ्जातः श्रमः क्लान्तिः खेद इति स्मृतः। एवं च चेष्टासमुत्पन्नः दैहिकव्यापारात् संजातः श्रमोऽपि खेद इति स्मृतः।

Eng. Trans.—Kheda is the fatigue due to mental or physical exertion. The example of fatigue arising out of mental exertion is in the Malati Madhava—Deep anxiety torments my heart—but it is not cut in twain. Depressed as my body has been, it falls into a swoon but nevertheless, it does not bid good-bye to conciousness. Internal heat tortures my body—but does not reduce it to ashes.

Providence strikes me cutting to the quick, but it does not destroy my life.

In this manner, physical exertion may be illustrated (from Swapnavasavadattam etc.),

Text—श्लोकः। ईप_सितार्थप्रतीघातः प्रतिषेध इतीष्यते।

वृत्तिः। यथा मम प्रभावत्यां विदूषकं प्रति प्रद्युम्नः—सखे! कथमिह त्वमेकाकी वर्त्तसे? क्वनु पुनः प्रियसखीजनानुगम्यमाना प्रियतमा मे प्रभावती? विदूषकः—असुरपइणा आआरिअ कहि विं णीदा।

प्रद्युम्नः -(दीर्घं निश्वस्य)

हा पूर्णचन्द्रमुखि! मत्तचकोरनेत्रे! मामानताङ्गि! परिहाय कुतो गतासि?

गच्छ त्वमद्य ननु जीवित! तूर्णमेव दैवं कदर्थनपरं कृत-कृत्यमस्तु।

मित—। इप्सितः वाञ्छितः योऽर्थः विषयः। तस्य प्रतीघातः प्रतिवन्धः एव प्रतिषेध इति इष्यते कथ्यते। अभिलषितस्य वस्तुनः प्राप्तिविषये उत्पन्नस्य विघ्नस्य एव प्रतिषेध इति संज्ञा। श्रीरूपधनञ्जयौ तु इमं न गणयतः। श्रीमुनिस्तु इमं निषेध—संज्ञया पठति। यथा नाट्यशास्त्रे "ईप_सितार्थप्रतीघातो निषेधः स तु कीर्त्तितः"।

Eng. Tran.—Pratisedha is the obstacle in the achievement of the desired object. As in my Prabhavati—Prdyumna says to the clown—My friend! why are you alone here? where is my beloved Pravavati followed by her dear friends? Clown—She was summoned and led to some unknown destination by the Asura-chief, Pradyumna (sighing deeply) Oh! you full-moon faced!

Oh you—that have eyes like those of a tipsy chakora, Oh you—with a drooping constitution! where have you gone—forsaking me? Oh my life! depart quickly to-day; and let the torturing fate attain its object.

Text—श्लोकः। कार्य्यात्ययोपगमनम् विरोधनमिति स्मृतम्।

वृत्तिः। यथा वेण्याम् युधिष्ठिरः—

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानलेनिर्वृते, कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम्।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये, सर्व्वे जीवित-संशयं वयममी वाचा समारोपिताः॥

मित—। कार्य्यस्य अभीष्टस्य कर्म्मणः अत्ययोपगमनं विघ्नप्राप्तिः, अभिलषिते खलु कर्म्मणि विघ्नस्याविर्भाव एव विरोधनमिति। दृष्टान्तो यथा वेणीसंहारे। तत्र द्वैपायनहृदगतम् दुर्य्योधनं प्रति भीमः सदर्पमाह—"त्वम् उत्तिष्ठ। अस्माकं पञ्चपाण्डवानाम् मध्ये येन सह ते रोचते तेनैव सह युद्धं कुरु। यदि तव जयः स्यात् त्वमेव राज्यं लप्स्यसे इति। तदाकर्ण्य आत्मनः जयं प्रति सन्देहं पोषयन् युधिष्ठिरः कथयति तीर्णेति।

अत्र अभीष्टे युद्धजयरुपकार्य्ये भीमवाक्येन विघ्नस्याविर्भावात् विरोधनम् उत्थितम्। किन्तु विरोधनस्य एतल्लक्षणं न मुनिसम्मतं—यथा नाट्यशास्त्रे "विरोधनं तु संरम्भादुत्तरभाषणम्" इति। क्रोधात् उक्तिप्रत्युक्तिरेव विरोधनमिति भावः। धनञ्जयोऽपि तथा—यथा संरब्धानाम् विरोधनमिति दशरूपके।

Eng. Trans.—Virodhana is the appearance of obstacle in the fulfilment of the (desired) object. As in the Venisamhara—

Yudhisthira (says)—The ocean in the shape of Bhisma being crossed over, the fire in the shape of Drona being extinguished, the venomous snake in the shape of Karna being checked, Salya having gone to heaven, and thus very little being left of our (final) victory, all of us have been put in the (very) risk of our life, by this statement of impetuous Bhim uttered hastily or by this (and careless) utterance of hasty Bhima.

Text—श्लोकः। प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी।

वृत्तिः। यथा वेण्याम्—पाञ्चालकः—"अहं देवेन चक्रपाणिना सहितः—इत्युपक्रम्य" कृतं सन्देहेन—

पूर्य्यन्ताम् सलिलेन रत्नकलशा राज्याभिषेकाय ते, कृष्णात्यन्त-
चिरोज्झिते तु कवरीबन्धे करोतु क्षणम्।
रामे शातकुठारभास्करकरे क्षत्रद्रुमोच्छेदिनि, क्रोधान्धे च
वृकोदरे परिपतत्याजौ कुतः संशयः॥

मित। संहारार्थप्रदर्शिनी संहारेउपसंहारांशे प्रतिपाद्यः योऽर्थः तस्य प्रदर्शिनी प्रदर्शिका तु प्ररोचना विज्ञेया। उपसंहारे यो विषयः संघटिष्यते तस्य प्रागेव सूचनं यत्र सा प्ररोचना इति भावः। तथाहि श्रीमुनिः—प्ररोचना तु विज्ञेया संहारार्थप्रकाशिनी। प्ररोचनायां खलु भावि यत् वस्तु तत् सिद्धत्वेन प्रदर्श्यते। उक्तं हि धनञ्जयेन—सिद्धामन्त्र-णतो भाविदर्शिका स्यात् प्ररोचना। श्रीरूपोऽपि—सिद्धवद्भाविनोऽर्थस्य सूचना स्यात् प्ररोचना इति।

Ens. Tran.—Prarochana is what points to the incidents that will occur at the end, that is Prorachana is that which speaks of the incident to come, as one that has already taken place. As in the Venisamhara—Pancha-

laka—I together with the venerable chakrapani—beginning from this—"Away with doubts. Let the begemmed pitchers be filled up for your coronation. Let Krishna—take joy in braiding her long trees of hair which she forsook for a long period; where is the doubt (in victory)—when Rama the uprooter of the trees in the shape of Ksattriyas marches on to the battle with his hands brightening with a sharp axe—and so does Bhim blind with rage.

Text—श्लोकः। कार्य्यसंग्रह आदानम्।

वृत्तिः। यथा वेण्याम्—भो भोः स्यमन्तपञ्चकसंचारिणः!

नाहं रक्षो न भूतो, रिपुरुधिरजलाह्लादिताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञा-जलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।
भो भो राजन्यवीराः! समरशिखिशिखाभुक्तशेषाः! कृतं वः
त्रासेनानेन, लीनैर्हतकरितुरगान्तर्हितैरास्यते यत्॥
अत्र समस्तरिपुवधकार्य्यस्य संगृहीतत्वादादानम्।

मित—। कार्य्याणाम्—नाटकप्रतिपाद्यानि यानि कर्म्माणि तेषाम् संग्रहः सङ्कलनम् वीजकार्य्यस्य एकत्र सङ्कलनम् इत्यर्थः, तत् एव आदानम् इति कथ्यते।

Eng. Trans.—Adana is (the speaking of) the co-ordination of the objects of the drama; or rather it is the taking together of the main currents of the drama. As in the Venismhara :—

Oh you! that roam in the Syamanta-panchaka area! I am neither a Raksasa, nor a ghost; but only an irritable Khsattriya that have got his limbs gladdened with the

water of the enemy's blood and have crossed the dangerous ocean in the shape of a tremendous vow; Oh you princely heroes! that are left of those that have been burnt up by the flame of the fire of war, away with your fear through which you are hiding yourselves amongst the elephants and horses killed in battle.

Text—श्लोकः। तदाहुश्छादनं पुनः। कार्य्यार्थमपमानादेः सहनं खलु यद्भवेत्।

वृत्तिः। यथा तत्रैव—अर्ज्जुनः आर्य्य!

अप्रियाणि करोत्वेष वाचा शक्तोन कर्म्मणा। हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा॥

मित—। कार्य्यार्थम् बीजकार्य्यस्य साधनाय अपमानादेः विपक्ष-कृतानाम् अपमानानिष्टप्रभृतीनाम् यत् सहनम् प्रतिशोधेच्छाम् वर्ज्जयित्वा यत् मौनतया सहनम् तत् पुनः छादनम् इति विमर्शसन्धेरङ्गं भवेत्। तथाहि मुनिः—अपमानात् कृतं वाक्यं कार्य्यार्थं छादनं भवेत्। अपमान-मवलम्ब्य यत् वाक्यं कृतं कथितं, स्वकार्य्यार्थं तस्य सहनम् एव छादनं स्यादित्यर्थः। मुनिवाक्यस्य इयं व्याख्या साहित्यदर्पणेन सह एकवाक्यतां कर्त्तुम् एव अस्माभिः कृता। परम् अस्य व्याख्यान्तरं सम्भवति यथा—कार्य्यार्थं स्वकार्य्यम् अनुसृत्य अपमानात् अपमानम् अवलम्ब्य कृतम् उच्चारितं वाक्यं छादनं भवेत्। अत्र व्याख्यायाम् अपमानवाक्येन एव छादनम् भवेत् तस्य अपमानवाक्यस्य सहनस्य प्रसङ्गोऽपि नास्ति। मन्यामहे धनञ्जयस्तु ईदृशीमेव व्याख्याम् मनसिकृत्य विमर्शसन्धौ छादनं न पठति परं छलनं स्वीकरोति। तस्य लक्षणम् यथा दशरूपके—छलनम् चापमाननम्।

Eng. Tran.—Chhadana is the putting up with any kind of insult in order to serve one's own (for the sake of

the safe conduct of the main object of the drama). As in the Veni—Let this fellow sorry with the loss of his hnndred brothers—injure us with mere words, unable to do anything in duals as he is, and what pain can his ravings produce ?

N. B.—इति व्याख्यातानि त्रयोदश विमर्शाङ्गानि। तत्र एतेषाम् अपवादशक्तिव्यवसाय-प्ररोचनादानानि प्रधानानि'' (? प्रधानं) इति धनिकः।

Text—वृत्तिः। अथ निर्वहणाङ्गानि—

मित—। अधुना निर्वहणसन्धिरिति अपरनाम्नः उपसंहारसन्धेः अङ्गानि चतुर्दश विभ्रियन्ते। तथाहि "मुखसन्ध्यादयो यत्र विकीर्णा बीजसंयुक्ताः। महाप्रयोजनं यान्ति तन्निर्वहणमुच्यते" इति नाटक-चन्द्रिका।

Eng. Tran.—Then (we proceed to illustrate) the Angas of the Nirvahana sandhi.

श्लोकः। सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्

कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्॥
भाषणं पूर्व्ववाक्यञ्च काव्यसंहार एव च
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः॥

मित—। सन्धिरित्यादीनि चतुर्दश अङ्गानि। धनञ्जयस्तु पूर्व्ववाक्य-मित्यत्र पूर्व्वभाव इति पठति। श्रीरूपोऽपि एवं। अपिच स काव्य-संहारस्थले उपसंहारं पठति। श्रीमुनिस्तु कृतिस्थले धृतिं पठति।

Eng. Tran.—Sandhi, Vivodha, Grathana, Nirnaya, Paribhasana, Kriti, Prasada, Ananda, Samaya, Upaguhana, Bhashana, Purvavakya, Kavya-samhara and Prasasti—these are the names of the Angas of Niravahhana sandhi.

Text—श्लोकः। वीजोपगमनं सन्धिः।

वृत्तिः। यथा वेण्याम्—भीमः। भवति ! यज्ञवेदिसम्भवे ! स्मरति भवती यन्मयोक्तम्—'चञ्चद्भुजे' त्यादि। अनेन मुखे क्षिप्तवीजस्य पुनरुपगमनमिति सन्धिः।

मित—। वीजस्य मुखसन्धौ स्थापितस्य वीजस्य उपगमनम् पुनराविर्भावः सन्धिरिति कथ्यते। उक्तं हि मुनिना "मुखवीजोपगमनं सन्धिरित्यभिधीयते" इति।

Eng. Tran.—Sandhi is the re-appearance (i. e. re-statement) of the vija (that was laid in the Mukha-sandhi). As in the venisamhara, Bhima—Venerable Lady that spring from the sacrificial altar! do you remember what I said to thee—"with my wavering hands"—and the like.

By this the Vija (the seed), sown in the Mukha (sandhi) re-appears (is re-asserted) and hence it is a case of sandhi.

Text—श्लोकः। विबोधः कार्य्यमार्गणम्।

वृत्तिः। यथा तत्रैव भीमः। मुञ्चतु मामार्य्यः क्षणमेकम्। युधिष्ठिरः—किमपरम् अवशिष्टम्? भीमः—सुमहदवशिष्टं। समापयामि तावदनेन सुयोधनशोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम्। युधिष्ठिरः—गच्छतु भवान्, अनुभवतु तपस्विनी वेणीसंहारम् इति। अनेन केशसंयमनकार्य्यस्यान्वेषणात् विबोधः।

मित—। कार्य्यस्य मूलकर्त्तव्यतया अवस्थितस्य वस्तुनः मार्गणं विवेचनया अन्वेषणं विबोध इति कथ्यते। उक्तं हि मुनीन्द्रेण—कार्य्यस्यान्वेषणं युक्त्या विबोध इति कीर्त्तितः। श्रीमुनिस्तु विबोधं निरोध इति पठति।

Eng. Tran.—Vivodha is the finding out of the duty, object or matter (that constitutes the goal or final view of the drama).

As therein, too—

Bhima—Please let me go, venerable sir, for a moment. Yudhisthira—What other is left ? Bhima—A great (an important) thing yet remains to be done. I shall braid the fine hair of Panchali (fine tresses of Draupadi's hair) that was (formerly) dragged by Duhsasana, with this hand of mine—besmeared with Duryyodhana's blood.

Yudhisthira—You may go ; let her wretched (poor) self feel (the pleasure of) the braiding of her hair. Here is vivodha, since here is the finding out of the duty in the shape of the braiding up of the hair (an act that justifies the title of the drama). (see next).

Text—श्लोकः। उपन्यासस्तु कार्य्याणाम् प्रथनम्।

वृत्तिः। यथा तत्रैव भीमः—पाञ्चालि। न खलु मयि जीवति संहर्त्तव्या दुःशासनविलुलिता वेणिरात्मपाणिभ्याम्। तिष्ठ। स्वयमेवाहं संहरामि" इत्यनेन कार्य्यस्योपक्षेपात् प्रथनम्।

मित—। कार्य्याणाम् प्राधान्येन आचरणीयानाम् वस्तूनाम उपन्यासस्तु उपक्षेपस्तु प्रथनम् इति कथ्यते। उक्तं हि श्रीरूपेण—प्रथनम् तदुपक्षेपः। धनञ्जयोपिप्रथनं तदुपक्षेपः। मुनीन्द्रोऽपि—उपक्षेपस्तु कार्य्याणां प्रथनं परिकीर्त्तितम्। अत्र उपन्यासः उपक्षेपो वा इत्यस्य कार्य्यस्य आविर्भावः उपस्थितिरित्यर्थः।

Eng. Tran.—Grathana is the reference to the main:

theme (of the drama which presents itself for completion). [N. B.—वेण्याःसंहारः (संयमनम्), वेण्याहृतःसंहारः (नाशः), वेणीश्च संहारश्च इति यत्र (उपचार) इत्यादि च वेणीसंहारमिति सार्थकं नाम]।

As therein too—Bhima—Panchali ! you should not, with your own hands braid up your hair that was slackened by Dussasana as long as I am living , wait, I shall braid it up myself. By this—here has taken place Grathana—as the main theme is referred to—(as presenting itself for completion).

[N. B.—Or we here explain 'कार्य्याणां' प्रतिपाद्यविषयानाम् उपन्यासः (साहित्यरूपेण सरसं कीर्त्तनं वा एकत्र समावेशनम्) ग्रथनम्। ततः तादृशः ग्रन्थांशोवा ग्रन्थविशेषो वा उपन्यासः। Thus herein such expl will be found the germ of modern उपन्यास which has many characteristics सादृश्य with our नाटकलक्षण and technique. So we interpret "उपन्यासः प्रसादनम्" (प्रतिमुखसन्ध्यङ्ग, P. 192) as "कुपितनायकादिप्रसादनं यथा उपन्यासः तथा विभ्रान्तजनचित्तप्रसादनमपि उपन्यासः"। Hence now-a-days उपन्यास should be such as to give light and education also culture to the bewildered mass].

Text श्लोकः। निर्णयः पुनः अनुभूतार्थकथनम्—

वृत्तिः। यथा तत्रैव भीमः। देव ! अजातशत्रो। अद्यापि दुर्य्योधनहतकः। मया हि तस्य दुरात्मनः—

भूमौक्षिप्तं शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे,
लक्ष्मीरार्य्ये निषिक्ता चतुरुदधिपयःसीमया सार्द्धमूर्व्या।
भृत्या मित्राणि योधाः कुरुकुलमनुजा दग्धमेतद्रणाग्नौ
नामैकं यद् ब्रवीषि क्षितिप। तदधुना धार्त्तराष्ट्रस्य शेषम् ॥

मित -। अनुभूतः इन्द्रियैः साक्षात्कृतः योऽर्थः विषयः, पूर्व्वम् अनुभूतः आचरितो वा यो विषय इत्यर्थः तस्य कथनम् प्रकाशनम् खलु निर्णयः। उक्तं हि श्रीमुनिना—अनुभूतार्थकथनं निर्णयः समुदाहृतः। अनुभूताख्या तु निर्णयः इति धनञ्जयः। निर्णयस्त्वनुभूतोक्तिरिति श्रीरूपः।

Eng. Tran.—Nirnaya is the statement of what has been already experienced. As therein, too, Bhima (says)—your Majesty ! Ajatasatru ! Till now I have thrown that rascal's (Duryodhana's) body on the ground ; and have besmeared my body with the sandal-paste-like blood of his. The royalty of the earth extending as far as the four oeeans has been vested on your venerable self. His officials (employees), allies, soldiers and all the men of the Kuru dynasty have been burnt in the fire of war ; and Duryyodhana, which your Majesty speaks, is but resting now in name only.

Text—श्लोकः। वदन्ति परिभाषणं परिवादकृतं वाक्यम् —।

वृत्तिः। 'यथा शाकुन्तले—राजा। आर्य्ये ! अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी'?, तापसी। को तस्स धम्मदारपरिच्चाइणो णामं गेण्हिस्सदि।

मित—! परिवादः अपवादः निन्दा इत्यर्थः। तेन कृतं निन्दया सह कथितं निन्दाद्योतनाय उच्चारितं इत्यर्थः वाक्यं परिभाषणं वदन्ति नाट्याचार्य्याः इति शेषः। तथाहि श्रीमुनिः—परिवादकृतं यत् स्यात् तदाहुः परिभाषणम्। धनञ्जयस्तु—मिथो जल्पनम् परिभाषणं मन्यते। तथाहि दशरूपके—परिभाषा मिथोजल्पः। मिथो जल्पः परस्परालापः। श्रीरूपस्तु

उभयमतमेव न्यस्तवान् यथा नाटकचन्द्रिकायाम्—परिभाषा 'मिथो जल्पः 'परिवाददोत्यकं भवेत् इति।

Eng. Trans—What is uttered by way of accusation is said to be Paribhashana. As in Sakuntala—King—venerable lady? Of which royal age is she the wife?

Female-ascetic—who will afford to utter the name of him who has forsaken his lawfully married wife?

Text—श्लोकः। लब्धार्थशमनं कृतिः।

वृत्तिः। यथा वेणयां—कृष्णः। एते भगवन्तो व्यासवाल्मीकिप्रभृतयोऽभिषेकं धारयन्तस्तिष्ठन्ति" इति।

अनेन प्राप्तराज्यस्य अभिषेकमङ्गलैः (शमनं) स्थिरीकरणं कृतिः।

मित। लब्धः प्राप्तः योऽर्थः विषयः—तस्य शमनं स्थिरीकरणं कृतिरित्युच्यते। उक्तं हि मुनीन्द्रेण—"लब्धस्यार्थस्य शमनं धृतिमाचक्षते पुनः।" श्रीमुनिस्तु कृतिस्थाने धृति पठति। शमनं स्थिरीकरणं। तथाहि श्रीरूपः—लब्धस्य कृतिः स्थैर्यमिति।

Eng. Trans—Kriti is the stabilisation of what has been (already) gained. (शमन here means स्थिरीकरण)।

As in the Veni—

Krishna—Here are venerable Vyasa-valmiki and others—waiting with the implements of coronation for yon.

By this the acquired kingdom is stabilised—and here is (an instance of) Kriti.

श्लोकः। शुश्रूषादिः प्रसादः स्यात्।

वृत्तिः। यथा तत्रैव भीमेन द्रौपद्याः केशसंयमनम्।

मित—। शुश्रूषा परिचर्य्या आदि र्यस्य स शुश्रूषादिः। परिचर्य्या-प्रभृतयः एव प्रसाद इति उपसंहारसन्धेः प्रसादनामाङ्गत्वं गच्छन्ति। आदिपदेन पर्य्युपासनमेव ग्राह्य" (तथाहि दशरूपके—प्रसादः पर्य्युपासनम्। अपिच शुश्रूषापर्य्युपासनादिकरणेन उत्पन्ना प्रसन्नता एव प्रसादशब्देन बोध्या। तथाहि नाटकचन्द्रिकायाम्—शुश्रूषादुपसम्पन्ना स्यात् प्रसादः प्रसन्नता। श्रीमुनिरपि—शुश्रूषादुपसम्पन्नः प्रसन्नः प्रीतिरुच्यते। प्रसादस्थले प्रीतिरिति—श्रीमुनिः पठति।

Eng. Tran.—Prasada implies cordial services and the like—i. e. Prasada stands for the satisfaction—ensured by the rendering of services and the like. As in the same work the braiding of Draupadi's hair by Bhima (stands as an example of Prasada).

Text—आनन्दो वाञ्छितागमः॥ यथा तत्रैव द्रौपदी "विसुमरिदं एदं वावारं णाथस्स पसादेन पुणोवि सिक्खिस्सम्'' ॥

समयो दुःखनिर्याणम्

वृत्तिः। यथा रत्नावल्यां—'वासवदत्ता। (रत्नावलीमालिङ्ग्य) समस्सस! बहीणिए। समस्सस।

मित।—दुःखस्य निर्याणं अपगमः समयः इति कथ्यते। दुःख-स्यापगमश्चैव समयोऽथ निगद्यते इति श्रीमुनिः। समयो दुःखनिर्गम इति धनञ्जयः। समयो दुःखसंक्षय इति श्रीरूपः।

Eng. Tran.—आनन्द is acquiring of the desired object. And Samaya is the passing away of misery.

As in Ratnavali—Vasavadatta. Cheer up! my sister! cheer up!

Text—श्लोकः। तद्भवेदुपगूहनं यत् स्यादद्भुतसम्प्राप्तिः।

वृतिस्तः। यथा मम प्रभावत्यां—नारदवर्शनात् प्रद्युम्न ऊर्द्ध्वमव-लोक्य—

"दधद्विद्युल्लेखामिव कुसुममालां परिमल-
भ्रमद्भृङ्गश्रेणीध्वनिभिरुपगीतां ततः इतः ।
दिगन्तं ज्योतिर्भिस्तुहिनकरगौरैर्धवलयन्
इतः कैलासाद्रिः पतति वियतः किं पुनरिदम् ॥

मित—। यत् स्यात् अद्भुतस्य आश्चर्य्यजनकस्य वस्तुनः सम्प्राप्तिः उपलब्धिः तदेव उपगूहनमिति कथ्यते। अद्भुतस्य च संप्राप्ति र्भवेत्तदुपगूहनम् इति श्रीमुनिः। अद्भुतार्थपरिप्राप्तिरुपगूहनमुच्यते इति श्रीरूपः। अद्भुतप्राप्तिरुपगूहनमिति दशरूपके।

Eng. Tran.—Upaguhana is the finding of some novel object. As in my Prabhavati—there at the sight of Narada, Pradyumna says, looking upwards—what may it be ? Is it the mountain Kailasa descending (on earth) from the upper region putting on (at the time) a garland of flowers resounding with a row of bees hovering (through their attraction) for the fragrance, and whitening, hither and thither the (entire) horizon through his (own) complexion white as the cool-rayed moon ?

Text—श्लोकः। सामदानादि भाषणम्।

वृत्तिः। यथा चण्डकौशिके—धर्म्मः—तदेहि ! धर्म्मलोकमधितिष्ठ।

मित—। साम सान्त्वनं प्रियवाक्यम् इति यावत्, दानं तथाशीर्व्वादप्रदानम् भाषणमिति कथ्यते। दृष्टान्तो यथा—चण्डकौशिके हरिश्चन्द्रम् प्रति धर्म्मस्य उक्तिः। तत्र वाक्यमिदं हरिश्चन्द्रस्य सन्तोषकरमित्यत्र भाषणम्। श्रीमुनिरप्येवम्—यथा सामदानादिसम्पन्नं भाषणं समुदाहृतम्। धनञ्जयस्तु "मानाद्याप्तिश्च भाषणम्" इति भाषणं लक्षयति। तत्र धनिकस्तु रत्नावल्याः

(४।२०) अन्तिमश्लोकात् पूर्व्वश्लोकम् उद्धृत्य "अनेन कामार्थमानादिलाभात् भाषणम्" इति लक्षणसंगतिं दर्शयति। श्रीरूपस्तु धनञ्जयमेवानुसरति। तन्मते आशीर्व्वादादिप्राप्त्या अपि भाषणं भवेत् इति।

Eng. Tran.—Bhashana stands for pacification and concession etc. As in the Chanda-Kausika-Dharma says—

Then come! take your seat in the region of Dharma.

Text—श्लोकः। पूर्व्ववाक्यन्तु विज्ञेयं यथोक्तार्थोपदर्शनम्।

वृत्तिः। यथा वेण्याम्—भीमः। बुद्धिमतिके। क्व सा भानुमती। परिभवतु सम्प्रति पाण्डवदारान्।

मित—। यथोक्तस्य (पूर्व्वं यत् उक्तं कथितं तदनतिक्रम्य इत्यादि) योऽर्थः विषयः तस्य उपदर्शनं प्रदर्शनं पूर्व्ववाक्यं कथ्यते। प्राक्कथितस्य कार्य्यस्य साधनप्रदर्शनमेव पूर्व्ववाक्यमित्यर्थः। तथाहि मुनिः—पूर्व्ववाक्यन्तु विज्ञेयं यथार्थोक्तार्थदर्शनम् इति। धनञ्जयस्तु पूर्व्ववाक्यस्थले पूर्व्वभाव इति पठति। "कार्य्यदृष्टिः पूर्व्वभावः"। कार्य्यदृष्टिः कार्य्यदर्शनमिति धनिकः।

Eng. Tran.—Purva-vakya implies the showing of (the accomplishment of) what has been declared. As in Veni, Bhima—Buddhimatika! where is Bhanumtai? Let her now insult the wife of the Pandavas.

Text—श्लोकः। वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते।

वृत्तिः। यथा सर्व्वत्र "किन्तेभूयः प्रियमुपकरोमि" इति।

मित—। वरप्रदानं केनचित मान्येन जनेन वरदानं तस्य संप्राप्तिः उपलब्धिः काव्यसंहार इष्यते। मुनिस्तु "वरप्रसादसंप्राप्तिः काव्यसंहारः इष्यते" इति पठति। स एव पाठ साधीयान् इति। वरस्य तथा

प्रसादस्य अनुग्रहस्य च संप्राप्तिः लाभः इति यावत्। यद्वा वररूपो यः प्रसादः अनुग्रहस्तस्य संप्राप्तिरेव काव्यसंहारः। वराप्तिः काव्यसंहार इति धनञ्जयः। श्रीरूपस्तु अत्र उपसंहार इति पठति। लक्षयति च इत्थम्—"कृतार्थतोपसंहारः सर्व्वाभीष्टोपलब्धितः"। सर्व्वेषाम् अभीष्टानाम् उपलब्धितः प्राप्त्या या कृतार्थता जायते स एव उपसंहारः काव्यसंहारः इति यावत्। दृष्टान्तः तु सर्व्वस्मिन् एव नाटके "किं ते भूयः प्रियमुपकरोमि" इत्यनेन काव्यार्थसंहरणात् काव्यसंहारः।

Eng. Trans.—Kavya-samhara stands for the acquisition of a boon (granted by some superior person).

As—in every drama—"what more good can I do (again) unto you ?" and so forth [See our edition of Sakuntala Pratima and Swapna etc. under भरतवाक्यम् (नटस्य प्रधानस्य वा वाक्यम् etc.)]

Text—श्लोकः। नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते।

वृत्तिः। यथा प्रभावत्याम्—

राजानः सुतनिर्विशेषमधुना पश्यन्तु नित्यं प्रजाः
जीयासुः सदसद्विवेकपटवः सन्तो गुणग्राहिणः।
शस्यस्वर्णसमृद्धयः समधिकाः सन्तु क्षमामण्डले
भूयादव्यभिचारिणी त्रिजगतो भक्तिश्च नारायणे॥

अत्र चोपसंहारप्रशस्त्योरन्ते एकेन क्रमेणैव स्थितिः।

मित—। नृपस्य देशस्य तथा आदिपदेन जनानाम् अपि शान्तिः मङ्गलं मङ्गलकामनासूचकं वाक्यम् इत्यर्थः प्रशस्तिरिति अभिधीयते कथ्यते। मुनिस्तु "नृपदेवप्रशस्तिश्च प्रशस्तिरभिधीयते" इति लक्षयति। नृपस्य तथा देवस्य च प्रशस्तिः प्रशंसा एव प्रशस्तिर्भवेदिति तन्मतं। प्रशस्तिः शुभशंसनमिति धनञ्जयः। शुभस्य मङ्गलस्य शंसनम् आशंसा प्रशस्तिः स्यादिति भावः। उक्तं च श्रीरूपेण—मङ्गलाशंसनं सम्यक् प्रशस्ति-

रभिधीयते। सम्यक् इति स च प्रशस्तिश्लोकः नाटकस्य अन्तिमश्लोकः एव प्रशस्तिरितिबोध्यम्।

Eng. Tran.—Prashati is the prayer for good (for peace and prosperity) with regard to Kings, countries and the like.

As in Prabhavati—

May the Kings now look upon their subjects without any distinction from their sons; may the good—who are adepts in discriminating the right from the wrong and are appreciators of merits—live long (literally prosper). May there be abundance of harvest and minerals (gold) on earth and may the people of the three worlds entertain staunch unflinching devotion for Narayana.

Text—वृत्तिः। "इह च मुखसन्धौ उपक्षेपपरिकर परिन्यासयुक्त्युद्भेद-समाधानानां, प्रतिमुखे च परिसर्पण-प्रगमनवज्रोपन्यासपुष्पाणाम्, गर्भे अभूताहरणमार्गत्रोटकाधिवलक्षेपाणां, विमर्शे अपवादशक्तिव्यवसाय-प्ररोचनादानानां प्रधान्यं। अन्येषाञ्च यथासम्भवं स्थितिः" इति केचित्।

मित—। अथ सन्ध्यङ्गानां मुख्यगौणभावं धनिकमतेन उपन्यस्यति। केचित् धनिकप्रभृतयः इत्यर्थः। अत्र यानि मुखसन्धेरङ्गानि तत्र केषाञ्चित् प्राधान्यं केषाञ्चित् वा गौणत्वम्। एतेषां पौर्वापर्य्यविपर्ययेपि क्रमभङ्ग दोषो नस्यात्।

Eng. Trans.—Here in the Mukhasandhi, Upaksepa, Parikara, Parinyasa, Yukti, Udveda and Samadhana, occupy prominent position; and so in Pratimukhasandhi Parisarpana, Pragamana, Vajra, Upanyasa and Puspa;

in the Garbha sandhi, Abhutaharana, Màrga, Trotaka, Adhivala and Khsepa ; in Vimarsa sandhi, Apavada, Sakti, Vyavasaya, Prarochana and Adana attain prominency ; and the rest should be applied as far as practicable—thus opine some authorities.

Text—श्लोकः। चतुषष्ठिविधं ह्येतदङ्गं प्रोक्तं मनीषिभिः
कुर्य्यादनियते तस्य सन्धावपि निवेशनम्।
रसानुगुणतां वीक्ष्य रसस्यैव हि मुख्यता॥

वृत्तिः। यथा वेणीसंहारे तृतीयाङ्के दुर्योधनकर्णयोमहत् सम्प्रधारणम्। एवमन्यत्रापि। यत्तु रुद्रटादिभिः—"नियम एव" इत्युक्तं तत् लक्ष्य-विरुद्धम्।

मित—। एतत् चतुःषष्ठिविधम् अङ्गं मनीषिभिः प्रोक्तम्। यथा मुखसन्धौ द्वादशाङ्गानि, प्रतिमुखे त्रयोदश, गर्भे अपि तथा मतान्तरेण, विमर्शे निर्वहणे अपि तादृशानि (प्रार्थनाप्रशस्त्योः उपसंहारप्रशस्त्योर्वाएकक्रमेणस्थितत्वात् ?)। सर्व्वाणि एकत्र चतुःषष्ठि संख्यकानि जायन्ते। रसानुगुणताम् रसस्य आनुकूल्यं रसनिष्पत्तिविषये उपयोगिताम् वीक्ष्य विविच्य अनियते अनिर्द्दिष्टे अपि सन्धौ तस्य अङ्गस्य निवेशनं कुर्य्यात्, यदि रसानुकूल्यं भवेत्। तर्हि यस्मिन् सन्धौ यदङ्गं निर्दिष्टं, तदङ्गं तमपि सन्धिमतिक्रम्य अपरस्मिन्नपि सन्धौ सन्निवेशयेत्। एतत् करणे न दोषः—यतः सर्वत्र रसस्य एव मुख्यता प्राधान्यम्। रसनिष्पत्तिरेव नाटके मुख्या ; अतएव रसनिष्पत्तिं दर्शयितुम् यदि अङ्गानां पौर्व्वापर्य्यहानिः स्यात् एकसन्धौ योज्यम् अङ्गम् अपरसन्धौ वा प्रविष्टं स्यात् तदपि न दोषाय इति भावः। अत्र दृष्टान्तो यथा—वेणीसंहारे तृतीयाङ्के तत्र गर्भसन्धिः—परं दृश्यते दुर्य्योधनकर्णयो महत्सम्प्रधारणम्। सम्प्रधारणं तु युक्तिः। सा च युक्तिर्मुखसन्धेरेव अङ्गं परं तत्र गर्भसन्धौ सन्निविष्टा। तत्र सन्निवेशे रसपुष्टिः सञ्जाता इति न कश्चित् दोषोऽत्र। एवमन्यत्रापि दृश्यते।

रुद्रटप्रभृतयः "नियम एव"—यदङ्गं यस्मिन् सन्धौ निर्दिष्टं तत् तस्मिन् एव सन्निवेष्टव्यम् इति नियमः पालनीयः इति कथयन्ति। परं रुद्रटप्रभृतीनाम् एतन्मतं तु लक्ष्यविरुद्धं प्रसिद्धनाटकादिप्रयोगविरुद्धम् इति ज्ञेयम्। यथा दर्शितं वेणीसंहारे गर्भे एव महत्सम्प्रधारणं यत् मुखसन्धेरेव अङ्गं भवति। श्रीरूपोऽपि विश्वनाथमतम् समर्थयतीति अस्माभिः प्रागेव कथितम्।

अपि च—अत्र श्रीरूपः सन्धीनाम् अभ्यन्तरे एव सन्ध्यङ्गानाम् अशैथिल्यकरणाय सन्ध्यन्तराणि योजयितुम् उपदिशति। यथा नाटकचन्द्रिकायाम् "मुखादिसन्धिष्वङ्गानामशैथिल्याय सर्व्वतः। सन्ध्यङ्गान्तराणि योज्यानि तत्र तत्रैकविंशतिः। तानि एकविंशतिसंख्यकानि सन्ध्यन्तराणि पठति श्रीरूपः। यथा—

"सामदाने भेददण्डौ प्रत्युत्पन्नमतिर्वधः गोत्रस्खलित-
मोजश्चधीः क्रोधः सहसां भयम्।
माया च संवृतिर्भ्रान्ति दूत्यं हेत्ववधारणम्। स्वप्नलेखौ
मदश्चित्रमेषां लक्षण मुच्यते।"

लक्षणान्यपि तेषां कथितानि। तानि च नाटकचन्द्रिकायाम् द्रष्टव्यानि।

Eng. Tran.—Thus these sixty four Angas (of all the sandhis) have been fixed by scholars. They may be indiscriminately (or irregularly) inserted in the (body of the) sandhis—considering of course, their utility in the presentation of the Rasa—since it is the Rasa that stands predominant (that attains predominant position i. e. Rasa is of primary importance in a drama and everywhere also in साहित्य and consequently deserves first priority). As in the Venisamhara, in the third act (which forms Garbha

sandhi) there occurs a great (and fine) Sampradharana (Yukti) which is but an anga of Mukhasandhi. Elsewhere, it is to be found out what Rudrata and others say, namely that this (i. e. the placing of Angas in their own sandhis) is a rule (a principle) that should be strictly adhered to ; but this is against standard usages.

द्रष्टव्यम् । अस्मिन् विषये श्रीमुनिः वक्ति—

"यथासन्धि तु कर्त्तव्यान्येतान्यङ्गानि नाटके कविभिः काव्यकुशलै रसभावानवेक्ष्यतु" ।

अत्र "यथासन्धि" इत्यनेन प्रतीयते यत् दर्पणोक्तदिशा क्रमभङ्गः श्रीमुनेः न सम्मतः । रुद्रटादयः एतन्मतमेव अनुसरन्ति । अपिच श्रीरूप-प्रोक्तानि सन्ध्यन्तराणि तु सर्व्वाण्येव श्रीमुनिप्रोक्तानि । तानि च अविकल-मेव दृश्यन्ते भारतीयनाट्यशास्त्रे । तत्र उक्तं हि श्रीमुनिना—"सन्ध्यन्त-राणि वक्ष्यामि त्वर्थौपक्षेपकाणि च" ।

Text —श्लोकः—इष्टार्थरचनाश्चर्य्यलाभो वृत्तान्तविस्तरः ।

रागप्राप्तिः प्रयोगस्य गोप्यानां गोपनं तथा ।

प्रकाशनं प्रकाश्यानामङ्गानां षड् विधं फलं ॥

अङ्गहीनो नरो यद्वन्नैवारम्भक्षमो भवेत्,

अङ्गहीनं तथा काव्यं न प्रयोगाय युज्यते ॥

मित—। सन्ध्यङ्गानां षट् प्रकारं प्रयोजनम् । उक्तं हि दशरूपके—"उक्ताङ्गानां चतुषष्ठिःषोढ़ा चैषां प्रयोजनम" । कानि पुनस्तानि षट्प्रयो-जनानि इति वक्ति—इष्टार्थरचना इत्यादि । इष्टस्य अभिप्रेतस्य अर्थ स्य विषयस्य रचना ग्रथनम् । विवक्षितार्थनिबन्धनमिति धनिकः । आश्चर्य्यलाभः द्रष्टॄणाम् विस्मयोत्पत्तिः । चमत्कारित्वम् इति धनिकः । आश्चर्य्यवद्भिख्यात-मिति श्रीमुनिः । वृत्तान्तविस्तरः उपाख्यानस्य कलेवरवृद्धिः । इतिवृत्तस्य विस्तर इति धनिकः । अत्र श्रीमुनिस्तथा धनञ्जयोअपि "वृत्तान्तस्यानुपक्षय"

इति पठति। प्रयोगस्य रागप्राप्तिः अभिनेयवस्तुनि श्रोतुः अनुरागोत्पादनम्। अभिनेयरागवृद्धिरिति धनिकः। गोप्यानां विषयाणाम् गोपनम्। गोप्यार्थगोपनमिति धनिकः। गुह्यनाम् गूहनमिति मुनीन्द्रः। प्रकाश्यानां पदार्थानाम् प्रकाशनम्। प्रकाशार्थप्रकाशनमिति धनिकः। इति षट्विधम् अङ्गानां फलं प्रयोजनम्। एतानि षट् प्रयोजनानि अङ्गैः साध्यन्ते इति भावः। अङ्गहीनः पाणिपादादिरहितः नरः यथा आरम्भक्षमः कस्यचित् कार्य्यस्य निष्पादने समर्थो न स्यात्—तद्वत् अङ्गहीनम् सन्ध्यङ्गरहितं काव्यं दृश्यकाव्यं प्रयोगाय न युज्यते न अभिनयोपयोगि भवति।

तथाहि मुनिः —अङ्गहीनो नरो यद्वत् युद्धारम्भेऽक्षमो भवेत्।
अङ्गहीनं तथा काव्यं न प्रयोगक्षमं भवेत्।

अतएव—"सम्पादनार्थं वीजस्य सम्यक् सन्धिकराणि तु॥
कार्य्याण्येतानि कविभिर्विशिष्टार्थानि नाटके॥

किञ्च— सर्व्वाङ्गानि कदाचित्तु द्वित्रियोगेन वा पुनः
ज्ञात्वा कार्य्यमवस्थां च योजयान्यङ्गानि सन्धिषु।—

इति भारतीयनाट्यशास्त्रम्।

Eng. Tran.—Six are the objects of the Angas (i. e. six objects are to be performed by the sandhi- Angas). These are—Composition of a desired subject ; winning the astonishment (of the audience) ; dragging or expanding of the plot (of the story) ; ensuring the attachment (of the audience) to"the staging of the drama ; suppression of what deserves to be suppressed ; and exhibition of what deserves to be exhibited.

As a deformed man is not fit for any undertaking, so a drama, devoid of these Sandhi angas, is not fit to be staged.

Text—श्लोकः। सम्पादयेताम् सन्ध्यङ्गं नायकप्रतिनायकौ।
तदभावे पताकाद्यास्तदभावे तथेतरत्॥

वृत्तिः। प्रायेण प्रधानपुरुषप्रयोज्यानि सन्ध्यङ्गानि भवन्ति। किन्तू-पक्षेपादि—त्रयं बीजस्याल्पमात्रसमुद्दिष्टत्वात् अप्रधानपुरुषप्रयोजितमेव साधु।

मित। ननु सन्धेरेतानि अङ्गानि को हि नाम अभिनीय निष्पादयेत् इति जिज्ञासायाम् उत्तरं पठति—नायकस्तथा प्रतिनायकश्च सन्धेरङ्गानि सम्पादयेताम्। तौ खलु अङ्गानि अभिनीय साधयेताम् इत्यर्थः। कथं? यतः नायकः प्रतिनायकश्च एव नाटके प्रधानपुरुषौ; एवम् सन्धेरपि अङ्गानि प्रधानपुरुषप्रयोज्यानि भवन्ति। परम् एतत् विधानं तु प्रायिकं तेनैव उक्तं "प्रायेण" इति। तर्हि यदा नायकप्रतिनायकौ अङ्गानि न अभिनयेयाताम् तदा को नाम तानि अभिनयेत्? उच्यते—तदभावे नायकस्य प्रतिनायकस्य च अभावे, पताकाद्याः पताका एवम् आदि-पदेन नायिका, प्रतिनायिका प्रकरी च एतानि अङ्गानि साधयेयुः। तथा एतेषाम् अपि अभावे "इतरत्" अन्यः कश्चिन्नाटकीयः जनः अङ्गानि साधयेत्। परम् अप्रधानानाम् (?) पात्राणाम् सर्व्वेषामेव सन्ध्यङ्गानाम् साधने न अधि-कारः—अपितु उपक्षेपपरिकरपरिन्यास इति त्रयाणाम् एव मुखसन्धेर-ङ्गानां प्रयोगे एव ते समर्थाः, यतः एषु त्रिषु नाटकीयकथाबीजम् अल्प-मात्रमेव उल्लिखितं स्यात्। अतएव उक्तं "बीजस्य अल्पमात्रसमुद्दिष्ट-त्वात्"। यत एषु बीजम् अल्पमात्रमेव समुद्दिष्टं भवेत्—अत्र एतेषां त्रयाणाम् अप्रधानपुरुषप्रयोज्यत्वेऽपि न दोषः इति भावः। अत्र श्रीरूप-मतं प्रागेव अस्माभिरुपन्यस्तम्। तन्मते नायकनायिका—प्रतिनायिका-नामेव मुख्यत्वम्—साहित्यदर्पणमते तु नायकप्रतिनायकयोरेव मुख्यत्वम्। एतत् पार्थक्यं न दोषाय। यतः श्रीमान् विश्वनाथः धीरोदात्तनायकसम्वलितं पुरुषपात्रप्रधानम् रूपकम् मनसिकृत्य एतद्विधानं दत्तवान्—अतएव तन्मते मुख्यत्वात् नायकप्रतिनायकौ एव सन्ध्यङ्गानि साधयेताम्। तदभावे

पताका, नायिका प्रतिनायिका प्रकरी वा। श्रीरूपस्तु धीरललितनायक-सम्वलितं स्त्रीपात्रप्रधानं रूपकम् मनसिकृत्य सन्ध्यङ्गनिष्पादनविधानं कृतवान्—अतएव तन्मते मुख्यत्वात् नायकः नायिका प्रतिनायिका च सन्ध्यङ्गानि निष्पादयेयुः। तदभावे पताका, प्रतिनायकः प्रकरी वा। एतेषां सर्व्वेषाम् अभावे कश्चिदप्रधानपुरुषः सन्ध्यङ्गानि अभिनयेत्। परमत्र विश्वनाथो नियमं करोति यत् अप्रधानपुरुषः उपक्षेपादित्रयमेव अङ्ग साधयेत्। श्रीरूपस्तु तादृशं नियमं न कृतवान्। (अत्र 'प्रक्षेपादि" पाठः अयुक्तः)।

Eng. Trans.—Nayaka (the hero) as well as the Pratinayaka (the rival of the hero) should act the Angas of the sandhi. In their absence, they may be acted by Pataka or others (such as Nayika the heroine, Pratinayika the rival of the heroine or Prakari); and in the absence of all these they may be acted by some other person.

The Angas of the sandhis are generally to be acted by main characters (of the drama). But the three angas—beginning with upakhsepa (i. e. upakhsepa, Parikara and Parinyusa) can be accepted as valid if acted by minor characters (can be acted as well by minor characters), in as much as the seed (of the drama) is but little developed in these (i. e. since they present a very little development of the seed).

Text—श्लोकः। रसव्यक्तिमपेक्ष्यैषामङ्गानां सन्निवेशनम्।
नतु केवलया शास्त्रस्थितिसम्पादनेच्छया॥

वृत्तिः। तथा च वेण्यां दुर्य्योधनस्य भानुमत्या सह विप्रलम्भो दर्शितः, तत्तादृशे अवसरे अत्यन्तमनुचितम्।

मित—। ननु एतानि सर्व्वाणि अङ्गानि किम् अवश्यमेव नाटके निवेशनीयानि? उच्यते। रसस्य व्यक्तिः प्रकाशनम् इति रसव्यक्तिः। रसस्यैव हि सर्व्वत्रमुख्यता इति अनेन हेतुना रसस्य प्रकाशनमेव अपेक्ष्य एतेषाम् अङ्गानाम् नाट्यकलेवरे सन्निवेशनम् स्यात्। रसमेव उद्दीपयितुम् एतेषाम् नाटके अवस्थितिः इति भावः। ननु परम् केवलया शास्त्रस्थिति-सम्पादनेच्छया। यतः अङ्गानि नाट्यशास्त्रे उक्तानि अतएव तानि रसोपयोगिताम् उपेक्ष्यैव येन केन उपायेन नाटके प्रदर्शनीयानि इति केवल-मेव नाट्यशास्त्रस्य उक्तिं परिपालयितुम् अङ्गानाम् सन्निवेशनं न कुर्य्यात्। अत्र रसपदेन भावोऽपि ग्राह्यः। यथा श्रीमुनिः—

यथासन्धि तु कर्त्तव्यानेतान्यङ्गानि नाटके। कविभिः काव्यकुशलै रसभावानवेक्ष्यतु। (रस is sentiment ; and भाव is Emotion).

श्रीरूपोपि—

"रसभावानुरोधेन प्रयोजनमवेक्ष्य च। साफल्यं कार्य्यमङ्गानामित्या-चार्य्याः प्रचक्षते"। अस्य नियमस्य व्यतिक्रमे दोषः स्यात्, तं दोष प्रदर्शयति यथा वेणीसंहारे। तत्र तादृशे अवसरे तुमुलसमरप्रसङ्गे भानुमत्या सह दुर्य्योधनस्य विप्रलम्भो वियोगो दर्शितः। तत्तु अत्यन्तम् अनुचितम्— यतः वीररसप्रधाने युद्धप्रसङ्गे शृङ्गाररसप्रधानः विप्रलम्भः प्रदर्शितः। अत्र इदं तत्त्वं—यद्यपि वेणीसंहारे भानुमत्या सह दुर्य्योधनस्य विरह-व्यापारम् अवतार्य्य विलासप्रभृतीनि प्रतिमुखसन्धेरङ्गानि उपन्यस्तानि तथापि तत्र वीररसाश्रिते दारुणसमरप्रसङ्गे शृङ्गाररसप्रधानस्य विरहस्य अवतारणेन सन्ध्यङ्गानाम् प्रदर्शनम् अनुचितम्, प्रस्तुतेन वीररसेन सह शृङ्गाररसस्य विरोधात्। तत्र एतेषाम् अङ्गानाम् अप्रदर्शनमेव उचितम् आसीत्। अतएव "प्रकृतरसव्यक्तेरसद्भावे नाट्यशास्त्रनिर्दिष्टमप्यङ्गम् कविः परिहरेत्" इति श्रीमान्सिद्धान्तवागीशः।

मुखसन्धिनिर्दिष्टानि विलासादीनि अङ्गानि सन्निवेशयितुम् एव श्रीमान् भट्टनारायणः प्रकृते दारुणसमरप्रसङ्गे भानुमत्या सह दुर्य्योधनस्य

विप्रलम्भं कल्पितवात्—परं तेन रसमर्य्यादा लङ्घिता। परं सन्ध्यन्ङ्गानाम् अप्रदर्शनम् तथापि न रसमर्य्यादालङ्घनम्—यतो रसस्यैव हि मुख्यता इति नातिम् अवलम्ब्य तत्र रसमर्य्यादाम् प्रति दृष्टिम् दत्त्वा विलासादीनाम् अप्रर्शनमेव तत्र उचितं स्यात् तदेव साधु अभविष्यदिति।

Eng. Tran.—The angas are to be inserted in the body of the drama solely with a view to present the (exhibition of the) sentiment (Rasa), but never with the motive of simply placing them, and simply to observe the dictation of the works of the authority or shastras.

Thus, the separation with Bhanumati shown in the Venisamhara has been too improper—on such an occasion (of war).

Trxt—श्लोकः। अविरुद्धन्तु यद्वृत्तं रसादिव्यक्तयेधिकं। तदप्यन्यथयेद्धीमान् न वदेद्वा कदाचन।

वृत्तिः। अनयोरुदाहरणम् सत्-प्रबन्धेष्वभिव्यक्तमेव।

मित—। श्लोकोऽयम् साहित्यदर्पणात् अविकल्पमेव उद्धृतोदृश्यते श्रीरूपेण नाटकचन्द्रिकायाम्। अथ व्याख्या—यत् वृत्तं यत् चरितम् इत्यर्थः अविरुद्धम् रसभावयोरप्रतिकूलम् रसभावादेर्विरोधि न भवतीत्यर्थः—अपितु रसादिव्यक्तये रसभावादिप्रकाशनाय अधिकम् अतिरिक्तं अनावश्यकम् स्यात्, तत् वृत्तं धीमान् प्राज्ञः कविः अन्यथयेत् अन्यप्रकारेण कल्पयेत् रसभावादिप्रकाशनव्यापारे तत् वृत्तान्तम् आवश्यकस्वरूपमेव विधाय नाटककलेवरे तत् सन्निवेशयेत्। वा अथवा कदाचन न वदेत् तद्वृत्तान्तम् उपेक्ष्य एव नाटकरचनां कुर्य्यात्। अनयोः—रसस्य अप्रतिकूलस्य परम्रसादिव्यक्तये अनावश्यकस्य वृत्तान्तस्य

अन्यथाप्रकल्पनं वृत्तान्तस्यअवर्णनम् इतिद्वयोः उदाहरणं दृष्टान्तो सत्प्रबन्धेषु अभिव्यक्तम् प्रकाशितमेव ।

Eng. Tran.—What particular feature appears to be reduntant in the presentation of the sentiment or Bhava though not conflicting with it—should be either twisted (so that it may not be deemed redundant in the exhibition of the sentiment or Bhava) or never be told (i. e. suppressed).

Examples of these two are to be clearly noticed in high class works.

Text—वृत्तिः । अथ वृत्तयः (उच्यन्ते)—

मित—। अथ वृत्तयः उच्यन्ते। ननु का नाम वृत्तयः? तद्व्या-पारात्मिका वृत्तिरिति धनञ्जयः। प्रवृत्तिरूपनेतृव्यापारस्वभावः वृत्ति-रिति धनिकः। अत्र श्रीमुनिः "ततो, देवेषु निक्षिप्ता द्रुहिणेन महात्मना। पुनर्नाट्यप्रयोगे च नानाभावरसान्विता। वृत्तिसंज्ञा कृता ह्येषा नाना-रसाश्रयाः। चरितैस्तस्य देवस्य द्रव्यं यत् सदृशं कृतं। ऋषिभि स्तादृशी कृता वाक्याङ्गसम्भवा। नाट्यवेदसमुत्पन्ना वागङ्गाभिनयात्मिका" इति। तत्र श्रीरूपः—"नेतृव्यापाररूपास्तु रसावस्थानसूचकाः। चतस्रो वृत्तयोधीरैः प्रोक्ता नाट्यस्य मातरः इति। अथ चतसृणां वृत्तीनां मध्ये तिस्रः खलु अर्थवृत्तयः। एका भारती वृत्तिरेव शब्दवृत्तिः। उक्तं हि नाटकचन्द्रिकायाम्—तिस्रोऽर्थवृत्तयः प्रोक्ताः, शब्दवृत्तिस्तु भारती। तस्या एव प्ररोचना वीथी प्रहसनम् आमुखम् इति चत्वारि अङ्गानि—तेन हि प्रागेव सा लक्षिता श्रीमता विश्वनाथेम। तत् करणम् साधु—यतः उक्तं हि धनञ्जयेन—चतुर्थी भारती सापि वाच्या नाटकलक्षणे। धनिकोऽपि—"तिस्र एव एताः अर्थवृत्तयः। भारती तु शब्दवृत्तिः—आमुखसङ्गतत्वात् तत्रैव वाच्या।" (P81). अधुना अर्थवत्तीनां परिचयं तथा वृत्तीनाम् च सामान्यलक्षणं प्रयच्छति ग्रन्थकारः।

Eng. Tran.—Now the Vrittis (Physical feats or postures) are going to be spoken of herein before—

Text—श्लोकः। श्रृङ्गारे कौशिकी (? कैशिकी) वीरे सात्त्वत्यारभटी पुनः
रसे रौद्रे च बीभत्से वृत्तिः सर्व्वत्र भारती।
चतस्रो वृत्तयो ह्येता सर्व्वनाट्यस्य मातृकाः।
सुर्नायिकादिव्यापारविशेषा नाटकादिषु।

मित। श्रृङ्गारेरसे कौशिकी (कैशिकी इति मुनिः। अत्र पाठान्तरञ्च तत्। तदेव ज्यायः।) नाम वृत्तिः अवलम्बनीया। वीररसे सात्त्वती नाम वृत्तिः प्रतिपालनीया। रौद्रे रसे तथा वीभत्सरसे आरभटी नाम वृत्तिर्मान्या। तथा सर्व्वत्र सर्वेषु एव रसेषु भारती वृत्ति र्दृश्यते। अत्र "सर्व्वत्र" इत्यस्य "अपरेषु सर्व्वेषु रसेषु इति व्याख्या कृता श्रीमता सिद्धान्तवागीशेन। "अपरेषु" इत्यनेन कथितं यत् श्रृङ्गार वीर-रौद्र-बीभत्सवर्ज्जम् अन्येषु पञ्चसु (वात्सल्यं गृहीत्वा षट्सु) रसेषु भारती वृत्तिः प्रयुज्यते। साहित्यदर्पणकारः श्लोकमिदम् अविकलमेव गृहीतवान् दशरुपकात्। परमत्र श्रमुनिः कथयति—

"एवमेता बुधैर्ज्ञेया वृत्तयो नाट्यसंश्रयाः। रसप्रयोगमासां च कीर्त्त्यमानम् निबोधत।
श्रृङ्गारे चैव हास्ये चैवृत्तिः स्यात् कैशिकीति सा, सात्वती नामज्ञेया
वीररौद्राद्भुताश्रया। भयानके च वीभत्से रौद्रे चारभटी भवेत्।
भारती चापि विज्ञेया करुणाद्भ तसंश्रया।"

तथाहि—वर्त्तते रसः अनया इति वृतधातोः करणे क्तिन् प्रत्ययः। ततः नायकनायिकादिचेष्टाविशेषाः वृत्तयः इति।

Eng. Tran.—Kaisiki Vritti is to be adopted in Erotic sentiment, Sattwati in the Heroic sentiment, Aravati in the terrible as well as in the hateful sentiment—but

Bharati may be adopted in almost all the sentiments. These are four Vrittis which are the mothers (so to speak) of all sorts of performances. These (i. e. Vrittis) are (thus) physical features (i. e. postures and the like) of the heroines and others (other dramatic personages), and these underlie all (kinds of) dramas.

N. B.—Vrittis are no doubt postures ; but they must be understood in relation to speech. This vritti is the physical outlook of the dramatic performance.

Text—वृत्तिः। तत्र कैशिकी—

मित। अथ कैशिकीं वृत्तिं विवृणोति। तथाहि—

"गीतनृत्यविलास कामोपभोगाद्युपलक्ष्यमाणो मृदुः शृङ्गारी कामकलावच्छिन्नो व्यापारः कैशीकी" इति धनिकः।

एषा सामोवेदात्पन्ना। तदुक्तं मुनिना "ऋग्वेदाद् भारती वृत्ति-र्यजुर्वेदात्तु सात्त्वती। कैशिकी सामवेदाच्च शेषा चाथर्वणी तथा"॥

Eng. Trans.—Amongst these (four Vrittis), Kaisiki (is being defined)—

Text—श्लोकः। या श्लक्ष्णनेपथ्यविशेषचित्रा, स्त्रीसङ्कुला पुष्कलनृत्यगीता।
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता॥

मित—। 'या वृत्तिः श्लक्ष्णनेपथ्यचित्रा' श्लक्ष्णं सूक्ष्मं, यत् नेपथ्यं नायिका-प्रतिनायिकादीनां वसनं तेषां विशेषेण उत्कर्षेण सूक्ष्ममनीरम-नायिकादिवेशेन चित्रा शोभना, तथा स्त्रीसङ्कुला रमणीजनबहुला एवं च पुष्कलनृत्यगीता प्रचुरनृत्यगीतसनाथा अपिच 'कामोपभोगप्रभवोपचारा' कामानां काम्यवस्तूनां यद्वा कामस्य मदनस्य उपभोगः अनुभूतिः स एव प्रभवः उत्पत्तिः येषां तादृशाः उपचाराः व्यवहाराः यस्यां तादृशी कामोप-भोगोत्पन्नेन व्यवहारेण युक्ता इत्यर्थः, एवं चारुणा अभिरामेण विलासेन

च युक्ता समन्विता या वृत्तिः सा कैशिकी इति भण्यते गण्यते च। तथाहि नाट्यचन्द्रिकायाम्—नृत्यगीतविलासादिमृदुशृङ्गारचेष्टितैः। समन्विता भवेद्वृत्तिः कैशिकी श्लक्ष्णभूषणा।"

Eng. Trans.—Kaisiki Vritti is that—which is striking with excellently fine apparel, which abounds with a good number of females, with dance and music and in which dealings and attitudes proceed from (or for) the enjoyment of pleasures and which presents lively dalliances.

Text—श्लोकः। नर्म्म च नर्म्मस्फूर्ज्जो नर्म्मस्फोटोऽथ नर्म्मगर्भश्च। चत्वार्यङ्गान्यस्याः।

मित—। अस्याः कैशिकीवृत्तेः चत्वारि खलु अङ्गानि। नर्मस्फूर्ज्जः इत्यत्र नर्मस्फिजः इति धनञ्जयः। परम् नर्म्मस्फूर्ज्ज इत्येव मुनीन्द्रसमर्थितः पाठः।

Eng. Trans.—This (Kaisiki) has got four angas :— Narma, Narma-Sphurja, Narma-Sphota and Narma-Garbha.

Text—वृत्तिः। तत्र—

मित—। तेषां चतुर्णाम् अङ्गानाम् मध्ये आदौ नर्म्म विवृणोति।

Eng. Tran.—Amongst these four divisions—

श्लोकः। वैदग्ध्यक्रीडितं नर्म्म। इष्टजनावर्ज्जनकृत्तच्चापि त्रिविधं मतम्। विहितं शुद्धहास्येन सशृङ्गारभयेन च।

मित। इष्टजनावर्ज्जनकृत् वैदग्ध्यक्रीडितं नर्म्म इति नर्म्मलक्षणम्। इष्टजनस्य आवर्ज्जनकृत् चित्तानुरञ्जनेन उपच्छन्दकम्—आकर्षणकृत् इत्यर्थः, वैदग्ध्यक्रीडितं—विदग्धः सुरसिकः कृच्छिसम्पन्नः जनः, तस्य

भावः वैदग्ध्यम् । तेन—ग्राम्यत्वं वर्जयित्वा सुरसिकत्वम् आश्रित्य नैपुण्येन सह यत् क्रीड़ितं विलसनं तदेव नर्म्म । तथाहि वैदग्ध्य-क्रीड़ितं नर्म्म प्रियोपच्छन्दनात्मकमिति धनञ्जयः । अग्राम्यः इष्टजनावर्ज्जन-रूपः परिहासः नर्म्म इति धनिकः ॥ शृङ्गाररसभूयिष्ठः प्रियचित्तानुरञ्जकः अग्राम्यः परिहासः स्यान्नर्म्म, तत्तु त्रिधामतमिति श्रीरूपः । अथ तस्य त्रिविधत्वं प्रदर्शयति—तच्च नर्म्म शुद्धहास्येन विहितं प्रचोदितम्—तथा सशृङ्गारभयेन च—शृङ्गारमिश्रहास्येन एवं च भयमिश्रेण हास्येन च विहितमिति त्रिविधम् । "आत्मापक्षेप-संभोग-मानैः शृङ्गार्य्यपि त्रिधा" ।

Eng. Trans.—Narma is gallant sporting—that ensures the satisfaction of the beloved one. It is of three types—Narma performed with a simple smile, or with an erotic or passionate smile or with a terror-striking smile.

Text—वृत्तिः । तत्र केवलहास्येन विहितं यथा रत्नावल्याम्—वासवदत्ता (फलकमुद्दिश्य सहासम्) एसा वि अवरा तव समीपे जा लिहिदा, एदं किं अज्जवसन्तस्य विण्णाणं [विण्णाणं=विज्ञानम् i. e. चित्रलेखननैपुण्यम् ।]

Eng. Tran.—Amongst these, the example of Narma accomplished only through smile is in the Ratnavali. As Vasavadatta—(referring to the picture-plate, with a smile). Is the other that has beed painted by you meant for displaying the dexterity of venerable Vasantaka ?

Text—वृत्तिः । सशृङ्गारहास्येन यथा शाकुन्तले—राजानं प्रति शकुन्तला—असंतोसे उण किं करेदि । राजा—इदं (इति व्यवसितः) । शकुन्तला (वक्त्रं ढौकते)

Eug. Tran.—The example of Narma effected with a passionate smile—is in Sakuntala. Sakuntala to the King, what will you do if dissatisfied? King—This (with this, he is about to kiss her). Sakuntala turns back her face.

Text—वृत्तिः। सभयहास्येन यथा रत्नावल्याम्—आलेख्यदर्शना-वसरे—सुसङ्गता। जाणिदो मए एसो बुन्तन्तो समं चित्तफलएण। ता देवीए गदुअ निवेदइस्सं।

मित -। सभयहास्यविहितस्य नर्म्मणः दृष्टान्तो यथा रत्नावली-नाटिकायाम्।

Eng. Tran.—The example of Narma effected with terror-striking smile is in the Ratnavali, in which on the occasion of finding the picture-plate Susangata (says to the king)—I have known (understood) everything together with all about the picture plate. Now let me go and refer it to the Queen.

Text—वृत्तिः। एतद्वाक्यसम्वन्धि नर्म्म उदाहृतम्। एवं वेशचेष्टा सम्बन्ध्यपि।

Eng. Trans.—All these (three) examples of Narma are with reference to speech (i. e. these are examples of Narma effected with speech). In this way examples of Narma with dress as well as with exertion (actions) are also to be found.

Text—श्लोकः। नर्म्मस्फूर्ज्जः सुखारम्भो भयान्तो नवसङ्गमः।

वृत्तिः। यथा —मालविकायाम् सङ्केतनायकमभिसृतायाम्, नायकः—

विसृज सुन्दरि ! सङ्गमसाध्वसं, ननु चिरात् प्रभृति प्रणयोन्मुखे। प्रतिगृहाण गते सहकारताम्, त्वमतिमुक्तलताचरितं मयि ॥

मालविका—भट्टा ! देवीए भएण अप्पणो वि पिअं कत्तुम् न पारेमि इत्यादि।

मित—। अथ नमूर्मस्फूर्जं इति कैशिकी वृत्तेरङ्गम् लक्षयति। स तु नवसङ्गमः नायक-नायिकयोः प्रथममीलनमेव। सुखारम्भः सुखः आनन्द-दायकः आरम्भः सूचनम् यस्य तादृशः—आदौ सुखदायकः। तथा भयान्तः भयम् अन्ते अवसाने यस्य तादृशः। तथाहि श्रीमुनिः—नव-सङ्गमसंभोगो रतिसमुदयवाक्यवेषसंयुक्तः। ज्ञेयो नर्मस्फूर्जो ह्यवसान-भयानकश्च व।

Eng. Tran. Narma Sphurja is the first meeting (of the hero and the heroine)—which begins in joy but ends in apprehension. Or better—Narma Sphurja is the happy beginning followed by apprehension in the first meeting (of the hero and the heroine). As for example—Malavika having approached the hero (her lover) in the tryst, the hero says—

Oh beautiful one ! please bid good-bye to your fear in this first meeting (of ours). I have been long cherishing love for you and now adopt the attitude of a Madhavi creeper unto me—who am now a veritable mango tree.

Malavika—My Lord ! I am unable to perform even what I like through the fear of the Queen—and so forth.

Text—धृतिः। अथ नमूर्मस्फोटः—

मित—। अथ नर्म्मस्फोटस्यलक्षणं प्रदर्शयति—

Eng. Tran.—Now Narma Spota is being explained.—

Text—श्लोकः। नर्म्मस्फोटो भावलेशैः सूचितोऽल्परसो मतः।

वृत्तिः। यथा मालतीमाधवे—

गमनमलसं शून्यादृष्टिः शरीरमसौष्ठवं श्वसितमधिकम्

किन्वेतत् स्यात् किमन्यदितोऽथवा।

भ्रमति भुवने कन्दर्पाज्ञा विकारि च यौवनं, ललितमधुरास्ते ते

भावाः क्षिपन्ति च धीरताम्॥

अलसगमनादिभिर्भावलेशो माधवस्य मालत्यामनुरागः स्तोकः प्रकाशितः।

मित—। भावलेशैः सूचितः विज्ञापितः अल्परसः अल्पप्रकाशितः रस एव नर्मस्फोटो मतः कथितः। तथाहि दशरूपके—नर्म्मस्फोटस्तु भावानां सूचितोऽल्परसो लवैः। श्रीरूपोऽपि—नर्म्मस्फोटस्तु भावांशैः सूचितोऽल्परसो भवेत्। दृष्टान्तो यथा—मालतीमाधवप्रकरणे प्रथमाङ्कस्य बिंशतिश्लोके माधवं प्रति मकरन्दस्य उक्तौ। युवतीनां प्रणयसूचकाः अपि भावाः धीरतां चित्तस्यधैर्य्यं क्षिपन्ति निरस्यन्ति।

Eng. Tran.—Narma Spota is but a scanty exhibition of the sentiment through a small quantity of Bhava. As in the Malati-madhava—

Your gait appears to be slow (slothful); your eyes void; your body rough; your inhalation deep and frequent; what is this? what do all these mean? or what other than these may occur? The order of cupid moves in the world; youth is a disturbing element; (or youth is very apt to be disturbed); and those objects

(as well as mental expression) beautiful and fascinating as they are—prove to do away with calm composure (of the mind).

Here the attachment of Madhava for Malati has been exhibited to a smaller degree—through a small quantity of Bhava—betrayed by slothful gait and the like.

Text – श्लोकः। नर्म्मगर्भो व्यवहृतिर्नेतुः प्रच्छन्नवर्त्तिनः।

वृत्तिः। यथा तत्रैव—सखीरूपधारिणा माधवेन मालत्या मरण-व्यवसायवारणम्।

मित –। प्रच्छन्नवर्त्तिनः गुप्तभावेन तिष्ठतः नेतुः नायकस्य व्यवहृतिः व्यवहारः आचरणं खलु नर्म्मगर्भः। तथाहि दशरूपके—छन्ननेतृप्रतीचारो नर्म्मगर्भोऽर्थहेतवे। दृष्टान्तो यथा—मालतीमाधवे यत्र सखीरूपं गृहीत्वा माधवो मालतीं मरणचेष्टायाः निवारितवान्। यथा वा प्रियदर्शिकायाम् श्रीहर्षविरचितायाम् गर्भाङ्के वत्सराजवेषसुसंगतास्थाने साक्षात् वत्सराजप्रवेशः। यथा वा अमरूशतके—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरादेकस्या नयने
निमील्य विहितक्रीडानुबन्धच्छलः।
ईषत्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसामन्तर्हासलसत्—
कपोलफलकाम् धूर्त्तोऽपरां चुम्बति।

Eng. Tran.—Narmagarbha is the attitude or action of a hero lying in secret. As therein, too, (where occurs) the dissuading of Malati from her attempting to kill herself, by Madhava—in the guise of a friend.

[अत्र श्रीरूपकृतात् लक्षणात् प्रतीयते यत् न केवलं प्रच्छन्नवर्त्तिनः नेतुरेवाचरणम्—अपितु प्रच्छन्नवर्त्तिन्याः नायिकाया अपि आचरणं

नर्म्मगर्भः स्यात्। उभयत्रापि तदाचरणं स्वार्थसिद्धये एव इति बोध्यम्]।

Text—वृत्तिः। अथ सात्वती (वक्ष्यते)—

मित—। श्रृङ्गाररसोपयोगिनी कैशिकींवृत्तिं व्याख्याय अधुना वीररसोपयोगिनीं सात्वतीवृत्तिः व्याख्यायतें, तां प्रक्रमते, श्रीमान् विश्वनाथः॥ सा तु सात्त्वती वृत्तिः "शोकहीनः सत्त्वशौर्य्यंत्यागदयाहर्षादिभावोद्भवो नायकव्यापारः" इति धनिकः।

Eng. Tran.—Now Sattwati Vritti is going to be illustrated next.

Text—श्लोकः। सात्त्वती बहुला सत्त्वशौर्य्यत्यागदयार्ज्जवैः।
सहर्षा क्षुद्रश्रृङ्गारा विशोका साद्भुता तथा॥
उत्थापकोऽथ सांघात्यः संलापः परिवर्त्तकः। विशेषा
इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः॥

मित—। सा सत्त्वती वृत्तिः सत्वेन धैर्य्येण दार्ढ्येण उत्साहेन, तथा शौर्य्येण वीर्य्येण बलेन इत्यर्थः, एवं त्यागेन धनादिविसर्ज्जनेन दानेन दयया अनुकम्पया तथा आर्जवैः सरलतया च बहुला पूर्णा। सहर्षा आनन्दगर्भा क्षुद्रश्रृङ्गारा अल्पेनैव श्रृङ्गाररसेन स्पृष्टा, विशोका शोक—रहिता तथा अद्भुता चमत्कारिणी च भवति। तस्या सात्त्वत्याः उत्थापकः सांघात्यः संलापः तथा परिवर्त्तकः इति चत्वारः विशेषाः भेदाः परिकीर्त्तिताः। तथाहि दशरुपके—विशोका सात्त्वती सत्त्वशौर्य्यत्याग-दयार्जवैः।

Eng. Trans.—Sattwati (Vritti) is predominantly abounding with vigour, strength, charity or self-sacrifice, compassion and simplicity. It incorporates joy; has a very slight (touch of) passion, is without grief and astonishing (in character). It has got four peculiati-

ties namely—Utthapaka, Samghatya, Samlapa and Parivartaka.

Text—श्लोकः। उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते।

वृत्तिः। यथा महावीरचरिते—

अनन्दाय च बिस्मयाय च मयादृष्टोऽसि दुःखाय वा
वैतृष्ण्यन्तु ममापि सम्प्रति कुतस्तद्दर्शने चक्षुषः।
त्वत्साङ्गत्यसुखस्य नास्मि विषयस्तत् किं वृथा व्याहृतैः
अस्मिन् विश्रुतजामदग्न्यदमने पाणौ धनुर्जृम्भताम्॥

मित—। अथ सात्वत्याः प्रथमं भेदम् उत्थापकं व्याचष्टे—

शत्रोः रिपोः उत्तेजनकरी क्रोधोत्पादिका वाक् उत्थापक इति उच्यते। अत्र धनञ्जयः—उत्थापकस्तु यत्रादौ युद्धायोत्त्थापयेत् परम्। अत्र श्रीमुनिः—"अहमप्युत्थास्यामि त्वं तावद्दर्शयात्मनः शक्तिम्। इति संघर्षसमाश्रयमुत्थितमुत्थापको ज्ञेयः"।

दृष्टान्तो यथा महावीरचरिते पञ्चमाङ्कस्य ऊनपञ्चाशत्श्लोके। अथ तस्य श्लोकस्य व्याख्या दीयते। प्रागेव विश्वनाथेन उक्तं यत् नायकस्य अनुचितम् वस्तु अन्यथा प्रकल्पयेत्। तेन हि वीरचरिते च बाली रामवधार्थमागतो रामेण हत इत्यन्यथा कृतः। तत्प्रसङ्गस्थः अयं श्लोकः। रावणसखः बाली रावणेन नियुक्तः सन् रामंहन्तुमागत्य रामं प्रति कथयति—हे राम! त्वम् मम् आनन्दाय च विस्मयाय च दुःखाय वा दृष्टोऽसि। त्वम् सौम्यदर्शनः इति मे आनन्दः। अद्भुतवीर्य्यः इति मे विस्मयस्तथा त्वमधुनैव मया हन्तव्यः इति मे दुःखम्। सम्प्रति अधुना त्वद्दर्शने तव आलोकने त्वां दृष्ट्वा इत्यर्थः कुतो मे चक्षुषः वैतृष्ण्यम् त्वम् अधुनैव मया हन्तव्यः—त्वत्साङ्गत्यसुखस्य तव साहचर्य्यात् उद्भूतस्य आनन्दस्य विषयः नास्मि—तव साहचर्य्यात् प्राप्तं सुखम् अपि नाहम् अनुभवितुम् शक्नोमि यतः अहं ते शत्रुः। तत् अतएव किं वृथा व्याहृतैः? विश्रुतजामदग्न्यदमने (नन्द्यादित्वात् ल्यु प्रत्ययः। ल्युट् वा प्रत्ययः) विश्रुतजामदग्न्य

दमने—प्रसिद्धस्य परशुरामस्य बिजेता इत्यर्थः तादृशो अस्मिन् पाणौ हस्ते धनुः जृम्भताम् युद्धाय प्रकाशय। विश्रुतजामदग्न्यदमने इत्यत्र जामदग्न्यस्य दमनं इति जामदग्न्यदमनं। विश्रुतं प्रसिद्धं जामदग्न्यदमनं यत्र तादृशे पाणौ इत्यपि व्याख्या सम्भवति। अत्र वालिनः उत्तेजनाकरी वाक् श्रीरामचन्द्रं युद्धाय उत्थापयतीति उत्थापकोऽत्र विद्यते।

Eng. Tran.—Utthapaka is the exciting (or inciting) utterances of the enemy. As in the Mahaviracharita—you have been found by me—(the very sight of yours is) for joy as well as for astonishment or for grief. Wherefrom can the gloating of my eyes be satisfied by this (short) beholding for you (by me ?) Neither can I be the subject of (enjoying) pleasure arising out of your company ; therefore what is the use of saying much in vain ? Exhibit (display) your bow in your hand that has conquered the noted Jamadagnya (or that has attained fame by defeating the celebrated Jamadagnya).

Text—श्लोकः। मन्त्रार्थदैवशक्त्यादेः सांघात्यःसङ्घभेदनम्।

वृत्तिः। मन्त्रशक्त्या यथा—मुद्राराक्षसे राक्षससहायानां चाणक्येन स्वबुद्धया भेदनम्। अर्थशक्त्यापि तत्रैव। दैवशक्त्या यथा—रामायणे रावणात् विभीषणस्य भेदः।

मित। मन्त्रशक्त्या मन्त्रणाबलेन तथा अर्थशक्त्या अर्थप्रदानेन एवं च दैवशक्त्या दैवानुग्रहेण एव, आदिपदेन प्रभावेन च सङ्घभेदनं सम्मिलितानाम् विपक्षाणाम् पृथक् करणं खलु सांघात्य उच्यते।

Eng. Tran.—Sanghatya is the breaking up of a League through (the application of) diplomacy, through bribe,

or through luck and the like. Through diplomacy—as in the Mudrá Rákṣasa—where the estragement of allies from Rakshasa is effected by Chanakya through diplomacy; an example of "through bribery" is also to be found there. "Through good luck"—as in the Ramayana—(where occurs) the defection of Vibhishana from Ravana.

Text—श्लोकः। संलापः स्याद् गभीरोक्तिर्नानाभाव (रस) समाश्रया।

वृत्तिः। यथा वीरचरिते रामः—अयं स यः किल सपरिवार कार्त्तिकेयविजयावर्जितेन (विजयप्रीणितेन इत्यर्थः) भगवता नीललोहितेन परिवत्सरसहस्त्रान्तेवासिने तुभ्यं प्रसादीकृतः परशुः ?

परशुरामः—राम! दाशरथे! स एवायमार्य्यपादानां प्रियः परशुः। इत्यादि।

मित—। गभीरा गाम्भीर्य्यसमन्विता दक्षनया एव यस्याः उक्तो अर्थः परिगृह्यते सा उक्तिः परस्परवचनं संलापः इति कथ्यते। स च संलापः नानाभावैः ईर्ष्याक्रोधादिभिर्भावैस्तथा नानारसैः वीराद्भुत-प्रभृतिभिः रसैः समाश्रितो भवेत्। उदाहरणं यथा वीरचरिते—

Eng. Trans.—Samlapa is grave and serious utterance, replete with various sentiments.

As in Viracharita—

Rama—Is it the same axe as was presented to you—who were a pupil for thousand years, by Lord Nila-lohita out of pleasure for your victory over Kartikeya and his followers ?

Parasurama—Rama ! the son of Dasaratha ! this is the very some axe, dear to my venerable preceptor.

Text—श्लोकः। प्रारब्धादन्यकार्याणां करणं परिवर्त्तकः।

वृत्तिः। यथा वेण्याम्—भीमः—सहदेव, गच्छत्वं गुरुमनुवर्त्तस्व अहमपि अस्त्रागारं प्रविश्य आयुधसहायो भवामीति यावत्। अथवा आमन्त्रयितव्यैव मया पाञ्चाली इति।

मित—। प्रारब्धात् कर्त्तुम् एव गृहीतात् कार्य्यात् अन्येषामेव कार्य्याणाम् करणं परिवर्त्तकः, समीहितं कार्य्यं विहाय अन्यकार्य्यस्य करणं परिवर्त्तकः इति भावः। प्रस्तुतस्योद्योगकार्य्यस्य परित्यागेन कार्यान्तर-करणं परिवर्त्तकः इति धनिकः।

दृष्टान्तो यथा वेणीसंहारे। तत्र भीमः प्रस्तुतम् आयुधग्रहणं कार्य्यं परित्यज्य पाञ्चाल्याः आमन्त्रणरूपं कार्य्यं कर्त्तुं प्रवर्त्तते इति अत्र परिवर्त्तकः।

Eng. Tran.—Parivartaka is the taking up of another duty to the exclusion of one—which has been already undertaken or begun. As in the Venisamhara—Bhima-Sahadeva! Go you please—follow the superiors. I, on my part, shall enter the arsenal and arm myself or I have to bid adieu to Panchali.

वृत्तिः। अथ आरभटी।

मित। अधुना आरभटीवृत्तेः लक्षणं भेदान् च विवृणोति ग्रन्थकारः। तथाहि मुनिः—प्रस्तावपातप्लुतलंघितानि चान्यानि मायाकृतमिन्द्रजालम्। चित्राणि युद्धानि च यत्र नित्यं तां तादृशीमारभटीं वदन्ति इति।

Eng. Tran.—Now the Arabhati Vritti is going to be spoken of.

Text—श्लोकः—मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता।

वस्तूत्थापनसम्फेटौ संक्षिप्तिरवपातनम् ॥
इति भेदास्तु चत्वारः आरभट्याः प्रकीर्तिताः ॥

मित—। माया कुहकम् इन्द्रजालम् तिरस्करिणीविद्या ; संग्रामः युद्धम् क्रोधः तथा उदभ्रान्तम् अधीरतया विचरणम् एवमादिभिः चेष्टितैः व्यापारैः—अत्र आदिपदेन आटोपसाहसादयः ग्रहणीयाः। तथा वधः मारणं बन्धः बन्धने ग्रहणम् एवमादिभिश्च—अत्र आदिपदेन छेदभेदादयः ग्राह्याः—संयुक्ता समन्विता उद्धता रौद्ररसप्रधाना वृत्तिः आरभटी उच्यते। अस्मिन् लक्षणे उल्लिखितयोः मायेन्द्रजालयोर्भेदं दर्शयति धनिकः यथा—माया तु मन्त्रबलेन अविद्यमानवस्तुप्रकाशनम्। तन्त्रबलात् तु इन्द्रजालम्। अस्याः आरभटीवृत्तेश्चत्वारः भेदाः यथा वस्तूत्थापनम् सम्फेटः संक्षिप्तिस्तथा अवपातनम्।

Eng. Tran.—The Aravati is a firy one—replete with such feats as Magic, jugglery, battles, anger, aimless movements (i. e. moving to and fro under some impulse or passion) and the like and in which abound killing, capturing and such others. Vastuthhapana, Sampheta, Samkhsipti and Avapatana—these are the four varieties of Aravati.

Text—श्लोकः। मायाद्युत्थापितं वस्तु वस्तूत्थापनमुच्यते।

वृत्तिः। यथा उदात्तराघवे—

जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकलाः रवेरपि कराः कस्मादकस्मादमी।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदराः
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः। इत्यादि।

मित—। अथ वस्तूत्थापनम् विव्रियते। मायाद्युत्थापितं मायादिना परिकल्पितं अत्र आदिपदेन इन्द्रजालम् बोध्यम्। तेन इन्द्रजालेनापि

परिकल्पितं वस्तु वस्तूत्थापनम् इति कथ्यते। "तद्वस्तूत्थापनम् यत्तु वस्तु मायाप्रकल्पितम्" इति श्रीरूपः। दृष्टान्तो यथा उदात्तराघवे। अथ श्लोकव्याख्या—कस्मात् अकस्मात् सहसा अमी जयिनः (सर्व्वाभिभाविनः) भास्वन्तः दीप्तिमन्तः रवेः अपि सूर्य्यस्य अपि सकलाः कराः समग्राः किरणाः वियद्व्यापिभिः आकाशाक्रमणकारिभिः सान्द्रतिमिरव्रातैः घनान्धकार-जालैः जीयन्ते अभिभूयन्ते। उग्रकबन्धकण्ठरुधिरैः आध्मायमानानि पूर्य्यमाणानि उदराणि येषां तादृशाः, तथा आननकन्दरेभ्यः मुखगह्वरेभ्यः अनलान् अग्निस्फुलिङ्गान् मुञ्चन्ति निष्कासयन्ति ये तादृशाः एते फेरवाः शृगालाः तीव्रान् कठोरान् कर्कशान् रवान् शब्दान् मुञ्चन्ति कुर्व्वन्ति। अत्र मायाबलेन घनान्धकारादीनां परिकल्पनं—तेनात्र वस्तूत्थापनम्।

Eng. Trans.—Vastutthapana refers to the thing called into existence by magic or jugglery. As in udatta-raghava, "What for, are these radiant and over-whelming rays of the sun being suddenly suppressed by this sky-covering dense set of darkness? These jackals with their stomachs filled up with the blood from the necks of the dreadful trunks, are throwing out sparkles of fire from their mouth-caves, yelling (at the same time) very fiercely. And so forth.

Tevt—श्लोकः। सम्फेटस्तु समाघातः क्रुद्धसत्वरयोर्द्वयोः।

वृत्तिः। यथा माल्त्याम् माधवाघोरघण्टयोः (सम्प्रहारः)।

मित—। क्रुद्धयोस्तथा सत्वरयोः त्वरायुक्तयोः द्वयोः नरयोः समाघातः परस्परप्रहार एव सम्फेट उच्यते। अत्र "सत्वर" इति स्थाने "संरब्ध" इति दशरूपककृत् पठति।

Eng. Tran.—Sampheta is the mutual striking of two

excited persons in quick succession. As in the Malati Madhava—that between Madhava and Aghoraghanta.

Text—श्लोकः। संक्षिप्तिर्वस्तुरचना शिल्पैरितरथापि वा।
संक्षिप्तिः स्यान्निवृत्तौ च नेतुर्नेत्रन्तरग्रहः।

वृत्तिः। यथा उदयनचरिते किलिञ्जहस्तिप्रयोगः। द्वितीयं यथा वालिनिवृत्त्या सुग्रीवः। यथा वा परशुरामस्य ओद्धत्यनिवृत्त्या शान्तत्वापादनम् "पुण्या ब्राह्मणजाति" - इति।

मित—। शिल्पैः शिल्पयोगात् इतरथा अन्यप्रकारेण अपि वा वस्तुरचना संक्षिप्तिः स्यात्। तथाहि दशरुपके—संक्षिप्तवस्तुरचना सङ्क्षिप्तिः शिल्पयोगतः। वस्तूत्थापने अलीकवस्तूत्थापनम्—अत्र तु यथार्थवस्तूत्थापनमिति संक्षिप्तिवस्तूत्थापनयोर्भेदः। शिल्पयोगात् वस्तूत्थापनस्य दृष्टान्तेषु यथा उदयनचरितम् अवलम्ब्य विरचिते नाटके (? श्रीभासकृते प्रतिज्ञायौगन्धरायणे) उज्जयिणीराजेन महासेनप्रद्योतेन उदयनं ग्रहीतुं काष्ठमयहस्तिनिर्म्माणम्। किलिञ्जहस्ती काष्ठमयः गजः इत्यर्थः। शिल्पयोगात् इतरथा वस्तु निर्माणस्य दृष्टान्तो यथा नाटकचन्द्रिकायाम्—

विधिना हृते शिशुकुले, तादृशमपरम् हरिः तया व्यतनोत्
विरमतु परस्य वार्त्ता स्वयमेव विसिष्मियेसोऽपि।

अथ मतान्तरेण संक्षिप्तिं व्याचष्टे—नेतुः कस्यचित् मुख्यपात्रस्य निवृत्तौ मरणादिना नाट्यवस्तुनः विदायग्रहणात् नेत्रन्तरस्य तत्स्थले एव अन्यस्य मुख्यपात्रस्य ग्रहणं आधानम् अपि संक्षिप्तिः स्यात्। किञ्च एकस्यैव पात्रस्य स्वभावपरिवर्त्तनेन तस्य नूतनत्वापादने अपि संक्षिप्तिः स्यात्। उक्तं हि धनञ्जयेन—पूर्व्वनेतृनिवृत्त्यान्ते नेत्रन्तरपरिग्रहः। दृष्टान्तो यथा श्रारामायणप्रतिबद्धवस्तुषु—वालिनिवृत्त्या श्रीरामेण वालिवधे साधिते सति सुग्रीवः किष्किन्ध्यासिंहासने वालिस्थले सुग्रीवस्य परिग्रहः—तेन तत्र संक्षिप्तिः। तृतीयप्रकारा संक्षिप्तिः यथा महावीरचरिते परशुरामस्य

औद्धत्यनिवृत्त्या उग्रत्वनाशनेन शान्तत्वापादने सौम्यत्वसाधने 'पुण्या ब्राह्मणजातिः' इत्यादिना तत्र संक्षिप्तेरवकाशः।

Eng. Tran —Samksipti is the manufacturing of something or creation of something through art or any other way. Samksipti also occurs in the acceptance of a dramatic person in place of one disappearing (for ever). As in the udayana-charita—the manufacturing of a wooden elephant. An example of the second type is in the case of Sugriva after the exit of vali, or as in the adoption of peaceful disposition by Parasurama after the parting away with his haughtiness—(saying) "the Brahminical caste is holy,"

Text—श्लोकः। प्रवेशत्रासनिष्क्रान्तिहर्षविद्रवसम्भवम्।
अवपातनमित्युक्तम्।

वृत्तिः। यथा—कृत्यरावणेषष्ठेऽङ्के—प्रविश्य खड्गहस्तः पुरुषः इत्यतः प्रभृति निष्क्रमणपर्य्यन्तम्।

मित—। प्रवेशः त्रासः भीतिः निष्क्रान्तिः बहिर्गमनं हर्षः आनन्दः विद्रवः पलायनम् एते एव सम्भवः उत्पत्तिस्थानं यस्य तादृशम् एव अवपातनं कथितम्। दृष्टान्तो यथा कृत्यरावणनामक-रूपके—

खड्गहस्तस्य पुरुषस्य प्रवेशात् आरभ्य निष्क्रमणपर्य्यन्तम्। यथा वा श्रीहर्षकृतायाम् प्रियदर्शिकायाम् प्रथमे अङ्के विन्ध्यकेत्ववस्कन्दे। किञ्च रत्नावल्याः द्वितीयअङ्के द्वितीयश्लोके (कण्ठेकृत्वावशेषम् इत्यादि श्लोके) तथा तृतीयश्लोके (नष्टं वर्षवरैरित्यादिश्लोके) अपि अवपातनस्य उदाहरणम्।

Eng. Tran.—Avapatana is said to originate from rushing, trepidation, exit, joy and flying away. That is,

Avapatana is the convulsion—due to the aforesaid matters or things.

As in the Kritya-Ravana, in the sixth act—"enters a man with sword in hand"—from this up to his exit.

Text—श्लोकः। पूर्व्वमुक्तैव भारती।

मित–। एतास्तिस्रः वृत्तयः खलु अर्थवृत्तयः। भारती तु शब्द-वृत्तिः। सा आमुखसङ्गता—अतएव तत्रैव व्याख्याता। तत्रैव अस्य भेदाः उक्ता लक्षणानि च तेषां द्रष्टव्यानि। तथाहि मुनिकृतं भारतीवृत्ति-लक्षणं "या वाक्प्रधाना पुरुषप्रयोज्या, स्त्रीवर्ज्जिता संस्कृतवाक्ययुक्ता स्वनामधेयै र्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः।" "प्रायः रसेषु सर्व्वत्र भारती करुणादिषु" इति श्रीरूपः।

Eng. Tran.—Bharati Vritti has already been dealt with (see P. 81. ante.)

Text—अथ नाट्योक्तयः—(Stage-directions etc., in utterances in dramas are being stated).

Text—श्लोकः। अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतं
सर्व्वश्राव्यं प्रकाशम् स्यात्तद्भवेदपवारितम्।
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते॥
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्।
अन्योन्यामन्त्रणं यत् स्यात् तज्जनान्ते जनान्तिकम्।
किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते।
श्रुत्वेवानुक्तमप्यर्थम् तत् स्यादाकाशभाषितम्॥

वृत्तिः। यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरतः ऊर्द्ध्वं सर्व्वाङ्गुलिनामितानामिकं त्रिपताकालक्षणं करं कृत्वा अन्येन सह यन्मन्त्र्यते तज्जनान्तिकम्। परावृत्यान्यस्य रहस्यकथनमपवारितम्। शेषं स्पष्टम्।

मित—। धनिकश्च आह "नियतमश्राव्यं द्विप्रकारं जनान्तिकापवारित-भेदेन" इति। तत्र आदौ अपवारितं लक्षयति—यत् रहस्यन्तु अन्यस्य परावृत्य अन्यस्य प्रकाश्यते तत् अपवारितं भवेत्। यत् रहस्यं गोपनीयं वस्तु अन्यस्य परावृत्य यम् जनं श्रावयितुम् न इच्छति त्वम् जनं पृष्ठतः कृत्वा अन्यस्य तद्विज्ञाय जनाय प्रकाश्यते निवेद्यते तदेववस्तु अपवारितं कथ्यते। अतएव "परावृत्य अन्यस्य रहस्यकथनमपवारितम्' इति वृत्तिः। 'रहस्यं कथ्यतेऽन्यस्यपरावृत्यापवारितम्" इति श्रीरूपः। अथ द्वितीयं नियतमश्राव्यम् जनान्तिकं लक्षयति त्रिपताक—इत्यादिना। लक्षणमिदम् अविकलमेव दशरूपकात् गृहीतम्। त्रिपताककरेण अन्यान् अपवार्य्य कथाम् अन्तरा यत् जनान्ते अन्योन्यामन्त्रणं तत् जनान्तिकं स्यात्। "त्रिपताककरेणा-न्यानपवार्य्यान्तरा कथां। या मिथः क्रियते द्वाभ्याम् तज्जनान्तिकमुच्यते" इति श्रीरूपः। अथ अस्य लक्षणस्य व्याख्या—त्रिपताककरेण तिसृणाम् पताकानां ध्वजदण्डानाम् समाहारः इति त्रिपताकम्। त्रिपताकतुल्यः करः इति त्रिपताककरः। तेन।—उर्द्धोत्तोलिते करे यदि सर्व्वासाम् अङ्गुलीनाम् मध्ये अनामिका एव नामिता स्यात् तर्हि करः त्रिपताकलक्षणः भवेत्। तादृशेन करेण अन्यान् जनान् अपवार्य्य बाधित्वा इत्यर्थः तत् जनान्तिकं स्यात्। वृत्तौ एतदेव स्पष्टयति यथा—यः कश्चित् अर्थः यद्वस्तु इत्यर्थः यस्मात् जनात् गोपनीयः तस्य जनस्य अन्तरतः व्यवधाने करम् हस्तम् उत्तोलितं यथा सर्वाङ्गुलिनामितानामिकम् सर्वासाम् उत्तोलितानाम अङ्गुलीनाम् मध्ये नामिता अवनामिता अनामिका यत्र तादृशम्—कृत्वा (एवमेव कृतं करं त्रिपताकलक्षणं कथयन्ति) अन्येन अभिलषितेन जनेन सह यत् मन्त्र्यते आलापः क्रियते तत् जनान्तिकं स्यात्। श्रीकृष्णदास कविराजकृते श्रीगोविन्दलीलामृतमहाकाव्ये द्वाविंशतिसर्गे एकनवति संख्यकस्य श्लोकस्य टीकायाम् इदं दृश्यते—"कनिष्ठाङ्गुष्ठयोरप्रसंयोगो संयोगी यत्र भासते तर्जनीमध्यानामाप्रसारस्त्रिपताककरः।" इति। अथ आकाशभाषितं—विवणोति—किमिति।

Eng. Tran—What is supposed not to be heard (by co-actors) is said to be 'within ones'self' (स्वगत वा आत्मगत) ; and what is to be heard by all is known as aloud (प्रकाश) ।"

Apavarita (aside) is what is secretly said of someone (to some actor) turning back (against other actors). Janantika is mutual discourse (in secret) unheard by others that is effected by turning the palm into Tripataka form—amidst the run (of the act). What is uttered in actings—beginning with "what do you say", after pretending to have heard what has not been said is known as Akasa-bhasita. [N. B.—All these are however to be heard by the audience].

Janantika is holding conversation with another, turning the palm into Tripataka (sign) by raising it up with only ring-finger bent down, behind some actor, for some thing is to be kept back. Apavarita is the confiding of a secret by turning back against another. The remaining portion of the text with regard to आकाश भाषित is clear. (See Sak III etc).

Text- श्लोकः । दत्तां सिद्धाश्च सेनाश्च वेश्यानाम् नाम दर्शयेत् ।
दत्तप्रायाणि बणिजां चेट्चेट्योस्तथा पुनः ।
बसन्तादिषु वर्णास्य वस्तुनो नाम यद्भवे त् ।

वृत्तिः । वेश्या यथा - वसन्तसेनादिः । बणिग् विष्णुदत्तादिः । चेटः कल्हंसादिः । चेटी मन्दारिकादिः । [N. B—प्रायेनदत्तानि gives दत्तप्रायाणि, see Sak VII. 24 एवंप्राय]

Eng. Tran—The names of courtesans should be seen as ending in Datta, Siddha or Sena ; the names of merchants should end mostly in Datta ; and the names

of servants—both males and female would be after those things that are fit to be described in connection with the spring and the like (i. e. spring and other genial seasons).

Courtesan—as Vasantasena and others ; merchant—as Vishnudatta ; Man-servant as Kalahamsa and others ; female-servant—as Mandarika and others.

Text—श्लोकः। नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम् ।

वृत्तिः। यथा रामाभ्युदयादिः ।

मित। गर्भेस्थितः वा गर्भसन्धिना सूचित इति गर्भितः। तादृशः अर्थःविषयः इति गर्भितार्थः । मूलप्रतिपाद्यः इत्यर्थः। नाटकस्य गर्भितार्थ-प्रकाशकं मूलप्रतिपाद्यविषयज्ञापकं नाम संज्ञां कुर्य्यात्। यथा रामाभ्युदयः इति नाटकम्। तत्र श्रीरामस्य अभ्युदयवर्णनमेव मूलप्रतिपादनम्। एवम्-अन्यानि अपि नाटकानि बोध्यानि ।

Eng. Tran.—The name of a Nataka should be given after the main topic of the same.

As Ramabhyudaya etc.

Text—श्लोकः। नायिकानायकाख्यानात् संज्ञाप्रकरणादिषु

वत्तिः। यथाः मालतीमाधवादिः ।

मित—। प्रकरणादिषु प्रकरणप्रभृतिषु रूपकेषु नायिकानायकाख्यानात् नायिकायाः आख्यायाः नाम्नः—अथवा नायकस्य आख्यायाः अथवा उभयोरेकत्रकृतयोराख्यायाःसमाना संज्ञा भवेत्। यथा मालती-माधवं प्रकरणम्। एवं वसन्तसेना—चारुदत्तयोः विषयम् अधिकृत्य रचितस्य प्रकरणस्य मृच्छकटिकमिति गर्भितार्थप्रकाशकं नाम दृश्यते ।

Eng. Tran.—In Prakarana and others (i. e. other Rupakas), the title should be after the hero or the heroine or the both. N. B.—For नाटक प्रकरण see P. 44 ante.

As in the Prakarana of Malatı Madhava etc.

Text—श्लोकः। नाटिकासट्टकादीनां नायिकाभिर्विशेषणम्।

वृत्ति। यथा—रत्नावली, कर्पूरमञ्जर्यादिः।

मित—। नाटिकासट्टकप्रभृतीनां रूपकाणाम् नायिकाभिरेव विशेषणं संज्ञा निर्देशः स्यात्। नाटिका—सट्टकनाट्यरासक—प्रभृतीनाम् नाम नायिका—नाम एव भवतीति सरलार्थः। यथा नाटिका=रत्नावली, सट्टक=कर्पूरमञ्जरी इत्यादि।

Eng. Tran.—Natika, Sattaka and the like are entitled by the name of the heroine.

As Ratnavali, Karpura-manjari and others.

Text—श्लोकः। प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते।

वृत्तिः। यथा शाकुन्तले—ऋषी—गच्छाव इत्यर्थे साधयावस्तावत् (इति)।

मित—। रूपकेषु प्रायेण णयन्तकः णिच् प्रत्ययान्तः साधिः साधयतीति साधिधातुः गमेः स्थाने गमनार्थैः प्रयुज्यते।

यथा—अभिज्ञानशाकुन्तलाख्यायाम्—गच्छावः आवाम् इत्यर्थे साधयावः इति लिखितम्।

Eng. Tran.—Generally the root "Sadh" with the suffix "Ni" (Nich), added to it, is used to express the meaning of the root "Gam" to go.

As in the Sakuntala where the two ascetics say "Sadhayavaas"—to mean "Gachhavas."

(N. B.—Mode of addresses to king's and others in dramas etc. are being stated ahead)—

Text—श्लोकः। राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः।
राजर्षिभिर्वयस्येति तथा विदूषकेण च।
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च॥

स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः ।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ॥
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् ।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ।
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः ।
वयस्येत्युत्तमैर्हंहो मध्यैरार्येति चाग्रजः ॥
भगवन्निति वक्तव्याः सर्व्वैर्देवर्षिलिङ्गिनः ।
वदेद्राज्ञीञ्च चेटीञ्च भवतीति विदूषकः ॥
आयुष्मन् रथिनं सूतो वृद्धं तातेति चेतरः ।
वत्स पुत्रक तातेति नाम्ना गोत्रेण वा युतः ।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः ।
विप्रैरयममात्येति सचिवेति च भण्यते ॥
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः
अगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ॥
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः ।
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः ॥
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः ।
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका ॥
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ।
हलेति सदृशी, प्रेष्याहञ्जे, वेश्याऽज्जुका तथा ।
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरती जनैः ।

[जरती=वृद्धा]

आमन्त्रणैश्च पाषण्डाः वाच्याः स्वसमयागतैः ॥
शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः ।
यस्य यत् कर्म्म शिल्पम् वा विद्या वा जातिरेव वा ।
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ।

Eng. Tran.—Employees (भृत्य) should address the King as Swamin or Deva, and menials should do so as Bhatta. Other Royal sages and the clown will address him (the King) as Vayasya. Sages are to call him as "Rajan" or by any appellation-expressive of his relation with his father (अपत्यप्रत्ययेन) । A Brahman will be addressed by other Brahmans by his personal name or (by any other appellation) at pleasure, others should call him (a Brahman) as Aryya A King should address the clown as "Vayasya" or by his personal name The Nati (actress or the consort of the Sutradhara) ard the Sutradhara (the stage-manager) will mutually address as Aryya and Aryya respectively. The Pariparsika (assistant) will call Sutradhara as Bhava and the Sutradhara is to address him (Pariparsika) as Marisha. A menial should address his equal as "Hande"; a high classman (a man of culture) will address his equal as Vayasya and a mediocre fellow as "Hanho." An elder brother should be addressed as Aryya. Deities, Sages and those wearing the emblem of asceticism—(such as Sanyasins and Brahmacharin) will be called as Bhagavan. The clown is to address the Queen as well as her hand-maid as "Bhavati." The charioteer will address the rider of the car as Ayusman and an old fellow is to be addressed as "Tata" by others. A son is to be called as Vatsa, Putraka, Tata, or by his name or family name i. e. as the name derived from

his gotra. A disciple or a younger brother will be addressed also in the same way. A minister as Aryya by menials and Amatya or Sachiva by Brahmans. The wise call an ascetic or a pious fellow as "Sadho." A worshipful man should be referred to by disciples and others--in any way save and except by uttering his personal name. A preceptor as Upadhyaya and a King as Bhupati, A crown-prince as "Swamin", a prince as Bhattridaraka and a princelike as Bhadra ; Saumya or Bhadramukha by menials. A Princess should be addressed as Bharttridarika by all persons ; whether high, low or middle – all should address "wives" just in the same manner as their husbands are addressed. An equal should be addressed as Hala—(by females) and a maid servant as Hanje. A courtezan as Ajjuka and a "go—between" (i. e. a band) as Amba by her adherent and a worshipful old lady should also be addressed as Amba by the people (or a courtezan as Hanje, a band as Ajyuka and a worshipful lady as "Amba" by her adherents and an old lady also as "Amba" by the people). Pasandas should be called by the appellation that fits in well with their profession and manners. Sakas that are engaged are to be addressed by names, as Bhadradattaa etc.

An engaged man may be addressed by his profession or the art he persues or his learning i. e. by that branch of study in which he is an adept or which he follows, or

by his easte ; and others should be addressed by their proper appellations. [For अन्ये etc., compare "शाक्यभिक्षुर्भदन्तेति, भगिनीपतिरावुत्तेति, जनक आवुकेति, राजश्यालो राष्ट्रियेति वाच्य" इत्यादि] ।

Text—वृत्तिः । अथ भाषाविभागः ।

मित— । अथ कः जनः नाटकादौ कया भाषया वदेत् इति तत्र नियमोऽस्ति । तं प्रदर्शयति ।

Eng. Trans.—Now comes the apportioning of dialects (which one should speak in dramas etc.).

अथ भाषाविभागः (allotment of language in dramas etc.)

Text—श्लोकः । पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम् ।
आसामेव तु गाथासु महाराष्ट्रीम् प्रयोजयेत् ॥
अत्रोक्ता मागधीभाषा राजान्तःपुरचारिणाम् ।
चेटानां राजपुत्राणां श्रेष्ठानाञ्चार्द्धमागधी ॥
प्राच्या विदुषकादीनां धूर्त्तानां स्यादवन्तिजा ।
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम् ॥
शवराणां शकादीनां शावरीं सम्प्रयोजयेत् ।
वाह्लीकभाषोदीच्यानां द्राविड़ी द्रविड़ादिषु ॥
आभीरेषु तथाभीरी चाण्डाली पुक्कसादिषु ।
[पुक्कसः=चाण्डालः]
आभीरी शावरी चापि काष्ठपत्रोपजीविषु ॥
तथैवाङ्गारकारादौ पैशाची स्यात् पिशाचवाक् ।
चेटीनामप्यनीचानामपि स्यात् शौरसेनिका ॥
बालानां षण्डकानाञ्च नीचग्रहविचारिणाम् ।

उन्मत्तानामातुराणां सैव स्यात् संस्कृतं क्वचित् ॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्येणापद्रुतस्य च
भिक्षुवल्कधरादीनां प्राकृतं सम्प्रयोजयेत् ॥
संस्कृतं सम्प्रयोक्तव्यं लिङ्गिनीषूत्तमासु च ।
देवीमन्त्रिसुता-वेश्यास्वपि कैश्चित्तथोदितम् ॥
यद्देश्यं नीचपात्रन्तु तद्देश्यं तस्य भाषितम् ।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः ॥
योषित् सखीबालवेश्याकितवाप्सरसां तथा
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ॥

वृत्तिः। एषामुदाहरणान्याकरेषु बोद्धव्यानि ।
भाषालक्षणानि मम तातपादानां भाषार्णवे ।

मित—। अथ नाटके भाषाविभागः कथ्यते। भाषाद्विधा, प्रधानतः संस्कृता च प्राकृती चेति भेदतः इति श्रीरूपः। अत्र नाटकीयानां पात्राणां मध्ये कः खलु कस्याम् भाषायाम् कथयिष्यति इति तस्य निर्णयः क्रियते। तत्र आदौ संस्कृतभाषा—तस्य लक्षणं कथितं श्रीमता दण्डिना—यथा "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः" इति काव्यादर्शः। के नाम जनाः सस्कृतं कथयिष्यन्तीति उच्यते—अनीचानां नीचश्रेणीबहिर्भूतानां जनानाम्—उत्तमानां तथा मध्यमानाम् इत्यर्थः कृतात्मनाम् शास्त्रनिविष्टानाम्—प्राप्तशिक्षाणाम् कृतविद्यानाम् इति यावत् पुरुषाणाम् नराणाम् संस्कृतं स्यात्। तथाहि दशरुपके—'पाठ्यं तु संस्कृतं नृणामनीचानां कृतात्मनाम्। लिङ्गिनां महादेव्यबन्तिजावेश्ययोः क्वचित्"। क्वचित् इति देवीप्रभृतीनां सम्बन्ध इति धनिकः।

अत्र श्रीरूपः—

संस्कृता देवतादीनां मुनीनां नायकस्य च ।
लिङ्गि-विप्र-वणिक्-क्षत्र-मन्त्रिकञ्चुकिनामपि ।

आरण्यदेवीगणिका मन्त्रिजाधीतियोषिताम्
योगिन्यप्सरसोः शिल्पकारिण्या अपि कीर्त्तिताः इति ॥
अथ प्राकृती भाषा। तथाहि नाटकचन्द्रिकायाम्—
'षोढ़ान्तिमा प्राकृती स्यात् शौरसेनी तु मागधी
पैशाची चूलिका शावर्यपभ्रंश इति क्रमात्।
तत्र सामान्यनियमः—यथा तत्रैव—
अत्र तु प्राकृतं स्त्रीणां सर्व्वासां नियतं भवेत्।
एश्वर्य्येण प्रमत्तानां दारिद्र्योपहतात्मनाम् ॥

ये नीचाः कर्म्मणा जात्या तेषां च प्राकृतं स्मृतम् ॥ दशरूपकेऽपि एवम्। प्रकृतेरागतं प्राकृतम्। प्रकृतिः संस्कृतम्। तद्भवं तत्समं देशीत्यनेकप्रकारम्। शौरसेनी मागधी च स्वशास्त्रनियते इति- धनिकः। "तत्समस्तद्भवो देशीत्यनेकः प्राकृतक्रमः" इति श्रीदण्डिनः। प्राकृत-भाषाणां मध्ये विशेषतः—तादृशीनां अनीचानां कृतात्मनां योषितां नारीणाम् शौरसेनी इति प्राकृतीभाषा प्रयोक्तव्या। शौरसेनी तु मथुरादिविषयेषु प्रचलिता प्राकृतभाषा। अपिच आसामेव उक्तविधानामेव गाथासु महाराष्टीं महाराष्टी इति प्राकृतभाषां प्रयोजयेत्। महाराष्ट्री महाराष्ट्रदेशीया प्राकृती। सा तु सर्व्वासाम् प्राकृतीनां मध्ये श्रेष्ठा इति काव्यादर्शे आचार्य्याः श्रीदण्डिनः कथयन्ति। "तत्रापि नायिकादीनां शौरसेनी प्रकीर्त्तिता। आसामेव तु गाथासु महाराष्ट्री स्मृता बुधैरिति श्रीरूपः। अथ मागधी प्राकृती। सा तु मगधदेशीया। अत्र नाटके राज्ञः अन्तपुरे ये विचरन्ति तादृशानां कुब्जवामनप्रभृतीनां मागधी भाषा उक्ता॥ अथ अर्द्धमागधी। चेटानां राजभृत्यानां राजपुत्राणाम् शिशूनाम् इत्यर्थः तथा श्रेष्ठिनाम् प्रधान-वणिजां अर्द्धमागधी भाषा। विदूषकप्रभृतीनां (आदिपदेन राजसुताधात्रेयीप्रभृतीनाम् इति श्रीमान् सिद्धान्तवागीशः) तु प्राच्या पूर्व्वदेशीया प्राकृती प्रयोक्तव्या। श्रीरूपमते एषामपि माधवी यथा—' तथा विदूष-

कादीनां चेटानामपि कीर्त्तिता" इति नाटकचन्द्रिका। धूर्त्तानां द्यूतक्रीड़ानियुक्तानाम् अवन्तिजा अवन्तिदेशीया आवन्ती प्राकृती इत्यर्थः स्यात्। अवन्ति तु उज्जयिनीं परितो स्थितो विषयः। दीव्यताम् अक्ष-क्रीड़ां कुर्व्वताम् योधनागरिकादीनां योद्धृणाम् नगरबासिनाम् एवं एतादृशानाम् अन्येषामपि दाक्षिणात्या दक्षिणदेशीया प्राकृती प्रयोक्तव्या। श्रीमान् सिद्धान्तवागीशस्तु दाक्षिणात्यपदेन वैदर्भीं गणयति। शवराणाम् शवरजातानां जनानां तथा शकादीनां शकहूणप्रभृतीनां शावरीं भाषां सम्प्रयोजयेत्। अत्र यवनादीनाम् अपि शावरी प्रयोक्तव्या इति सिद्धान्तवागीशः। परं श्रीरुपमते तु तत्र अपभ्रंशः व्यवहर्त्तव्यः, यथा नाटकचन्द्रिकायाम्—अपभ्रंशस्तु चण्डालयवनादिषु युज्यते—इति। उदीच्यानां भारतवर्षस्य उत्तर-प्रान्तनिवासिनाम् बाह्लीकभाषा। वाह्लीक-देशस्तु भारतात् उत्तरपश्चिमदिशि स्थिता। द्रविड़ादिषु द्रविड़देशीय-पात्रेषु अन्त्यजातीयपात्रेषु इत्यर्थः द्राविड़ीं प्रयोजयेत्। आभीरेषु आभीर इति नाम्ना प्रसिद्धेषु गोपजातीयेषु पात्रेषु आभीरी भाषा तथा पुक्कसादिषु पुक्कसाख्यचाण्डालप्रभृतिषु जातिषु चाण्डाली भाषा प्रयोक्तव्या। एवं काष्ठपत्रोपजीविषु आभीरी शाबरी चापि। ये काष्ठविक्रयं कृत्वा जीविकाम् अर्जयन्ति ते काष्ठोपजीविनः ये तु पत्रादीनि विक्रीय जीविकां अर्जयन्ति ते पत्रोपजीविनः। तेषां सम्बन्धे तु आभीरी शावरी च भाषा प्रयोक्तव्या। अत्र काष्ठोपजीविषु आभीरी पत्रोपजीविषु च शावरी इत्येव बोध्यम् इति केचित्। एवं च अङ्गारकारादौ आदिपदेन चर्म्मकारप्रभृतिषु वा आभीरी शावरी वा भाषा प्रयोक्तव्या। शावरीभाषायाः एव प्रयोगः साधीयान् इति मन्यामहे वयम्। तथा पिशाचानां वाक् भाषा इत्यर्थः पैशाची स्यात्। अत्र दशरुपके धनञ्जयः—पिशाचात्यन्तनीचादौ पैशाचं तथा इति। अत्र श्रीरुप—रक्षःपिशाचनीचेषु पैशाची द्वितयं भवेत्—इति। राक्षसपिशाचप्रभतीनां नीचानाम् उक्तौ पैशाची मागधी इति द्वयमेव प्रयोक्तव्यमिति श्रीरासविहारिसांख्यतीर्थचरणाः। पैशाची-

भाषाम् भूतभाषामपि कथयन्ति यथा भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम् इति काव्यादर्शे श्रीदण्डिनः। एवं च अनीचानाम् चेटिनां याः खलु परिचारिकाः नीचकुले उत्पन्नास्तासाम् अपि शौरसेनिका इति प्रसिद्धा प्राकृतीभाषा स्यात्। बालानां शिशूनाम् षण्डकानां तथा नीचग्रहविचारिणाम् नीचाः हीनाः ये ग्रहविचारिणः दैवज्ञास्तेषाम् एवम् उन्मत्तानाम् अस्थिराणाम् अपि सैव शौरसेनी एव स्यात्। क्वचित् तु एतेषां संस्कृतमपि भवेत्।

ननु नियतायाः अपि भाषायाः व्यतिक्रमोऽपि स्थान-काल-पात्र-विशेषेषु भवेत्। उक्तं हि दशरूपके 'कार्य्यतश्चोत्तमादीनां कार्य्यो भाषा-व्यतिक्रम।"

श्रीरूपोऽपि—"सर्व्वेषां कारणवशात् कार्य्यो भाषा-व्यतिक्रमः। माहात्म्यस्य परिभ्रंशत्मकस्यातिशयन्तथा। प्रच्छादनञ्च विभ्रान्तिर्यथा लिखितवाचनं। कदाचिदनुवादञ्च कारणानि प्रचक्षते' इति। दृष्टान्तं प्रकटयति श्रीमान् विश्वनाथ—ऐश्वर्य्येणेत्यादिना। ऐश्वर्य्येण प्रमत्तस्य धनगर्व्वेण उत्सिक्तस्य दारिद्र्येण उपद्रुतस्य वा प्रपीड़ितस्य च एवं भिक्षूणां परिव्राजकानां वल्कलधरादीनां वृथात्वग्धारिणां सन्न्यासिनां एवम् आदिपदेन वौद्धभिक्षुप्रभृतीनां च कविः प्राकृतमेव सम्प्रयो-जयेत्। किञ्च उत्तमासु उच्चश्रेणीगतासु कृतविद्यासु च लिङ्गिनीषु दण्डकमन्डलुप्रभृतितपस्विचिह्नधारिणीषु संस्कृतं प्रयोक्तव्यम्। देवी मन्त्रिसुता वेश्यास्वपि तथा संस्कृतमेव प्रयोक्तव्यमिति कैश्चिद् आलङ्कारिकैः उदितं कथितम्। तथाहि दशरूपकमते "लिङ्गिनीनां महादेव्याः मन्त्रिजा—वेश्ययोः क्वचित्"। श्रीरुपमते—"आरण्यदेवीगाणिका—मन्त्रिजाधीति-योषिताम्। योगि-अप्सरसः शिल्पकारिण्या अपि कीर्त्तिताः" इति अस्माभिः प्रागेव उद्धृतम्। किञ्च नीचपात्रन्तु यद्देश्यं यस्मिन् देशे जातं तस्य भाषितम् तद्देश्यं तद्देशीयमेव। तथाहि दशरूपके "यद्देशो नीचपात्रस्तद्देश्यं तस्य भाषितम्"। परं कार्य्यतः कार्य्यवशात् उत्तमा-

दीनां संस्कृतभाषिणाम् उत्तमपात्राणाम् आदिपदेन नायिकादीनां भाषा-विपर्य्ययः भाषाव्यतिक्रमः कार्य्यः अवलम्बनीयः। योषितां नारीणाम सख्याः बालस्य वेश्यायाः कितबानाम् तथा अप्सरसाम् च अन्तरा अन्तरा मध्ये मध्ये संस्कृतं प्रदातव्यं कदाचित्। कथम् एवम्? वैदग्ध्यार्थम् एषां वैदग्ध्यं प्रदर्शयितुम्। वैदग्ध्यं संस्कृतिचातुर्य्यम् इति यावत् (culture, gallantry इति आङ्गलभाषा)। अत्र श्रीरूपः – 'नायिकानां सखीवेश्याकितवाप्सरसां तथा वैदग्ध्यार्थं प्रयोक्तव्यं संस्कृतञ्चान्तरान्तरा। कितवानां धूर्त्तानाम् इत्यर्थः।''

अथ वृत्तिव्याख्या। एषां भाषाविभागानाम् उदाहरणानि आकरेषु मृच्छकटिकादिषु मूलग्रन्थेषु बोध्यव्यानि द्रष्टव्यानि। नाटकेभ्य एव ज्ञात-व्यानि इति भावः। ननु कस्याः भाषायाः किं लक्षणम्? उत्तरं पठति—भाषालक्षणानि इति। कस्याः भाषायाः किं लक्षणमिति मम श्रीमतो बिश्वनाथस्य तातपादानां पितृदेवस्य "भाषार्णवे" भाषार्णव इति आख्याते ग्रन्थे द्रष्टव्यानि। अत्र नाटकचन्द्रिकायाम् श्रीरूपः किञ्चित् एव कथितवान्—यथा—"तत्र भाषाद्विधा भाषा बिभाषा चेति भेदतः? चतुर्द्दश बिभाषाः स्युः प्राच्याद्याः वाक्यवृत्तिभिः। आसां संस्कारराहित्याद् विनियोगो न साध्यते? भाषाद्विधा सस्कृता च प्राकृती चेति भेदतः। अस्माभिस्तु संस्कृतभाषायाः लक्षणं काव्यादर्शात् तथा प्राकृतभाषायाः लक्षणं नु दशरूप-कात् प्रागेव उद्धृत्य प्रदर्शितम्।

Eng. Tran.—Now comes the allotment of language of (dramatic) male figures :—those who do not belong to the lower rank and are cultured, Sanskrit should be their language of speech. In the speech of females of these types, the Sauraseni (Prakrit) should be employed. In the songs (verses) of these ladies the Maharastri should be used. Magadhi should be the language of those who

move in the Royal apparments ; and Ardha-magadhi is the language of menials, the Princes (Princelings) and rich merchants (bankers). Clowns and others are to use the Eastern dialect and gamblers the dialect of Avanti ; the citizens and soldiers and those who play at dice will speak the southern dialect. Savari should be employed in the speech of the Savaras, Sakas and the like. The Northerners will speak Vahlika (Bactrian) dialect and Dravidi (Dravidian) is to be used in the speech of the Dravidas (Dravidians). Abhiri is to be employed in the speech of Aviras (milkmen) and chandala of the Pukkasa and others.

Abhiri should be the dialect of the wood-dealer and Savari of the vegetable-seller and either of the two of the coal-burners. Paisachi forms the dialect of the Paisachas, Sauraseni may be used even by hand-maids who do not belong to the lower rank. The same (i. e. Sauraseni) should also be employed by children, eunuchs, and astrologers of the lower rank ; as well as by the insane and the distressed ; and sometimes these may also speak Sanskrit ; Prakrit should be employed in the speech of those—who are puffed up with (the pride of their) wealth, who are reduced to poverty, of the mendicants as well as of those who wear bark-clothing. Sanskrit should be employed in the speech of female asceties of the high order—and in the opinion of some—also in the

speech of the Queen, the minister's daughter and the courtezans. The speech of a person of the lower order will be determined by the country to which he belongs, The change of dialect in the case of high class persons— is to be effected if demanded by necessity. In the speech of ladies, lady-friends, boys, harlots gamblers and celestial nymphs, sanskrit should be employed at intervals, for the sake of (exhibiting) their cultures (or cultural taste).

Examples of these (of the above) should be known from original works (आकर) (i. e. dramas like Mrichchhakatika etc.) The respective characteristics however of dialects are to be found in the Bhasarnava by my revered father,

Text—श्लोकः। षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा। त्रयस्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश। लास्याङ्गानि दश यथालाभं रसव्यपेक्षया।

वृत्तिः। यथालाभं प्रयोज्यानीति सम्बन्धः। अत्र नाटके इत्यर्थः।

मित—। अत्र नाटके षट्त्रिंशत् संख्यकानि लक्षणानि, तथा त्रयस्त्रिंशत् नाट्यालङ्कृतयः नाट्यालङ्काराः, एवं त्रयोदश वीथ्यङ्गानि तथा दशलास्याङ्गानि रसव्यपेक्षया रसाभिव्यक्तिम् अपेक्ष्य रसानुगुणताम् विविच्य इति यावत्, यथालाभम् यथासम्भवं प्रयोज्यानि।

Eng Tran.—Thirty six Lakshanas (adornments), thirty three Natyslankaras, thirteen Vithyangas i. e. thirteen varieties of Vithi, as well as ten varieties of Lasyasa should also be applied (used) as far as practicable (of course) with perfect harmony with the (expression of the) sentiment

(Rasa)—i. e. bring any one or all of them into the line with the proper exhibition of some particular sentiment or Rasa [N. B.—These procedures or varieties of लक्षण or भूषण etc are to be adopted for successful progress and conclusion in dramas etc., so these will be explained hereinnow)—

Text—वृत्तिः। तत्र लक्षणानि (embellishments in नाटक etc)

मित । एतेषाम् मध्ये प्रथमंप्राप्तानि लक्षणानि आदौ विवृणोति ग्रन्थकारः। श्रीरूपगोस्वामिचरणास्तु एतानि "विभूषणानि" इति आचक्षते। एतेषाम् उपयोगन्तु तैरित्थम् कथितं यथा नाटकचन्द्रिकायाम् "एवमङ्गैरुपाङ्गैश्च सुश्लिष्टं रूपकश्रियः शरीरं वस्त्वलङ्कुर्यात् षटत्रिंशद्भूषणैः स्फुटम् इति। अस्य वङ्गानुवादः यथा श्रीमता रासविहारि सांख्यतीर्थेन कृतः 'रूपक अर्थात् नाट्यकाव्येर शोभा, ताहार शरीररूप वस्तुटी पूर्व्वोक्त अङ्ग ओ उपाङ्गद्वारा सुन्दरभावे विरचित एवं उक्तवस्तुके षटत्रिंशत् छत्रिशप्रकार=भूषणद्वारा सुस्पष्टभावे अलङ्कृत करिते हय'।

Eng. Trans—Amongst these, the Lakhsana (embellishment in नाटक) are being taken first for consideration.

Text—श्लोकः। भूषणाक्षरसंघातौ शोभोदाहरणं तथा। हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः। निदर्शनाभिप्रायौ च प्राप्ति विचार एव च। दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा। विशेषणनिरुक्ती च सिद्धिभ्रंशविपर्य्ययौ। दाक्षिण्यानुनयौ मालार्थापत्तिर्गर्हणं तथा। पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्त्तनम्। लेशोमनोरथोऽनुक्तसिद्धिः प्रियवचस्तथा।

मित—। इति षटत्रिंशत्संख्यकानि लक्षणानि "भूषणानि" इत्यपि नाम्ना

प्रसिद्धानि लक्षणानि कथितानि। श्रीहर्षस्तु क्षतिं तथा संक्षेपं न पठति प्राप्तिं क्षोभम् इत्येव पठति।

Eng. Trans.—Bhushana, Akshara-samghata, Sova, Udaharana, Hetu, Samshaya, Dristanta, Tulyatarka. Padochchaya, Nidarsana, Abhipraya, Prapti, Vichara, Dista, Upadista, Gunatipata, Atisaya, Visesana, Nirukti, Siddhi, Bhramsa, Viparyaya, Daksinya, Anunaya, Mala, Arthapatti, Garhana, Prichha, Prasiddhi, Sarupya, Samkshepa, Gunakirtana, Lesha, Manoratha, Anukta Siddhi, Priya-vachas—these are the thirty six Lakshanas.

Text—वृत्तिः। तत्र—

श्लोकः। लक्षणानि गुणैः सालङ्कारैर्योगस्तु भूषणम्।

वृत्तिः। यथा आक्षिपन्त्यरविन्दानि मुग्धे तव मुखश्रियम्।

कोषदण्डसमग्राणाम् किमेषामस्ति दुष्करम्॥

मित। तत्र तेषाम् लक्षणानाम् मध्ये प्रथमप्राप्तं भूषणं लक्षयति। लक्षणानि इति। लक्षणानि उच्यन्ते मया इति भावः। सालङ्कारैः उपमारूपकादिभिः अलङ्कारैः सह, गुणैः ओजःप्रसादमाधुर्यादिगुणैः एतेषां गुणानाम् इत्यर्थः योगः कस्मिंश्चिन् प्रबन्धे पद्ये नाटकेवा परस्परसम्मेलनम् भूषणम् इति कथ्यते। तथाहि—गुणालङ्कारबहुलं भाषणं भूषणं मतम्। दृष्टान्तो यथा, आक्षिपन्ति इत्यादि। अथ श्लोकव्याख्या। हे मुग्धे, अरविन्दानि तव मुखश्रियः वदनशोभाम् आक्षिपन्ति अभिभवन्ति। एतत् वदनशोभाभिभवनरूपं कार्यं कारणेन समर्थयति—कोषदण्डसमग्राणाम् कोषेण वीजकोषेण किञ्च धनागारेण इत्यपि ध्वन्यते। यथा दण्डेण पद्मनालेन—दण्डशक्त्या इत्यपि च ध्वन्यते समग्राणाम् सम्पन्नानाम् एषाम् कमलानाम् किम् दुष्करम् दुःसाध्यम् अस्ति—अपितु न किमपि। यथा धनागारेण तथा दण्डशक्त्या च समन्वितानां नृपतीनाम् शत्रुपरिभवः

अनायासेनैव साध्यते—यथा वा कोपेन लिङ्गकोपेन तथा दण्डेन च वीर्य्य-वताम् पुरूषाणाम् रमणीपरिभवः अल्पायासेनैव सिद्ध्यति तद्वत् बीजकोषेण तथा नालेन च सम्पन्नानां कमलानाम् नव मुखशोभापभिवः सिध्यति। अत्र कारणेन कार्य्यं समर्थनरूपः अर्थान्तरन्यासालाङ्कारः, तथा अर्थापत्तिरिति अलङ्कारस्तथा श्लेषेण अनुप्राणिना भेदे अभेदाध्यवसायमूला अतिशयोक्तिश्च दृश्यन्ते। एवं च प्रथमे चरणे माधुर्य्यगुणः अन्यत्र च प्रसादः इति गुणानाम् अलङ्काराणां च परस्परसम्मेलनादेव भूषणम्। मुनिरप्याह—'अलङ्कारैर्गुणैश्चैव वहुभिः समलङ्कृतम् भूषणैरिव विन्यस्तै स्तद्भूषणं स्मृतम्।"

Eng. Trans.—Amongst these 36 Lakshanas in dramas etc,—

The definitions (are in order being spoken of) :— Bhushana is the intermixture (i. e. co-existence) of Guna (the excellences of माधुर्य etc.) and Alamkara (the figure of speeches) in a passage.

Example—Oh credulous one ! the lotuses are throwing the beauty of your face in the back ground. Endowed with ovary and stalk as they are—what is difficult for them.

Text -श्लोकः। वर्णनाक्षरसंघातश्चित्रार्थैरक्षरैर्मितैः।

वृत्तिः। यथा शाकुन्तले राजा—क्वचित् सखी वो नातिबाधते शरीर-संतापः। प्रियंवदा-संपदं लब्बोसहो उपसमं गमिस्सदि।

मित—। चित्रः विचित्रः। तादृशैः मितैः स्वल्पपरिमितैः अक्षरैः शब्दैः या वर्णना विवरणं सा अक्षरसंघात इत्युच्यते। उक्तं हि श्रीरूपेण— वाक्यमक्षरसंघातो भिन्नार्थं श्लिष्टशब्दकं। दृष्टान्तो यथा—अभिज्ञान

शाकुन्तले। 'साम्प्रतं लब्धौषधः उपशमं गमिष्यति" इति संस्कृतम्। अत्र औषधशब्देन राजाएव लक्ष्यीक्रियते।

Eng Tran.—Akhara-samghata is the description (of something) or the reference of something with a scanty number of words—conveying a very gallant or excellent idea. As in the Sakuntala, King—Does any severe physical indisposition trouble your friend ? (Is it not ?) Priyamvada—Now with the medicine (remedy) found, it will abate.

Text—श्लोकः। सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते। श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते।

वृत्तिः। यथा -सद्वंशसम्भवः शुद्धः कोटिदोऽपि गुणान्वितः।
कामं धनुरिवक्रूरो वर्ज्जनीयः सदा प्रभुः॥

मित —। यत्र यस्मिन प्रबन्धे पद्ये वा सिद्धैः स्पष्टतः प्रतीयमानैः अर्थैः समं अप्रसिद्धः अन्तर्निहितः अर्थः अभिप्रायः प्रकाशते, यत्र वाक्यस्य द्वौ एव अर्थौ भासेते इतिभावः। श्लिष्टलक्षणचित्रार्था—श्लिष्टं श्लेषसनाथं यत् लक्षणं चित्रम् तेन अर्थद्वयप्रकाशकेन श्लेषेण इत्यर्थः चित्रार्था मनोरमार्थसम्पन्ना सा शोभा इति अभिधीयते। दृष्टान्तो यथा—सद्वंशसम्भवः उत्कृष्टवेणुदण्डनिर्मितः शुद्धः श्लक्ष्णः कोटिदः कोटिरग्रभागः तां ददाति धारयति इति कोटिदः अग्रभागसनाथः, यद्वा कोटिं कोटिसंख्यक शत्रुन् द्यति छिनत्ति इति कोटिदः कोटिशत्रुघातनः गुणान्वितः गुणेन धनुर्गुणेन अन्वितः युक्तः शिञ्जिनीसनाथः इत्यर्थः क्रूरः कठिनः धनुरिव सद्वंशप्रभवः उच्चकुलप्रसूतः शुद्धः निर्म्मलः कोटिदः कोटिधनदाता गुणान्वितः दयादाक्षिण्यादिगुणावलीसम्पन्नः क्रूरः कुटिलः प्रभुः कामं यथेष्टमेव सताम् साधूनां वर्ज्जणीयः परिहरणीयः। अत्र प्रभुपक्षे प्रयोज्यः अर्थः प्रसिद्ध एवं धनुःपक्षे प्रयोज्यार्थस्तु अप्रसिद्धः। परम् उभयोरे-

चार्थयोः समं प्रकाशनादत्र शोभा उद्भुता। अत्र श्रीरुपस्तु मतान्तरम् अवलम्बितवान्—यथा तन्मते शोभालक्षणं—शोभा स्वभावप्राकट्यं यूनोरन्योन्यमुच्यते इति नाटकचन्द्रिकायाम्।

Eng. Tran.—Sova stands for the fina idea or the inner meaning that originates out of slesa (double meaning or etendre or entendre) but presents itself simultaneously with the simple meaning. For example..

As a cruel master should be profitably shunned even if he comes of a noble family, be pure (in conduct) bestows profusely in charity, and be accomplished—just like a crooked bow—that is made of fine bamboo, is sharp and endowed with tips and string

Text—श्लोकः। यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्। साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम्।

वृत्तिः। यथा—अनुयान्त्या जनानीतं कान्तं साधुत्वया कृतम्।
का दीनश्रीर्विनाऽर्केण का निशा शशिना बिना॥

मित—। यत्र यस्मिम् सन्दर्भे पद्ये वा तुल्यार्थयुक्तेन समानाभिप्राय—प्रतिपादकेन वाक्येन अभिप्रदर्शनात् दृष्टान्तप्रदर्शनात् अभिमतः आकाङ्क्षित अर्थः विषयः प्रतिपाद्यवस्तु इति यावत् साध्यते निष्पाद्यते, तत् खलु उदाहरणम् इति नाम लक्षणं मतं कथितम्। दृष्टान्तो यथा—अस्मिन् श्लोके १ जनातीतम् लोकोत्तरगुणशालिनम् महापुरुषम् इत्यर्थः कान्तं प्रियंपतिम् अनुयान्त्या अनुगच्छन्त्या अनुसरन्त्या इति यावत् त्वया साधु न्याय्यमेव कृतम् आचरितम्। तथाहि—अर्केण सूर्येण विना का दिनश्रीः दिवसशोभा—शशिना विना निशा का। अत्र तुल्य-विषय प्रतिपादनेन द्वितीयार्द्धगत वाक्यद्वयेन दृष्टान्तं प्रदर्श्य अयमेव अभिप्रायः प्रतिपाद्यते यत् भार्य्यया पत्युरनुगमनमेव कर्त्तव्यम् इति तेनात्र उदाहरणम्।

Eng. Trans.—Udaharana is that in which the object intended for divulging is presented by an illustration conveying a similar idea.

As—You have done well by having followed your highly accomplished (super-human) beloved one. What is the lustre of the day without the sun and what is the beauty of the night without the moon ?

Text —श्लोकः। हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात्।

वृत्तिः। यथा वेणयाम् भीमं प्रति चेटी - एवम् मए भणिदं भानुमदि। तुह्याणं अमुक्केमु केमेमुकहं अम्हाणं देवीए केसा संजमिअन्तिति।

मित—। हेतुदर्शनात समासोक्तं इष्टकृत् वाकयम् हेतुरिति योजना? समासोक्तं समासेन संक्षेपेण उक्तं कथितं इष्टकृत् अभिमतस्य अर्थस्य प्रकाशकम् वाकयं हेतुरिति उच्यते। कथं? तत्रहेतुदर्शनात् तत्र वाक्ये साध्यस्य वस्तुनः यो हेतुः यत् साधनं तस्य अवस्थितिवशात्। उक्तं हि श्रीरूपेण—स हेतुरिति निर्दिष्टो यत् साध्यार्थप्रसाधकम् इति। दृष्टान्तो यथा वेणीसंहारे भीमं प्रति चेटी वक्ति—एवं मया भणितम् भानुमति! युष्माकम् अमुक्तेषुकेशेषु कथम् अस्माकम् देव्याः केशाः संयम्यन्ते इति संस्कृतम्। यदा दुर्य्योधनादयः निहता भविष्यन्ति—यदा भानुमत्याः केशाः मुक्ताः भविष्यन्ति तदैव च वैरनिर्य्यासनतृप्तायाः द्रौपद्याः केशाः वद्धाः भविष्यन्ति इति एतेन दुर्य्योधन—प्रभृतीना विनाशरूपः अभिमतः अर्थः अत्र वाक्ये संक्षेपेण प्रदर्शितः। अतःहेतुरिति लक्षणम् अत्र अवतिष्ठते।

Eng. Tran.—Hetu is a statement which expresses one's intention in brief through a reference to the cause of one's intention—

As in the Venisamhara—The hand-maid says to Bhima—This I have said—Bhanumati how can the hairs of our Queen be braided—so long as your locks remain non-loosened ?

Text—श्लोकः। संशयोऽज्ञाततत्त्वस्य वाक्येस्याद् यदनिश्चयः।

यथा—ययातिविजये—

इयं स्वर्गाधिनाथस्य लक्ष्मीः किं यक्षकन्यका।
किञ्चास्य विषयस्यैव देवता किमु पार्व्वती॥

मित—। अथ संशयं लक्षयति—अज्ञाततत्त्वस्य इति। अज्ञातं तत्त्वम् वस्तुस्वरूपं येन तादृशस्य जनस्यवाक्ये यदनिश्चयः एकतरपक्ष-निर्णयोन स्यात्, तत् खलु संशयोनाम लक्षणम्। अनिश्चयान्तं यद् वाक्यं संशयः स निगद्यते इति श्रीरूपः। दृष्टान्तो यथा ययातिविजये किम् इयं रमणी स्वर्गाद्निाथस्य स्वर्गराजस्य इन्द्रस्य लक्ष्मीः राजश्रीः किं वा इयं काचित् यक्षकन्यका? किं वा अस्य एव विषयस्य देशस्य देवता अधिष्ठात्री देवी, किमु उत पार्व्वती शिवपत्नी इति निश्चयाभावरूपः संशयः।

Eng. Trans.—Samsaya is indecision or ignorance that lies in the statement of one that is unaware of the real fact.

As in the Yayati-vijaya :—Is she the Royal fortune of the Lord of the heaven ? or is she a Yaksa-girl ? Or is she the presiding deity of this land or is she Parvati ?

Text—श्लोकः। दृष्टान्तो यस्तु पक्षार्थसाधनाय निदर्शनम्।

वृत्तिः। यथा वेण्याम्—भीमः आर्य्य। उचितमेव एतत् तस्याः, यतो दुर्य्योधनकलत्रं हि सा" इत्यादि।

मित—। पक्षार्थसाधनाय यत्तु निदर्शनम् स एव दृष्टान्त इति लक्षणम् उच्यते। तथाहि पर्व्वतो वह्निमान् धूमात् इति वाक्ये पर्व्वतः पक्षः, तत्र साध्यते यथा वह्निः स एव साध्यः, धूम इति हेतुः। अनेन हि पक्षे पर्व्वतादौ अर्थस्य अग्निप्रभृतेः साध्यत्वसाधनाय यत्तु निदर्शनं धूमादिहेतुप्रदर्शनं तत् दृष्टान्तः इति कथ्यते। उक्तं हि श्रीरूपेण स्वपक्षे दर्शनं हेतोः दृष्टान्तः साध्यसिद्धये इति नाटकचन्द्रिका। यथा वेणीसंहारे—युधिष्ठिरं प्रति भीमः आह—आर्य्य! तस्याः भानुमत्याः एतत् उपहासप्रदर्शनम् उचितम् न्याय्यमेव—यतः सा भानुमती हि नूनं दुर्य्योधनकलत्रं अस्मद्वैरिणः दुर्योधनस्य पत्नी। अत्र भानुमती पक्षः। तस्मिन् भानुमतीरूपे पक्षे परिहासप्रदर्शनौचित्यरूपस्य साध्यस्य साधनाय तस्याः दुर्योधन-कलत्रत्व-रूपस्य हेतोः प्रदर्शनात् दृष्टान्तः।

Eng. Tran.—Dristanta is the advancing of cause for the establishment of some fact in some particular object. As in the Venisamhara—Bhim—venerable sir, it is quite proper for her in as much as she is the consort of Duryyodhana—and so forth.

Text—श्लोकः। तुल्यतर्को यदर्थेन तर्कः प्रकृतिगामिना।

बृत्तिः। प्रकृतिं प्रकृतवस्तु गच्छति स्पृशति यः स प्रकृतिगामी। प्रकृतिगामिना प्रकृतवस्तुदर्शिना अर्थेन विषयेण यस्तर्कः यत् पर्य्यालोचनम् भविष्यदुद्भावकनिर्द्धारणं स तुल्यतर्क इति नाम्ना लक्षणं कथ्यते।

दृष्टान्तो यथा वेणीसंहारे—

प्रायेण एव हि शुभाशुभाः स्वप्राः कामं यथेष्टं दृश्यन्ते। इयं पुनः शतसंख्याः- याः स्वप्ने दृष्टाः—ताः सानुजं शतसंख्यकैः अनुजैः समन्वितं मां दुर्योधनं स्पृशति विषयीकरोति इव इति मन्ये।

श्रीरुपस्तु "कश्चित्त् आह" इत्यनेन साहित्यदर्पणलक्षणं नाटकचन्द्रिकायायाम् उद्धृतवान् तस्य आत्ममतं तु भिन्नं तद् यथा–'रुपकैरुपमाभिर्वा तुल्यार्थाभिःप्रयोजितःअप्रत्यक्षार्थसंस्पर्श स्तुल्यतर्क इतीरितः।

Eng. Trans.—Tulyatarka is the discussion (or forecasting) through some affair or incident—which appears to touch the subject matter under discussion.

As therein, too—

Very often good or evil dreams are dreamt sufficiently. But the number hundred appears to touch me with my brothers.

Text—श्लोकः। सञ्चयोऽर्थानुरुपो यः पादानां स पदोच्चयः।

वृत्तिः। यथा शाकुन्तले -

अधरः किसलयरागः कोमलविटपानुकारिणौवाहू
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

अत्र पदपदार्थयोः सौकुमार्य्यं सदृशमेव।

मित—। पादानां सन्दर्भे व्यवहृतानां पादानां योऽर्थानुरूपः अर्थप्रकाशानुकूलः सञ्चयः सन्निदेशः य पदोच्चयः। तथाहि कोमलभावे अभिव्यक्तव्ये कोमलपदानां सन्निवेश. एवं कठोरभावे अभिव्यक्तव्ये कठोरपदानां सन्निवेशः इति एतादृशी रचना पदोच्चयः उच्यते। दृष्टान्तो यथा शकुन्तलायाम्।

श्रीरुपस्तु साहित्यदर्पणमतम् "कश्चित् तु आह" इति उद्धृत्यस्वमतं विभिन्नप्रकारम् इत्थम् उपन्यस्तवान्—

"वहूनान्तु प्रयुक्तानां पदानां वहुभिः पदैः। उच्चयः सदृशार्थो यः स विज्ञेयः पदोच्चयः"।

Eng. Tran.—Podochchaya is the selection of words (in a piece or composition), quite in keeping (in perfect

harmony) with the idea it conveys. As in the Sakuntala—The lower lip has got the ruddiness of fresh leaves; the arms imitate tender branches; and budding youth fascinating as the flower has been arrayed around the person.

Here the tenderness of the words as well as of the meaning is in perfect harmony (with each other.)

Text—श्लोकः। यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनम्। परपक्षव्युदासार्थं तन्निदर्शनमुच्यते।

वृत्तिः। यथा—क्षात्रधर्म्मोचितैं धर्म्मैरलं शत्रुवधे नृपाः। किन्तु वालिनि रामेण मुक्तो वाणः पराङ्मुखे।

मित। यत्र प्रसिद्धानां लोकख्यातानाम् अर्थानां विषयाणाम् परिकीर्त्तनं घोषणं क्रियते परपक्षव्युदासार्थं परपक्षस्य विपक्षैरुत्थापितायाः युक्तेः व्युदासार्थं निरासार्थं इति तत् निदर्शनमिति उच्यते। दृष्टान्तो यथा—अस्मिन् श्लोके। तस्य व्याख्या—क्षात्रधर्म्मोचितैः धर्म्मैः नियमैः नृपाः शत्रुवधे रिपुनाशने अलं समर्थाः पर्य्याप्ता इति कथ्यते। सत्यं नाम एतत्। परं किन्तु रामेण पराङ्मुखे रणम् अकुर्वति सति वालिनि बाणः शरः मुक्तः निक्षिप्तः। अत्र प्रथमार्द्धे या युक्तिरुत्थापिता तस्याः निरासाय द्वितीयार्द्धेन रामकर्त्तृकवालिवधरुपस्य प्रसिद्धस्य अर्थस्य कीर्त्तनं तेनात्र निदर्शनम्।

अत्र श्रीरूपस्तु एवं लक्षणं कृतवान्—

'यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनं परपक्षव्युदासार्थं तन्निदर्शनमुच्यते'।

Eng. Tran.—Nidarsana is that in which well-known matters are cited for the refutation of an adverse argument. As—

Abiding by the regulations prescribed for Khsattriyas, Kings are quite capable of putting an end to their enemies. But Rama aimed an arrow at Balin who was not in actual conflict with him (was पराङ्मुख)।

Text—श्लोकः। अभिप्रायस्तु सादृश्यादद्भुतार्थस्य कल्पना।

तथा शाकुन्तले—इदं किलाव्याजमनोहरं वपुस्तपःक्रमं * साधयितुं य इच्छति! ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुम् ऋषिर्व्यवस्यति॥

मित—। सादृश्यात् सादृश्यवशात् यद्वा सादृश्यात् सादृश्यमाश्रित्य अद्भुतार्थस्य अद्भुतः असम्भावनीयः योऽर्थो विषयः तस्य कल्पना मनसि उद्भावनं अभिप्राय इति कथ्यते। तथाहि श्रीरूपः—अभिप्रायस्तूद्भूतार्थोद्वयः साम्येन कल्पितः। अथ मतान्तरमपि दर्शयति श्रीरूपो यथा--अभिप्रायं परे प्राहुःसमतां हृद्यवस्तुनि। दृष्टान्तो यथा—अभिज्ञान-शकुन्तलनाटके--

तत्र शकुन्तलादेहेन तपःक्रमसाधनस्य सादृश्यं नीलोत्पलपत्रधारया शमीलताछेदने कल्पितः—उभयोरपि असम्भवनीयतया। अतएव इदं सादृश्यमाश्रित्य नीलोत्पलपत्रधारया शमीलताच्छेदनरूपस्य लोके अदृश्यमानस्य अद्भुतस्य विषयस्य कल्पनात् अत्र अभिप्रायः।

Eng. Tran.—Abhipraya is the fancying of an imaginary strange thing (or affair) due to or by way of resemblance (similarity).

As in the Sakuntala—undoubtedly that sage attempts at cutting the branch of a sami tree with the edge of the leaf of a bluelotus, the sage who wants to subject this naturally beautiful figure to the hardship of penance.

[* N. B.—Here the usual reading is तपःक्षमं]।

Text—श्लोकः। प्राप्तिः केनचिदंशेन किञ्चिद् यत्रानुमीयते।

वृत्तिः। यथा मम प्रभावत्याम्—"अनेन खलु सर्व्वतश्चरता चञ्चरीकेणावश्यं विदिता भविष्यति प्रियतमा मे प्रभावती।"

मित—। केनचिदंशेन कमपि अंशम् दृष्ट्वा, यत्र किञ्चित् अनुमीयते उन्नीयते तत्र प्राप्तिर्नाम लक्षणं स्यात। यथा ग्रन्थकर्त्तुरेव प्रभावती-रूपके प्रद्युम्नः कथयति—अनेन सर्व्वतः चरता चञ्चरीकेण भ्रमरेण अवश्यं मे प्रियतमा तथा प्रभावती विदिता ज्ञाता भवेत्। अत्र "सर्व्वतश्चरता" इति अंशेन "चञ्चरीकेण अवश्यं प्रभावती विदिता भवेत्" इत्यंशस्य अनुमानात् प्राप्तिः। तथाहि उक्तं श्रीरूपेण "एकदेशविलोकेन प्राप्तिः शेषाभियोजने"। श्रीरूपोपि ज्ञप्तिस्थले प्राप्तिमेव पठति। [अत्र "ज्ञप्ति" इत्यपि पाठो दृश्यते]।

Eng. Tran.—Prapti (or Jnapti) is that in which something is inferred from a part (of the sentence), as in my Prabhavati—"certainly this bee that moves everywhere knows my beloved Prabhavati"—(that is, must be aware of the whereabouts of my beloved Prabhavati).

Text—श्लोकः। विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम्।

वृत्तिः। यथा मम चन्द्रकलायाम्—राजा—नूनमियमन्तःपिहित-मदनविकारा वर्त्तते। यतः—

"हसति परितोषरहितं निरीक्ष्यमाणापि नेक्षते किञ्चित्।
सख्यामुदाहरन्त्यामसमञ्जसमुत्तरं दत्ते।"

मित—। युक्तियुक्तवाक्येन अप्रत्यक्षस्य अदृशस्य अर्थस्य वस्तुनः यत् साधनं स विचार इति लक्षणमुच्यते। दृष्टान्तो यथा—ग्रन्थकर्त्तुरेव चन्द्रकला-नाटके राज्ञः उक्तिः। नूनम् निश्चितम् इयं रमणी अन्तःपिहितमदन-विकारा वर्त्तते। अन्तःपिहितस्य अतएव अदृशस्य अपि मदनविकारस्य अत्र साधनम् युक्ति—प्रदर्शनेन। साच युक्तिः श्लोके प्रदर्श्यते। श्रीरूपस्तु

इदं लक्षण "कश्चित्तु" इति प्रदर्श्य स्वमतम् इत्थं प्रकाशयति—'विचार-स्त्वेकसाध्यस्य यदासाधनवर्णनम् ।"

Eng. Tran.—Vichara is the presenting or proving of what is un-seen, by means of a statement based on reasons (i. e. with the advancing of grounds for the thing that is to be proved). As in my Chandrakala, King says undoubtedly this damsel has got the influence of cupid suppressed within herself. Since she laughs without any contentment, looks at nothing, though herself looked by us, and gives irrelevant answer or speaks incoherently when her friend speaks anything.

Text—श्लोकः । देशकालस्वरूपेण वर्णना दिष्टमुच्यते ।

वृत्तिः । यथा वेण्याम्—सहदेवः—

"यद्वैद्युतमिव ज्योतिरार्य्ये क्रुद्धेऽद्य सम्भृतम्; तत् प्रावृडिव कृष्णेयं नून संवर्द्धयिष्यति ।

मित—। देशस्य तथा कालस्य स्वरूपेण वर्णनम् दिष्टमिति लक्षणम् कथ्यते । उदाहरणम—वेणीसंहारे सहदेवस्य उक्तिः । अद्य क्रुद्धे भीमसेने वैद्युतमिव यत् ज्योतिः सम्भृतम् उपचितं तत्तेजः प्रावृट् वर्षाकालः इव इयं कृष्णा नूनं सवर्द्धयिष्यति । अत्र भीमक्रोधस्य तथा द्रौपद्या च वर्णनम् कालस्य सादृश्यवत्तया तेनात्र दिष्टम् । देवकालयोश्च साधर्म्येण वर्णनं दिष्टम् इति मन्ये ग्रन्थकर्त्तुरभिप्रायः । परं श्रीरूपस्तु स्वभाववर्णनमेव दिष्टं मन्यते । यथा "जात्यादिवर्णनं धीरैर्दृष्टमित्यभिधीयते" । एवं दिष्ट स्थानेदृष्टमिति पाठः नाटकचन्द्रिकायाम् ।

Eng. Tran.—Dista is the description in accordance with time and space, in equal or proportionate terms.

As in the Veni, Sahadeva—

Undoubtedly Krishna like the rainy season, will enhance (augment) the energy (excitement) which, like that of the lightning, has appeared in my excited (irritated) elder brother.

Text—श्लोकः। उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः।

वृत्तिः। यथा शाकुन्तले—

"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने। भर्त्तु र्विप्रकृतापि रोषणतयामास्मप्रतीपं गमः भूयिष्ठं भव दक्षिणापरिजने" इत्यादि।

मित। अथ उपदिष्टम् इति लक्षणं लक्षयति—शास्त्रानुसारतः शास्त्रनिर्द्देशम् अवलम्व्य मनोहारि वाक्यं उपदिष्टम् उच्यते। तथाहि, शास्त्रानुसारि यद्वाक्यम् उपदिष्टम् तदुच्यते इति श्रीरूपः। दृष्टान्तो यथा शाकुन्तले शकुन्तलां प्रति कण्वस्य (काश्यपस्य) उपदेशः।

Eng. Tran.—Upadista stands for advice which is at once agreeable (wholesome) to and based on the injunctions of the Sastras.

As in the Sakuntala—serve your superiors ; adopt the attitude of a dear friend towards your co-wives ; and never go against (the wishes of) your husband, through peevishness, even if you are wronged (insulted), and be highly courteous towards your attendants etc.

Text—श्लोकः। गुणातिपातः कार्य्यं यद्विपरीतं गुणान् प्रति —।

वृत्तिः। यथा मम चन्द्रकलायाम्—चन्द्रं प्रति—

यइं संहरिज्जइ तमोधेप्पइ सअलेहिं ते पाओ
वज्जसि सिरे पसवइणो तहविह इत्थीअ जीअणं हरसि।

मित—। गुणान् प्रति विपरीतं गुणप्रतिकूलं यत् कार्य्यम् स्वगुणस्य

अननुरूपं यत् कार्य्य तत् गुणातिपात इति लक्षणं कथ्यते। यथा ग्रन्थकर्त्तुः चन्द्रकलानाटके चन्द्रमुद्दिश्य.

चन्द्रकला वक्ति—

यदि संह्रियते तमः धार्य्यते सकलैस्ते पादः।

वससि शिरसि पशुपतेस्तथापि हा स्त्रियाः जीवनं हरसि। (इति छाया)।

व्याख्या। हे चन्द्र यद्यपि त्वया तमः अन्धकारः संह्रियते विनाश्यते। यद्यपि सकलैः जनैः पादः किरणः चरणश्च धार्य्यते शिरसा सेव्यते, यद्यपि च त्वं पशुपते महादेवस्य शिरसि ललाटे वससि तिष्ठसि तथापि एतादृग् गुणवान् महान् च भवन्नपि (हा इति खेदे) त्वम् विरहविधुरायाः रमण्याः जीवनं हरसि तासां हृदये कामस्य उद्दीपनं विधाय तासां जीवनं दहसि इति भावः। अत्र महत्वगुणप्रतिकूलं नारीजीवनहरणरूपं कार्य्यम्—तेनात्र गुणातिपातः। श्रीरूपस्तु "गुणातिपातः कार्य्यं यद्विपरीताभिशंसनम्" इति परमतमुक्त्वा स्वमतम् तु इत्यम् आह—'गुणातिपातो व्यत्यस्तगुणाख्यानमुदाहृतः" इति। निन्दितभावेन गुणकीर्त्तनं गुणातिपात इत्यर्थः।

Eng. Tran.—Gunatipata is the action that militates against (one's) merits (virtues or magnanimity). As in my Chandrakala referring to the moon (it is said) Though you remove all darkness, though your feet—the light—is held by all (on their heads) and though you reside on the crest of Pasupati yet you take away the life of a woman.

Text—श्लोकः। यः सामान्यगुणोद्रेकः स गुणातिशयो मतः।

वृत्तिः। यथा तत्रैव राजा (चन्द्रकलाया मुखं निर्दिश्य)

"असावन्तश्चञ्चद्विकचनवनीलाब्जयुगलस्तलस्फूर्ज्जत्कम्बुविल-

सदलिसंघात उपरि।

विना दोषासङ्गं सततपरिपूर्णाखिलकलः कुतः प्राप्तश्चन्द्रो
विगलितकलङ्कः सुमुखि ते ॥

मित। यः सामान्यगुणप्रसक्तिः साधारणगुणप्रसक्तिः स गुणातिशयो मतः। परम् इयं व्याखया न साध्वी इति मन्यामहे। यः सामान्यगुणात् उपमानस्य तथा उपमेयस्य च साधारणधर्म्मात्—उद्रेकः उपमेयस्थितस्य कस्यचित् विशिष्टगुणस्य आधिक्यप्रदर्शनं स एव गुणातिशय इति लक्षणं कथ्यते। तथाहि उक्तं श्रीरुपेण—

वहून् गुणान् कीर्त्तयित्वा सामान्यत्वेन संश्रितान्
विशेषः कीर्त्यते यत्र ज्ञेयः सोऽतिशयोवुधैः ॥

दृष्टान्तो यथा चन्द्रकलायाम्--तत्र चन्दकलायाः मुखम् उल्लिख्य राजा तत् वर्णयति। अथ श्लोकव्याखरा--हे सुमुखि। दोषासङ्गं रात्रि-सम्पर्कं विना अपि कुतः कस्मात् स्थानात् ते त्वया (अत्र तृतीयार्थे षष्ठी यथा श्रीसप्तशत्याम्—विष्णीः शरीरग्रहणमहमीशान एव ते कारिताः इत्यादि) असौ मुखरुपः विगलितकलङ्कः कलङ्करहितश्चन्द्रः प्राप्तः। मुखरुपं चन्द्रं विशेषयति—सततपरिपूर्णाखिलकलः तथा अन्तश्चञ्चद्विकचनव-नीलाब्जयुगलः अन्तर्मध्यदेशे चञ्चत् विलसन् बिकचं प्रस्फटितं नवं नूतनं नीलाब्जयुगलं नेत्रद्वयरुपं नीलकमलद्वयं यस्मिन् तादृशः; तथाच तलस्फूर्जत् कम्वुतले अधोदेशे स्फूर्जन् शोभमानः कम्वुः ग्रीवारुपः शङ्खः यस्मिन् तादृशः। एवं च उपरि ऊर्द्ध्वदेशे विलसन् बिचरन् अलिसंघातः भ्रूयुगलरूपः भ्रमरपङ्क्तिर्यस्मिन् तादृशः। अत्र उपमानःचन्दः—उपमेयः मुखं। परं चन्द्रात् मुखस्य उत्कर्षोत्र सूचितः—'विगलितकलङ्कः" इति कलङ्कहीनत्वधर्म्मेण। अतएव अत्र अतिशयः वा गुणातिशयोनाम्—लक्षणम्। व्यतिरेकालङ्कारश्च कथमपि लक्ष्यते।

Eng. Tran.—Gunatisaya (Atisaya) is the description of some special qualification through comparison. As therein too, king (pointing to the face of Chandrakala) says :—

Oh fair-faced lady wherefrom have you come by this moon—without any reference to the night, the moon in which exists two fresh bloomed and shining blue lotuses, which glimmers like the conch-shell and over which hover the row of bees—this moon which is always endowed with perfect beauty and is free from stigma.

Text—श्लोकः। सिद्धानर्थान् वहूनुक्त्वा विशेषोक्ति र्विशेषणाम्।

वृत्तिः। यथा—

"तृष्णापहारी बिमलो द्विजावासो जनप्रियः। ह्रदः पद्माकरः किन्तु वुधस्त्वं स जलाशयः॥

मित—। अथ विशेषणंनाम लक्षणं लक्षयति—बहून् अनेकान् सिद्धान् प्रख्यातान् अर्थान् बिषयान् उपमानोपमेयगतान् सामान्यधर्म्मान् इत्यर्थः उक्त्वा घोषयित्वा बिशेषोक्तिः उपमेयगतस्य कस्यचित् विशिष्टस्य धर्म्मस्य निर्द्देशः विशेषणम् इति लक्षणं स्यात्। तथाहि—"सिद्धान् वहून् प्रधानार्थानुक्त्वा यत्र प्रयुज्यते। विशेषयुक्तं बचनं बिज्ञेयं तद्विशेषणमिति" नाटकचन्द्रिका। उदाहरणं यथा—अस्मिन् श्लोके। अथ श्लोकव्याख्या—ह्रदः एवं त्वम् च तृष्णापहारी। ह्रदस्तु जलदानेन पिपासानिवारकस्त्वं च धनदानेन धनतृष्णाहारकः। ह्रदः विमलः त्वमपि बिमलः निष्पापः। ह्रदो द्विजानां पक्षिणाम् आवासः वासस्थानं, त्वमपि द्विजानां विप्राणाम् आबासः आश्रयः। ह्रदः जनप्रियः त्वमपि तादृशः। ह्रदः पद्मानाम् कमलानाम् आकरः उत्पत्तिस्थानं त्वमपि पद्मायाः लक्ष्म्याः आकरः खनिः। इति एतैः उपमानोपमेययोः प्रसिद्धान् सामान्यधर्म्मान् कथयित्वा अधुना उपमेयस्य विशिष्टधर्म्मं वक्ति—किन्तु परं स जलाशयः जलाधारः। अपि च डलयोर भेदात् जडाशयः मूढमतिरितिभावः। त्वं न तथा, किन्नु त्वं वुधः प्राज्ञः।

Eng. Tran.--Vishesana is the starting of some distinguishing characteristic after having spoken of so many common feautures.

As—The lake is the quencher of thirst and you too do away with the thirst for wealth ; both of you are popular and spotless ; the lake is the abode of birds—you, too, the resort of Brahmanas ; the lake is the source of lotuses and you of prosperity ; but the lake is but the reservoir of water and consequently dull ; whereas you are wise.

Text—श्लोकः। पूर्व्वसिद्धार्थकथनं निरुक्तिरिति कीर्त्त्यते।

वृत्तिः। यथा वेण्याम्—"निहताशेषकौरव्यः क्षीवो दुःशासनासृजा।

भङ्क्ता दुर्योधनस्योर्वोर्भीमोयं शिरसानतः॥

मित—। पूर्व्वं प्रागेव सिद्धस्य निष्पन्नस्य अर्थस्य विषयस्य कथनम् घोषणम् निरुक्तिरिति कीर्त्त्यते। यथा—वेणीसंहारे निहताशेषकौरव्य इत्यादिना पूर्व्वसिद्धाखिलकौरवहननकथनात् अत्र निरुक्तिर्मता। श्रीरूपस्तु निरुक्तम् इति पठित्वा तस्य अन्यप्रकारं लक्षणं कृतवान्, यथा नाटकचन्द्रिकायाम् "निरुक्तं निरवद्योक्तिः अर्थप्रसिद्धये"।

Eng. Tran.—Nirukti is the statement of the affair—already accomplished.

As in the Venisambara—I Bhima mad with Dussasana blood, the breaker of Duryodhana-thigh having killed all the Kauravas bow down to you and so forth.

Text—श्लोकः : बहूनां कीर्त्तनं सिद्धिरभिप्रेतार्थसिद्धये।

वृत्तिः। यथा—"यद्वीर्य्यं कूर्म्मराजस्य यश्च शेषस्य विक्रमः। पृथिव्या रक्षणे राजन्नेकत्र त्वयि तत् स्थितम्"।

मित —। अभिप्रेतस्य अभिलषितस्य अर्थस्य वस्तुनः सिद्धये बहूनाम वस्तूनाम कीर्त्तनम् कथनं खलु सिद्धिर्नाम् लक्षणं स्यात्। यथा—हे राजन् इत्यत्र। श्रीरूपस्तु अत्र प्रसङ्गे "कश्चित्" इत्यनेन साहित्यदर्पण-लक्षणम् उद्धृत्य स्वमतं प्रदर्शितवान् इत्थम्—तद् यथा नाटकचन्द्रिकायाम् "अतर्कितोपपन्नः स्यात् सिद्धिरिष्टार्थसङ्गम" इति।

Eng. Tran.—Siddhi is the statement of many a thing to serve one's own end.

As—Oh king, the prowess of the (cosmic) tortoise-chief as well as of the (cosmic) serpent king, rests together on you for the protection of the earth.

Text—श्लोकः। दृप्तादीनां भवेद् भ्रंशो वाच्यादन्यतरद्वचः।

वृत्तिः। यथा—वेण्याम् कञ्चुकिनं प्रति दुर्योधनः—

"सहभृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्। स्वबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम्।

मित —। दृप्तादीनां गर्व्वोद्धतप्रभृतीनां। आदिपदेनात्र आनन्दितानाम् दुःखितानाम् चञ्चलानाञ्च ग्रहणम्। तथाहि गर्व्वितानाम् आनन्दितानां दुःखितानां चञ्चलानां च दृप्तादीनाम् अतिशयात् वाच्यात् वक्तव्यविषयात् यत् अन्यतरद् वचः अन्यप्रकारं वाक्योच्चारणम् तदेव भ्रंशो नाम लक्षणम् उच्यते। यथा—वेणीसंहारे दुर्योधनः कञ्चुकिनं वक्ति। श्रीरूपस्तु साहित्यदर्पणमतं "कश्चिदाह" इति उक्त्वा स्वमतं इत्थम् लिखति, यथा नाटकचन्द्रिकयाम्।

"पतनात् प्रकृतादर्थादन्यस्मिन् भ्रंश ईरितः॥"

Eng. Tran.—Bhramsa is the utterance, by the haughty and the like, of something other than what is intended to be spoken.

As in the Veni, Duryyodhana says to the Chamberlain—Very soon, the son of Pandu will kill, by his own prowess, Suyodhana—with his followers, friends, relatives, sons and brothers in the battle.

Text —श्लोकः। विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः।

वृत्तिः। यथा—

मत्वा लोकमदातारम् सन्तोषेयैः कृतामतिः। त्वयि राजनि ते राजन्! न तथा व्यवसायिनः।

मित। सन्देहात् सन्देहवशात् विचारस्य पूर्व्वसिद्धान्तस्य अन्यथाभावः अन्यप्रकारेण अवधारणम् विपर्य्ययोनाम लक्षणं स्यात। उक्तं हि श्रीरूपेण विचारस्यान्यथाभावो विज्ञेयस्तद्विपर्य्ययः इति। दृष्टान्तो यथा—अस्मिन् श्लोके। ते पूर्व्वोक्ताः जनाः न तथा तादृशम् व्यवसायिनः चेष्टिनः—अधुना ते तादृशम् सिद्धान्तं न कुर्व्वते, अपितु भवन्तमेव याचन्ते इत्यर्थः। अत्र पूर्व्वसिद्धान्तस्य अन्यथाभावात् विपर्य्ययः।

Eng. Tran.—Viparyaya is the changing (re-shaping or re-modelling) of (former) conclusion (decision), due to doubt.

As in—Those fellows—who adopted (took recourse to) contentment, thinking the people uncharitable, now do not follow that course, you being crowned king, Ho your Majesty.

Text—श्लोकः। दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम्।

वृत्तिः। वाचा यथा—प्रसाधय पुरीं लङ्काम् राजा त्वं हि विभीषण!

आर्य्येणानुगृहीतस्य न विघ्नः सिद्धिमन्तरा॥

एवं चेष्टयापि (भवति)।

मित—। चेष्टया कर्म्मणा तथा वाचावाक्येन वा परचित्तस्य अन्यजनस्य मनसः अनुवर्त्तनम् अनुसरणम् अनुरञ्जनमिति यावत् तत् दाक्षिण्यमुच्यते। तत्र "वाचा" इति अस्य दृष्टान्तो यथा अस्मिन् श्लोके अत्र चेष्टया परच्चित्तस्य अनुवर्त्तने अपि दाक्षिण्यं स्यात्। परं श्रीरूपः तत् न गणयति यथा नाटकचन्द्रिकायाम्--दाक्षिण्यन्तु भवेद्वाचा परचित्तानुवर्त्तनम्।

Eng. Tran.—Dakshinya is the entertaining of or following another's mind with words or deeds. With deeds as, Bibhisana ! you are (now) the king and (therefore) grace the city of Lanka (by your presence). Obstacle does not come in the way of those—whom my venerable brother takes into his favour. [N. B.—Similarly चेष्टया परचित्तानुवर्त्तन is in the Sakuntala 'तदहमेनामनृणां करोमि—इत्यङ्गुलीयकं ददाति'']।

Text—श्लोकः। वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम्।

वृत्तिः। यथा— वेणयाम् अश्वत्थामानं प्रति कृपः— दिव्यास्त्रग्रामकोविदे भारद्वाजतुल्यपराक्रमे किं न सम्भाव्यते त्वयि ?"

मित—। स्निग्धैः मधुरैस्तथा स्नेहप्रकाशकैः वाक्यैः अर्थस्य ईप्सितस्य कार्य्यस्य साधनं निष्पादनम् अनुनयो भवेत्। तथाहि श्रीरुपः—"अभ्यर्थनापरं वाक्यं विज्ञेयोऽनुनयो बुधैः"।

Eng. Tran.—Anunaya is the establishing of one's own desired purpose through sweet and affectionate words. As in the Venisamhara, Kripa says to Aswathama—what is not possible with you (what cannot be accomplished by you) who are as valourous as Bharadwaja and are experienced (expert) in the (use of) divine missiles.

Text—श्लोकः। माला स्याद् यदभीष्टार्थम् नैकार्थप्रतिपादनम्।

वृत्तिः । यथा शाकुन्तले राजा—

किं शीकरैः क्लमविनोदिभिरार्द्रवातं सञ्चालयामि नलिनीदलताल-वृन्तैः । अङ्के निवेश्य चरणावुतपद्मताम्रौ संवाहयामि करभोरु, यथा—सुखंते ।

मित । अथ माला नाम लक्षणं विवृणोति । अभीष्टार्थं ईप्सित-वस्तुसम्पादनार्थम् यत् नैकार्थप्रतिपादनम् वहुविषयज्ञापनं सा माला । न एकार्थ इत्यत्र सन्धिरेव न तु समासः । अनेकार्थप्रकाशनम् इत्येव तस्य अर्थः ।

Eng. Tran.—Mala is the expression of many subjects (presentation of many topics) for the accomplishment of one's own object. As in the Sakuntala, King—Oh one with a thigh—like the outer edge of the palm, shall I (waver) move the breeze—wet with the drops of water —that allay fatigue, with a fan of the Palm-leaf ? or shall place your lotus—red feet on my lap and shampoo them in an agreeable manner ?

Text—श्लोकः । अर्थापत्तिर्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते ।

वृत्तिः । यथा वेणयाम्—"द्रोणोऽश्वत्थामानम् राज्ये अभिषेक्तु-मिच्छतीति कथयन्तं कर्णं प्रति, राजा - साधु अङ्गराज । साधु ! (कथमन्यथा ?)—

"दत्वाभयं सोऽतिरथो बध्यमानं किरीटिना । शिन्धुराजमुपेक्षेतनैवं चेत्— कथमन्यथा ॥ मित—अन्यः अर्थः अर्थान्तरम् । तस्य उक्तिः । अर्थान्त-रोक्तेः—अन्यार्थस्य कथनात, यत् अन्यार्थकथितात् अर्थात् अन्योऽर्थः प्रतीयते सा अर्थापत्तिः ।

तथाहि श्रीरूपः—उक्तार्थानुपपत्त्यान्यो यस्मिन्नर्थः प्रकल्प्यते ।

वाक्यान्माधुर्य्यसंयुक्तात् सार्थापत्तिरुदाहृता ॥

दृष्टान्तो यथा वेणीसंहारे—तत्र द्रोणस्य स्वार्थसिद्धिसाधकम् अभिप्रायम् श्रुत्वा कर्णं प्रति दुर्योधनः कथयति।

अत्र सिन्धुराजवधस्य उपेक्षारूपस्य अर्थान्तरस्य कथनात् द्रोणेन राज्ये अश्वत्थामाभिषेकेच्छारूपस्य वस्तुनः प्रतीतिस्तेनात्र अर्थापत्तिः।

Eng. Tran.—Arthapatti is the appearance of another fact from the statement of one fact. As in the Venisamhara—where, the king says—"Bravo! King of Anga! Bravo!—" to Karna—who avers that Drona wants to instal Aswathama in the kingdom;—Had it not been so, that great hero would not have allowed the King of Sindhu to have been killed by Arjuna after having pledged him safety.

Text—श्लोकः। दूषणोद्घोषणायान्तु भर्त्सना गर्हणन्तु तत्।

वृत्तिः। यथा तत्रैव—कर्णं प्रति अश्वत्थामा—

"निर्व्वीर्य्यं गुरुशापभाषितवशात् किं मे तवेवायुधं
संप्रत्येव भयाद्विहाय समरं प्राप्तोऽस्मि किं त्वं यथा।
जातोऽहम् स्तुतिवंशकीर्त्तनविदां किं सारथीनां कुले
क्षुद्रारातिकृताप्रियं प्रतिकरोम्यस्रेण नास्त्रेण किम्॥"

मित—। दूषणस्य निन्दायाः उद्घोषणायाम्, प्रकाशन-व्यापारे या भर्त्सना तत् तु गर्हणं नाम लक्षणम्। दृष्टान्तो यथा—वेणीसंहारे कर्णं प्रति अश्वत्थामनः उक्तौ। क्षुद्रेण हीनवीर्य्येण अरातिना रिपुना कृतम् साधितम् अप्रियम् अनिष्टम् किम् अहम् अस्रेण नयनजलेन रोदनेन इति भावः प्रतिकरोमि निर्यातयामि. न अस्त्रेण? अवश्यमेव अस्त्रेण वैरनिर्यातनम् करिष्यामिइति भावः। अत्र कर्णस्य दूषणोद्घोषणायाम् अश्वत्थाम-कर्त्तृकम् भर्त्सनम्—अत एवात्र गर्हणं नाम लक्षणम्। श्रीरूपस्तु गर्हणस्य किञ्चिदन्य-प्रकारं लक्षणं कृतवान्, यथा नाटकचन्द्रिकायाम्—

"यत्र सङ्कीर्त्तयन् दोषान् गुणमर्थेन दर्शयेत्। गुणान् वा कीर्त्तयन्दोषं दर्शयेत् गर्हणं हि तत्"। अतएव तन्मते गर्हणम् द्विविधम्—यथा दोष कीर्त्तनतया पर्य्यवसितम् गुणकीर्त्तनम्, एव गुणकीर्त्तनतया पर्य्यवसितं दोषकीर्त्तनं च।

Eng. Trans.—Garhana is the reproach with reference to some person in connection with laying bare his demerits. As therein too, Aswathama—to Karna : Is it that my missiles are powerless due to the curse-pronounced by preceptor just like those of yourself? Have I come away from the battle out of fear like you? Am I born in the line of panegyrists that (only) know how to eulogise and describe dynasties? Shall I avenge the wrong done unto me by an insignificant foe with tears and not with weapons?

Text—श्लोकः। अभ्यर्थनापरैर्वाक्यैः पृच्छार्थान्वेषणं मतम्॥

वृत्तिः। यथा तत्रैव सुन्दरकः—अज्जा! अवि णाम सारथिदुदिओ दिट्ठो तुम्हेहि महाराओ दुज्जधनो ण वेति।

मित—। अभ्यर्थनापरैः श्रद्धासूचकैः वाक्यैः अर्थान्वेषणम् स्वाभिलषितविषयानुसन्धानं अन्वेषणं पृच्छा नाम लक्षणं मतम्। दृष्टान्तो यथा वेणीसंहारे सुन्दरकः कथयति—आर्य्याः अपि नाम सारथिद्वितीयः दृष्टो युष्माभि र्महाराजो दुर्य्योधनो न वेति। अत्र "आर्याः" इति श्रद्धासहकारेण दुर्य्योधनस्य अन्वेषणात् पृच्छा। श्रीरूपस्तु, अस्य लक्षणान्तरं विधत्ते यथा—"प्रश्न एवोत्तरं यत्र पृच्छा सा परिकीर्त्तिता।" यस्मिन् प्रश्नसूचके वाक्ये तस्य प्रश्नस्य उत्तरमपि श्लेषादिना लभ्यते तत् वाक्यम् पृच्छानाम लक्षण (भूषणं) स्यादिति तस्य अभिप्रायः।

Eng. Tran.—Prichha is the quest for the desired object with conciliatory words. As therein too ; Sundaraka (says)—Gentlemen ! (noble sirs !) have you beheld king Duryyodhana with his charioteer ?

Text—श्लोकः। "प्रसिद्धि र्लोकसिद्धार्थैरुत्कृष्टै रर्थसाधनम्"।

वृत्ति। यथा विक्रमोर्वश्याम् राजा -

सूर्य्याचन्द्रमसौ यस्य मातामहपितामहौ। स्वयं कृतः पतिर्द्वाभ्या-मुर्व्वश्या च भुवा च यः॥

मित—। उत्कृष्टैः उत्तमैस्तथा लोकेषु भुवनेषु सिद्धैः प्रख्यातैः अर्थैः विषयैः अर्थस्य अभीष्टस्य वस्तुनः साधनं हि प्रसिद्धि र्नाम लक्षणम्। तथाहि "प्रसिद्धिर्लोकविख्यातैरर्थैः स्वार्थप्रसाधनमिति" श्रीरूपः। दृष्टान्तो यथा श्रीकालिदासकृतायाम् विक्रमोर्व्वश्याम् राजा पुरूरवाः कथयति—

अत्र प्रसिद्धाभ्याम् सूर्य्यचन्द्राभ्याम तथा प्रसिद्धया उर्व्वश्या भुवा च आत्मनः परिचयप्रदानात् प्रसिद्धिः।

Eng. Tran.—Prasiddhi is the accomplishment of one's own object (that is presenting one's own case) through excellent things wellknown in the world. As in the Vikramorassi—The king (says)—whose paternal and maternal grand—fathers are (respectively) the sun and the moon and who has been chosen (selected or wooed) husband of their own accord by Urvasi as well as by the Earth.

Text—श्लोकः। सारुप्यमभिभूतस्य सारुप्यात् क्षोभवर्त्तनम्।

वृत्तिः। यथा वेणयाम्—दुर्योधनभ्रान्त्या भीमं प्रति युधिष्ठिरः—

"दुरात्मन्। दुर्योधनहतक।" इत्यादि।

मित—। सारुप्यमनुभूतस्य (अनुरुपस्य वा) सारुप्यात् क्षोभवर्धन-मित्यपि पाठो दृश्यते। स एव साधीयान्। उक्तं हि श्रीरुपेण नाटकचन्द्रिकायाम्—"दृष्टश्रुतानुभूतार्थकथनादिसमुद्भवम्। सादृश्यं यत्र संक्षोभात् तत् सारूप्यं निरुप्यते" इति। अस्य व्याख्या—अभिभूतस्य पराजयादिना मनोव्याधिना वा क्लिष्टस्य जनस्य सारुप्यात् प्रतिपक्षजनस्य तुल्यरुपदर्शनात् क्षोभेन चित्तवैकल्येन विषादेन वा यत् वत्तनम् आचरणम् अनुष्ठानं वा तत् सारुप्यम् उच्यते। सुस्पष्टो दृष्टान्तः।

Eng. Tran.—Sarupya is the disgustful attitude of a dejected person against one—bearing similarity to his object of disgust. As in the Venisamhara—Yudhisthira says to Bhim—taking him for Duryyodhana—Rascal! wretched Duryyodhaaa! and so forth.

Text—श्लोकः। संक्षेपो यत्तु संक्षेपादात्मान्यार्थे प्रयुज्यते।

वृत्ति'। यथा मम चन्द्रकलायाम्—राजा "प्रिये! अङ्गानि खेदयति किम् शिरीषकुसुमपरिपेलवानि मुधा। (आत्मानं निर्दिश्य) अयमीहितकुसुमानां सम्पादयिता तवास्मि दासजनः"।

मित—। संक्षेपात् वाक्यसंक्षेपम् आश्रित्य इति ल्यब्लोपे पञ्चमी, संक्षिप्तवाक्यम् कथयित्वा इत्यर्थः आत्मा यत् तु अन्यार्थे अपरस्य जनस्य प्रयोजनसाधने प्रयुज्जते तत्तु संक्षेपोनाम् लक्षणम्। दृष्टान्तो यथा ग्रन्थकर्त्तुरेव चन्द्रकलारुपके—राजा प्रियामुद्दिश्य वक्ति—

अहम् ते दासः—अतएव अहमेव तव अभीष्टानि कुसुनानि तव कृते अन्वेष्यामीति भावः। अत्र संक्षिप्तवाक्येन राजा आत्मानम् अपरस्य प्रयोजनसाधने नियोजयतीति अनेन हेतुनात्र संक्षेपः। श्रीरुपस्तु संक्षेपं न पठति।

Eng. Trans.—Samksepa is that in which one employs his ownself in the service of another with a brief

introduction or statement—As in my Chandrakala—King, My darling ! why are you putting your Sirisa-like delicate limbs to trouble for nothing. (Pointing to his own self)—

Here stands your servant (attendant) who is to pluck the flowers, that you like.

Text—श्लोकः। गुणानां कीर्त्तन यत्त् तदेव गुणकीर्त्तनम्।

वृत्ति। यथा तत्रैव—नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि मुखम् इत्यादि।

मित—। गुणानां नायकनायिकादि—गतानां सौन्दर्य्यादीनाम् यत् कीर्त्तनं घोषणं तदेव गुणकीर्त्तनं इति लक्षणम् उच्यते। श्रीरूपस्तु अत्र लक्षणे कश्चित् विशेषं निर्द्दिष्ठवान्—

यथा—"लोके गुणातिरिक्तानां बहूनां यत्र नामभिः।

एकः संशव्यते तत्त् बिज्ञेयं गुणकीर्त्तनम्।

दृष्टान्तो—यथा चन्द्रकलायाम् तृतोयपरिच्छेदे नेत्रे इत्यादि। अत्र नायिकाया सौन्दर्य्यगुणकीर्त्तनात् गुणकीर्त्तनम्।

Eng. Tran.—Gunakırtana is the mentioning of the qualities (of some body). As therein, too—The eyes put those of the Khanjana birds into the back ground etc.

Text—श्लोकः । स लेशो भण्यते वाक्यं यत् साहृश्यपुरःसरम्।

बृत्तिः। यथा वेणयाम्—राजा।—

हते जरति गाङ्गेयेपुरस्कृत्य शिखण्डिनं। या श्लाघा पाण्डुपुत्राणाम् सैवास्माकं भविष्यति॥

मित—। अथ लेशनामलक्षणं प्रदर्शते। यत् साहृश्यपुरःसरम् साहृश्यप्रदर्शनाभिप्रायमूलकं वाक्यम् स लेश इति भण्यते। दृष्टान्तो यथा वेणीसंहारे—सप्तभिः रथिभिः अभिमन्योर्वधे तादृशी एव श्लाघा

भविष्यति इत्यादि। अत्र तुलनाप्रदर्शनाभिप्रायमूलकं वाक्यं—तेनात्रलेशः। श्रीरुपस्तु अत्र लक्षणान्तरं कृतवान् यथा नाटकचन्द्रिकायाम्—'लेशः स्यादींक्षितज्ञानकृत् विशेषणवद्वचः'' इति।

Eng. Tran—Lesha is said to be that statement in which a comparison is drawn.

As in the Venisanhara—King, we shall have that type of boast which the sons of Pandu had, when the old Bhisma was killed (by Arjuna) after having placed Sikhandin in the fore front.

Text—श्लकः। मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत्।

वृत्तिः। यथा—रतिकेलिकलः कश्चिदेपमन्मथमन्थरः।

पश्य सुभ्रू * समाश्वस्तां कादम्वश्चुम्वति प्रियाम्।

मित—। यत् भङ्गयन्तरेण भङ्गीविशेषेण कोशलसहकारेण इत्यर्थः अभिप्रायस्य इष्टस्य भावस्य उक्तिः प्रकाशनं स एव मनोरथ इति कथ्यते। उक्तं हि श्रीरुपेण "मनोरथस्तु व्याजेन विवक्षितनिवेदनम्।" दृष्टान्तो यथा अत्र श्लोके। अत्र वक्तुः नायकस्य चुम्वनाभिलाषः अनेन कादम्बचुम्वनव्याजेन नायिकायै निवेदितः इति अत्र मनोरथः।

Eng. Tran.—Manoratha is expression of one's desire on some pretext or in some particular (peculiar) mode.

As—Just see—oh fair eyed one! this swan that is slow through the influence of passion and cackling indistinctly in love sport, is kissing his beloved one—who is in her high spirits. (* for gram. in सुभ्रू see our Kum. V sl 43 and काव्यादर्श)।

Text—श्लोकः। विशेषार्थोऽतिविस्तारो (? अतिविस्तर) अनुक्तसिद्धिरुदीर्यते।

वृत्तिः। यथा गृहवृक्षवाटिकायाम्—

"दृश्येते तन्वि। यावेतौ चारुचन्द्रमसंप्रति। प्राज्ञे कल्याण—नामानावुभौ तिष्यपुनर्वसू।

मित—। विशेषार्थः कस्यचित् विशेषस्य उत्कर्षस्य इति यावत् ज्ञापननिमित्तः स अतिविस्तारः (? अतिविस्तरः इति युक्तः "प्रथने वावशब्दे" सूत्रेण) आतिशय्यप्रापणव्यापारः अभेदरूपातिशयोक्तिः इति यावत् सा अनुक्तसिद्धिरिति उदीर्य्यते कथ्यते। यथा—गृहवृक्षवाटिकायाम् अयं श्लोकोऽस्य दृष्टान्तः। तस्य व्याख्या—हे तन्वि कृशाङ्गि चारुचन्द्रमसं प्रति उभयतः यौ एतौ दृश्यते, हे प्राज्ञे। तौ कल्याणनामानौ मङ्गलसंज्ञकौतिष्यपुनर्वसू इति नक्षत्रे। तिष्यपुनर्वसुतुल्यसुन्दरौ इत्यर्थः रामलक्ष्मणौ विश्वामिमुभयतः तिष्ठन्तौ दृष्ट्वा शिवधनुर्भञ्जनात् प्रागेव सीतां प्रति कस्याः उक्तिरियम्। अत्र विश्वामित्र रामलक्ष्मणानां सौन्दर्य्यातिशयज्ञापनार्थं तेषु चन्द्रपुष्यपुनर्वसूनाम-भेदारोपातिशयोक्तेरनुक्तसिद्धिरिति श्रीमान् सिद्धान्तवागीशः। परम् श्रीरूपेण अस्य व्याख्यान्तरं कृतं यथा—प्रस्तावेनैव शेपार्थो यत्रानुक्तोऽपि बुध्यते, अनुक्तसिद्धिरेपास्यादित्याह भरतमुनिरिति" नाटकचन्द्रिकायाम्। इदमेव लक्षणं साधीय इति मन्यामहे अनुक्तस्य अकथितस्य अपि सिद्धिः प्रस्तावप्रसङ्गात् इति व्युत्पत्त्या।

Eng. Tran.—Anukta-Siddhi is said to be that in which something is taken to be identical with another thing in order to lay stress on some special feature.

As in the Vrikshavatika—

Those two—oh slender one—which are visible by the side of the beautiful moon, are the auspicious stars Tisya and Punarvasu—Oh wise one.

Text—श्लोक। स्यात् प्रमाणयितुं पूजा प्रियोक्ति र्हर्षभाषणम्।

वृत्तिः। यथा शाकुन्तले—

"उदेति पूर्व्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः
निमित्तनैमित्तिकयोरयं विधिस्तव प्रसादस्य पुरस्तु सम्पदः ॥

तित—। पूज्यं पूजार्हं जनं प्रमाणयितुम् मानयितुम्—तस्य उत्कर्षं ख्यापयितुम् इत्यर्थः यत् हर्षभाषणम् आनन्दोच्छ्वासप्रकाशकं वाक्यं तत् प्रियोक्तिर्नाम लक्षणं। श्रीरूपेण एतद्धि मधुरभाव इति कथ्यते। दृष्टान्तो यथा अभिज्ञानशकुन्तलनाटके मारीचं प्रमाणयितुम् दुष्यन्तस्य राज्ञः हर्षभाषणम्। कार्य्यकारणपौर्व्वपर्य्यातिक्रमी हि भवतो महिमा इति भावः।

Eng. Tran.—Priyokti is the delightful statement made to make much of (made to show excellence of) a superior personage (a man of high order). As in the Sakuntala—first the flower blossoms then appears the fruit ; first the cloud rises (in the sky)—and then comes downpour (of rain). Such is the law of cause and effect ; but fortune smiles upon one before your favour is extended (to any one)—that is before one is graced by you.

Text—वृत्तिः। अथ नाट्यालङ्काराः।

मित—। "षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा,
त्रयस्त्रिंशत् यथायोग्यं प्रयोज्यानि" इत्यादि प्रागेव कथितं ग्रन्थकारेण।

तत्र षट्त्रिंशत् संख्याकानि लक्षणानि व्याख्यातानि। एतानि एव लक्षणानि श्रीरूपेण "भूषणानि" इति वा कृतसंज्ञानि। यथा नाटकचन्द्रिकायाम्—"षट्त्रिंशत् भूषणानि हि"। एतानि तु सन्ध्यङ्गान्येव च। उक्तं हि श्रीरूपेण—"सन्ध्यङ्गान्तराण्यनुक्त्वैव भूषणं लक्षणाख्यया प्रोच्यते" इति। अत्र पि "एषाञ्च एकरूपत्वेपि भेदेन व्यपदेशः" इत्यत्र द्रष्टव्यम्।

अथ लक्षणानां कथनात् अनन्तरं त्रयस्त्रिंशत् नाट्यालङ्कृतयः विव्रियन्ते।

एतानि सर्व्वाणि नाट्यालङ्करणानि तु श्रीभरतस्य न सम्मतानि। उक्तं हि श्रीरूपेण नाटकचन्द्रिकायाम्—

"प्रोच्यतेऽन्यत्त्रयस्त्रिंशत्संख्यकैश्चिद्विभूषणं।
मुनेरसम्मतत्वेन तत्तु सर्व्वमुपेक्षितम्" ॥

Eng. Tran.—Now are being spoken of the Natyalankaras.

Text—श्लोकः। आशीराक्रन्दकपटाक्षमा गर्व्वोद्यमाश्रयाः।
उत्प्रासनस्पृहाक्षोभपश्चात्तापोपपत्तयः ॥ आशंसाध्यवसायौ च विसर्पोल्लेखसंज्ञितौ।
उत्तेजनं परीवादो नीतिरर्थविशेषणं प्रोत्साहनञ्चसाहाय्यमभिमानोऽनुवर्त्तनम्।
उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम् ॥ प्रवर्त्तनाख्यानयुक्ति-प्रहर्षाश्चोपदेशनम्।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः ॥

मित—। अथ त्रयस्त्रिंशत्संख्यकाः नाटालङ्काराः संज्ञाभिर्निर्दिश्यन्ते—

(१) आशीः (२) आक्रन्दः (७) कपटम् (४) अक्षमा (५) गर्व्वः (६) उद्यमः (७) आश्रयः (८) उत्प्रासनं (९) स्पृहा (१०) क्षोभः (११) पश्चात्तापः (१२) उपपत्तिः (१३) आशंसा (१४) अध्यवसायः (१५) विसर्पः (१६) उल्लेखः (१७) उत्तेजनं (१८) परीवादः (१९) नीतिः (२०) अर्थविशेषणं (२१) प्रोत्साहनं (२२) साहाय्यं (२३) अभिमानः (२४) अनुवर्त्तनं (२५) उत्कीर्त्तनं (२६) याच्ञा (२७) परीहारः (परिहारः) (२८) निवेदनं (२९) प्रवर्त्तनं (३०) आख्यानं (३१) युक्तिः (३२) प्रहर्षः (३३) उपदेशनं। एताः नाट्यालङ्कृतयः नाट्यस्य दृश्यकाव्यस्य भूषण-

हेतवः शोभाकारणानि सौष्ठवोत्पादिकास्तेन च उत्कर्षवर्द्धिका इत्यादि। एताअपि सन्ध्यङ्गानि भवितुम् अर्हन्ति।

Eng. Tran.—Asis, Akranda, Kapata, Akhsama, Garva, Udyama, Asraya, Utprasana, Spriha, Khsobha, Paschattapa, Upapatti, Asamsa, Adhyavasaya, Visarpa, Ullekha, Uttejana, Parivada, Niti, Arthaviseshana, Protsaha, Sahayya, Abhimana, Anuvartana, Utkirtana, Yachna, Parihara, Nivedana, Pravartana, Akhyana, Yukti, Praharsa, Upadeshana—these (thirty three) are Natyalamkaras (and these are) the causes of the beauty of the drama—that is, these Natyalamkaras go on adding to the beauty or grandeur (elegance) of the drama. These may also be called सन्ध्याङ्ग।

Text—श्लोकः। आशीरिष्टजनाशंसा।

वृत्तिः। यथा

शकुन्तले—"यथातेरिव शर्म्मिष्ठा पत्युर्वहुमता भव।
पुत्रं त्वमपि सम्राजं सेव पुरुमवाप्नुहि।

मित—। आशीरित्यस्य अर्थस्तु इष्टाविष्कर'—कस्यचित् मङ्गलं भवतु इति एतदर्थे स्वाभिलाषप्रकाशनमित्यर्थः। अतएव इष्टजनस्य अभीप्सितस्य जनस्य आशंसा प्राप्तिशसनं:—दृष्टान्तो यथा, अभिज्ञानशकुन्तले शकुन्तलां प्रति मुनेरुक्तिः—अत्र अभिलषितस्य पुत्रलाभस्य आशंसनात् आशीरिति नाट्यालङ्कारः।

Eng. Tran.—Ashis is the expression of one's desire regarding some near and dear one. As in the Sakuntala—Be thou held in the high estimation of your husband—as was Sarmistha of Yayati. Beget, you too, an imperial son—just as she begot Puru.

Text—श्लोकः। आक्रन्द· प्रलपितं शुचा।

वृत्तिः। यथा वेण्यां—कञ्चुकी। हा देवि कुन्ति! राजभवन-पताके इत्यादि।

मित—। शुचा शाकेन प्रलपितं विलपनं खलु आक्रन्द इति नाट्यालङ्कारः स्यात्। दृष्टान्तो यथा वेणीसंहारे कुन्तीम् उद्दिश्य कञ्चुकिनः विलापे।

Eng. Tran.—Akranda is the wailing or lamentation due to grief. As in the Veni—Kanchukin (Chamberlain says) :—Alas ! Queen ! Kunti, the banner of the Royal Palace and so forth.

Text—कपटं मायया यत्र रूपमन्यद्विभाव्यते।

वृत्तिः। यथा कुलपत्यङ्के— मृगरूपं परित्यज्य विधाय कपटं वपुः।

नीयतेरक्षसा तेन लक्ष्मणोयुधि संशयम्॥

मित—। मायया मायावलेन यत्र अन्यत् रूपं मूर्त्तिरन्या काचित् मूर्त्ति विभाव्यते स्वीक्रियते धार्य्यते इति यावत्, तत्र कपटम् इति नाट्या-लङ्कारस्य अवस्थितिर्ज्ञेया। दृष्टान्तो यथा कुलपत्यङ्के—

अत्र मायया अन्यस्य रूपस्य परिग्रहात् कपटं ज्ञेयम्।

Eng. Tran.—Kapata occurs when a form other than what has been (already) noticed, is assumed through Maya (Magic or witchcraft). As in the Kulapati scene—Lakmana has been led to his life's risk by that Raksasa—that bade good-bye to his deer-body (i. e. appearance as a deer) which he took to through Maya (or that bade good bye to his false deer body) and has assumed his real one.

Text—श्लोकः। अक्षमा सा परिभवः स्वल्पोऽपि नाभिषह्यते।

वृत्तिः। यथा शाकुन्तले—राजा। भोः सत्यवादिन्। अभ्युपगतं तावदस्माभिः, (एवंविधा एव वयं इतिभावः)। किं पुनरिमामतिसन्धाय लभ्यते।

शार्ङ्गरवः। विनिपातः—इत्यादि।

मित—। स्वल्पः अपि सामान्यः अपि परिभवः अवमानना तिरस्कार इति यावत् यत्र न अभिषह्यते [विषह्यते वा पाठः] क्षम्यते, सा अक्षमा इति नाट्यालङ्कारः। अस्य दृष्टान्तो यथा अभिज्ञानशाकुन्तले।

Eng. Tran.—Akshama occurs—when even a little slight is not tolerated. As in the Sakuntala—King—Oh veracious one! that we are such is admitted by me; (or granted that we are of this type); but what will accrue to me by cheating (hood-winking) this simple lady ?

Sarangarva—Down fall.

Text—श्लोकः। गर्व्वोऽवलेपजं वाक्यम्।

वृत्तिः। यथा तत्रैव - राजा। ममापि नाम सत्त्वैरभिभूयन्ते गृहाः।

मित—। अवलेपजं अहङ्कारबिजृम्भितं वाक्यं वचनं गर्व्व इति नाट्यालङ्कारः स्यात्। दृष्टान्तो यथा शाकुन्तले - ममापीति। स्पष्टम्।

Eng. Tran.—Garbha is the statement expressive of one's pride. As therein, too,—King, What! even my palaces are being attacked by goblins ?

Text -श्लोकः। कार्य्यस्यारम्भ उद्यमः।

वृत्तिः। यथा कुम्भाङ्के रावणः—पश्यामि शोकविवशः अन्तकमेव तावत्।

मित—। कार्य्यस्य आरम्भः सूचनं उद्यमः इति नाट्यालङ्कारः स्यात्। यथा कुम्भाङ्के रावणः—स्पष्टम्।

Eng. Tran.—Udyama is the taking up of some duty or business. As in the Kumbhanka—Ravana—Overwhelmed with grief as I am, I shall meet (the God of) death (अन्तक) ।

Text—श्लोकः। ग्रहणं गुणवत् कार्य्यहेतोराश्रय उच्यते ।

वृत्तिः। यथा विभीषणनिर्भत्सनाङ्के "विभीषणः—राममेवाश्रयिष्यामि" इति ।

मित—। अथ आश्रयम् नाम नाट्यालङ्कारं व्याचष्टे - कार्य्यहेतोः कस्यचित् प्रयोजनस्य साधनाय गुणवत् उत्तमं ग्रहणं अवलम्बनम् उत्तमकार्य्यस्याश्रयग्रहणमित्यर्थः आश्रय उच्यते। यद्वा गुणवत्कार्य्यहेतोः ग्रहणं गुणवान् उत्तमो यः कार्य्यहेतुः कार्य्यसाधकः तस्य ग्रहणम् अवलम्बनम् आश्रय इति कथ्यते। दृष्टान्तो यथा -राणकर्त्तृकस्य बिभीषणस्य निर्भत्सनम् अवलम्ब्य विरचिते अङ्के - बिभीषणः रावणम् परित्यज्य आत्मकार्य्यसाधकम् उत्तमम् रामं खलु आश्रयितुम् इष्टवान् ।

Eng. Tran.—Asraya is the adoption of an excellent ally for the fulfilment of some purpose ; as in the act in which Vibhisana was reproached (by Ravana), he (Vibhisana) says—I shall certainly take recourse to Rama. etc.

Text—श्लोकः। उत्प्रासनन्तूपहासो योऽसाधौ साधुमानिनि ।

वृत्तिः। यथा शाकुन्तले—शार्ङ्गरवः राजन्! अथ पुनः पुर्व्ववृत्तान्तमन्यासङ्गात् विस्मृतो भवान् (?)—तत् कथम् अधर्मभीरोर्दारपरित्यागः।

मित—। साधुमानिनि आत्मानं यः साधुम् मन्यतेतादृशे असाधौ असज्जने यो उपहासः तत् उत्प्रासनं नाम नाट्यालङ्करणं, यथा अभिज्ञानशकुन्तले शकुन्तलाप्रत्याखयानेन साधुमानिनि दुष्यन्ते शार्ङ्गरवस्य उक्तिः।

Eng. Tran.—Utprasana is the taunt extended to a dishonest person—who thinks or considers himself honest.

As in the Sakuntala—Sarangarava—your Majesty, if however you have forgotten the old incident due to your intimacy with others (other ladies), then how can be justified the repudiation of the legally married wife by you who are afraid of impiety ?

Text—श्लोकः। आकाङ्क्षा रमणीयत्वाद्वस्तुनः या स्पृहा तु सा।

वृत्तिः। यथा तत्रैव राजा।

चारुणास्फुरितेनेयमपरिक्षतकोमलः। पिपासतो ममानुज्ञां ददातीव प्रियाधरः।

मित—। कस्यचित् वस्तुनः पदार्थस्य रमणीयत्वात् अभिरामत्वात् तत्र वस्तुनि या आकाङ्क्षा लालसा सा तु स्पृहा इति नाट्यालङ्कारो भवेत्। यथा शाकुन्तले अत्र रमणीये शकुन्तलावस्तुनि राज्ञः आकाङ्क्षा, तेन चात्र स्पृहा।

Eng. Tran.—Spriha is the desire for something which is charming.

As therein too, 'the King—the tender lip of my beloved one—that has not been yet been bitten by any body, seems to permit me (to kiss) by its beautiful (way of) throbbing.

Text—श्लोकः। अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु।

वृत्तिः। यथा—त्वयातपस्विचाण्डाल। प्रच्छन्नवधवर्तिना।

न केवलं हतो वाली स्वात्मा च परलोकतः।

मित—। अधिक्षेपः तिरस्कारः। अधिक्षेपवचः तिरस्कारसूचकं यत् वाक्यं तत् करोति तत् प्रकाशयीति यः क्षोभः चित्तविकारविशेषः स एव तु क्षोभ इति नाट्यालङ्कारः प्रोक्तः। यः क्षोभः तिरस्कारजनकं वाक्यं प्रकाशयति स एव क्षोभः क्षोभनामकं नाट्यालङ्करणं स्यादिति—

सरलार्थः। उक्तौ अत्र बालिनो यश्चित्तक्षोभः स राममुद्दिश्य तिरस्कारद्योतकं बाक्यं प्रकाशितवान् इति अत्र क्षोभनामा नाठ्याउङ्कारः ।

Eng. Tran. Kshobha is said to be the disgust which gives vent to reprochful utterance. As: Oh Chandala amongst ascetics! by secretly assassinating me, you have not only put an end to me, but also to your movement into the celestial regions.

Text--श्लोकः। मोहावधीरितार्थस्य पश्चात्तापः स एव तु।

वृत्तिः यथा—अनुतापाङ्के रामः किं देव्या नविचुम्बितोऽस्मि वहुशो मिथ्याभिशप्तस्तदा।

मित—। मोहात् वुद्धिभ्रंशवशात् अवधीरितः अवज्ञातः परित्यक्त इति यावत् अर्थः वस्तु स्वाभिलषितः विषयः इति यावत् येन तादृशस्य जनस्य च (?) पश्चात्तापः अवधीरणात् अनन्तरं कृतः अनुतापः स एव पश्चात्ताप इतिनाम नाठ्यालङ्कारः। दृष्टान्तो यथा अनुतापाङ्के—तदा मिथ्याभिशप्तः रावणगृहनिवासहेतोः व्यभिचारिणी इयं सीतेति अलीकलीकापावाद—विषयीभूतः अहं किं देव्या सीतया न वहुशः वहुवारं विचुम्बितोऽस्मि। अत्र मोहात् परित्यक्तचुम्बनस्य रामस्य अनुतापात् पश्चात्तापो माम नाठ्यालङ्कारः।

Eng. Tran. Paschattapa is the repentance of a person who has rejected some agreeable object due to ignorance or lack of understanding. As in the act dealing with the

repentance (of Rama), Rama (says)—why was I, an object of false scandal as I was at that time, not kissed many a time by the Queen ?

Text—श्लोकः। उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये।

• वृत्तिः। यथा वध्यशिलायाम्—

म्रियते म्रियमाणे या त्वयि जीवति जीवति. तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः॥ व्याख्या—अर्थसिद्धये कस्यचित् प्रयोजनस्य साधनाय हेतोः कारणस्य य उपन्यासः उपस्थापनं प्रदर्शनं सा उपपत्तिरिति नाम नाट्यालङ्कृतिर्मता। तत्र वध्यशिलायाम्।

अत्र नायिकायाः जीवन-स्थितिरूपस्य अर्थस्य सिद्धये नायकजीवन-रूपस्य हेतोरुपन्यासात् अत्र उपपत्तिः।

Eng. Tran. Upapatti is said to be the presentation of reason for the fulfilment of some object. As in the Badyashila (literally a slaughter-slab) too "Should you like her who lives if you live and dies if you die, to continue her existence, then please save yourself with my life.

Text—श्लोकः। आशंसनं स्यादाशंसा—

वृत्तिः। यथा श्मशाने माधवः—तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम् इति।

मित—। आशंसनं अभिलषितस्य वस्तुनः लाभो भवतु इति प्रार्थनं आशंसानाम नाट्यालङ्कारो भवेत्। दृष्टान्तो यथा मालतीमाधवे माधवस्य उक्तौ न।

श्लोकव्याख्या—तत् किम् अहं अनङ्गमङ्गलगृहं अनङ्गस्य कामदेवस्य शुभनिवासस्थानभूतं तस्याः मालत्याः मुखं भूयोऽपि पुनरपिपश्येयम्। अत्र मालत्याः मुखदर्शने आशंसनं माधवस्य इति अत्र आशंसा। अपि नाम

अहं मे इष्टं वस्तु प्राप्नुयाम्' इति आत्मनः एव प्राप्तिविषये आशंसनं तत् आशंसा इति नाट्यालङ्करणं स्यात्।

Eng. Tran. Asamsa is the hankering after something (by somebody),

As in the cremation ground—Madhava (says)—would I again see her face the (veritable) lucky repository (abode) of cupid.

Text—श्लोकः। प्रतिज्ञाध्यवसायकः।

वृत्ति। यथा मम प्रभावत्यां वज्रनाभः—

"अस्य वक्षः क्षणेनैव निर्म्मथ्य गदयानया, लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः।"

मित—। प्रतिज्ञा कस्यचित् अभिलषितस्य वस्तुनः साधने सुदृढ़-सङ्कल्प एव अध्यवसाय इति नाम नाट्यालङ्कारः स्यात्। (अध्यवसाय एव अध्यवसायक इति स्वार्थे कप्रत्ययः)। अस्य दृष्टान्तो यथा ग्रन्थकर्त्तुरेव प्रभावतीरुपके—प्रभावत्याः पितुर्वज्रनाभस्य उक्तौ। अद्य क्षणेनैव अल्पेनैव समयेन [अपवर्गे तृतीया] अनया गदया अस्यवक्षः निर्म्मथ्य वः युस्माकम् समक्षं लीलया अनायासेनैव भुवनद्वयम् उन्मूलयामि चूर्णयिष्यामि।

अत्र भुवनद्वयस्य उन्मूलने प्रतिज्ञेति अध्यवसायः।

Eng. Tran. Adhyavasaya is the firm determination (to do something).

As in my Prabhavati, Vajranabha (says)—

To-day, I shall tear asunder his breast with this club in a moment and up-root the two worlds (earth as well as the nether region) before you (i. e. your very eyes).

Text—श्लोकः। विसर्पो यत् समारब्धम् कर्मानिष्टफलप्रदम्।

वृत्तिः। यथा वेणयाम्—एकस्य तावत् पाकोऽयमित्यादि।

मित। अनिष्टफलप्रद' अमङ्गलपरिणामदायक' समारब्धम् यत्कर्म्म तत् विसर्प इति नाट्यालङ्कारः स्यात्। यथा वेणीसंहारे धृष्टद्युम्नकर्त्तृक' द्रोणाचार्य्यकेशग्रहण' दृष्ट्वा अश्वत्थामा कथयति—एकस्य दुःशासनकर्त्तृकस्य द्रौपदीकेशग्रहणस्य अयं तावत् पाकः कुरुक्षेत्रयुद्धरुपः परिणामः। अथ द्वितीये अस्मिन् केशग्रहे प्रजा निःशेषिताः भविष्यन्तीति प्रजाध्वंसरुपस्य अनिष्ठफलस्य उत्पादक' द्रौणकेशग्रहणरुप' कर्म्मधृष्टद्युम्नेन समरेकृतम् इति विसर्पः।

Eng. Tran. Visarpa is the taking up of some action which is sure to produce evil result ; as in the Veni—this is the consequence of one action and so forth.

Text—--श्लोकः। कार्य्यग्रहणमुल्लेखः।

वृत्तिः। यथा शाकुन्तले—राजान' प्रति तापसौ—समिदाहरणाय प्रस्थितावावाम्। इह चास्मद्गुरोः कणवस्य साधिदैवत इव शकुन्तलया अनुमालिनीतीरमाश्रमो दृश्यते? न चेत् अन्यकार्य्यातिपातः, प्रविश्य गृह्यताम् अतिथिसत्कारः। इति—

मित—। कार्य्यस्य साधनीयस्य ग्रहणम् अनुष्ठानमेव उल्लेखः। पर' इय' व्याख्या न साधीयसी इति मन्यामहे। कार्य्यस्य नाटकीय-कार्य्यस्य ग्रहणम् नायकादिना अभ्युपपत्तिः स्वीकरणमिति यावत् एव उल्लेख इति नाट्यालङ्कारः स्यात्। दृष्टान्तो यथा—शाकुन्तले दुष्यन्तं कथयतः कणवशिष्यौ—प्रस्थितौ आवाम् इति कार्य्यस्य ग्रहणात् उल्लेखः इति पूर्व्व-व्याख्यया सह सङ्गतिः। नाटकीयं यत् कार्य्यं शकुन्तलया सह राज्ञः मेलन' तस्य प्रथमसूत्रस्य राज्ञा ग्रहणात् उल्लेखः इति परव्याख्यया सह सङ्गतिः।

Eng. Tran. Ullekha is the undertaking of the business or action. As in the Sakuntala, where two ascetics address the king we have started for the purpose of

of bringing faggots. Yonder is seen on the bank of the River Malini the hermitage of our preceptor graced as it were by the presiding deity in the shape of Sakuntala. If no other business suffer, then please proceed there to accept the rites of hospitality.

Text—श्लोकः। उत्तेजनमितीष्यते। स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्।

वृत्तिः। यथा—इन्द्रजिच्चण्डवीर्य्योऽसि नाम्नैव बलवानसि।

धिक्! धिक्! प्रच्छन्नरूपेण युध्यसेस्मद्भयाकुलः।

मित—। स्वकार्य्यसिद्धये आत्मनः उद्देश्यं साधयितुम् अन्यस्य अपरजनस्य प्रेरणाय कस्मिंश्चित् कर्मणि प्रवर्त्तनाय कठोरा निष्ठुरा या वाक् तदेव उत्तेजनमिति नाट्यालङ्कारः। दृष्टान्तो तु अस्मिन् श्लोके। एतादृशोऽपि त्वम् अस्मद्भयाकुलः मत्तो भयेन भीतः सन् प्रच्छन्नरूपेण अन्तारलवर्त्ती सन् युध्यस इति त्वां धिक्। अत्र आत्मनः जयरूपकार्य्यं साधयितुम् इन्द्रजितं प्रकाश्ययुद्धं अवतारयितुम् लक्ष्मणः कठोरवाक्यं उच्चारयतीति अत्र उत्तेजनम्।

Eng. Tran.—Uttejana is said to use harsh words meant for the pursuasion of others and for success of one's own work. Oh Indrajit, you are of fiery valour (immense prowess) and you are (physically) strong as is implied by your name; but still—being afraid of me—you fight from a hiding place (or fight invisibly) and hence fie on you!

Text—श्लोकः। भर्त्सना तु परीवादः।

वृत्तिः। यथा सुन्दराङ्के—दुर्योधनः—धिक् धिक् सूत। किं कृतवानसि?

वत्सस्य मे दुर्केलितस्य पापः, पापं विधास्यति इत्यादि।

मित—। भर्त्सना—कमपि उद्दिश्य उच्चारितस्तिरस्कारस्तु परीवाद इति नाट्यालङ्कारः स्यात्। दृष्टान्तो यथा अस्मिन् श्लोके। भीमसेनः दुर्गस्थितस्य चञ्चलस्य सोत्साहस्य इति यावत् मे वत्सस्य दुःशासनस्य पापं अमङ्गलं विनाशनं इति यावत् विधास्यति साधयिष्यतीति। तत् वारयितुम् सचेष्टं मां त्वम् निवारयसीति सूतं प्रति दुर्योधनस्य भर्त्सना। तेनात्र परीवादः।

Eng. Tran.—Parivada stands for reproach. As in the Sundara act, Duryyodhana—Fie! Fie upon you charioreer! what have you done? The wretched fellow will do injury to my dear one (Dushashana) restless as he is.

Text—श्लोकः। नीतिः शास्त्रेण वर्त्तनम्।

वृत्तिः। यथा शाकुन्तले -दुष्यन्तः। विनीतवेशप्रवेष्टव्यानि तपोवनानि इति।

मित—। शास्त्रेण शास्त्रस्य अनुशासनम् अवलम्ब्य वर्त्तनम् आचरणं खलु नीतिर्नाम नाट्यालङ्कारः। यथा. तपोवनं तु विनीतवेषेण प्रवेष्टव्यम् इति शास्त्रमनुसृत्य राजा दुष्यन्तः राजवेषम् अपनीतवान्।

Eng. Tran. Niti is the following of the scriptural injunction, that is to abide by scriptural injunction forms the subject-matter (or nucleus) of Nita. As in the Sakuntala, Dushyanta—Hermitages are to be entered with a modest dress (or person) etc.

Text—श्लोकः। उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा। उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम्।

वृत्तिः। यथा शाकुन्तले राजानं प्रति शार्ङ्गरवः आः! कथमिदं

नाम। किमिदमुपन्यस्तमिति ? ननु भवानेव नितरां लोकवृत्तान्त-निष्णातः।

"सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा दयितास्वबन्धुभिः ॥

मिति। उक्तस्य प्रागेव कथितस्य अर्थस्य विषयस्य यत्तु अनेकधा बहुप्रकारेण उत्कीर्त्तनम् घोषणम् स्यात्, किमर्थं ? उपालम्भस्वरूपेण तिरस्काररूपेण, तिरस्कारमेव साधयितुम् इत्यर्थः, तत् अर्थविशेषणं नाम नाट्यालङ्करणम्। तिरस्कारं विधातुं यत् कथितविषयस्य पुनः पुनः कीर्त्तनं तत्खलु अर्थविशेषणम् इति भावः।

दृष्टान्तो यथा शाकुन्तले। तत्र आगतां शकुन्तलां दृष्ट्वा तथा तस्याः सहचराणां मुखात् आत्मना सह तस्याः परिणयवृत्तान्तम् श्रुत्वा विस्मृत-शकुन्तलावृत्तान्तः राजा कथयति किमिदमुपन्यस्तमिति। तदाकर्ण्य सक्रोधः शार्ङ्गरवः वक्ति—अत्र किमिदमुपन्यस्तं इति दुष्यन्तेन प्रोक्तम् अर्थम् दुष्यन्तमुद्दिश्य तिरस्कारं विधातुम् शार्ङ्गरवः पुनः पुनः उत्कीर्त्तयति इति उक्तविषयस्य उपालम्भस्वरूपेण अनेकधा उत्कीर्त्तनात् अत्र अर्थ-विशेषणम्।

Eng. Tran.—Artha-vishesana stands for the repetition of a statement in many ways by way of reproach.

As in Sakuntala—Sarngarva says to the king :—Ah ! How is it that you say 'what has been presented' ? well ! it is you who are conversant with the human nature (or with the wordly affair). Just see ! a wife living perpetually (permanently) in the house of her father (or living with her paternal relations) is suspected to be otherwise—by the people, even if she be chaste in her character ; or better—however chaste in her character a

wife if she lives permanently with her paternal relations is suspected to be otherwise by the people ; and that is why a woman be she a favourite of her husband or not, is desired by her relatives to remain with her husband.

Text—श्लोकः। प्रोत्साहनं स्यादुत्साहगिरा कस्यापि योजनम्।

वृत्तिः। यथा वालरामायणे—

कालरात्रिकरालेयं स्त्रीति किं विचिकित्ससि। तज्जगत्त्रितयं त्रातुं तात! ताड़य ताड़काम्।

मित। उत्साह-गिरा उत्साहप्रदायकवाक्येन कस्यापि जनस्य योजनं कस्मिन्नपि कर्म्मानुष्ठाने प्रेरणम् प्रोत्साहनम् इति नाम नाट्या-लङ्करणं भवेत्। दृष्टान्तो यथा वालरामायणे—श्रीरघुनाथं प्रति महर्षेः विश्वामित्रस्य उक्तौ। अत्र विश्वामित्रकर्त्तृकं श्रीरामचन्द्रस्य ताड़का-वधकर्म्मणि उत्साहवाक्येन नियोजनं। तेनात्र प्रोत्साहनं।

Eng. Trans.—Protsahana is the persuading of some person (in a work) through words of encouragement—(or by an encouraging speech). As in the Bala-Ramayana—This is as dreadful as the Kala-ratri (a black and dreary night). Therefore why are you hesistating (to kill her) simply because she is a woman. In order to save the three regions (worlds), oh boy, put an end to (this) Tadaka.

Text—श्लोकः। साहाय्यं सङ्कटे यत् स्याद्दानुकूल्यं परस्य च।

वृत्तिः। यथा वेण्याम्—कृपं प्रति अश्वत्थामा। त्वमपि तावद्राज्ञः पार्श्ववर्त्ती भव। कृपः—वाञ्छाम्यहमद्य प्रतिकर्त्तुम् इत्यादि।

मित। सङ्कटे विषमे आपतकाले इति यावत् यत् च परस्य आनुकूल्यं सहायता तत् साहाय्यमिति नाट्यालङ्कृतिः स्यात्। वेणीसंहारे—तत्र रणसङ्कटमध्यगतं दुर्योधनम् अनुकुलयितुम् अश्वत्थामा कृपाचार्य्यं प्रणोदितवान्। अत्र समरसङ्कटे कृपकर्त्तृकं दुर्योधनस्य साहाय्यं—तेनात्र साहाय्यं नाम नाट्यालङ्कारः।

Eng. Tran. Sahayya is the help or assistance given to somebody (i. e. kind hand lent to somebody) in time of need or in some critical time. As in the Veni, Aswathama says to Kripa—you, too, should stand by the king's side. Kripa—To-day I intend to retaliate and so forth.

Text—श्लोकः। अभिमानः स एव स्यात्।

वृत्तिः। यथा तत्रैव—दुर्योधनः मातः! किमप्यसदृशं कृपणं वचस्ते इत्यादि।

मित । सः प्रसिद्धः अभिमानः, अभिमान इति आख्याया परिज्ञातः चित्तक्षोभविशेषः यदा रूपके (नाटके) अवतार्य्यते तदा अभिमान इति नाम नाट्यालङ्कारो भवेत्। दृष्टान्तो यथा वेणीसंहारे गान्धारीं प्रति दुर्योधनः अभिमानवशात् कथयति। अत्र गान्धारीमुखात् असदृशं तथा कृपणम् वचः आकर्ण्य दुर्योधनस्य अभिमानः उत्थितः। अत एवात्र अभिमानो नाम नाट्यालङ्कारः।

Eng. Tran. Abhimana stands for (that well-known state of the mind-known as) Sensitiveness. As therein, too Duryyodhana (says)— Mother! your statement (advice) is weak, (it betrays your nervousness) and (hence) somewhat un-worthy of yourself.

Text—श्लोकः। प्रश्रयादनुवर्त्तनम् अनुवृत्तिः॥

वृत्तिः। यथा शाकुन्तले—राजा शकुन्तलां प्रति—अपि तपो वर्द्धते ? अनसूया—दाणिं अदिधिविशेसलाहेण इत्यादि।

मित—। प्रश्रयात् सौशील्यात् बिनयात् इति यावत् यत् अनुवर्त्तनं आनुगत्यकरणं तत् अनुवृत्तिर्नाम नाट्यालङ्करणं स्यात्। दृष्टान्तो यथा शाकुन्तले—अत्र राज्ञः वाक्यं तथा अनुसूयावाक्ये विनयेन आनुगत्य- करणं दृश्यते अतःअत्र अनुवृत्तिः स्यात्।

Eng. Tran. Anuvritti is following of somebody through courtesy. As in Sakuntala—the king says to Sakuntala—well ! do your austerities prosper ?

Anasuya—Yes sir ; now by the arrival of a distinguished guest—and so forth.

Text—श्लोकः। भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्।

वृत्तिः। यथा वालरामायणे—

"अत्रासीत् फणिपाशवन्धनविधिः शक्त्याभवद्देवरे, गाढ़ंवक्षसिताड़िते हनुमता द्रोणाद्रिरत्राहृतः। इत्यादि।

मित । भूतं अतीतं यत्कार्य्यं वृत्तान्तः तस्य आख्यानम् कस्मैचित् जनाय कथनं उत्कीर्त्तनम् इति नाम नाट्यालङ्करणं मतम्। दृष्टान्तो यथा बालरामायणात् अस्मिन् श्लोके। तत्र श्रीरामः श्रीजानकीं वक्ति। अत्र श्रीरामेण सीतायै अतीतवृत्तान्तकथनं तेनात्र उत्कीर्त्तनम्।

Eng. Trans. Utkirtana is said to be the narration or description of some past incident. As in the Bala-Ramayana—It is here, where took place the bondage of ours by the snake-coils and it is here where Hanuman brought (carried) the Drona hill, when your brother-in-law was seriously wounded on his chest with the sakti-shaft.

Text—श्लोकः। याच्ञा तु क्वापि याच्ञा या स्वयं दूतमुखेन वा।

वृत्तिः। यथा—अद्यापि देहि वैदेहीं दयालुस्त्वयि राघवः।
शिरोभिः कन्दुकक्रीड़ाम् किं कारयसि वानरान्॥

मित—। क्वापि कस्मिन्नपि जने या याच्ञा प्रार्थना—या स्वयं कृता वा भवतु दूतमुखेन बा भवतु—सा याच्ञा इति नाट्यालङ्कृतिः स्यात्। दृष्टान्तो यथा अस्मिन् श्लोके -अत्र दूतमुखेन याचञा प्रदर्शयति। हे रावणः अद्यापि वैदेहीं देहि श्रीरामचन्द्राय प्रत्यर्पय। राघवः श्रीरामः त्वयि दयालुः अतएव अद्यापि यदि त्वं वैदेहीं प्रत्यर्पय—तर्हि श्रीरामेण सह तव विरोधः नूनं शममेष्यति। नोचेत् विपत् भवेत् इति दर्शयति। किं कथं वैदेहीम् अप्रदाय वानरान् श्रीरामस्य सैन्यभूतान् कपीन् शिरोभिः तव अनुचराणां राक्षसानां मस्तकैः कन्दुकक्रीड़ाम् गोलकक्रीड़ां कारयसि। त्वं सीतां न प्रत्यर्पितवान् इति अनेनैव हेतुना वानराः तव अनुचरान् राक्षसान् निहत्य तेषां शिरोभिः कन्दुकक्रीड़ां कुर्व्वन्ति। अतएव सीतां प्रत्यर्पय इति मे याच्ञा। मा खलु राक्षसशिरोभिः वानरान् कन्दुकक्रीड़ां कारय। हृक्रोरन्यतरस्याम् इति सूत्रेण वानरान् इत्यत्र पाक्षिकी द्वितीया।

Eng. Tran. Yachna is the name for prayer or supplication, made unto somebody either direct or through (the agency of some) messenger.

As—Till uow there is time for returning Vaidehi (i.e. you may return Sita to Ramachandra till now) ; Raghava is favourable to you ; why are you allowing the monkeys to play ball with the heads (of the Raksasas here) ?

Text—श्लोकः। परिहार इति प्रोक्तः कृतानुचितमार्ज्जनम्।

वृत्तिः। यथा—प्राणप्रयाणदुःखार्त्तो उक्तवानस्म्यनक्षरम्।
तत् क्षमस्व विभो! किञ्च सुग्रीवस्ते समर्पितः॥

मित—कृतम् आचरितं यत् अनुचितं अवैधं कर्म्म तस्य मार्ज्जनं क्षमापणं परिहार इति नाम नाट्यालङ्करणं भवेत्। परिहारशब्दस्य अस्मिन्नर्थे प्रयोगः बङ्गभाषायामपि दृश्यते यथा श्रीवृन्दावनदासठाकुर-विरचिते श्रीचैतन्यभागवते "एत परिहारेतवे पापी निन्दा करे, तबे लाथि मार तार शिरेर् उपरे।" अस्य दृष्टान्तो यथा श्रीरामं प्रति मरणापन्नस्य वालिनः उक्तौ। त्वाम् कठुभिः अक्षरैः अहं दूषितवान्। नूनम् इदं नाम अनुचितम् अतएव हे विभो तत् तादृशम् मे अनुचितं कार्य्यं क्षमस्व मार्जय। किञ्च अपि च सुग्रीवः मे कनीयान् भ्राता अधुना मम स्थलाभिषिक्तः ते तुभ्यम् तव हस्ते इत्यर्थः समर्पितः। अत्र वालिना स्वयम् अनुचितस्य मार्ज्जनं तेनात्र परिहारः

Eng. Tran.—Parihara implies expiation (asking forgiveness) for some wrong or improper act already done.

As—Afflicted with the grief of losing my life, I accused you harshly. Oh Lord—please pardon the act (of mine). Now Sugriava is placed in your charge.

Text—श्लोकः। अवधीरितकर्त्तव्यकथनं तु निवेदनम्।

यथा। राघवाभ्युदये—लक्ष्मणः। आर्य्य! समुद्राभ्यर्थनया गन्तमुद्यतोऽसि, तत् किमेनत्?

मित—। अवधीरितस्य पूर्व्वम् उपेक्षितस्य करणीयविषयस्य कथनम् उल्लेखः निवेदनम् इति नाम नाट्यालङ्करणं भवति। दृष्टान्तो यथा राघवाभ्युदये—अत्र पूर्व्वम् अवधीरितं यत् समुद्रसमीपप्रस्थानरूपं कर्त्तव्यं, तस्य अधुना लक्ष्मणेन उल्लेखःकृतःतेनात्र निवेदनम् इति नाट्यालङ्करणम्।

Eng. Tran. Nivedana stands for the mentioning of the duty or business which was formerly despised

(ignored or shelved) As in the Raghava-Avyudaya Lakshmana—Venerable sir! You are (now) about to entreat the ocean, what is this ?

Text—श्लोक। प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम्।

वृत्तिः। यथा बेणयाम्—राजा—कञ्चुकिन्। देवस्य देवकीनन्दनस्य बहुमानात् वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्त्तन्ताम तत्रोपचिताः समारम्भाः।

मित—। कार्य्यस्य कस्यचिदपि करणीयस्य यत् साधु सुष्टु प्रवर्त्तनम् आरम्भणं अनुष्टानसूचनमिति यावत् स्यात् तत् प्रवर्त्तनम् इति नाट्यालङ्करणम्। दृष्टान्तो यथा वेणीसंहारे—तत्र राजा कञ्चुकिनम् आदिशति श्रीभगवतः देवकीनन्दनस्य श्रीकृष्णस्य बहुमानात आदरात् वत्सस्य भीमसेनस्य विजयमङ्गलनिमित्तं तत्र उपचिताः संगृहीताः समारम्भाः मङ्गलकलससंपादनादिमाङ्गलिकव्यापाराः प्रवर्त्तन्ताम् आरभ्यन्ताम्। अत्र भीमसेनस्य विजयमङ्गलनिमित्तं माङ्गलिककर्मणाम् शुभानुष्ठाने निर्द्देशदानात् प्रवर्त्तनम्।

Eng. Tran. Pravartana is the setting up or taking up of some function in a suitable way. As in the Venisamhara King, Chamberlain! due to deference to the venerable son of Devaki, let the pre-arranged functions be taken up (be set of work) for the auspicious victory of my darling Bhimsena.

Text—श्लोकः। आख्यानं पूर्ववृत्तोक्तिः।

वृत्तिः। यथा तत्रैव—देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः इत्यादि।

मित—। पूर्व्वं अतीतं यत्वृत्तं घटना तस्य उक्तिः कथनं खलु आख्यानं नाम नाट्यालङ्कृतिः। यथा वेणीसंहारे—।

Eng. Tran. Akhyana implies the mentioning of past incidents. As therein, too, that is the land where the lake were (formerly) filled up with the water-like blood of the enemy.

Text—श्लोकः । युक्तिरर्थावधारणम् ।

वृत्तिः । यथा तत्रैव –

यदि समरमपास्यनास्तिमृत्योर्भयमिति युक्तमितीऽन्यनः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वम् ॥

मित । अर्थस्य वस्तुनः कर्त्तव्यतय ग्श्रितस्य इति यावत् अवधारणम् निंश्चयकरनं युक्तिरितिनाम नाट्यालङ्कारणं भवेत् । दृष्टान्तो यथा वेणीसंहारस्य अस्मिन श्लोके । अत्र मरणं अवश्यम्भावीति युद्धं कर्त्तव्यम् इति कर्त्तव्यस्य अवधारणात् युक्तिः ।

Eng. Tran.—Yukti is the ascertaining of one's own duty.

As therein, too, If one can avoid death (if one has no fear from death), by (simply) running away from the battle, then it is (no doubt) advisible to leave this place for another. But if death is inevitable for one who is born, then why do you sully your fame for nothing (in vain) ?

Text—श्लोकः । प्रहर्षः प्रमदाधिक्यम् ।

वृत्तिः । यथा शाकुन्तले राजा । किमिदमात्मानं पूर्णमनोरथं नाभिनन्दामि ।

मित । प्रमदस्य आह्लादस्य आधिकायम् आतिशय्यम् अतिरेकः इति यावत् प्रहर्षः इतिनाम नाट्यालङ्कारः स्यात् । यथा शाकुन्तले लब्ध-

पत्नीपुत्रः दुष्यन्तः आनन्दातिरेकात् वक्ति। अत्र पत्नीपुत्रलाभात् राज्ञः आनन्दातिशयस्तेनचात्र प्रहर्षः।

Eng. Tran. Praharsa is the excessive joy. As in the Sakuntala—King—Why, then, I shall not congratulate myself—whose desire has been completely fulfilled.

Text—श्लोकः। शिक्षा स्यादुपदेशनम्।

वृत्तिः। यथा तत्रैव 'सहि! ण जुत्तं अस्समवासिणो जणस्य अकिद-सक्कारं अदिधिविशेसं उज्झिअ सच्छन्ददो गमणं''।

मित —। शिक्षा शिक्षणम् शिक्षाप्रदानम् इति यावत् खलु उपदेशनं नाम नाट्यालङ्कारः स्यात् यथा शाकुन्तले— नयुक्तमित्यादौ।

Eng. Tran. Upadeshana implies the imparting of instruction. As therein, too; my friend! it is not proper for a dweller in the hermitage to go away at pleasure, leaving a distinguished guest to whom the rights of hospitality have not been (yet) extended.

Text - वृत्तिः। एषाञ्च लक्षणानां नाट्यालङ्काराणाम् च सामान्यतः एकरू-पत्वेपि भेदेन व्यपदेशो गड्डलिकाप्रवाहेण। एषु च केषाञ्चित् गुणालङ्कार-भावसन्ध्यङ्गविशेषान्तर्भावेऽपि नाटके प्रयत्नतः कर्तव्यत्वात्त् विशेषोक्तिः।

मित —। ननु यादृक्लक्षणानि भूषणप्रभृतीनि, भूषणम् इति संज्ञान्तरेण लक्षणीयानि लक्षणानि, तादृशलक्षणानि एव आशीः इत्यादीनि नाट्या-लङ्करणानि। लक्षणानां तथा नाट्यालङ्काराणां लक्षणानि खलु एकरूपाणि तयोर्मध्ये न कश्चिद्विभेदोदृश्यते इति भावः। बाढम्—तर्हि कथं तयोः पृथगुक्तिरिति प्रश्नस्य उत्तरं पठति। यद्यपि नाम लक्षणानि तथा नाट्यालङ्करणानि सामान्यतः सामान्येन स्थूलतः एव इति यावत् एकरू-

पाणि तथापि लक्षणं तथा नाट्यालङ्कार इति आख्याभेदेन व्यपदेशः नाम-करणं यत् मया अनुष्ठितं तत्त गड्डलिकाप्रवाहेण, पूर्व्वेषाम् केषाञ्चित् आलङ्कारिकाणाम् मतम् अविचारेणैव अनुसृत्य इत्यर्थः। गड्डलिका मेषः। एकः मेषः अग्रगामी सन् यस्याम् दिशि प्रयाति—शुभं वा भवतु अशुभं वा भवतु इति अविचार्य्यैव अन्ये मेषास्तमनुसरन्ति—इति यथा लोके दृश्यते तद्वत् प्राक्तनाः केचित् अलङ्कारकोविदाः लक्षणं तथा नाट्या-लङ्करणम् इति एकरूपाणाम् अपि वस्तूनाम् संज्ञाद्वयम् कृतवन्तः-- अहमपि विशेषविचारम् अकृत्वैव तेषाम् मतम् अनुसृतवान. एवं च लक्षणं तथा नाट्यालङ्करणम् इति एकरूपाणाम् वस्तूनाम् आख्याद्वयम् विहितवान् इति सरलार्थः।

किञ्च अत्र यानि लक्षणानि उक्तानि या च नाट्यालङ्कृतयः कथिताः - तेषाम् मध्ये केषाञ्चित् प्रसादादिगुणे, केषाञ्चित् च केषु केषु अलङ्कारेषु केषां वा केषु केषु भावेषु केषां वा सन्धेरङ्गेषु अन्तर्भावः स्यात्। तर्हि कथं तेषामत्र लक्षणमध्ये नाट्यालङ्कारमध्ये च पृथगुक्तिः? उत्तरं पठति—सत्यम्। परम् रसस्य (रसाभिव्यक्तेरित्यर्थः) अनुकूलताम् अवेक्ष्य प्रसादादिगुणानाम् उपमाद्यलङ्काराणाम्, रत्यादिभावानाम् तथा युक्ति-प्रभृतीनां सन्ध्यङ्गानाम् काव्ये (श्रव्यकाव्ये दृश्यकाव्ये च) यथासम्भवं प्रयोगः स्यात् न तेषाम् अवश्यकर्त्तव्यता। किन्तु एतेषाम् नाट्यालङ्काराणाम् तथा लक्षणानाम् गुणालङ्कारभावसन्ध्यङ्गविशेषेषु अन्तर्भावेऽपि नाटके सयत्नम् एव प्रयोगः कर्त्तव्यः इति नाटकेषु अपितु अन्येषु अपि रूपकेषु—एषाम् अवश्यकर्त्तव्यत्वात् एषाम् अत्र विशिष्य पृथगुक्तिः।

अस्मिन् प्रसङ्गे केषाञ्चित लक्षणानाम् तथा नाट्यालङ्काराणां च गुणालङ्कारादिषु अन्तर्भावः प्रदर्श्यते - तथाहि गुणैः सालङ्कारैर्योगस्तु भूषण-मितिभूषणलक्षणम्। तत्र गुणालङ्कारबहुलं भाषणम् भूषणं मतमिति श्रीरूपः।

अत्र प्रसादमाधुर्य्यादिगुणानां अनुप्रासश्लेषानुमानाद्यलङ्काराणाञ्च सत्तया भूषणमिति नाटकचन्द्रिका। अतएव भूषणम् इति आख्यातस्य लक्षणस्य प्रासादमाधुर्य्यादिगुणेषु अन्तर्भावः—तथा श्लेषानुमानानुप्रासादिषु अलङ्कारेष्वपि अस्य अन्तर्भावः परम गुणानाम् तथा अलङ्काराणां काव्ये सत्ता तु रसाभिव्यक्तिम् अपेक्ष्य एव, अतो न तेषाम् अवश्यकर्त्तव्यता। किन्तु भूषणम् इत्यस्य रूपकेषु प्रयोगः अवश्यकर्त्तव्यता इति तस्य पृथक्‌लक्षणम् कृत्वा पृथगुल्लेखः। एवं च 'अभिप्राय' इति लक्षणस्य निदर्शनालङ्कारे अन्तर्भावः। यथा—अभिप्रायस्तु सादृश्यादद्भु‑तार्थस्य कल्पना इति अभिप्रायलक्षणं। अस्य दृष्टान्तः तु "इदं किलाव्याजमनीहरं वपुरिति शाकुन्तलश्लोके लक्षितं। किञ्च सम्भवन् वस्तुसम्बन्धोप्यम्भवन् वापि कुत्रचित्। यत्र विम्बानुबिम्बत्वं दर्शयेत् सा निदर्शनेति निदर्शना लक्षणम्। अस्य अलङ्कारस्य दृष्टान्तो पूर्व्वोक्त एव लभ्यते। अतः निदर्शनस्य निदर्शनायाश्च लक्षणं तथा तुल्यमेव दृष्टान्तं पर्य्यालोच्य इदम् आयाति यत् निदर्शनायाम् नाम अभिप्राय अन्तर्भावो भवितुमर्हति। तथापि अभिप्राय इति संज्ञाम् उररीकृत्य तस्य यः पृथगुल्लेखः तत्तु रूपके अस्य अवश्यकर्त्तव्यता ज्ञापनाय इति बोध्यम्। एवं ज्ञप्तिः प्राप्तिः केनचिद्दर्शन किञ्चिद् यत्रानुमीयते इति लक्षणाक्रान्तं यत् ज्ञप्तिरिति लक्षणम् अस्य 'अनुमानन्तु विच्छित्या ज्ञानं साध्यस्य साधनात्' इति लक्षणाक्रान्तस्य अनुमानालङ्कारस्य मध्ये अन्तर्भावः स्यात्; तथा नीतिमार्गानुसृत्यादेरर्थनिर्द्धारणं मतिः "इति लक्षणाक्रान्तस्य मतिनाम्नः व्यभिचारिभावस्य मध्ये अन्तर्भावः स्यात्। तथापि अस्य ज्ञप्तिरिति लक्षणस्य विशिष्योक्तेः अस्य अवश्य कर्त्तव्यता स्यात् रूपके इति बोधनाय। एवं च विचारो युक्तवाक्यैरर्थ साधनम् इति विचारनाम्नः लक्षणस्य अनुमानालङ्कारे किञ्च लिङ्गादूहोऽनुमानता इति लक्षणाक्रान्तस्य गर्भसन्धेरङ्गे अन्तर्भावः स्यात्। इष्टजनाशंसा इति लक्षणाक्रान्तस्य आशीरिति नाट्यालङ्कारस्य प्रसादादिगुणेषु अन्तर्भावः न दुष्करः। उपपत्तिर्मता हेतो-

रुपन्यासोर्थसिद्धये इति उपन्यासनाम्नः नाट्यालङ्कारस्य, हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते इति काव्यालिङ्गालङ्कारे अन्तर्भाव सुसाध्यः। "आक्रन्दः प्रलपितं शुचा" इति आक्रन्द नाम्मः नाट्यालङ्कारस्य "शोकोअत्र स्थायिभावः" इति करुणरसस्य स्थायिभावे शोके अन्तर्भावः भवितुम् अर्हति। एवं च 'युक्तिरर्थावधारणम्" इति युक्तिसंज्ञवस्य नाट्यालङ्कारस्य "समप्रधारण-मर्थानांयुक्तिरिनियुक्तिसंज्ञके मुखसन्धेरङ्गे अन्तर्भावः अपरिहार्य्यः। एवम् अन्यत्रापिवोध्यम्। तथापि तु यदेतेषाम् विशिष्य पृथक् संज्ञादानं तथा पृथगुक्तिः--तत्तु रुपकेषु एतेषाम् अवश्यकर्त्तव्यता वोधनाय किञ्च गुणा-लङ्कारभावानाम् तथा सन्धेरङ्गानाम् च रसव्यक्तिम् अपेक्ष्य एव काव्येषु अवस्थितिः—न तेषाम् अवश्यकर्त्तव्यता इत्येव अत्र वोध्यम्। अस्माभिस्तु एतत् नाट्यं वारं वारमुक्तम्।

Eng. Tran. Though these Laksahnas and Natyalankaras are fundamentally of the same nature still they are mentioned here distinctively (separately) ; and this is by way of persuing the old tradition. Though some of these (these Lakshananas as well as Natyalankaras) may be incorporated into one or other of the Gunas, or Alankaras, or Bhavas or any branch (anga) of the sandhis, yet they are here specifically mentioned simply due to the fact that these must need have their presence in dramas. (नाटक).

Text— वृत्तिः। एतानि च—

"पञ्चसन्धिचतुर्वृत्ति चतुःषष्ठ्यङ्गसंयुतम्। षट्त्रिंशल्लक्षणोपेतम् अलङ्कारोपशोभितम्, महारसं महाभोगमुदात्तरचनान्वितम्। महापुरुष-सत्कारं साध्वाचारम् जनप्रियं सुश्लिष्टसन्धियोगञ्चसुप्रयोगं सुखाश्रयम्। मृदुशब्दाभिधानञ्च कविः कुर्य्यात्तु नाटकम्।

इति मुनिनोक्तत्वात् नाटकेऽवश्यकर्त्तव्यान्येव।

मित—। ननु भूषणानि (लक्षणानि) तथा नाट्यालङ्काराणि नाटके प्रयत्नतः कर्त्तव्यानीति विशेषभावेन प्रोक्तानि इति यदुक्तं तेन किम् नाटके एतेषाम् अवश्यकर्त्तव्यता विज्ञेया इति संशये समाधत्ते—"एतानि" लक्षणानि तथा नाट्यालङ्कारणानि च "नाटके" रूपकेषु इत्यर्थः "अवश्य" कर्त्तव्यानि" प्रयोक्तव्यानि इति बोध्यम्। ननु तत्र किं ते प्रमाणं? प्रमाणं प्रदर्शयितुम् अत्र श्रीभरतमुनेर्वचनमुदाहरति। तथाहि—कविः नाटकं कुर्यात् विरचयेत्। ननु तत् नाटकं कीदृशम् भवेत् इति आकाङ्क्षायाम् तत् नाटकं विशेषयति—

पञ्चसन्धि -पञ्चसंख्यकाः मुखप्रतिमुखादयः सन्धयः यस्मिन् तादृशम्। एतेन नाटके पञ्चानां सन्धिनाम् अवश्यकर्त्तव्यता ध्वनिता। तथा चतुर्वृत्ति चतस्रः भारती कैशिकी (कौशिकी) प्रभृतयः वृत्तयः यत्र तादृशम्। एतेन नाटके भारत्यादीनाम् चतसृणाम् वृत्तीनाम सत्ता उपदिष्टा। एवं चतुःषष्ट्यङ्गसंयुतम्—चतुःषष्टिसंख्यकैः सन्ध्यङ्गैः संयुतं समेतम्, एतेन नाटके सन्धीनां चतुःषष्ठिसंख्यकानि अङ्गानि प्रयोक्तव्यानीति निर्दिष्टम्। उक्तं हि ग्रन्थकारेण "चतुःषष्ठिविधं ह्येतदर्थम् मनीषिभिः। एवं नाम षट्त्रिंशत् संख्यकानि लक्षणानि तैर्लक्षणैः उपेतं समन्वितम्। एतेन षट्त्रिंशत् संख्यकानां भूषणादिलक्षणानाम नाटके अवश्यकर्त्तव्यता सूचिता। अपिच अलङ्कारोपशोभितम् अलङ्कारैः आशीः प्रभृतिभिः त्रयस्त्रिंशत् संख्यकैः नाट्यालङ्कारैः शोभितं विभूषितं। एतेन नाट्यालङ्काराणाम् नाटके अवश्यकर्त्तव्यता विज्ञापिता। महारसम्—महान् श्रेष्ठः शृङ्गारः वीरो वा रसः यस्मिन् तादृशम्। एतेन "यत्र एव भवेदङ्गी शृङ्गारो वीर एव वा" इति लक्षितम्। महाभोगम् महान् उत्कृष्टः भोगः लीला विलासो वा लीलायाः विलासस्य अनुभूतिरित्यर्थः यस्मिन् तादृशम्। एतेन अनुभवयोग्यं विपुलं सौन्दर्य्यम् नाटके अवश्यमेव ज्ञेयम् इति कथितं। उदात्ता श्रेष्ठा गम्भीरा इति यावत् या रचना तया अन्वितम् समेतम्। रचना-गाम्भीर्य्यशोभिता इत्यर्थः। एतेन नाटकस्य भाषा

उत्कृष्टा स्यात् इति अपि सूचितम्। महापुरुषसत्कारम्—महापुरुषस्य श्रेष्ठनरस्य धीरोदात्तनायकस्य यः सत्कारः साधुव्यवहारः यस्मिन् तादृशम्। एतेन नाटकीयनाटकस्य आचरणं लोकोत्तरं स्यात् न कदापि नीचजनोचितं इति व्यञ्जितम्। साध्वाचारं साधुः सन्मार्गसम्मतः आचारः व्यवहारः यस्मिन् तादृशम्। एतेन नाटकप्रतिपाद्यतथ्यं सन्मार्गसम्मतं भवेत् इति आदिष्टम्। एवं च जनप्रियं जनानां श्रोतॄणाम् पाठकानां तथा रसिकानां च प्रियम् अभिलषितम्। एतेन नाटकानां लोकप्रियता विधेयेति उपदिष्टम्। सुश्लिष्ट-सन्धियोगं सुष्ठुशोभनभावेन श्लिष्टः संयोजितः संसाधित इति यावत् सन्धीनां मुखप्रभृतीनां योगः सन्निवेशो यस्मिन् तादृशम्। एतेन नाटके सन्धीनाम् परस्परः योगः सुमङ्गलंस्यादिति निर्दिष्टम्। सुप्रयोगं सुशोभनः प्रयोगः अभिनयः यस्य तादृशं। एतेन अस्य प्रयोगव्यापारे अपि मनोरमत्वं कर्त्तव्यमिति विज्ञापितम्। सुखाश्रयं—सुखम् आश्रयः अवलम्बनं यत्र तादृशम्। एतेन अस्य अभिनयदर्शने द्रष्टॄणाम् सुखोत्पत्तिः यथास्यात् तथा विधेयमिति निर्दिष्टम्। मृदुशव्दाभिधानञ्च मृदूनाम् कोमलानां कर्णश्रुतिसुखानां इत्यर्थः शव्दानाम् अभिधानं अनिपातः वाहुल्येन सन्निवेशः यस्मिन् तादृशम्। एवं नाम नाटकम् कविना रचनीयम्। अतएव अस्य श्लोकस्य उक्तिवलात् नाटके षट्त्रिंशत् संख्यकानाम् भूषणप्रभृतीनाम् लक्षणानाम् यथा आशीःप्रभृतीनाम् त्रयस्त्रिंशत्संख्यकानाम् नाट्यालङ्कारा-णाम् आवश्यकत्वम् इति। एषा खलु श्रीमतः विश्वनाथस्ययुक्तिः श्रीरूप-गोस्वामिचरणेन न अङ्गीकृता। तथाहि नाटकचन्द्रिकायाम्—

> प्रोच्यतेऽन्यत्त्रयस्त्रिंशत् संख्यं कैश्चिद्विभूषणम्।
> मुनेरसम्मतत्वेन तत्तु सर्व्वमुपेक्षितम्॥

ननु किमिदम्? श्रीविश्वनाथमतेन नाट्यालङ्काराः मुनिसम्मताः—तथा अवश्यकर्तव्याः तत्र च दर्पणे मुनिकृतं श्लोकोऽपि उद्धृतः। तथा श्रीरूपमतेन तानि नाट्यालङ्करणानि मुनेरसम्मतानि अतएव उपेक्ष्याणि? कथमयं विरोधः? यथाशक्ति अस्माभिर्विचार्य्यते। मुम्बानगर्य्यां मुद्रिते

भारतीयनाट्यशास्त्रे श्रीविश्वनाथेन उद्धृतः श्लोको न दृश्यते अपितु तत्स्थाने निम्नोक्तः श्लोको दृश्यते—

> वृत्तिवृत्त्यङ्गसंपन्नपदार्थं—प्रकृतिक्षमम्।
> पञ्चावस्थाभिर्निष्पन्नैः पञ्चभिः सन्धिभिर्युतम्॥
> षट्त्रिंशल्लक्षणोपेतम् गुणालङ्कारभूषितम्।
> महारसं महाभोगमुदात्तवचनान्वितम्॥*
> महापुरुषसञ्चारं साध्वाचारजनप्रियम्।
> सुश्लिष्टसन्धिसंयोगसुप्रयोगम् सुखाश्रयम्॥
> मृदु शब्दाभिधानं च कविः कुर्यात्तु नाटकम्।"

ननु श्रीमता विश्वनाथेन उद्धृते नाट्यशास्त्रपाठे "षट्त्रिंशल्लक्षणोपेतमलङ्कारोपशोभितम्" इति यत् दृश्यते तत्र अलङ्कारशब्देन आशीः प्रभृतयस्त्रिंशन्नाट्यालङ्काराः एव गृहीतास्तेन च तेषाम् अवश्यकर्त्तव्यताऽपि उररीकृता च। नूनम् अलङ्कारशब्देन नाट्यालङ्कारग्रहणे न दोषः—यतः "अर्थग्रहो व्याकरणोपामानात् कोषात्त् वाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेवदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" इति नियमात् अत्र सिद्धपदस्य सान्निध्यात् अर्थग्रहः—तथा सति 'षट्त्रिंशल्लक्षणम्' इतिं सिद्धपदस्य सान्निध्यात् अत्र अलङ्कारशब्देन काव्यालङ्कारं वर्ज्जयित्वा नाट्यालङ्कारस्य ग्रहणविषये न कश्चित् दोषः।

परं मुन्वानमरीमुद्रिते यत् "षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषित" इति वाक्यांशो दृश्यते तत्र गुणशब्देन नूनमेव प्रसादादयः लक्षितास्तथा सति प्रसादादिगुणवाचकस्य गुणइति सिद्धपदस्य सान्निध्यात् अत्र अलङ्कार शब्देन अवश्यमेव उपमादयः काव्यालङ्काराः लक्ष्यीकृताः। तथा सति नाट्यालङ्काराणाम् उल्लेखोऽत्र नास्ति। अतएव ते नाट्यालङ्काराः न मुनिः-सम्मताः। मन्यामहे ईदृशम् एव नाट्यशास्त्रपाठम् मनसिकृत्य दृष्टपठित-विचारितसाहित्यदर्पणोऽपि श्रीरूपगोस्वामिचरणः "मुनेरसम्मतत्वेन तत्तु

सर्व्वमुपेक्षितम्" इति घोषयित्वा नाट्यालङ्कारान् नाटकचन्द्रिकायाम् परित्यक्तवान्। [* "रचनान्वित" इत्येव ज्यायान् पाठः]।

ननु काव्यालङ्काराणाम् न नाटके अवश्यकर्त्तव्यता तर्हि कथमत्र अलङ्कार-शब्देन काव्यालङ्काराणां ग्रहणं भवेत्। तथाहि अत्र उल्लिखितानां सन्धिवृत्तिलक्षणप्रभृतीनां सर्वेषामवश्यकर्त्तव्यता। अत एवात्र अलङ्कारशब्देन नाट्यालङ्काराणां ग्रहणं युक्तं—यतस्तेषां अवश्यकर्त्तव्यता-स्वीकारे सर्व्वं समञ्जसं स्यात् इति चेत्—

अत्र उत्तरं पठ्यते—अत्र "कविः कुर्य्यात्तु नाटकम्" इति वाक्यांशः सर्वत्र-दर्पणोक्तपाठे तथा मुस्वानगरीमुद्रिते पाठे इति उभयत्र दृश्यते। अनेन अलङ्काराणाम् प्रयोक्तव्यता एव निर्द्दिष्टा न तेषां अवश्यकर्त्तव्यता। अवश्य-कर्त्तव्यता सर्व्वेषाम सन्धिवृत्तिलक्षणप्रभृतीनाम् अपि न भवेत् इति त्वया (श्रीमता विश्वनाथेन) अपि अङ्गीकृता--"रसव्यक्तिमपेक्ष्यैषामङ्गानां सन्निवेशनम्। न तु केवलया शास्त्रस्थिति—सम्पादनेच्छया" इत्यनेन। अतएव "गुणालङ्कारभूषितम्" इत्यत्र अलङ्कारशब्देन नूनम् काव्यालङ्काराणा-मेव ग्रहणं न्याय्यम्। तथा सति कुतो नाट्यालङ्काराणाम् सत्त्वायाः अवकाश इति श्रीरुपगोस्वामिनाम् आशयः। ननु अत्र विचारे कस्य आशयः साधीयान्—श्रमती विश्वनाथस्य उत श्रीरुपगोस्वामिपादानाम् इति सुधिभिर्विभाव्यम्। अस्माभिस्तु अत्र उभयमतमेवावलम्ब्य यथाशक्ति विचारः प्रदर्शितः। परन्तु विश्वनाथमतमेव वयं साधु मन्यामहे, प्रकरणत्वात्।

Eng. Tran.—These must be inserted (must have their existence) in dramas—as the following has been directed by the sages—"A drama—to be composed by a poet, must have five sandhis, four vritties, sixty four angas, thirty six lakshanas and Alamkaras ; it must have a grand sentiment (as the running, predominent or principal one). should be full of grace and capable of enjoy-

ment and be graced with a majestic style. It must present great personages, advocate proper conduct and should be liked by the people. The sandhis should be symmetrically arranged, the drama itself should be fit for staging, afford pleasure and be full of a set of graceful words."

Text—वृत्तिः। वीथ्यङ्गानि वक्ष्यन्ते। (अधुना ?) लास्याङ्गानि आह—

मित—। "षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथा। त्रयस्त्रिंशत् प्रयोज्यानि बीथ्यङ्गानि त्रयोदश" तथा—

"लास्याङ्गानि दश यथालाभं रसव्यपेक्षया" इति रुपके त्रयोदश-वीथ्यङ्गानि तथा दशलास्याङ्गानि रसव्यक्तिम् अपेक्ष्य योजगानि इति ग्रन्थकारेण आदौ कथितम्। तत्र लक्षणानाम तथा नाट्यालङ्काराणाम् परिचयप्रदानात् अनन्तरं क्रमप्राप्ता वीथी अङ्गैः सहिता व्याख्यातुं युक्ता। सा च पश्चात् कथयिष्यते इति अनेन हेतुना आदौ दश लास्या-ङ्गानि व्याख्यायन्ते। "लास्याङ्गानि दश तथा वीथ्यङ्गानि त्रयोदश। अङ्केष्वपि निबध्यानि केचिदेवं प्रचक्षते। प्रायस्तान्यपि सन्त्येव तस्मिल्लँलितमाधवे।" लास्यं तु नृत्यगीतादिव्यापारविशेषः। तस्य उपयोगिता--यथा दशरूपके—तथाहि, नाट्यात् विभिन्नं खलु नृत्यं। अन्यद्भावाश्रयम् नृत्तमिति धनञ्जयः। रसाश्रयात् नाट्यात् भावाश्रयं नृत्तम् अन्यदेव इति धनिकः। प्रसङ्गात् नृत्यम् अपि वा नुत्पादयति—नृत्यं तालल्याश्रितं। अथ द्विविधस्य (नृत्यस्यतथा नृत्तस्य च) द्वैविध्यं प्रदर्शयति—

मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः। लास्यताण्डवरुपेण नाटकाद्युप-कारकम्—इति धनञ्जयः। सुकुमारं द्वयम् अपि लास्यम्। उद्धतं द्वितयमपि ताण्डवमिति धनिकः। अतएव सुकुमारं नृत्यं तथा मधुरं नृत्तं च लास्यशब्देन उच्यते इति बोध्यम्। अथ प्रसक्तस्य उपयोगं तच्च नाटकाद्युपकारकमिति। नृत्यस्य क्वचिदवान्तरपदार्थाभिनयेन

नृत्तस्य च शोभाहेतुत्वेन नाटकादौ उपयोग इति धनिकः। तेन हि यतो सुकुमारनृत्यरूपस्य तथा मधुरनृत्तरूपस्य च लास्यस्य नाटकादौ उपयोगिता ततः अङ्गैः सह लास्यस्य परिचयः दीयते। तथाहि श्रीमुनिः "अन्यान्यपि लास्यविधावङ्गानि तु नाटकोपयोगीनि"।

Eng. Tran.—Vithi with its (thirteen angas) will be explained (later on). Now we proceed to describe "Lasaya" with its (ten) angas (first).

Text—श्लोकः। गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका। प्रच्छेदकस्त्रिगूढञ्च सैन्धवाख्यं द्विगूढकम्।
उत्तमोत्तमकञ्चान्यदुक्तप्रत्युक्तमेव। लास्ये दशविध ह्येतदङ्गमुक्तं मनीषिभिः॥

मित—। मनीषिभिः नाट्यशास्त्रविद्भिः लास्ये लास्यविषये एतत दशविधं दशप्रकारम् अङ्गम् उक्तं विहितं। तानि च अङ्गानि नाम्ना कीर्त्त्यन्ते—यथा गेयपदम् स्थितपाठ्यं, आसीनं, पुष्पगण्डिका, प्रच्छेदकः त्रिगूढकम्, सैन्धवं, द्विगूढकम् उत्तमोत्तमकं तथा उक्तप्रत्युक्तम् इति।

Eng. Tran—Scholars have fixed the following ten angas for Lasya ;— viz Geyapada, Sthitapattya, Asina, Puspagandika, Prachhedaka, Triguda, Saindhava, Dwiguraka, Uttamottama and Uktapratyukta.

Text- श्लोकः। तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्यासने पुरः। शुद्धं* गानं गेयपदम्।

वृत्तिः। यथा गौरीगृहे वीणां वादयन्ती—"मलयवती—

उत्फुल्लकमलकेसरपरागगौरद्युते! ममहि गौरि! अभिवाञ्छितं प्रसिद्ध्यतु भगवति! युष्मत्प्रसादेन।

मित—। तन्त्रीभाण्डं तुम्बुरुवीणादिकम् पुरस्कृत्य अग्रतः रक्षित्वा पुरः कस्यचित् देवविग्रहस्य अग्रे आसने उपविष्टस्य आसीनस्य शुद्धं पवित्रम् यद्वा शुद्धम् नृत्यादिवर्जितं गानं गेयपदम् इति लास्याङ्गं कथ्यते। गेयं गीतयोग्यं पदं इति पदार्थः। दृष्टान्तो यथा नागानन्दे नायिका मलयवती गौरीगृहे बीणां वादयन्ती प्रार्थयते—मम वाञ्छितं प्रसिद्धयतु पूर्णं भवतु। "सासनेतूपविष्टैर्यत्तन्त्रीभाण्डोपबृंहितम्। गायनैर्गीयते शुष्कं* तद्गेयपदमुच्यते।" इति भारतनाट्यशास्त्रम्। (*शुद्धमितियुक्तः पाठः)।

Eng. Tran—Geyapada stands for the decent or pure music (emanting) from one seated with a stringed instrument before a deity. As Malayavati (prays) while playing upon a lyre in the temple of Gauri :—

Oh. Gauri ! Oh Mother ! (Oh Lady !) oh one with her complexion as yellow as the pollen of the filaments of a budding lotus ! may my desire be fulfilled through your grace.

Text—श्लोकः। स्थितपाठ्यं तदुच्यते। मदनोत्तापिता अत्र पठति प्राकृतं स्थिता।

वृत्तिः। अभिनवगुप्तपादास्त्वाहुः—उपलक्षणञ्च तत्। क्रोधोद्भ्रान्तस्यापि प्राकृतपठनं स्थितपाठ्यम् इति।

मित। यत्र मदनोत्तापिता कामपीड़िता काचिन्नारी स्थिता उपविष्टा सती प्राकृतं प्राकृतभाषानिवद्धं श्लोकं पठति—तत् स्थितपाठ्यमिति लास्याङ्गं कथ्यते। "प्राकृतं या वियुक्ता तु पठेदासनसंस्थिता। मदनानलतप्ताङ्गी स्थितिपाठ्यं तदुच्यते—इति नाट्यशास्त्रम्। अत्र स्थितपाठ्य स्थले "स्थितिपाट्यम्" अपि दृश्यते। अपिच "आसनसंस्थिता" इति नाट्यशास्त्रपाठेन सह एकवाक्यताम् विधातुम् वयम् "स्थिता" इति दर्पणोक्तपदस्य "उपविष्टा सती "इति अर्थं कृतवन्तः॥ अथ नाट्यशास्त्र

टीकाकृत् श्रीअभिनवगुप्तपादास्तु मन्यन्ते—यथा मदनोत्तापेन प्राकृतपठनम तथा रमण्या खलु प्राकृतपठनम् इति द्वयमेव उपलक्षणम्। स्वप्रतिपादकत्वेसति स्वेतरप्रतिपादकत्वम् उपलक्षणत्वम्। तथाहि क्रोधोत्तापेन अपि प्राकृतपाठनम् स्थितपाठ्यं स्यात्। "क्रोधोद्भ्रान्तस्यापि प्राकृत पठनम् स्थितपाठ्यम्" इति अभिनवगुप्तपादानम् अभिप्रायसारस्यात् द्विविधस्य अर्थस्य समुपत्तिःस्यात्। यथा - प्रथमः –मदनोत्तापेन तापितया नार्य्या प्राकृतपठनम् स्थितपाठ्यम्। तथा क्रोधात् उद्भ्रान्तेन पुरुषेण प्राकृतपठम् स्थितपाठ्यम्। द्वितीयः—अत्रापि श्रीअभिनवगुप्तपाद-वाक्ये उपलक्षणवलात् द्वितीयः अर्थ यथा—मदनेन तापितया नार्य्या तापितपुरुषेण वा प्राकृतपटनम् स्थितपाठ्यम्। तथा क्रोधात् उद्भ्रान्तेन पुरुषेण उदभ्रान्तया रमण्या वा प्राकृतपठनम् स्थितपाठ्यम्। अस्माभिस्तु द्वितीय एव अर्थः समर्थ्यते। अथ मदनोत्तापितया रमण्या प्राकृतपठनं यथा अभिज्ञानशकुन्तले। तत्र कामपीड़िता शकुन्तला दुष्यन्तमुद्दिश्य प्राकृत लेखं पठति यथा—"तुजम्भ ण आणे हिअअ। मम उण मअणो दिवावि रत्तिं वि णिक्किव। दहइ वलिअं तुएवित्थमनोरहाइं अङ्गाइं। तव न जाने हृदयम्। ममपुनर्मदनो दिवापि रात्रावपि निष्कृप। दहति बलीयः त्वयि वृत्तमनोरथाया अङ्गानि इति संस्कृतम्।

Eng. Tran.—Sthitapathya is the Prakrit text that is read by a female under the influence of cupid. The venerable Abhinavaguptapada says (on this point) ; This is a case of upalakshana ! (what is the theory propagated here should have wider application and hence) the reading of Prakrita thus by a male—non-plussed through anger is also Sthithapathya

Text—श्लोकः। निखिलतोद्यरहितं शोकचिन्तान्विताबला। अप्रसाधितगात्रं यदासीनासीनमेव तत्।

मित—। अथ आसीनम् इति लास्याङ्गं व्याख्याति। शोकेन अन्विता आक्रान्ता अवला नारी आसीना उपविष्टा सती निखिलातोद्य रहितं निखिलेन आतोद्येन वाद्येन वाद्ययन्त्रेण रहितं शून्यं यथा तथा तादृशं वादित्ररहितम् इत्यर्थः तथा अप्रसाधितगात्रम् अनलङ्कृतशरीरं यथा तथा इति यत् गायति आसीनमेव तत् चासीनम् इति नाम लास्याङ्गम्। यदा नायकशोकेन तथा नायकचिन्तया च मग्नाभूषणवर्जिता नायिका वाद्ययन्त्रं विना आसीना सती गायति तदा आसीनमिति लास्याङ्गं स्यात् इति भावः। अथ "गायति" इति क्रियापदं श्लोके न दृश्यते। अपि च न कापि क्रिया तत्र विराजते। तथासति निखिलातोद्यरहितम् इत्यत्र आतोद्यपदबलात् "गायति" इति पदम् अत्र अवस्थानयोग्यम् इति मत्वा गायति इति पदं अध्याहार्य्य वयम् श्लोकमिदं व्याख्यातवन्तः। किञ्च भारतीयनाट्यशास्त्रे अत्र वादित्रवर्जनस्य यथा गानस्य प्रसङ्गोऽपि नास्ति। तन्मते शोकचिन्तान्वितायाः अवलायाः उपवेशनम् एव आसीनं भवेत्। यथा—

"आसीनमास्यते यत्र चिन्ताशोकसमन्वितं अप्रसाधितगात्रम् च जिह्मदृष्टिनिरीक्षितम्" इति।

Eng. Tran.—Asina implies the sitting of a woman—, off her ornaments and decorations due to the seizure by grief and anxiety, together with singing by her without (the aid of) any musical instrument.,

N. B.—An instance of this Asina may be found in the following lines of Jayadeva, when Radhica sings—

तथाहि गीतगोविन्दे द्वितीयः सर्गः। गीतम् गुर्जरीरागयति—तालाभ्यासं गीयते।

"सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्।
वलिततदृगञ्चलचञ्चलं मौलिकपोलविलोलवतंसम्॥

श्लोकः। आतोद्यमिश्रितं गेयं छन्दांसि विविधानि च।
स्त्रीपुंसयोर्विपर्यासचेष्टितं पुष्पगण्डिका ॥

मित—। आतोद्यमिश्रितं वाद्ययन्त्रेण सह सङ्गतं गेयं गानम्; तथा विविधानि छन्दांसि तेषां पठनम् इतिभावः। तथा स्त्रीपुंसयोः नार्याः नरस्य च विपर्य्यासचेष्टितं विपरीतव्यवहारः—नार्य्या हि नरवत् व्यवहारः नरस्य च नारीवत् आचरणम् इत्यर्थः—पुष्पगण्डिका इति नाम लास्याङ्गम्। नार्य्या हि नरवेषेण संस्कृतपठनम् एव पुष्पगण्डिका इति श्रीमुनिः तथाहि नाट्यशास्त्रे—

यत्र स्त्रीनरवेषेण ललितं संस्कृत पठेत्। सखीनां तु विनोदाय
सा ज्ञेया पुष्पगण्डिका।

अपि च स्त्रीपुंसयोर्विपर्य्यासचेष्टितमेव श्रव्यकाव्ये विपरीतविहार इति उच्यते।

Eng. Tran—Puspagandika indicates music accompanied by instruments as well as the recitation of (verses in) various metres and the topsyturvy attitude (conduct or procedure) of male and female.

N. B.—छन्दांसि विविधानि च इत्येतस्य उदाहरणं तु मृग्यम्। श्रीपुंसयोर्विपर्य्यासचेष्टितं तु श्रव्यकाव्ये विपरीतसम्भोग उच्यते इति अस्माभिः प्रागेव कथितम्। तस्य वर्णनं यथा श्रीचण्डीदासपदावल्याम्—तत् तु विरहाधिक्यात् सम्भवेत्। तस्य दृष्टान्तो प्राप्यते श्रीमद्भागवते श्रीश्रीरासपञ्चाध्याय्याम् यत्र विरहपीड़िता गोपी कृष्णायितवती।

अतएव सर्व्वम् विविच्य त्रिविधा पुष्पगण्डिका भवति इति मन्यामहे वयम्। श्रीमता हरिदाससिद्धान्तवागीशेन कृतायाम् टीकायाम् यत् व्याख्यानं दृश्यते तस्मात् प्रतीयते यत् तन्मते पुष्पगण्डिका एकविधा एव। यथाहि एकविधायाम् एव पुष्पगण्डिकायाम् आतोद्यमिश्रितस्य गेयस्य, विविधानि छन्दांसीति एतस्य यथा श्रीपुंसयोर्विपर्य्यासचेष्टितम् इति

एतस्य च सत्ता विज्ञेया। परं तेन उदाहृते दृष्टान्ते तु एतत्त्रयस्य युगपत् सत्ता न दृश्यते। एतत् सर्व्वं विचार्य्य अस्माभिः आतोद्यमिश्रितगेय-युक्ता, तथा विविधैः छन्दोभिः सनाथा, तथा स्त्रीपुंसयोर्वैपरीत्येन व्यवहार-समन्विता इति त्रिविधा पुष्प-गण्डिका भवेत् इति एतत् सिद्धान्तितम्। अस्य साधुत्वमसाधुत्वं वा सुधीभिर्विभाव्यम्। श्रीमुनिमते तु पुष्प-गण्डिका एकविधा एव तस्याः प्रसङ्गस्तु यत्र यत्र नारी सखीनां विनोदाय नरवेषम् आश्रित्य ललितं संस्कृतम् पठेत्। अनेन सह दर्पणलक्षणस्य एक-वाक्यताम् विधाय इदं सिद्धान्तं कर्त्तुं शक्यते तत् पुष्पगण्डिका एकविधा एव। सा तु तत्रैव स्यात् यत्र काचिन्नारी नरवेषं धृत्वा विविधछन्दो-ग्रथितं संस्कृतश्लोकं पठति तथा वादित्रसङ्गतम् गीतं च करोति। मन्ये ईदृशं व्याख्यानमेव सर्वेषां पूरणम् समञ्जसं शरणञ्चेति।

अत्र मुनिश्लोके नार्य्यां नरवेषधारणश्रवणेन श्रीपुंसयोर्विपर्य्यास-चेष्टितं" ध्वनितं। तथाहि इदं विपर्य्यासचेष्टितं द्विविधं स्यात्—सम्भोग-मयम् विप्रलम्भमयं च। सम्भोगे तत् चेष्टितं विपरीतविहाररूपम्—परम् दृश्यकाव्ये रतिक्रीड़ायाः निषेधात ईदृशम् विपरीतचेष्टितम् अत्र अग्राह्यम्। अतएव विप्रलम्भचोदितं विपर्य्यासचेष्टितम् अत्र स्वीकार्य्यम्। तस्मिन् च चेष्टिते नारी नरवेषं धारयति नरवत् च आचरति। अस्य दृष्टान्तो श्रीमद्भागवते श्रीश्रीरासपञ्चाध्याय्याम् दृश्यते इति प्रागेव उक्तम् अस्माभिः।

Text—श्लोकः। अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना। वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः।

मित—। पतिं स्वामिनम् अन्यासक्तम् मत्वा विज्ञाय प्रेमविच्छेदेन प्रणयभङ्गेन जनितः यः मन्युः क्रोधः दुःखं वा तेन हेतुना वीणापुरःसरं वीणावादनपूर्व्वकम् यत् स्त्रियाः गानं आत्मनः आधिप्रकाशकम् गीतं तदेव प्रच्छेदक इति लास्याङ्गं कथ्यते। दृष्टान्तो यथा-शाकुन्तले हंस पदिकायाः गीते। अत्र मुनिकृते लक्षणं तु किञ्चित् विभिन्नं तत् यथा—

"प्रच्छेदकः स विज्ञेयो यत्र चन्द्रातपाहताः स्त्रियः प्रियेषु सज्जन्ते ह्यपि विप्रियकारिषु" इति।

Eng. Trans.—Prachhedaka is the song sung by a heroine in consonance with a lyre, through disaffection due to the break-down of the affection of the lover, thought to be attached to another woman.

Text—श्लोकः। स्त्रीवेशधारिणां पुंसाम् नाट्यम् श्लक्ष्णं त्रिगूढ़कम्। [Both वेश and वेश are correct]

वृत्तिः। यथा मालत्याम् मकरन्दः—एषोऽस्मि मालती संवृत्तः।

मित । "स्त्रीवेशधारिणाम्" कस्यचित् उद्देश्यस्य साधनाय स्वीकृतनारी-परिच्छदानां पुंसाम् श्लक्ष्णं निपुणं नाट्यम् रमणीयत्वेन अभिनयः त्रिगूढ़कम् इति लास्याङ्गं स्यात्। दृष्टान्तो यथा मालतीमाधवे यत्र मालतीम् परिणेतुम् उद्यतम् राजनिर्दिष्टं जनं वञ्चयितुम् मालत्या प्रणयिनः माधवस्य मित्रेण मकरन्देन मालतीवेशस्य उरर्गाकरणम्। तदेव अस्याम् पङ्क्त्याम् प्रदर्शितम्। मुनिलक्षणं तु विभिन्नं तद् यथा "अनिष्ठुरं श्लक्ष्णपद समवृत्तैरलंकृतम्। नाट्यं पुरुषभावाढ्यं त्रिमूढ़कमुदाहृतम्"। (त्रिगूढ़कम् इति स्थले त्रिमूढ़कम् इति श्रीभरतः पठति)।

Eng. Trans.—Trigudaka is the clever acting of actors that have assumed female garbs (for some purpose).

As in the Malati-Makaranda says—Now I have been turned into Malati (i. e. now I figure as Malati).

Text—श्लोकः। कश्चन भ्रष्टसङ्केतः सुव्यक्तकरणान्वितः। प्राकृतं वचनं वक्ति यत्र तत् सैन्धवं विदुः—(वा मतम्)।

वृत्तिः। करणं वीणादिक्रिया।

मित—। भ्रष्टः अप्रतिपालितः विस्मृतः इति यावत् सङ्केतः यस्य तादृशः। अतएव भ्रष्टसङ्केतः नायिकायाः अनागमनात् बिफलसङ्केतः कश्चन यः कश्चित् नायकः सुव्यक्तकरणान्वितः सुव्यक्तेन सुसपष्टेन करणेन वीणादिवादनेन अन्वितः युक्तः सन् प्राकृतं वचनं बक्ति यत्र, तत् सैन्धवम् लास्याङ्गं स्यात्। तथाहि श्रीमुनिः—"पात्रम् विस्मृतसङ्केतं सुव्यक्तकरणान्वितम्। प्राकृतैर्वचनैर्युक्तं विदुः सैन्धवकं बुधाः।" अत्र बिस्मृतसङ्केतं इति भ्रष्टसङ्केतम् इत्यस्य प्रतिशव्दः। परं विस्मृतसङ्केतः इति शव्देन प्रतीयते यत् सङ्केतस्तु नायकेन एब बिस्मृतः न तु नायिकया। तथा चेत् "भ्रष्ट सङ्केतम्" इति शव्दः तु भ्रष्टः अप्रतिपालितः सङ्केतः येन स इति एवंविधरूपेण एव व्याख्येयः। श्रीमान् सिद्धान्तबागीशस्तु भ्रष्टः निर्दिष्टस्थाने नायिकाया अनागमनात् प्रच्युतः (lost) सङ्केतः यस्य स इति इत्थम् व्याख्याय बिक्रमोर्व्वश्याः दृष्टान्तं प्रदर्शितवान्। तत् यथा - राजा। कइ तुए सिविदादमेदं गइलानस॥ सा तुए दिट्टा जहणभरालसा॥ मन्ये भ्रष्टसङ्केतम् इत्यस्य सिद्धान्तबागीशव्याख्यानसेव शोभनम्। परं ईदृशः अर्थः बिस्मृतसङ्केतम् इति मुनिप्रयुक्तात् शव्दात् नोद्भवति। थता सति मुनिलक्षणेन सह दर्पणलक्षणस्य एकवाक्यता अपि न भवति। परम् दर्पणलक्षणेन सह मुनिलक्षणस्य पार्थक्यं तु बहुषु स्थानेषु दृश्यते। अत्रापि च तत् भवतु—काक्षतिरिति विबिच्य वयम् विस्मृतसङ्केतम् इत्यनेन सह भ्रष्टसङ्केतम् इत्यस्य एकवाक्यताम् ,अकृत्वा भ्रष्टसङ्केतम् इत्यस्य सिद्धान्तबागीशकृतं अर्थमेव गृहीतवन्तः। यद्वा विस्मृतसङ्केतात् भ्रष्टसंङ्केतता आयाति।

Eng. Tran.—Saindhava is that in which the hero utters Prakrit sentence while playing upon lyre in a very distinct (clear or nice) way, when he has missed his heroine in the tryst.

The word Karana (in the text) stands for playing upon lyres etc.

Text—श्लोकः। चतुरस्रपदं गीतं मुखप्रतिमुखान्वितं। द्विगूढं रसभावाढ्यम्।

मित—। अथ द्विगूढं नाम लास्याङ्गम् व्याचष्टे। तत्त गीतं गानम्, शुभवस्तुविषयकम् शुभकामनासूचकं वा गानम् इति बोध्यं। कीदृशम्? चतुरस्रपदम् चतुरस्राणि चतुष्कोणस्थितानि चतुर्धाविभक्तानि इति यावत् पदानि यत्र तादृशम्। अपि च रसभावाढ्यं रसेन भावेन च आढ्यम् उज्ज्वलम्। स्पष्टभावरसोपेतम् इत्यर्थः। कुत्र वा अस्य स्थितिः? मुखप्रतिमुखान्वितं—मुखेन मुखसन्धिना प्रतिमुखेन प्रतिमुखसन्धिना च अन्वितं युक्तं। तथाहि नाटकस्य मुखसन्धौ वा प्रतिमुखसन्धौ वा उभयत्र वा अस्य द्विगूढम् इति लास्याङ्गस्य अवस्थितिर्ज्ञेया। मुखप्रतिमुखान्वितमिति एतन्न मुनिसम्मतम्। तथाहि नाट्यशास्त्रे—शुभार्थगीताभिनयं चतुरस्रपदक्रमम्। स्पष्टभावरसोपेतम् व्याजचेष्टं द्विगूढकम्। इति। व्याजचेष्टम् इति एतन्न दर्पणसम्मतम्। दृष्टान्तो यथा शाकुन्तले—

ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि। अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि।

Eng. Tran.—Dwiguda is the song resplendent with sentiment (i. e. having a clear appeal to some particular sentiment) inserted in either the Mukha or the Pratimukhasandhi (or in the both) with a four fine set of words.

N. B.--The significance of the word चतुरस्रपदम् is not very clear. The word occurs as we have already seen, in the work of Bharata as चतुरस्रपदक्रमम्।

Dasarupaka mentions only the names of these lasyangas—but does not define them individually. Sri Rupa does

not mention them even by names. He simply lays down--
"लास्याङ्गानि दश तथा वीथ्यङ्गाणि त्रयोदश । अङ्केष्वपि निबध्यानि केचिदेवं प्रचक्षते ।" Sidhantavagisha explains this in the following way :—चतुरस्राणि चतुर्धा विभक्तानि पदानि यत्र तत् ; but how this is possible—he does not say. Perhaps this is possible in शब्दालङ्कारबन्ध* (see our Kavyadarsha third chapter) ; or explain thus—चतस्त्रोस्त्रयः कोणा यस्य इति बहुब्रीहौ अच् निपात्यते=चतुरस्रम् चतुरश्रम् वा having four points i. e. which pleases all equally पूर्णसप्तस्वरम्, मौलरसंचतुष्टययुक्तम् (see our chap. I Intro. and III under Rasas) इत्यर्थः ततश्च विदग्धमनोहरम् पदं यत्र तत् चतुरस्रपदम् ।

Text—श्लोकः । उत्तमोत्तमकं पुनः । कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम् ।

सित—। कोपप्रसादजम् कोपात् क्रोधात् प्रसादात् प्रसन्नतायाः जातम् उत्पन्नम् अधिक्षेपयुक्तम् तिरस्कारयुक्तं रसोत्तरम् रसः उत्तरः प्रधानं यत्र तादृशम् रसप्रधानम् लास्याङ्गम् पुनः उत्तमोत्तमकम् कथ्यते । अधिक्षेपयुक्तम् इति एतत्तु कोपजे एव उत्तमोत्तमे सम्भवति । ईदृश* लक्षणयुक्तं लास्यं तु मुनिमते उक्तप्रत्युक्त भण्यते—तथाहि नाट्यशास्त्रे कोपप्रसादजनितम् साधिक्षेपपदाश्रयम् । उक्तप्रत्युक्तमेव स्यात् किन्तु गीतार्थयोजितम् ।

Eng. Tran—Uttamottamaka is the lasyanga which emanates from either wrath or cheerfulness and (consequently) contains reproaches (in the case of uttamottamaka—owing to its origin from wrath) and in which sentiment occupies a predominent position.

Text—श्लोकः। हावहेलान्वितं चित्रश्लोकवन्धमनोहरम। उक्ति-प्रत्युक्तिसंयुक्तं सोपालम्भमलीकवत्। बिलासान्वितगीतार्थमुक्तप्रत्युक्त-मुच्यते।

धृतिः। स्पष्टान्युदाहरणानि।

मित—। उक्तप्रत्युक्तोदाहरणानि—इति अनेन उक्तप्रत्युक्तं नाम लास्याङ्गं लक्षयति। तत् कीदृशं? हावहेलान्वितम्—हावेन हेलया च अन्वितं युक्तमिति यावत्। हावस्तु अल्पसंलक्ष्यविकारोभावः। हेला तु अत्यन्तसमालक्ष्यबिकारो भावः। तथाहि—निर्व्विकारात्मकेचित्ते भावः प्रथमंविक्रिया—इति भावलक्षणम्। भ्रनेत्रादिबिकारैस्तु सम्भोगेच्छा प्रकाशकः। भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते इति हावलक्षणम्। हेलात्यन्तसमालक्ष्यबिकारः स्यात् स एव च—इति हेलालक्षणम्। ईदृश-लक्षणेन हावेन तथा हेलयाच युक्तम्। अपि च चित्रश्लोकवन्धमनोहरम्—बिचित्रश्लोकवन्धमनोहरम्। यद्वा चित्रेण चित्रयुक्तेन श्लोकवन्धेन मनोहरम्। खड्गमुरजचक्रगोमुत्रिकादयः चित्रश्लोकाः। उक्तिप्रत्युक्ति संयुक्तं उक्त्या वचनेन प्रत्युक्त्या प्रतिवचनेन च सयुक्तं तथा सोपालम्भम् उपालम्भेन तिरस्कारेण भर्तसनया इति भावः सह बर्त्तमानं यत् तादृशम्। विलासान्वितगीतार्थम्--धीरादृष्टिर्गतिश्चित्रा विलासे सस्मितं बचः इति एतल्लक्षणेन बिलासइति प्रख्यातनायकगुणेन अन्वितः युक्तः। यद्वा यानस्थानासनादीनां मुखनेत्रादिकर्म्मणाम् विशेषस्तु विलासः-आदिष्टसन्दर्शनादिना इति एतल्लक्षणेन विलास इति प्रख्यातेन नायिका लङ्कारेण युक्तं; यद्वा समीहा रतिभोगार्था विलास इति कथ्यते इति एतल्लक्षणेन, बिलास इति कथितेन सन्ध्यङ्गेन युक्तः गीतार्थः गान-वस्तु यत्र तादृशम्। एतदेव उक्तप्रत्युक्तं मुनिना उत्तमोत्तमकं मन्यते। यथा नाट्यशास्त्रे—उत्तमोत्तमकं विद्यादनेकरससंश्रयम्। विचित्रैः श्लोक-वन्धैश्च हेलाभावविभूषितम्—इति।

विचित्रैः श्लोकवन्धैरिति एतस्य व्याख्यानम् श्रीमुनिः इत्थं ददाति

यथा—"यदि प्रतिकृतिं दृष्ट्वा विनोदयति मानसम्। मदनानलतप्तम् तु विचित्रपदमुच्यते। अतएव प्रतीयते यत् विचित्रैः श्लोकबन्धैः"—इति एतस्य किंम्व "चित्रश्लोकबन्ध मनोहरम्" इति एतस्य वा "प्रतिकृति दर्शनेन मदनानलसन्तप्तस्य चित्तस्य विनोदनव्यञ्जकैः श्लोकैः इति अयमेव अर्थः। प्रतिकृतिदर्शनेनमदनानलसन्तप्तस्य चित्तस्य बिनोदनं तु स्वप्नवासबदत्तादौ प्रसिद्धम्। अधुना सर्व्वं पिण्डीकृत्य एतदयाति—

उक्तप्रत्युक्तं नाम लास्याङ्गं (यत् खलु श्रीमुनिना उत्तमोत्तमकमिति भण्यते) गीतवस्तु एव। तत् तु हावेन हेलया विलासेन च भूषितं स्यात्। अपि च तत्र मदनानलसन्तप्तचित्तविनोदनसूचकश्लोकस्तिष्ठेत्। तथा (दर्पणमते) तिरस्कारस्य एवं उक्तिप्रत्युक्तेश्चापि स्यात् सत्तातत्र। एवं च उत्तमोत्तमकं नाम नवमलास्याङ्गमूखलु रस-प्रधानम् कोपात् प्रसादात् का उत्पन्नं तथा तिरस्कारसूचकवचनयुक्तं स्यात्। मुनिमते तु एतदेव गीतार्थयोजितं सत् उक्तप्रत्युक्तम् उच्यते।

Eng. Tran.—Uktapratyuktam is a subject-matter for song which is teeming with Vilasa, Hava and Hela, which is appealing due to the existence of fine couplets and which abounds with reproach as well as mutual conversations (or accusations).

Examples can be easily gathered from dramas.

मित—। अथ एवं नाटकविवरणं प्रदाय महानाटकं लक्षयति—

Text—श्लोकः। एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम्।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे॥

वृत्तिः। एतदेव नाटकम। यथा—बालारामायणम्।

मित—। एतदेव ईदृशम सन्ध्यङ्ग-लक्षणलास्याङ्गादिभिरलङ्कृतं नाटकं यदा सर्व्वैः चतुःषष्ठिसंख्यकैः प्रागुक्तलक्षणयुतं समन्वितं तथा पताकास्थानकैरेवंदशभिश्च अङ्कैः सनाथं स्यात् तदा ईदृशं खलु नाटकं

धीरा पण्डिताः महानाटकम् ऊचिरे प्रोक्तवन्तः। अस्य दृष्टान्तो यथा वालरामायणम्। अपिच हनुमन्नाटकम् इति संज्ञान्तरेण आख्यातं महानाटकम् इति अस्ति। तत्र चतुर्दश अङ्काः। इदं नाटकं आदौ श्रमता हनुमता रचितं पश्चात् श्रीदामोदरमिश्रेण सुश्लिष्टम्। वालरामायणंतु श्रीमता राजशेखरेण विरचितम्। तत्र दश अङ्काः सन्ति।

Eng. Tran.—When this (i. e. this drama or नाटक) is endowed with (i. e. when it abounds with) all the four Patakasthana, Lakshana etc, and contains ten acts--it is denominated as a Mahanataka by the wise.

Text—वृत्तिः। अथ प्रकरणम्।

मित— "नाटकमथ प्रकरण" मिति नाटकं विचार्य्य अधुना क्रमप्राप्तं प्रकरणं नाम रुपकम् लक्षयति।

Eng. Tran.—Now Prakarana (is going to be defined).

Text—श्लोकः। भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।

श्रृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।

सापायधर्मकामार्थपरो धीरप्रशान्तकः।

वृत्तिः। विप्रनायकं—यथा मृच्छकठिकम्। अमात्यनायकं—मालती माधवम्। वणिङ्नायकं—पुष्पभूषितम्।

मित -। प्रकरणे तदाख्ये दृश्यकाव्ये वृत्तं वृत्तान्तइति यावत् लौकिकम् लोकसंश्रयम् मर्त्त्यलोकसन्वन्धि इत्यर्थः तथा कविकल्पनोक्तं कविना उद्भावितम्—न खलु इतिहासात् पुराणात् वा गृहीतं भवेत्। तथाहि दृश्यकाव्यनिवद्धम् इतिवृत्तम त्रिधा स्यात् यथा—नाटकचन्द्रिकायाम्—

"इतिवृत्तं भवेत् ख्यातं क्लृप्तं मिश्रमिति त्रिधा।

शास्त्रप्रसिद्धं ख्यातं स्यात् क्लृप्तं कविविनिर्म्मितम्॥

तयोः सङ्करता मिश्रम्"—इति।

तत्र नाटकं ख्यातवृत्तं स्यादिति वचनात् नाटकस्थम् इतिवृत्तम् ख्यातं-भवेत्। ख्यातम् इतिहासात् पुराणाद्वा गृहीतम्। एवं च प्रकरणे इतिवृत्तम् कविकल्पितमपि स्यात् अतएव प्रकरणस्थम् इतिवृत्तं क्लृप्तम्। तच्च कविकल्पितम् इतिवृत्तम् मर्त्त्यलोकवासिनाम् चरिताश्रयि स्यात्। उक्तं हि श्रीमुनिना "यन्नाटके मयोक्तं वस्तु शरीरं च वृत्तिभेदाश्च। तत् प्रकरणेऽपि कार्य्यं केवलमुत्पाद्यं वस्तु स्यात्"। दशरूपकेऽपि—अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्। "किञ्च प्रकरणे शृङ्गाररसः एव अङ्गीस्यात्। नाटके तु शृङ्गारोऽङ्गी भवेत् वीरो वा अङ्गीभवेत्। अपिच प्रकरणे यो नायकः स तु कश्चित् विप्रः स्यात् यथा मृच्छकटिके तत्र—विप्रश्चारुदत्त एव नायकः। अथवा कश्चित् अमात्योभवेत् यथा—मालतीमाधवे अमात्यतनयः (अतएव भावी अमात्यः) माधव एव नायकः। अथवा कश्चित् वणिक् स्यात् यथा पुष्पभूषिताख्ये प्रकारणे कश्चित् वणिक् एव नायकः। अपि च स नायकः धीरप्रशान्तः एव भवेत्—न वा धीरोदात्तः नापि धीरललितः नचापि धीरोद्धतः। तल्लक्षणं यथा—सामान्यगुणैर्भूयान् द्विजादिको धीर-प्रशान्तः स्यात्। किञ्च स च नायकः कस्मिन् उद्देश्ये व्यापृतो भवेत् इति उत्तरं पठति—सापाय इत्यादिना। अपायः विनाशः। तेन सह वर्त्तमानो यः स सापायः विनाशशीलः इत्यर्थः। तादृशः यः धर्म्मः दानादिकर्म्मानु-ष्ठानं तथा तादृशः योऽर्थः धनविषयादिकः लक्षणया धनादीदानम् अर्जनम् तथा तादृशः यः कामः भोग्यपदार्थः—ते एव परं प्रधानं यस्य तादृशः एव नायकः स्यात्। प्रकरणस्थो नायकः विनाशधर्म्मिणः दानादिधर्म्मानुष्ठाने तत्परः स्यात् अथवा विनाशधर्म्मिणाम् धनादीनाम् अर्जने व्यापृतो भवेत् अथवा विनाशधर्म्मिषु कामनीयेषु भोग्यवस्तुषु आसक्तो भवेत्, न कदापि मोक्षे यतमानः स्यात् इति भावः।

तथाहि दशरूपके—

अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्। अमात्यविप्रवणिजामेकम्

कुर्य्याच्च नायकं धीरप्रशान्तम् सापायधर्म्मकामार्थतत्परम्। शेषं नाटकवत्सन्धिप्रवेशकरसादिकम्।

अत्र सापायधर्म्मकामार्थतत्परम् इत्यस्य अर्थः "विपदन्तरितार्थसिद्धिम्" इति टीकाकृता धनिकेन लिखितम्। अपायः विघ्नः। सापायः विघ्नसङ्कुलः। तादृशः धर्म्मकामार्थः परं यस्य तादृशः एव नायकः स्यात्। प्रकरणे नायकस्य यः खलु मुख्यः उद्देश्यः धर्म्मकामार्थभोगः स तु सापायः विपदा अन्तरितः स्यात् इति भावः। ईदृशं व्याख्यानम् एव साधीयः। अथ प्रकरणमधिकृत्य श्रीमुनिवचनम्—

"विप्रवणिक् सचिवानां पुरोहितामात्यसार्थवाहानाम् चरितं
यत्रैक-विघ्नं ज्ञेयं तत् प्रकरणं नाम।
नोदात्तनायककृतं न दिव्यचरितं न राजसंभोगः।
वाह्यजनसंप्रयुक्तं ज्ञेयं तत् प्रकरणम्" ॥

Eng. Tran.—The Subject matter of a Prakarana should be an invention of the poetbased on human beings (ordinary mortals). The predominant sentiment should be Erotic and the hero will be either a Brahman or a minister or a merchant (at any rate) of the Dhiraprasanta-type and he will be devoted to the performance of Dharma (pious deeds) Artha (acquisition of wealth) or Kama (enioyment of pleasures) which is but transitory in character (or better—which is to be beset with difficulties or confronted by obstacles).

Example of a Brahman hero—as in the Mrichhakatika ; of a minister hero—as in the Malati Madhava ; of a merchant hero as in the Puspa-bhushita.

Text—श्लोकः। नायिका कुलजा क्वापि, वेश्या क्वापि द्वयं क्वचित्।

तेन भेदास्त्रयस्तस्य तत्रभेदस्तृतीयकः। कितवद्यूतकारादिविटचेटक सङ्कुलः।

वृत्तिः। कुलस्त्री पुष्पभूषिते। वेश्या तु तरङ्गवृत्ते (तरङ्गदत्ते इति पाठान्तरम् *)। द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्। [रङ्गवृत्ते, रङ्गदत्ते वा पाठान्तरम्]।

मित। अथ प्रकरणगतां नायिकां विवेचयति—क्वापि कस्मिन् खलु प्रकरणे कुलजा कुलाङ्गना स्वकीया कन्यकारूपा परकीया वा नायिका भवति। कुलजा अभ्यन्तरा इति दशरूपके। दृष्टान्तो यथा पुष्पभूषिते। (पुष्पभूषितके इति धनिकः)। अत्र एका एव नायिका सा तु कुलाङ्गना। क्वापि कस्मिन् अपि वा प्रकरणे वेश्या नायिका दृश्यते। "वेशोभृतिः। सोऽस्या जीवनम् अस्ति" इति वेश्या। तद्विशेषो गणिका वेश्याविशेषा इत्यर्थः—

यदुक्तं—आभिरभ्यर्थिता वेश्या रूपशीलगुणान्विता।
लभते गणिकाशब्दं स्थानं च जनसंसदि।"

वेश्या तु "धीरा कलाप्रगल्भा स्यात् वेश्या सामान्यनायिका" इति लक्षणाक्रान्ता। अतएव इदम् आयाति—कस्मिन् खलु प्रकरणे वेश्या नायिका भवति कस्मिन् वा वेश्याविशेषो या गायिका सा एव नायिका स्यात्। उक्तं हि दशरूपके—नायिका तु द्विधा नेतुः कुलस्त्री गायिका तथा। वेश्या नायिका यथा तरङ्गवृत्ते (तरङ्गदत्ते इति धनिकः)। किञ्च क्वचित् कस्मिन् वा प्रकरणे द्वयं कुलजा तथा वेश्या गणिका वा इति द्वे एव नायिके दृश्येते यथा मृच्छकटिके। तत्र कुलाङ्गना धूता तथा वेश्या वसन्तसेना च नायिके। अतएव नायिकाभेदम् आश्रित्य तस्य प्रकरणस्य त्रयः भेदाः स्वीकृताः। कुलजया नायिकया सनाथं शुद्धं प्रकरणं, वेश्यया गणिकया वा नायिकया सनाथं धूर्त्तप्रकरणं तथा उभयविधनायिकासनाथं मिश्रं प्रकरणम् सङ्कीर्णं वा इति

त्रिविधो भेदः। तत्र तेषां त्रयाणाम् भेदानां मध्ये यः तृतीयः तृतीयभेदः उभयविधनायिकायुक्तं प्रकरणम् इत्यर्थः—तत् तु कितवैः धूर्त्तैः तथा द्यूतकारः पणं कृत्वा अक्षक्रीड़ां कुर्व्वद्भिः जनैः, एवं द्युतकारादि इति आदिपदेन सभिकग्रन्थिच्छेदक सन्धिच्छेदकादयः ग्राह्याः। तादृशैश्च जनैः तथा विटेन चेटेन च सङ्कुलं परिपूर्णं स्यात्। अत्र विटचेटशब्दद्वय-साहचर्य्यात् उपलक्षणमाश्रित्य शकारोऽपि ग्राह्यः। विटचेटशकाराणां लक्षणं तु साहित्यदर्पणस्य तृतीये परिच्छेदे द्रष्टव्यम्। मृच्छकटिकं हि कितवद्यूतकारादिविटचेटकसङ्कुलम्। इदं खलु प्रकरणं सङ्कीर्णप्रकरण-मिति उच्यते। यथा धनिकः—कितवद्यूतकारादि धूर्त्तसङ्कुलं तु मृच्छकटिका-दिवत् सङ्कीर्णं प्रकरणमिति"॥ अस्य इत्यादि। "विना विशेषं सर्व्वेषाम् लक्ष्म नाटकवन्मतम्" इति अस्याः उक्तेरुपयोगिताम् अत्र दर्शयति—अस्य प्रकरणस्य नाटकप्रकृतित्वात् वाहुल्येन नाटकधर्म्माक्रान्तत्वात् शेषं प्रागुक्ते श्लोकद्वये यो यो विशेषः कथितः तं तं विशेषं वर्ज्जयित्वा अवशिष्टम् अङ्गम् सन्धिप्रवेशकादिकम् इत्यर्थः नाटकवत् यद्वत् नाटके प्रयोक्तव्यं तद्वदेव प्रकरणे अपि प्रयोक्तव्यं स्यात्। उक्तं हि दशरूपके—"शेषं नाटकवत् सन्धिप्रवेशकरसादिकम्" इति। अत्र श्रीमुनिः—प्रकरणनाटकविषये पञ्चाद्याः दशपरास्तथाचैव अङ्काः कर्त्तव्याः सुग्रनानारस-भावसंयुक्ताः। अपिच दासविटश्रेष्ठियुतं वेशस्त्र्युपचारकरणीभूतं मन्द-कुलस्त्रीचरितं काव्यं कार्य्यं प्रयोगे तु।

Eng. Trans.—Somewhere (i. e. in some Prakrana) the heroine comes of a house-holder's family; somewhere the heroine is a courtezan; and somewhere both types of heroines are to be found. Thus through it (i. e. through the variety of heroines) the Prakarana becomes of three types; and out of those, the third type turns with swindlers, gamblers and so forth and also with Vita, and Cheta etc.

(The examples of) a heroine coming of a householder's family—(as) in the Puspabhusita ; a courtezan—as in the Taranga Vritta (Tarangadatta etc) ; both as in the Mrichhakatika. The remaining characteristics of this (Prakarana) is the same with a Nataka in as much as it is (essentially) of the Nataka characteristic.

Text—वृत्तिः । अथ भाणः ।

मित— । क्रमप्राप्तं भाणं रूपकं लक्षयति ।

Eng. Tran.—Now comes the description or definition of Bhana.

Text—श्लोकः । भाणः स्याद् धूर्त्तचरितोनानावस्थान्तरात्मकः ।

एकाङ्क एकएवात्र निपुणः पन्डितोविटः ॥

रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा । सम्बो-

धनोक्तिप्रतुयक्ती कुर्य्यादाकाशभाषितः ॥

सूचयेद्वीरश्रृङ्गारौ शौर्य्यसोभाग्यवर्णनैः । तत्रेति-

वृत्तमुत्पाद्यं वृत्तिः प्रायेण भारती ॥

मुखनिर्वहणे सन्धीलास्याङ्गानि दशापि च ॥

वृत्तिः । अत्र आकाशभाषितरूपं परवचनमपि स्वयमेवानुवदन्नुत्तर-प्रतुयत्तरे कुर्य्यात् । श्रृङ्गारवीररसौ च सौभाग्यशौर्य्यवर्णनया सूचयेत् । प्रायेण भारती (वृत्तिः) । क्वापि कैशिक्यपि वृत्तिर्भवति । लास्याङ्गानि गेयपदादीनि । उदाहरणं लीलामधुकरः ।

मित— । भाणः इति नाम्ना प्रसिद्धं रूपकं खलु धूर्त्तचरितः । धूर्त्ताः चौरद्यूतकारादयः इति धनिकः । तेषां चरितं यस्मिन् स धूर्त्तचरितः । कश्चित् चौरः कश्चित् द्यूतकारः कश्चित् सभिकः कश्चित् कितवो वा भाणे नायको भवेत् । एवं वृत्तान्तमाश्रित्य भाणः इत्थितः

स्यादिति भावः। नाना विविधानि अवस्थान्तराणि आत्मा स्वरूपं यस्य स तादृशः। धूर्त्तस्य नायकस्य विविधानां अवस्थानां उपवर्णनमेव भाणस्य मुख्यम् उपजीव्यम् इति भावः। तत्र भाणे एक एव अङ्कस्तिष्ठेत्। अपि च निपुणः कर्म्मणि कुशलस्तथा पण्डितः कृतविद्यश्च कश्चित् विटः स्वेन आत्ममनसा एव अनुभूतं वस्तु रङ्गे रङ्गमध्ये प्रकाशयेत् वर्णयेत्। किञ्च इतरेण वा अपरेण वा अनुभूतम् वस्तु विटः प्रकाशयेत्। उक्तं हि दशरूपके—भाणस्तु स धूर्त्तचरितं स्वानुभूतं परेण वा। यत्रोपवर्णयेदेको निपुणः पण्डितो विटः। एक एव विटः स्वकृतं परकृतं वा उपवर्णयतीति धनिकः। ननु तत्तु उपवर्णनं किम्प्रकारम् स्यादिति पठति— सम्बोधनोक्ति इत्यादिना। आकाशभाषितलक्षणं प्रागेव कथितम्। तादृशैः आकाशभाषितैः सम्बोधनेन उक्तिप्रत्युक्ती उत्तरप्रत्युत्तरे कुर्य्यात् भाणे सन्निवेशयेत्। उक्तं हि अत्र वृत्तौ आकाशभाषिनरूपं परवचनं आकाशभाषितरीत्या परवचनश्रवणमभिनीय तादृशम् परवचनम् स्वयमेव अनुवदन् स्वयमेव रङ्गमध्ये उच्चारयन् उत्तरप्रत्युत्तरे कुर्य्यात्। "एकस्य च उक्तिप्रत्युक्तयः आकाशभाषितराशङ्कितोत्तरपरत्वेन भवन्ती"ति धनिकः। अपिच भाणेरसद्वयस्य एव सत्ता—वीरस्य तथा शृङ्गारस्य। अत्र "सूचयेत्" इत्यनेन ज्ञायते यत् भाणे वीरस्य शृङ्गारस्य वा सत्ता न सुष्पष्टा। उक्तं हि धनिकेन—"अस्पष्टत्वाच्च वीरशृङ्गारौ सौभाग्यशौर्य्यवणनया सूचनीयौ—इति। तत्र भाणे इतिवृत्तं नाटकीयं वस्तु तु उत्पाद्यम् कविना कल्पितम्। "वस्तु कल्पितम् इति" दशरूपके। तथा चतसृणां वृत्तीनां मध्ये प्रायशः भारतीमेव वृत्तिमवलम्ब्य भाणः विरचितः स्यात्। कस्मिंश्चित् भाणे कैशिकी वृत्तिरपि दृश्यते। पञ्चानां सन्धीनां मध्ये तत्र मुखसन्धिः निर्व्वहणसन्धिश्च तिष्ठेताम्। परं गेयपदप्रभृतानि दश एव लास्याङ्गानि तत्र प्रयोक्तव्यानि। अस्य भाणस्य दृष्टान्तो यथा लीलामधुकरः। अपरः दृष्टान्तो यथा वसन्ततिलकम्।

Eng. Tran—Bhana deals with the exploits of a Dhurta (a cheat, a knave, a rogue or a swindler) ; its essential feature is the unfolding of various stages (of a Dhurta). There is a single act in which a clever and erudite vita describes on the theatrical platform what he has experienced or any other experienced by others. Questions and answers in course of addressing one another should be put in these through the Akasa-bhasita system. The erotie as well as the Heroic sentiments should be expressed through the description of good luck (or amiability) and valour respectively. The subjeet-matter should be an invention of the poet and very often the Vritti is Bharati, There should exist only two sandhis—Mukha and Nirvahana and all the ten angas of Lasya should grace a Bhana.

Here (in the Bhana) questions and answers should be set in course of repeating the statements of others, couched up in Akasa-bhasita by himself. The erotic and ths heroic sentiments should be expressed through the description of luck or amiability and valour. Generally the Vritti is Bharati, (though) somewhere (in some Bhanas) Kausiki Vritti exists. The word "Lashyanga" here stands for Geyapada and others.

Example is—Lila Madhukara.

Text—वृत्तिः । अथ व्यायोगः ।

विमल— । अधुना क्रमप्राप्तं व्यायोगम् नाम रूपकं व्याचष्टे ।

Eng. Tran—Now comes the description of Vyayoga.

Text—श्लोकः। ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजन संयुतः
हीनोगर्भविमर्शाभ्याम् नरैर्बहुभिराश्रितः ॥

एकाङ्कश्च भवेदस्त्री-निमित्तसमरोदयः। कैशिकीवृत्तिरहितः प्रख्यात-नायकः ।राजर्षिरथ दिव्यो वा भवेद्धीरोद्धतश्च सः। हास्यश्रृङ्गारशान्तेभ्य इतरेऽत्राङ्गिनोरसाः ॥

वृत्तिः। यथा सौगन्धिकाहरणम्।

मित—। व्यायुज्यन्ते अस्मिन् वहवः पुरुषाः इति व्यायोगः इति धनिकः। उक्तं हि अत्र नरैर्बहुभिराश्रितः। दशरुपके अपि—व्यायोगो बहुभिर्नरैः। ख्यातं प्रसिद्धं पुराणेतिहासादिभ्यः गृहीतं इतिवृत्तं नाटकीयकथावस्तु यस्य तादृशः एव व्यायोगः: तथा स्वल्पसंख्यकैः स्त्रीजनैः संयुतः एवं गर्भविमर्शाभ्याम् हीनः। अपरं त्रयः सन्धयः स्थास्यन्ति अत्र। तथा बहुभिः नरैः आश्रितः स्यात् व्यायोगः। ईदृशः एव समवकारः— स च पश्चात् दर्शयिष्यते।

अत्र धनिकः—“अस्त्रीनिमित्ताश्चत्र संग्रामः। यथा परशुरामेण पितृवधकोपात् सहस्त्रार्ज्जुनवधः कृतः” इति। कैशीकिवृत्तिस्तत्र व्यायोगे न तिष्ठेत्। तत्र नायकः प्रख्यातः पुराणादिषु प्रसिद्धः स्यात्। स च कीदृशः? उत्तरं पठति—राजर्षिः अथ दिव्यो वा। पुराणप्रसिद्धः इतिहासप्रसिद्धः वा। यथा—प्रसिद्धो वा कश्चित् राजर्षिः (यथा दुष्यन्तः) अथवा कश्चित् दिव्यो जनः व्यायोगे नायकः स्यात्। अपिच स च राजर्षि-र्दिव्यो वा नायकः धरोद्धत एव भवेत्। तथाहि दशरूपके—“ख्यातोद्धत-नराश्रयः” इति।

अपिच हास्यरसं श्रृङ्गाररसं यथा शान्तरसं वर्ज्जयित्वा इतर ये षट् रसा स्तेषां मध्ये यः कोऽपि व्यायोगे अङ्गीरस स्यात्। डिमे अपि एवं तच्च पश्चात् वक्ष्यते। तथाहि दशरूपके—“दीप्ताः स्यु डिमवद्रसाः”। अत्र धनिकः—“तत्र डिमवत् रसाः षट्. इति—शृङ्गार रहिताः।”

(शान्तरसन्तु नाटेय दशरूपकृत् न गणयति)। अस्य व्यायोगस्य दृष्टान्तो यथा सौगन्धिकाहरणम्। अपरंच—धनञ्जयविजयः। अयं खलु एकाङ्को व्यायोगः काञ्चनाचार्य्यविरचितः। तत्र कर्णादिना अपहृतानाम् विराट-राजस्य गवाम् अर्जुनेन उद्धारः वर्णितः ।

Eng. Tran—Vyayoga has got fot its subject-matter a well known incident, with a seanty number of females. As regards males, there are many in the Vyayoga which lacks in the two Sandhis—Garbha and Vimarsa. There will be only one act—dealing with battles not originating out of a female-affair. Kaisiki Vritti will be conspicuous by its absence ; The hero will be a well known figure, a saintly monarch or a Divya (celestial) personage of the Dhirodhata type. Any one of the (nine) sentiments—save and except the Sringara (Erotic), Hasya (comic) and Santa (the sentiment of quietitude) can be the predominating Rasa here. [For 9 Rasa, see ch III]

Example—Saugandhika haranam.

Text—वृत्तिः। अथ समवकारः।

मित—। अधुना क्रमप्राप्तं समवकारं नाम रूपकम् लक्षयति।

Eng. Tran.—Now comes the description of Samavakara.

Text—श्लोकः। वृत्तं समवकारेतु ख्यातं देवासुराश्रयम्।
सन्धयो निर्विमर्शास्तु त्रयोऽङ्कास्तत् चादिमे॥
सन्धीद्वावन्त्ययोस्तद्वदेकः एको भवेत् पुनः।
नायका द्वादशोदात्ता प्रख्याता देवमानवाः॥
फलं पृथक् पृथक् तेषां वीरमुख्योऽखिलोरसः।
वृत्तयो मन्दकैशिक्योनात्र विन्दुप्रवेशकौ॥

वीथ्यङ्गानि च तत्र स्युर्यथालाभं त्रयोदश।
गायत्र्युष्णिक्प्रमुखान्यत्र छन्दांसि विविधानि च॥
त्रिशृङ्गारस्त्रिकपटः कार्य्यश्चायं त्रिविद्रवः।
वस्तु द्वादशनाडीभिर्निष्पाद्यं प्रथमाङ्कगम्॥
द्वितीयेऽङ्के चतसृभिर्द्वाभ्यामङ्के तृतीयके॥
नाडिका घटिकाद्वयमुच्यते। विन्दुप्रवेशकौ च
नाटकोक्तावपिनेह विधातव्यौ॥

मित—। समवकारे समवकार इति प्रसिद्धे रूपकविशेषे तु वृत्तं इतिवृत्तम् नाटकीयं कथावस्तु इनि यावत् ख्यातं पुराणादिभ्यः गृहीतं स्यात् न वा कृतम् (कविकल्पितं) न वा मिश्रम्। तर्हि तत् कीदृशम्? देवासूराश्रयम्। तत्र निर्विमर्शाः सन्धयः। बिमर्शसन्धि वर्ज्जयित्वा मुखम् प्रतिमुखम् गर्भः उपसंहारः इति चत्वारः सन्धयः समवकारे तिष्ठ न्तीति भावः। अथ समवकारे त्रयः अङ्काः। तत्र तेषाम् त्रयाणाम् अङ्कानां मध्ये आदिमे प्रथमे अङ्के द्वौ सन्धी मुखसन्धिस्तथा प्रतिमुखसन्धि- स्तिष्ठेताम्। तद्वत् एवम् अन्त्ययोः द्वितीयाङ्के तृतीयाङ्के च पुनः एकः एकः सन्धिर्भवेत्। द्वितीयाङ्के गर्भसन्धिस्तथा तृतीयाङ्के च निर्व्वहणसन्धिः तत्र समवकारे द्वादशसंख्यकाः नायकाः भवेयुः—ते च सर्व्वे उदात्ताः धीरोदात्तलक्षणाक्रान्ताः स्युः। के ते? प्रख्याताः प्रसिद्धाः देवदानवाः एव ते नायकाः। तेषां द्वादशानां नायकानां फलं पृथक् पृथक् भवेत्। तत्र बीररसः एव मुख्यः अङ्गी स्यात्। अखिलरसः—अन्ये सर्व्वेरसास्तत्र अङ्गभूताः तिष्ठेयुः। अपि वृत्तयः मन्दकैशिक्यः— मन्दा अल्पा अल्पा कैशिकी यासु तादृश्यः वृत्तयः। नात्र इति। विन्दुः तथाप्रवेशकः इति द्वयम् यद्यपि नाटके तिष्ठति तथापि नाटकतुल्ये तौ न भवेताम्। एवं त्रयोदश बीथ्यङ्गानि यानि पश्चात् कथयिष्यन्ते— तानि यथालाभं यथायोग्यं तत् समवकारे स्युः यथा प्रहसने। उक्तं हि दशरूपके—वीथ्यङ्गानि यथालाभं कुर्य्यात् प्रहसने यथा। एवं च

गायत्र्युष्णिङ्मुखानि—गायत्री षडक्षरावृत्तिः (छन्दः उष्णिक् च सप्ताक्षरावृत्तिः (छन्दः), ते एव मुख्ये प्र न' येषां तानि विविधानि छन्दांसि समवकारे भवेयुः। अपिच समवकारः त्रिश्रृङ्गारः त्रिकपठः त्रिविद्रवः कार्य्यः। समवकारः त्रिश्रृङ्गारः भवेत्। त्रिविधः धर्मोपेतः अर्थोपेतः तथा कामोपेतश्च श्रृङ्गार' यत् इति त्रिश्रृङ्गारः। अत्र विस्तृता व्याख्या पश्चात् विधातव्या। तथा समवकारः त्रिकपटः भवेत् त्रिविधं कपटं यत् तादृशः। कपटस्य विस्तृता व्याख्या पश्चात् कर्त्तव्या। एवं समवकारः त्रिविद्रवः भवेत्। त्रिविधः विद्रवः यत्र तादृशः। शङ्काभय त्रासकृतः सम्भ्रमो विद्रवो मतः इतिविद्रवलक्षणं प्रागेव उक्तम्।

नाड़िका (नालिका वा) घटिकाद्वयपरिमितः कालः। अत्र श्रीमुनिः "नाड़ीसंज्ञा ज्ञेया मानंकालस्य यन्मुहूर्त्तार्द्धम्। तन्नाड़िकाप्रमाणं यथोक्तमङ्गेषु संयोज्यम्"। मुहूर्त्तेन द्विदण्डपरिमितः कालः स्वीकृतः। अतएव मुहूर्त्तार्द्धम् दण्डपरिमितः कालः ज्ञेयः। स च चतुर्विंशति—मिनिटव्यापी। स एव नाड़िका। साचात घटिकाद्वयमुच्यते।

Eng. Tran—The subject-matter in a Samavakara is a well-known one—being relative to (the conflict of) gods and demons. There should remain all the Sandhis—except one—namely the Vimarsa, couched up in three acts, of which the first one will incorporate two sandhis (Mukha and Pratimukha) and the remaining two (acts) will take one (sandhi) each. There will be twelve reputed heroes from amongst human and celestial beings and to every one of them will be alloted separate function. (i. e. every one of these twelve heroes will have an individual object), The predominant sentiment will be heroic—with all others—inserted therein, There will

be all the Vrittis but the Kausiki will be scanty (I. e. few and far between) and there will be neither Vindu nor Praveshaka. All the thirteen angas of the Vithi may find their proper places (in a Samavakara). There will be various metres the (most) important of these being Gayatri and Ushnik. It (Samavakara) must deal with three sorts of Sringara, three types of Kapata (see next) and three kinds of Vidrava (see Tikaand next). The topic in the first act should be finished within twelve Nadis—i. e. four hours and 48 minutes ; that of the second act will have a period covering three Nadis and that of the third act two.

Text—वृत्तिः। तत्—

मित। तेषां त्रिविधानां शृङ्गाराणां मध्ये, एवं त्रिविधानां कपटानाम्, त्रिविधानां विद्रवाणां च मध्ये –

English Tran—Amongst tbese.

Text—श्लोकः। धर्मार्थकामैस्त्रिविधः शृङ्गारः, कपटः पुनः।
स्वाभाविकः कृत्रिमश्च दैवजो, विद्रवः पुन।
अचेतनैश्चेतनैश्च चेतनाचेतनैः कृतः।

वृत्ति। तत् शास्त्राविरोधेन कृतो धर्म्मशृङ्गारः। अर्थलाभार्थकल्पितः अर्थशृङ्गारः। प्रहसनशृङ्गारः कामशृङ्गारः। तत् कामशृङ्गारः प्रथमाङ्क एव। अन्ययोस्तु न नियम इत्याहुः। चेतनाचेतना गजादयः। समवकीर्यन्ते बहवोऽर्थाः अस्मिन्निति समवकारः। यथा समुद्रमथनम्।

मित—। अथ त्रिशृङ्गारादीन् व्याचष्टे—धर्मार्थे इत्यादिना। त्रिविधः शृङ्गारः समवकारे प्रयुज्यते। स च किं प्रकार इति उत्तर

पठति—धर्म्मार्थकामै, तैः प्रचोदितः इत्यर्थः त्रिविधः शृङ्गारः। तथाहि धर्म्मप्रचोदितः धर्म्मशृङ्गारः। स च कीदृशः? शास्त्राविरोधेन शास्त्र-विधिना सह विरोधम् अकृत्वा शास्त्रविधिम् अनुलङ्घ्य एव कृतः शृङ्गारः धर्म्मशृङ्गारः। तथाहि—

श्रीमुनिः—"यत् तु धर्म्मसमाकल्पितमात्मस्थितं भवति साधनं बहुधा।
व्रतनियमतपोयुक्तो ज्ञेयोऽसौ धर्म्मशृङ्गारः—इति।

एवं अर्थप्रचोदितः अर्थलाभार्थकल्पितः अर्थशृङ्गारः। एवं प्रहसन-शृङ्गारः प्रहसनाय कामस्य तृप्तिसाधनाय कृतः शृङ्गारः कामशृङ्गारः। अथ तिकपटं व्याचष्टे—कपटः पुनरित्यादिना। कपटस्त्रिविधः—स्वाभाविकः। कृत्रिमः स च शत्रुकृतः इति बोध्यः। एवं दैवजः दैवयोगात् प्राप्तः इत्यर्थः। अथ तिविद्रवं व्याचष्टे—विद्रवपुनरित्यादिना तिविधः विद्रवः यथा अचेतनैः कृतः चेतनैः कृतः चेतनाचेतनैश्च कृतः। अचेतनैः अग्निवायु प्रभृतिभिः। चेतनैः अरातिभिः। चेतनाचेतनैः मनुष्येतरैः गजादि-जन्तुभिः।

अथ समवकारसंज्ञायाः व्युत्पत्तिं दर्शयति—

समवकीर्य्यन्ते सम्यक उल्लिख्यन्ते बहवः अर्थाः विषयाः यस्मिन् रूपके इति समवकारनामकं रूपकम्। तस्य दृष्टान्तो यथा समुद्रमथनम्।

Eng. Tran—Sringara is of three types—done with a pious object in view (dharma), performed with monetary motive (Artha), and urged by passion (Kama); Kapata, in its part, is natural, artificial and accidental (or pheno-menal)—wheress Vidrava is effected by the unconscious. the conscious, or the sub-concious or semi-conscious.

Amongest these—Dharma Sringara is what is resorted to without any conflict with the injunction of the Sastras; Arthasringara is what is betaken to for the acquisition of

wealth : whereas Kama Sringara is what is done under or with the impulse of passion. Amongst these, Kama Sringar should (necessarily) stay in the first act ; and as regards the other two, these is no (hard and fast) rule—So say (the authorities) ; by sub-conscious (?) (chetaneachetana) elephants and the like are implied. Samavakara is so named as so many topics are dealt within it. As (an example of it) Samudra-mathanam.

Text—वृत्तिः। अथ डिमः।

मित—। अनन्तरं क्रमप्राप्तं डिमं नाम रूपकं वर्णयति—

Eng. Tran.—Now comes the description or definition of Dima.

Text—श्लोकः। मायेन्द्रजाल-संग्रामक्रोधोद्भ्रान्तादिचेष्टितैः।
उपरागैश्चभूयिष्ठो डिमः ख्यातेतिवृत्तकः॥
अङ्गी रौद्ररसस्तत सर्व्वेऽङ्गानि रसाः पुनः।
चत्वारोऽङ्का मता नेह विष्कम्भकप्रवेशकौ॥
नायका देवगन्धर्व्वयक्षरक्षोमहोरगाः
भूतप्रेत-पिशाचाद्याः षोड़शात्यन्तमुद्धताः॥
वृत्तयः कैशिकीहीना निर्विमर्शास्तु सन्धयः।
दीप्ताः स्युः षड् रसाः शान्तहास्यश्रृङ्गारवर्जिताः॥

वृत्तिः। अत्रोदाहरणञ्च—"त्रिपुरदाहः" इति महर्षिः (श्रीभरतः)॥

मित—। डिमस्य लक्षणं प्रयच्छति, "मायेन्द्र"—इत्यादिना। डिमः डिमनामकंरूपकं—ख्यातेतिवृत्तकः ख्यातं पुराणादिभ्यः गृहीतम् इतिवृत्तं यस्य तादृशः। समासान्तः कप्। तथाहि श्रीमुनिः—"प्रख्यात-वस्तुविषयः प्रख्यातोदात्तनायकश्चैव षट्त्रिंशल्लक्षणयुक् चतुरङ्को वै डिमः कार्य्यः।" अन्यत् सुगमम्॥

Eng. Trans.—Dima has got, for its subject-matter, a well-known incident and it is full of movements or actions replete with magic, jugglery, battles, wrath and confusion as well as with eclipses (Solar or lunar). The predominant sentiment is Raudra (the wrathful) and all others (i. e. all other sentiments) are subsidiaries of these (i. e. they act as subordinate to the principal the Raudra— (being themselves incorporated hither and thither). There are four acts—but there is neither Viskambhaka nor Pravesaks. There are sixteen powerful heroes—themselves being gods. Gandharvas, Yaksas. Raksas, Great Serpents, Ghosts, Hob-goblins and Pisachas. All the Vrittis are there except the Kausiki and all the Sandhis save the Vimarsa ; six sentiment there shine (appear) brilliantly—the six being the nine (sentiments) minus three—viz Shanta (Quietitude). Hasya (comic) and Sringara (Erotic).

Here the example is, Tripuradaha—so says the great sage Bharata in "इदं त्रिपुरदाहे तुलक्षणं—ब्रह्मणोदितम् । तत् त्रिपुरदाहश्च डिमसंज्ञः प्रयोजितः" ।

Text—वृत्ति । अथेहामृगः ।

मित—अथ क्रमप्राप्तम् ईहामृगं रुपकं लक्ष्ययति ।

Eng. Tran.—Now comes the description or definition of Ihamriga.

Text—श्लोकः । ईहामृगो मिश्रवृत्तश्चतुरङ्कः प्रकीर्त्तितः

मुखप्रतिमुखे सन्धीतत्रनिर्वहणं तथा ॥

नरदिव्यावनियमौ नायकप्रतिनायकौ ।
स्यातौ धीरोद्धतावन्यो गूढभावादयुक्तकृत् ॥
दिव्यस्त्रियमनिच्छन्तीमपहारादिनेच्छतः ।
शृङ्गाराभासमप्यस्य किञ्चित् किञ्चित् प्रदर्शयेत् ॥
पताकानायका दिव्या मर्त्या वापि दशोद्धताः ।
युद्धमानीय संरम्भं परं व्याजान्निवर्त्तते ॥
महात्मानो बधप्राप्ता अपि वध्याः स्युरत्रनो ।
एकाङ्कोदेव एवात्र नेतेत्याहुः परे पुनः ।
दिव्यस्त्रीहेतुकं युद्धं नायकाः षड़िति परे ॥

वृत्तिः । मिश्रं ख्यातानाख्यातम् । अन्यः प्रतिनायकः । पताका-नायकास्तु नायकप्रतिनायकयोर्मिलिता दश । नायको मृगवदलभ्याम् नायिकामत्र ईहते वाञ्छतीनि ईहामृगः । यथा कुसुमशेखर-विजयादिः ।

मित— । ईहामृग इति प्रसिद्धस्य नाम्नः व्युत्पत्तिं दर्शयति—नायकः ईहामृग इति नाम्ना प्रसिद्धस्य रूपकस्य नेता मृगवत् पलायमानं हरिणम् इव अलभ्याम् लब्धुम् प्राप्तुमिति यावत् अशक्याम् अत् अस्मिन् रूपके ईहते वाञ्छति प्राप्तुम् कामयते इति ईहामृगः । इयं खलु ईहामृग शब्दव्याख्या धनिकटीकातः गृहीता श्रीमता विश्वनाथेन । ईहः काम्यः मृगः गत्वा मृगवत् नायिका यस्मिन् रूपके स ईहामृगः । पृषोदरादि-त्वात् हकारात् परम् आकारागमः ।

स च ईहामृगः मिश्रवृत्तः । अन्यः प्रतिनायक इत्यर्थः । अन्यत् स्फुटम् । अनियमौ अविद्यमानः नियमः यत्र तादृशौ नरदिव्यौ नायकप्रतिनायकौ । नरः दिव्यो वा नायको भवेत् एवं प्रतिनायकोऽपि तादृशो भवेत् इति अत् नियमो नास्ति । तथाहि यदि नरः नायकः स्यात् दिव्यः खलु प्रतिनायको भवेत् । एवं चेत् दिव्योनायकः स्यात् तर्हि नरश्च प्रतिनायको भवेत्—इति केषाञ्चित् व्याख्यानं, परम् "अनियमौ" इति पदस्य बलात् उभौ अपि

दिव्यौ नरौ वा भवेत् इति वयं मन्यामहे। श्रीमुनिमते तु नायकः दिव्य एव। तथाहि नाट्यशास्त्रे –"दिव्यपुरुषाश्रयकृती दिव्यस्त्रीकारणोपगतयुद्धः। सुविहितवस्तुनिवन्धो विपर्यासकारकश्चैव"। एतन्मतं तु श्रीमान् विश्वनाथः पश्चात् विपारयिष्यति। तौ च नायकप्रतिनायकौ धीरोद्धतौ ख्यातौ प्रोक्तौ। तथा तौ च धीरोद्धतौ एवं च ख्यातौ लोकप्रसिद्धौ। तयोर्नायकप्रतिनायकयोरन्यः अन्यतरः प्रतिनायकः 'गूढ़भावात्" गूढ़भावम् गुप्तभावम् गोपनीयाभिसन्धिम् इति यावत् आश्रित्य (अत्र ल्यवलोपे पञ्चमी)। 'अयुक्तकृत्' असङ्गताचारी अवैधकार्यानुष्ठायी इत्यर्थः तथाहि दशरूपके—"अन्यो विपर्यासात् अयुक्तकृत्"। 'अथ प्रतिनायकस्य अयुक्तानुष्ठानम् कथयति –'दिव्यस्त्रियमित्या' दिना एतत् पङ्क्तिद्वयम् अविकलमेव दशरूपकात् उद्धृतम्। 'अनिच्छन्तीम्' प्रतिनायकम्' प्रेमास्पदत्वेन अकामयमाना यद्वा अनिच्छन्तींप्रतिनायककर्तृकम् सुरतम् अनभिलषन्तीम् दिव्यास्त्रियम् सर्ग-योषनम् अपहारादिना हरणप्रभृतिना (अत्र आदिशब्देन छलमपि ग्राह्यं)। तेन बलात् वा अपहरणेन इच्छतः अभिलषतः उपभोक्तुम् वाञ्छतः इत्यर्थः अस्य प्रतिनायकस्य इति यावत् शृङ्गाराभासम शृङ्गाररसाभासम् किञ्चित् 'किञ्चित्" अल्पमात्रं खलु कविः ईहामृगे प्रदर्शयेत्।

अत्र शृङ्गारस्य आभास एव न तु शृङ्गारः। स कथम्? उच्यते—"अनौचित्यप्रवृत्तत्वे आभास रसभावयोः" इति तृतीयपरिच्छेदे। यदि शृङ्गारे अनौचित्यं तर्हि शृङ्गाराभासः। ननु 'शृङ्गारे अनौचित्यं यत्र यत्र स्यात् तत्र एवं तु "रतौ तथा अनुभयनिष्ठायाम" इति (साहित्यदर्पणस्य तृतीय परिच्छेदे)। अयमर्थः—यदि रति नायकनिष्टा नायिकानिष्ठा च इति उभयनिष्ठा न स्यात् तर्हि तत्र न शृङ्गारः अपि तु शृङ्गाराभासः। अत्र 'अनिच्छन्तीम्' इत्यादिना सुष्पष्टं ज्ञापितं यत् प्रतिनायके विद्यमाना या दिव्यस्त्रीविषया रतिः सा तु न नायिकानिष्ठा दिव्यस्त्रीनिष्ठा भवति यतः सा रतिः दिव्यस्त्रियाम् अविद्यमाना—अतएव अत्र शृङ्गाराभास एव

न तु शृङ्गारः। एवं यदि रतिर्नायिकानिष्ठा नायकविषया एव भवति परं न तु नायिकाविषया नायकनिष्ठा तर्हि तत्रापि शृङ्गारभासः अत्र प्रथमविधः शृङ्गारभासः—यतः अत्र रतिर्नायकनिष्ठा नायिकाविषया एव। अतएव उक्तं अस्य प्रतिनायकस्य एव शृङ्गारामासः, स च शृङ्गाराभासः अल्पम् एव कविना ईहामृगे दर्शयितव्य इति सर्व्वम् अवदातम्। अथ पताकानायकं विचारयति। तथाहि व्यापि प्रासङ्गिकवृत्तं पताकेत्यभिधीयते तत्र अधिकृतः पुरुषः पताकानायकः। [तथाहि पताकानायकस्य स्यान्न स्वकीयफलान्तरम्। गर्भे सन्धौ विमर्शे वा निर्व्वाहस्तस्य जायते]। अत् ईहामृगे दिव्याः स्वर्गीयाः मर्त्त्या नरा वा दश उद्धताः उग्रस्वभावाः यद्वा उद्धताः धीरोद्धताः पताकानायका अपिस्युः। ननु "व्यापि प्रासङ्गिकं वृत्तं पताका"—यथा श्रीरामचरिते सुग्रीवचरितम्। अत्र सुग्रीव एव पताका-नायकः। किं नायकसम्बन्धे एव दश पताकानायकाः भवेयुः? उत्तरं पठति वृत्तौ—नहि। पताकानायकाश्च नायकप्रतिनायकयोर्मिलित्वा दश नायक-सम्बन्धिनः पताकानायकाः (यथा श्रीरामचरिते सुग्रीवादयः) यथा प्रतिनायकसम्बन्धिनश्च पताकानायकाः (यथा श्रीरामचरिते रावणः प्रतिनायकः एनमवलम्ब्य अवस्थितः पताकानायकः मेघनादः) इति सर्व्वे मिलित्वा एव दश पताकानायकाः ईहामृगे भवेयुः। ननु "दूराह्वानं-वधोयुद्धम्" इत्यादि वचनेन युद्धम् निषिद्धं खलु नाटके। स निषेधः किम अत्रापि वर्त्तते? उच्यते—परमदारुणं संरम्भम् आनीय नायके प्रतिनायके च उत्पाद्य युद्धम् आसन्नसंग्रामः व्याजात् कौशलात् कार्य्यान्तरसाधन-व्यपदेशेन इति भावः निवर्त्तते निवृत्तं स्यात्।

अथ ईहामृगस्य नायकविषयम् तथा अङ्कसंख्याम् अधिकृत्य परमतं विचारयति—परे अन्ये पुनः तु नाट्यकाराः ईहामृग एकाङ्कः तथा देव एव अत् नेता नायकः इति आहुः कथयन्ति। श्रीमुनिमते नायकस्तु देव एव—यथा नाट्यशास्त्रे "दिव्यपुरुषाश्रयकृतः" इति। परम् तन्मते स चतुरङ्को यथा नाट्यशास्त्रे "ईहामृगस्तु कार्य्यश्चतुरङ्कविभूषितश्चैव।" इतरे

अन्ये च केचित् आहुः यत ईहामृगे दिव्यस्त्रीहेतुकं युद्धं स्यात्। श्रीमुनिरपि एवम् यथा नाट्यशास्त्रे "दिव्यस्त्रीकारणापगतयुद्धः। अपिच "उद्धतपुरुषप्रायः स्त्रीरोपग्रथितकाव्यबन्धश्च। संक्षोभविद्रवकृतः संफेट कृतस्तथा चैव"। तत् ईहामृगेष्ट एव नायकाः भवन्तीति एतत् अपरस्य कस्यचित् मतम्। श्रीमुनिः व्यायोगेन सार्द्धम् ईयामृगम् इत्थं तूलयति यद्व्यायोगे कार्यं ये पुरुषा वृत्तयो रसाश्चैक ईहामृगेअपि तत् स्यात् केवलमत्र स्त्रिया योगः।" ईहामृगस्य दृष्टान्ती यथा कुसुमशेखर विजयः।

Eng. Tran.—The subject-matter (i. e. the story) of an Ihamriga is of mixed type (i. e. partly historical and partly imaginary), it is said to have four acts. There will be three Sandhi-Mukha, Pratimukha—as well as Nirvahana. The hero—and the rival may be either celestial or human beings ; there is no hard and fast rule governing it ; but they must be well-known figures of the Dhiroddhata type ; one of these two (viz. the rival of the hero) will be such as commits wrong deeds in secret ; and in connection with him (the rival), Sringarabhasa (i. e. Erotic sentiment not of high model i. e. improper erotic sentiment or that of lower type) should be depicted hither and thither (i. e. hither and thither in an Ihamriga, an erotic sentiment of low model pertaining to the rival of the hero should be dealt with) by showing him as desirous of (or intent on) adbucting an un-willing celestial woman. There will be ten celestial or human Pataka-characters—all arrogant. High

wrath (in the hero of his rival) should be portrayed, but (actual) fighting should be avoided on some pretext. Great persons—even though doomed to death should not be shown as killed. Some say, on the other hand that Ihamriga has got only a single act and the hero heroine is (always) of divine figures ; others affirm that there must be battle arising out of celestial females and there will be six heroes.

The word "Misra" means (i. e. by the assumption ' of mixed type" is implied) that let its वृत्त (matter) be both known and unknown i.e. partially known or historical and partially unknown i. e. imaginary. The word "Anya" here means (i. e. the sentence "one of the two "refers to) the Rival (of the hero). Pataka-characters—belonging to both the hero as well as the rival will constitute ten. The name Ihamriga implies that in it the hero hankers after the heroine—who is difficult to approach just like a doe. As—Kusuma-Sekhara and others.

Text—वृत्तिः ।. अथ अङ्कः ।

मित— । अथ अनन्तरं क्रमप्राप्तम् अङ्कम् उत्सृष्टिकाङ्क इति अपर-नामानम् रुपकं विवृणोति ।

Eng. Tran.—Now comes description of Amka.

Text -श्लोकः— उत्सृष्टिकाङ्कः एकाङ्कोनेतारः प्राकृता नराः ।
रसोऽत्रकरुणः स्थायी वहुस्त्रीपरिदेवितम् ॥

प्रख्यातमितिवृत्तञ्च कविर्बुद्ध्या प्रपञ्चयेत् । भाणवत् सन्धिवृत्तयङ्गा-
न्यस्मिन् जयपराजयौ ॥

युद्धवाचा कर्त्तव्यम् निर्वेदवचनं बहु ॥

वृत्तिः। इमञ्च केचित् नाटकाद्यन्तःपात्यङ्कपरिच्छेदार्थमुत्सृष्टिकाङ्क-नामानम् आहुः। अन्ये तु "उत्क्रान्ता विलोमरूपासृष्टिर्यत्र इति उत्सृष्टि-काङ्क"। यथा—शर्मिष्ठाययाति।

मित—। उत्सृष्टिकाङ्क इति अङ्कनाम्ना प्रसिद्धस्य रूपकस्य एव अपरं नाम। अस्य नाम्नः व्युत्पत्तिः सार्थकता च पश्चात्वृत्तौ दर्शयिष्येते। अस्मिन् उत्सृष्टिकाङ्के एक एव अङ्कः स्यात् इत्यादि सुगमम्।

इमम् एव अङ्कम् केचित् उत्सृष्टिकाङ्क इति आहुः। तेषाम् एव मत-मनुसृत्य श्लोके उत्सृष्टिकाङ्कः इति लिखितः। ननु कथम् ते इमं उत्सृष्टि-काङ्कम् वदन्ति ? उच्यते रूपकाद्यन्तःपाती नाटक—प्रकरणप्रभृतीनाम् अन्तर्व्यर्त्तीयोऽङ्क इति नाम्ना अंशविशेषः तस्य परिच्छेदार्थम् व्यावृत्त्यर्थम् नाटकस्य अंशविशेषात् अङ्कात् अस्य अङ्क इति प्रसिद्धस्य रूपकस्य विशेषं द्योतयितुम् इत्यर्थः, इमम् अङ्कम् उत्सृष्टिकाङ्क इति कथयन्ति - अन्यथा नामसाम्ये भ्रान्तिरापतेत्। इदम् खलु धनिकमतं—तथाहि दशरूपक-टीकायाम्—"उत्सृष्टिकाङ्क इति नाटकान्तर्गताङ्कव्यवच्छेदार्थम्" इति। मतान्तरमपि दर्शयति, अन्ये अपरे उत्सृष्टिकाङ्क इति संज्ञायाः इमाम् एव व्युत्पत्तिमाहुः। यथा उतक्रान्ता उद्गता विलोमरूपा नाटकादीनाम् अङ्कात् पृथकरूपा सृष्टिराविर्भूति र्यत्र स उत्सृष्टिकः। "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्चेति" बहुव्रीहिसमासः। "शेषात् विभाषा" इति कप्। उत्सृष्टिकश्चासौ अङ्कश्चेति उत्सृष्टिकाङ्कः। अस्य उत्सृष्टिकाङ्कस्य उदाहरणं यथा शर्म्मिष्ठाययातिः।

Eng. Tran.—Utsristikanka otherwise known as Anka has got only one act with its heroes (or dramatic figures) as mere mortals (or common men). The predominant sentiment is Pathetic—exhibited in the wailing of many women.

The story a well-known one should undergo development through the poet's imagination, The Sandhi, the Vritti as well as the angas (of sandhi as well as of Lasya) will be there as in Bhana.

Victory and defeat (respectively of the hero and his rival) will exist in it, but the fight should be only in words ; and there shall stay a great deal of self-mortification (dejection).

Some say this (Amka) as utsristikanka simply to distinguish it from the Amka (act) inserted in a drama ; according to others the name utsristikanka implies that in this Amka—there stands a different presentation as not found in acts of dramas. As (an example of this is) Sarmistha-yayati.

Text—वृत्तिः। अथ वीथी।

मित—। अथ क्रमप्राप्तां वीथीं लक्षयति। अस्या एव त्रयोदश अङ्गानि—तानि च यथालाभम् आमुखे अन्यत्रापि च योज्यानि स्युः। तत् सर्व्वं पश्चात् विचारयितव्यम्। आदौ तु वीथ्यालक्षणमेव वाच्यम।

Eng. Tran.—Now comes description of Vithi.

Text—श्लोकः। वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र कल्प्यते।
आकाशभाषितैरुक्तै श्चित्रां प्रत्युक्तिमाश्रितः।
सूचयेद्भूरिशृङ्गारं किञ्चिदन्यान्रसानपि।
मुखनिर्व्वहणेसन्धी अर्थप्रकृतयोखिलाः।

वृत्तिः। कश्चिदित्युत्तमो मध्यमोऽधमो वा। शृङ्गारबहुलत्वा-च्चास्याः कैशिकीवृत्तिबहुलत्वम्।

मित –। वीथीइति नाम्ना प्रसिद्धे रुपके एक एव अङ्कस्तिष्ठति तत् यःकश्चित् उत्तमप्रकृतिकजनो वा मध्यमप्रकृतिकजनो वा अधमप्रकृतिक जनो वा नायको भवति। अन्यत् सुगमम्।

Eng. Tran.—In Vithi, there will be a single act and there will be a single hero of any kind ; and he should produce primarily the erotic sentiment as well as others to a small degree, having taken recourse to interesting replies through Akasa-bhasita (definition of which has been referred to above). There will be two Sandhis, Mukha and Nirvahana—and all the Arthaprakritis.

By some one (of any kind) is implied—one of the best, mediocre or ordinary type. It abounds primarily with the Kaisiki Vritti—as it is teeming with Erotic Sentiment ("शृङ्गारे कैशिकी")।

मितभाषिणी। इतः परं खलु वीथ्यास्त्रयोदश अङ्गानि नाम्ना निर्दिश्यन्ते लक्षणेन विचार्य्यन्ते च। अत्र अयं विचारः—चतसृणाम् वृत्तीनाम् एकतमा तु भारती वृत्तिः। सा तु संस्कृतवहुलो वाक्प्रधानो व्यापारः। आस्यातु चत्वारि अङ्गानि—प्ररोचना, आमुखम्, वीथी प्रहसनं च। तत्र प्ररोचना आमुखं च आदावेव लक्षिते। वीथी तु अत्र लक्षिता। प्रहसनं तु पश्चात् वक्ष्यते। तत्र वीथ्यास्तु यानि त्रयोदश अङ्गानि भवन्ति तानि आमुखाङ्गानि अपि स्युः। तथाहि दशरूपके— "वीथ्यङ्गान्यामुखत्वादुच्यन्ते" इति। एवं प्रस्तावनायास्तु ये पञ्च भेदाः उद्घात्यकादयः तेषां उद्घात्यकः अवलगितम् इति द्वे तु वीथ्या एव अङ्के। परम् प्रस्तावनायाम् अन्यानि अपि अङ्गानि यथासम्भवं योजनीयानि स्युः—'यथा योज्यान्यत्र यथालाभम् वीथ्यङ्गानीतराण्यपि।' अत्र वृत्तिः—तत्र आमुखे। उद्घात्यकावलगितयोरितराणि वीथ्यङ्गानि वक्ष्य-

माणानि॥ अत्र धनञ्जयः—"प्रस्तावना वा तत्र स्युः कथोद्घात प्रवृत्त-कम्। प्रयोगातिशयश्चाथ वीथ्यङ्गानि त्रयोदश।" अतएव दशरूपकमते त्रयोदशवीथ्यङ्गानि तथा कथोद्घातादयस्त्रयः इति मिलित्वा षोड़श एव प्रस्तावनाभेदाः (आमुखभेदाः) स्युः। एवम् समवकार इति प्रसिद्धे रूपके अपि यथासम्भवं वीथ्यङ्गानि बोद्धव्यानि यथा 'वीथ्यङ्गानि च तत्र स्यु र्यथालाभं त्रयोदश।"

अधुना तानि वीथ्यङ्गानि कथ्यन्ते—।

Text—श्लोकः। अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः।

उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलं। वाक्केल्यधिवले

गण्डमवस्यन्दितनालिके।

असत्प्रलापव्याहार—मृदवानि च तानि तु॥

वृत्तिः। तत्र उद्घात्यकावलगिते प्रस्तावनाप्रस्तावे सोदाहरणं लक्षिते।

मित—भारतीवृत्तेरङ्गरूपा या वीथी तस्या एव यादृशानि त्रयोदश अङ्गानि—तादृशानि एव त्रयोदश अङ्गानि वीथी इति नाम्ना प्रसिद्धस्य रूपकस्य। तानि तु—उद्घात्यकः अवलगितम् प्रपञ्चकः, त्रिगतं, छलम्, वाक्केलिः, अधिवलं, गण्डम्, अवस्यन्दितम्, नालिका, असत्प्रलापः व्याहारः मृदवश्चेति। एतयोर्मध्ये उद्घात्यकः अवलगितं च उदाहरणेन आमुखाङ्गानि अपि भवन्ति। अतः अत्र प्रपञ्चस्य लक्षणम् आदौ वक्ष्यते।

Eng Tran.—The wise proclaim thirteen angas of this (Vithi); they are Udghatyaka, Avalagita, Prapancha, Trigata, Chhala, Vak-Keli, Adhivala, Ganda, Avasyandita, Nalika, Asatpralapa, Vyahara and Mridava; and amongst these (the first two) Udghatyaka and Avalagita

have been defined with illustration in course of dealings with Prastavana (Prelude before).

Text—श्लोक। मिथो वाक्यमसद्भूतम् प्रपञ्चो हास्यकृन्मतम्।

वृत्तिः। यथा –विक्रमोर्व्वश्याम् वलभीस्थविदूषकचेट्योरन्योऽन्य-वचनम्।

मित। मिथः परस्परम् उद्दिश्य इतियावत् असद्भूतम् अलीकम् मिथ्याभूतम् इति यावत् हास्यकृत्हास्योत्पादकं वाक्यं वचनं प्रपञ्च इति वीथ्यङ्गं मतम्। मिथ्यादोषोद्घाटनेन परस्परस्तुतिरेव प्रपञ्चः इति वाफलितम्। अत श्रीमुनिः– 'यदसद्भूतं वचनं संस्तवयुक्तं द्वयोः परस्परतः। एकस्य चार्थहेतोः स हास्यजननः प्रपञ्चस्तु।' अत दृष्टान्तो यथा विक्रमोर्व्वश्याम् वलभीस्थस्य गृहस्यपटलोपरिस्थितस्य विदूषकस्य तथा चेट्याश्च परस्परोक्तिः।

Eng. Tran.—Prapancha stands for a comic statement in which there is mutual false accusation. As in the Vikramorvasi—where there is the mutual (accusing) statement of the jester standing in the terrace as well as of the maid servant.

Text—श्लोकः। त्रिगतं स्यादनेकार्थयोजनं श्रुतिसाम्यतः।

वृत्तिः। यथा तत्रैव राजा

"सर्वक्षितिभृतां नाथ! दृष्टा सर्व्वाङ्गसुन्दरी'।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया।

(नेपथ्ये तत्रैव प्रतिशब्दः) राजा—कथं दृष्टेत्याह। तत्र प्रश्न-वाक्यमेव उत्तरत्वेन योजितम्। "नटादित्रितयविषयमेव इदम्" इति कश्चित्

मित—। श्रुतिसाम्यतः कस्यचित् वाक्यस्य श्रवणतुल्यत्वहेतोः अनेकार्थयोजनं बहुवर्थपरिकल्पनं खलु त्रिगतमितिनाम्ना प्रसिद्धं वीथ्यङ्गं

स्यात। तथाहि श्रीमुनिः—"श्रुतिसारूप्यार्थात्म नि बहूवोर्थाः यदभि-विनियुज्यन्ते। एतद्वीक्ष्य सहास्यं वा त्रिगतं नामापि विज्ञेयम्" इति।

दृष्टान्तो यथा—श्रीकालिदासग्रथिते विक्रमोर्व्वशीति प्रसिद्धे त्रोटके उर्व्वशीम् अनुसन्दधतः राज्ञः पुरुषरवसः वाक्ये। अत्र यदेव प्रश्नवाक्यं तदेव उत्तरत्वेन योजितं—अत एवात्र त्रिगतम्। "इदम् त्रिगतं खलु नटादित्रितयविषम् एव" नटश्च प्रतिनटश्चः नटी च इति त्रितयमेव अधिकृत्य वर्त्तते इति कश्चित् दशरुपकृत् धनञ्जयः इत्यर्थः। अतएव त्रिगतम् इति संज्ञायाः सार्थकता। परम् अस्य नटादित्रितयविषयत्वं तु न सर्व्वत्र अपितु पूर्व्वरङ्गे एव। तथाहि दशरुपके—"श्रुतिसाम्यादनेकार्थयोजनं त्रिगतमिह। नटादित्रितयालापः पूर्व्वरङ्गे तदिष्यते"। अयं भावः—"योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि" इति श्रीविश्वनाथवचनः सारस्यात् पूर्व्वरङ्गे (आमुखे) उद्घात्यकात् तथा अवलगितात् अन्यदपि वीथ्यङ्गं यथा-सम्भवम् योजयितुं शक्यते। ननु यदा त्रिगतमिति वीथ्यङ्गं पूर्व्वरङ्गे योज्यते तदा तु इदं नटादित्रितयालापम् एव अधिकृत्य कर्त्तव्यम्। मन्यामहे 'नटादित्रितय' इत्यनेन नटः (सूत्रधारः) नटी तथा पारिपार्श्विकश्च लक्षिताः—यत एते एव परस्परालापेन पूर्व्वरङ्गं विदधति। एवम्प्रकारस्य पूर्व्वरङ्गयोजितस्य त्रिगतस्य उदाहरणं विक्रमोर्व्वशी त्रोटकादेव धनिकेन प्रदर्शितं यथा—मत्तानाम् कुसुम्भरसेन षट्पदानां शव्दोअयम् परभृतनादेन धीरः। कैलासे सुरगणसेविते समन्तात् किन्नर्यः कलमधुराक्षरं प्रगीताः इति। विक्रमोर्वशीत्रोटकात् उदाहरणप्रदर्शनेन इदम् विज्ञाप्यते यत् त्रिगतम् इति वीथ्याः अङ्गम् त्रोटके अपि योजयितुम् शक्यते।

Eng. Tran.—Trigata is more than one interpretation (of a sentence or statement) due to mere sameness (causal or accidental sameness) of the very words (of the sentence).

As therein too – the King—

Oh the chief of the mountains ! have you seen here in this charming tract of forest any woman—beautiful in every limb (i. e. beautiful all over her body) and separated from one ? Behind the scene—an echo there (which means and implies the following—Oh the best or greatest of all kings, I have come across a perfectly beautiful lady separated from you in this fine tract of forest). King, How is it that he says that he has seen. Now, here the very sentence that is put up as the question is presented as the answer. Some are of opinion that this (Trigata) concerns only the three—the (main) aetors and another.

Text—श्लोकः। प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलना छलम्।

वृत्तिः। यथा वेण्याम् —भीमार्ज्जुनौ।

कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनःसोऽभिमानी
राजादुःशासनादे र्गुरुरनुजशतस्याङ्गराजस्यमित्रम्।
कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः
क्वास्ते दुर्योधनोऽसौ कथयत न रुषा द्रष्टुमभ्यागतौ स्वः॥

मित—। प्रियाभैः प्रियस्य अनुकूलस्य वचनस्य आभा रूपम्। सा इव आभा यस्य तादृशैः वाह्यतः अनुकूलैः—वस्तुतस्तु प्रतिकूलैरित्यर्थः अप्रियैः वाक्यैः विलोभ्य प्रलोभनं प्रदाय या छलना प्रतारणा तत् छलमिति वीथ्यङ्गम्।

दृष्टान्तो यथा वेणीसंहारे भीमार्ज्जुनवाक्ये। अथ श्लोकव्याख्या— असौ दुर्योधनः क्व कुत्र आस्ते अधुना तिष्ठतीति एतत् कथयत इत्यादि।

अत्र दुर्योधनस्य दक्षताप्रदर्शनात् आपाततः प्रियैः वस्तुतस्तु तस्य दोषाविष्करणादप्रियैः वाक्यैः दुर्योधनं प्रलोभ्य भीमार्ज्जुनौ तं द्रष्टुमागतौ इत्यत्र छलम् ।

Eng. Tran.—Chhala is the hood-winking (of some body) though alluring with apparently sweet words. As in the Venisamhara—Bhima and Arjuna (say)—Please tell us where is Duryyodhana that King with a high prestige, who is the director of the trickery displayed at the game of dice, the contriver of the burning of the lac-house, the chief of hundred brothers beginning with Dussasana and an ally of the ruler of Anga ; that Duryyodhana—who displayed his ability in dragging the hair and taking off the upper garment of Krishna and whose servants are the sons of Pandu ; we have come only to see him not out of grude (i. e. not in wrath).

Text—श्लोकः । अन्ये त्वाहुश्छलं किञ्चित् कार्यमुद्दिश्य कस्यचित् ।

उदीर्य्यते यद्वचनं वञ्चनाहास्यरोषकृत् ॥

मित—। अथ मतान्तरम् प्रदर्शयति—कस्यचित् जनस्य किञ्चित् किमपि कार्य्यम् उद्दिश्य अभिप्रेत्य वञ्चनाहास्यरोषकृत् यद्वचनं वाक्यम् उदीर्यते उच्चार्य्यते तदेव अन्ये तु छलं नाम वीथ्यङ्गम् आहुः कथयन्ति । यथाह श्रीमुनिः—"अन्यार्थमेव वाक्यं छलमभिसन्धानहास्यरोषकरम्" इति ।

Eng. Tran.—Others opine that chhala is the statement which is pregnant with the idea of cheating

of laughter and anger and is uttered with a view to do something with reference to some body.

Text--श्लोकः। वाक्केलिः हास्यसम्बन्धो द्वित्रिप्रत्युक्तितो भवेत्।

वृत्तिः। द्वित्रीत्युपलक्षणम्, : यथा—

भिक्षो ! मांसनिषेवणं प्रकुरुषे ? किन्तेन मद्यं विना।
मद्यञ्चापि तव प्रियम् ? प्रियमहो वाराङ्गनाभिः सह॥
वेश्याप्यर्थ रुचिः कुतस्तव धनं ? द्यूतेन चौर्येण वा।
चौर्य्यद्यूतपरिग्रहोऽपि भवत ? नष्टस्य कान्या गतिः॥

केचित् प्रक्रान्तवाक्यस्यसाकाङ्क्षस्यैव निवृत्ति र्वाक्केलिः इत्याहुः। अन्ये च "अनेकस्य प्रश्नस्य एकमुत्तरम्"।

मित—। वाचा वाक्येन एव केलिः क्रीड़नमिति वाक्केलिः। सा तु हास्यपरिहाससनाथा उक्तिप्रत्युक्तिरुपा। अतएव कथितं—वाक्केलिरिति वीथ्यङ्गम् तु हास्यसम्बन्धः हासपरिहाससम्पर्कः 'द्वित्रिप्रत्युक्तितः' द्वौ वा त्रयो वा परिमाणं अस्यद्वित्रिरिति वहुव्रीहिः। ('वहुव्रीहौ संख्येये'—इति "द्वित्र" स्यात्। समासान्तविधेरनित्यत्वात् न डच् इतिं कथञ्चित् समाधेयम्)। एतत्तु उपलक्षणंतेन द्वित्रोत्तरप्रत्युत्तरेण अनेकोत्तरप्रत्युत्तरेण व भवेत्। तथाहि श्रीमुनि—"एकद्वि (?) प्रतिवचना वाक्केली स्यात् प्रयोगेऽस्मिन्। अतएव श्रीमुनिमते एकस्य एव प्रश्नस्य एकस्य एव हास्य-ज्नके प्रतिवचनेऽपि वाक्केलिः सयात्। अस्य दृष्टान्ती यथा—भिक्षो इत्यादि।

अत्र हास्यसम्वन्धेन उत्तरप्रत्युत्तरचतुष्टयात् वाक्केलिः।

अथ मतान्तरम् उपन्यसति। केचित् दशरुपकारादयस्तु साकाङ्क्षस्य प्रारब्धवचनस्य निवृत्तिरवसानमवाक्केलिः इति आहुः। तथाहि दशरुपके—"विनिवृत्त्यास्य वाक्केलिः द्विस्त्रिः प्रत्युक्तितोऽपि वा" अत्र धनिकटाकायाम् अस्य इति वाक्यस्य प्रकान्तस्यसाकाङ्क्षस्य विनि-वर्त्तनं वाक्केलिः। द्विस्त्रिर्वा उक्तिप्रत्युक्तितः। तत्र आद्या—यथा उत्तरे चरिते वासन्ती—

"त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्, त्वं कौमुदी
नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्ययुक्तां तामेव शान्तमथवा
किमतः परेण ॥

उक्तिप्रत्युक्तिरूपयाः द्वितीयप्रकारायाः उदाहरणं धनिकेन रत्नावल्याः प्रथमाङ्कं विदूषकमदनिकयोरुत्तरप्रत्युत्तरात् प्रदर्शितम् । अथ तृतीयं मतं उपन्यसति—अनेकस्य प्रश्नस्य एकम् एव उत्तरम् वाक्केलिर्भवतीति अपरे मन्यन्ते ।

Eng. Tran.—Vak-keli is the statement in which is couched up two or three (or more) questions and answers all motivated or urged by joke.

"two" or "three" is significant (signifying two, three or more)—that is, the term "two" or "three" should be taken in a wider sense implying two, three or more.

As—Oh mendicant ! do you take meat ? It is nothing if not (accompanied) with wine. Do you like wine also ? Yes, I like it and together with harlots. Harlots hanker after money, and how do you procure it ? Through dice playing or through pilfering ; oh ! you have taken to dice playing and pilfering, also ! There is no other course-left for down-fallen one. Some opine that Vak-keli is the (abrupt) termination of statement (sentence) that has been (already) begun, even though the idea has not been (fully) conveyed or expressed ; others hold that vak-keli stands for a single answer for many a question.

Text—श्लोकः। अन्योन्यवाक्याधिक्योक्तिः स्पर्द्धयाधिबलं मतम्।

वृत्तिः। यथा मम प्रभावत्याम्—वज्रनाभः।

अस्य वक्षः क्षणेनैव निर्म्मथ्य गदयानया। लीलयोन्मूलयिष्यामि भुवनद्वयमद्यवः।

प्रद्युम्नः—अरे रे असुरापसद! अलममुना वहु प्रलापेन। मम खलु—

अद्य प्रचण्डभुजदण्डसमर्पितोरुकोदन्ड निर्गलितकाण्डसमूहपातैः
आस्तां समस्तदितिजक्षतजोक्षितेयं क्षौणिः क्षणेन पिशिताशन—
- लोभनीया।

मित—! स्पर्द्धया परस्परस्पर्द्धया परस्परमुद्दिश्य गर्व्वप्रकाशनेन अन्योन्यवाक्यैं र्वचनैः 'आधिक्योक्तिः प्रतिद्वन्द्विनम् अपेक्ष्य आत्मनः एव उत्कर्षज्ञापनम् खलु अधिवलं इति नाम्ना ख्यातं वीथ्यङ्गं मतम्। दृष्टान्तो यथा ग्रन्थकाररचिते प्रभावतीरुपके।

दृष्टान्तान्तरं यथा वेणीसंहारस्य पञ्चमे अङ्के—तत्र अर्ज्जुनः—सकलरिपुजयाशा यत्र वद्धासुतैस्ते तृणमिव परिभूतो यस्य गर्व्वेण लोकः रणशिरसि निहन्ता तस्य राधासुतस्य प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम्। इत्युपक्रमे—दुर्योधनः--दुरात्मन्। भरतकुलापसद द्यूतदास पाण्डवापसद। नाहं भवानिवविकत्थनप्रगल्भः। किंतु—

"द्रक्ष्यन्ति न चिरात् सुप्तं वान्धवास्त्वां रणाङ्गणे। मद्गदा-
भिन्नवक्षोअस्थिवेणिकाभङ्गभीषणम्"

इत्यन्तेन भीमदुर्योधनयोरन्योऽन्यवाक्यस्याधिक्योक्ति—
रधिवलम्।

Eng. Tran.--Adhival is said to be the utterance exhibiting or impressing mutual superiority in course of defying each other. As in my Pravabhati—Vajranabha—(This sloka has been already translated before).

Pradyumna.—Oh you wicked demon! away with this bragging of yours. To-day let the entire earth be, in a moment, besmeared with the blood of all the demons and as such alluring to the flesh-eaters, by the shooting of arrows from the bow, placed on my vigorous arms.

Text—श्लोकः। गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सत्वरं वचः।

वृत्तिः। यथा वेण्याम्—राजा—

अध्यासितुं तव चिराज्जघनस्थलस्य पर्य्याप्तमेव करभोरु ममोरु युग्मम्।

अनन्तरं (प्रविश्य) कञ्चुकी। देव! भग्नं भग्नं इत्यादि।

अत्र रथकेतनभङ्गार्थे वचनमुरूभङ्गार्थे सम्बन्धे सम्बद्धम्।

भिन--। प्रस्तुतं प्रकृतं प्रकृतविषयः तेन सह सम्बन्धः सम्पर्कः अस्ति यस्य प्रस्तुतसम्बन्धि प्रकृतविषयसम्पृक्तम् अथच भिन्नार्थम् अन्यार्थसूचकं सत्वरम् सहसा ससम्भ्रमेण वा उच्चारितं वचः वाक्यं गन्डम् इति वीथ्यङ्गं स्यात्। तथाहि दशरुपके-"गण्डं प्रस्तुतसम्बन्धि भिन्नार्थं सहसोदितम्" इतिं। दृष्टान्तो यथा बेणीसंहारे द्वितीयेऽङ्के—(लीलांशुकस्य पवनाकुलितांशुकान्तं। त्वद् दृष्टिहारि मम लोचनवान्धवस्य। अध्यासितुम् तव चिरं जघनस्थलस्य पर्य्याप्तमेव करभोरु! ममोरु युग्मम्।" अथास्य द्वितीयार्धस्य व्याख्या -हे करभोरु! तव जघनस्थलस्य चिरं दीर्घकालम् अध्यासितुम् जघनस्थलस्य आश्रयणाय मम उरुयुग्मम् पर्याप्तम् शक्तं योग्यं वा भवत्। प्रविश्य कञ्चुकी कथयति देव! भग्नं भग्नम् इति। तथाहि अत्र भग्नम् इति वाक्यं रथकेतनंभग्नं इति पृथगर्थम् बोधयति परन्तु पताकायोगात् इदमेव बाक्यम् बेणीसंहारस्य प्रकृतविषयम् दुर्योधनस्य उरुभङ्गम् अपि व्यञ्जयति अतएव प्रकृतविषयरूपः-य उरूभङ्गः—तत्सम्बन्धित्वात् बाक्येन भङ्गरूपं पृथगर्थं बोधयत् इदं

बोधयत् इदं वाक्यं सम्भ्रमेण उच्चारितं सत् गण्डं भवति। दृष्टान्तान्तरम् यथा उत्तररामचरिते—रामः।

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयोरसावस्या स्पर्शो वपुषि
बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृनो मौक्तिकसरः। किमस्या न
प्रेयो यदि परमसह्यस्तु विरहः॥

(प्रविश्य) प्रतीहारी। देव! उपस्थितः।

रामः—अयि। कः?

प्रतीहारी—देवस्य आसन्नपरिचारको दुर्मुखः।

अत्र "दुर्मुखः उपस्थितः" इत्येबार्थबोधकं वाक्यम् उत्तररामचरितस्य प्रस्तुतविषयम् सीतावर्ज्जनम् सूचयति अतएव प्रस्तुतसम्बन्धि भिन्नार्थबोधकमिदं वाक्यं गण्डम्।

नथाहि पूर्वं छलस्य दृष्टान्तो नाटकात् उद्धृतः। वाक्केल्याः दृष्टान्तो दशरूपके नाटकात् नाटिकायाः च प्रदर्शितः। अधिबलस्य दृष्टान्तो नाटिकायाः—दशरूपके च नाटकात् उद्धृतः। गण्डस्य दृष्टान्तः अत्रैव। अतएव एतानि वीथ्यङ्गानि नाटके नाटिकासु च यथासम्भवं योजयितुं शक्यन्ते।

अथ श्रीमुनिकृतं गण्ड-लक्षणं—

संरम्भसंभ्रमयुतं विवादयुक्तं तथा अपवादकृतम्।
बहु वचनाक्षेपकृतं गण्डं प्रवदन्ति तत्त्वज्ञाः॥

Eng. Tran.—Ganda is a suddenly uttered statement connected with the main topic (of the drama), though it (really) connotes a different implication. As in the Veni-samhara—King, oh one with her thigh like the outer edge of the palm, these two thighs of mine are quite fit for settling long upon the charming hip of yours.

Then (entering) Chamberlain, your Majesty ; broken ! broken ! etc. Here the statement uttered to inform the throwing off (i. e. severance) of the car-banner is connected with the breaking of the thighs—which is the main topic.

Text—श्लोकः। व्याख्यानम् स्वरसोक्तस्यान्यथावस्यन्दितं भवेत्।

वृत्तिः। यथा छलितरामे—सीता। जाद! कल्लं कखु अओज्झाये गन्तव्वं तहिं सो राआ विणएणपणइदव्वो। लवः-अथ किमावाभ्याम् राजीपजीविभ्याम् भवितव्यम्। सीता—जाद! सोक्खु तुम्हाणं पिदा। लवः—किमावयोः रघुपतिः पिता? सीता—(साशङ्कम्) मा अण्णधा संकधं, ण क्खु तुम्हाणं, सअलाएज्जेव पुहवीएत्ति।

मित—। स्वरसः आत्मनः हृद्गताभिप्रायः। स्वरसेन आत्मन एव अभिप्रायम् वोधयितम् उक्तस्य कथितस्य वाक्यस्य अन्यथा अन्यप्रकारं व्याख्यानम् अवस्यन्दितं नाम वीथ्यङ्गं भवेत्। तथाहि दशरूपके "रसोक्तस्यान्यथा व्याख्या यत्रावस्यन्दितं हि तत्"। श्रीमुनिरपि—"आक्षिप्तार्थेतु कस्मिंश्चिच्छुभाशुभसमुत्थिते। कौशलादुच्यतेऽन्यार्थः तदवस्यन्दितं भवेत्"। दृष्टान्तो यथा छलितरामे—

अत्र रामः युवयोः पिता इति अनेन कुशीलवयोः पिता रामः इति सीतया वोधयितुम् इष्टम्। पर सत्यवृत्तान्तं लवात् गोपयितुम् सा अस्य व्याख्यान्तरं चकार इति अत्र अवस्यन्दितम्।

Eng. Tran.—Avasyandita is presenting of a (quite) different interpretation of a statement used to convey the real sense. As in the chhalita-Rama—

Sita—My boy ! we are to start to-morrow for

Ayodhya. There you should behave unto the king in a befitting humble manner.

Lava.—Are we then, to be dependants of the king ?

Sita—My boy ! he is the father of you too.

Lava—Is the Lord of the Raghus our father ?

Sita—(with apprehension) Do not take it in any other sense. (Don't apprehend any other thing); not only of you too, but of the (people of the) entire earth.

Text—वृत्तिः । प्रहेलिकव हास्येन युक्ता भवति नालिका ।

वृत्तिः । संवरणकार्युत्तरं प्रहेलिका । यथा रत्नावल्यां—सुसङ्गता- सहि ! जस्स किदे तुमं आअदा । सो इदो ज्जेव चिट्ठदि । सागरिका— कस्सकिदे अहं आअदा ?

सुसङ्गता—णं चित्तफलअस्स ।

अत्र त्वं राज्ञ कृते आगता इत्यर्थः संवृतः ।

मित—। हास्येन युक्ता प्रहेलिका एव नालिका इति वीथ्यङ्गं स्यात् । ननु प्रहेलिका का ? उच्यते—संवरणकारि उत्तरं प्रहेलिका ।

अत्र यस्य कृते इत्यनेन राज्ञः उदयनस्य कृते इति अभिप्रायः प्रकाशितः । तं संवरीतम्—ननु चित्रफलकस्य इति उत्तर सोपहासं दीयते तेनात्र नालिका ।

Eng. Tran.—Prahelika impregnated with taunt becomes Nalika. Prahelika means an answer given to conceal (or twist) the meaning (of something already said). As in the Ratanavali, susanganta—My friend—

Here sits he for whom you have come. Sagarika—For whom have I come. Susangata—well for the picture. Here the implication that "She has come for the king" has been concealed.

Text—श्लोकः। असत्प्रलापो यद्वाक्यमसम्बद्धं तथोत्तरम्।
अगृह्णतोऽपि मूर्खस्य पुरोयच्चहितं बचः।

वृत्तिः। तत्राद्यं यथा मम प्रभावत्यां—

प्रद्युम्नः—(सहकारवल्लीमवलोकय सानन्दं) अहो किमिहैव—
अलिकुलमञ्जुलकेशी परिमलबहला रसावहातन्वी
किशलयपेशलपाणिः कोकिलकलभाषिणी प्रियनमा मे॥

एवम् असम्वद्धोत्तरे अपि। तृतीयं यथा वेणयाम् दुर्योधनं प्रति गान्धारीवाक्यम्।

मित—। अथ असत्प्रलापं विवृणोतिं। स च त्रिविधः—तत्र आद्यो यथा—यत् वाक्यं असम्वद्धम् पूर्व्वापरसम्वन्धरहितं स असत्-प्रलापः। द्वितीयो यथा—यदुत्तरं असम्वद्धम् प्रश्नेन सह सम्पर्क-रहितम् स असत् प्रलापः। तृतीयो यथा—अगृह्णतोऽपि अमानयतः अपि मूर्खस्य पुरः अग्रतः यच्च हितं वचः हितोपदेशः स असत्प्रलापः। श्रीमुनिस्तु तृतीयमेव असत्प्रलापम् उररीकृतवान्—यथा नाट्यशास्त्रे—"मूर्खजन सन्निकर्षे हितमपि अत्र प्रभाषते विद्वान्। न च गृह्यते अस्य वचनं विज्ञेयोऽसत्प्रलापोऽसौ" इति। अस्य दृष्टान्तो वेणीसंहारे तत्र यत्र विमूढः दुर्योधनो गान्धार्य्याः हितोपदेशम् न गृह्णाति। धनञ्जयस्तु "असंवद्धकथा प्रायोऽसत्प्रलापो तथोत्तरः इति लक्षणं कृत्वा प्रथमं द्वितीयम् च असत्प्रलापम् स्वीकरोति। प्रथमस्य दृष्टान्तः यथा प्रभावती-रूपके प्रद्युम्नः सहकारवल्लीम् (आम्रशाखाम्) दृष्ट्वा तामेव प्रभावतीम् मन्यमानः सानन्दः सन् तां वर्णयति अलिकुलेत्यादिना।

Eng. Tran.—Asatpralapa means an irrelevant statement or an irrelevant answer (to a question); or a wholesome advice given to a fool—but un-accepted (flouted) by him.

Of these the first is in my Prabhavati—Pradyumna (looking out a branch of some mangoe tree) says oh ! how it is that here is my beloved—with her hair beautiful as the lines of bees, besmeared with sweet scent, blooming with (erotic) sentiment (or affording pleasure), lean (in constitution), with her palm like the new twig and speaking as sweet as a cuckoo. And in this manner, it is in the case of an irrelevent answer. The third is as in the Venisamhara in cases of Gandhari's advice to Duryyodhana.

Text—श्लोकः। व्याहारो यत् परस्यार्थे हास्यक्षोभकरं वचः।

वृत्तिः। यथा—मालविकाग्निमित्रे (लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति)।

विदूषकः - मा दाव। उपदेशसुद्धा गमिस्समसि। (इत्युपक्रमेण)।

गणदासः - (विदूषकं प्रति) आर्य्य ! उच्यतां यस्त्वया क्रमभेदो लक्षितः।

विदूषकः--पढ़मं वम्हण पूआ भोदि सा इमाए लङ्घिदा।

(मालविका स्मयते)

इत्यादिना नायकस्य विशुद्धनायिकादर्शनप्रयुक्तेन हास्यक्षोभकारिणा वचसा व्याहारः।

मित । परस्य अर्थे अन्यस्य कृते अपरस्य उपकारं कर्त्तुं तोषम् वा जनयितुमित्यर्थः यत् हास्यक्षोभकरं हासोत्पादकं क्षोभजनकं वा वचः वाक्यं तदेव व्याहार इति वीथ्यङ्गं स्यात्। अस्य दृष्टान्तो यथा मालविकाग्निमित्रे–तत्र नृत्यात् परम् यावत् मालविका गन्तुमिच्छति तावत् विदूषकः

वक्ति—मालविके। मा तावत्; उपदेशशुद्धा गमिष्यसि। मा तावत्= मा गच्छ इत्यादि।

इति एतत् सर्व्वं नायकस्य अग्निमित्रस्य विशुद्धनायिकादर्शनेन, स्वाभाविकावस्थाम् अधितिष्ठन्त्याः मालविकायाः दर्शनहेतुना हास्यक्षोभ-कारिणावचसा व्याहारः सम्भूतः। अयं भावः—एतावन्तं कालं यावत् राज्ञा नृत्यन्ती एव मालविका दृष्टा—न तु स्वाभाविकावस्थां गता। तादृशी-मेव मालविकाम् राज्ञे दर्शयितुम् विदूषकः अनेन हास्यक्षोभोत्पादिना वचनेन मालविकायाः गमनं स्थगितवान् तेन च राज्ञः उपकारम् अवधारित-वान्। अतएव राज्ञः कृते विदूषकेण कथितं इदं क्षोभहास्यकरं वचनं व्याहार इति वीथ्यङ्गमत्र सम्भृतम्।

Eng. Tran—Vyahara is a statement (an utterance) that gives rise to laughter and curiosity (agitation)—made for the sake of another. As in the Malavikagnimitra: at the dancing performance, Malavika wants to go out. Vidusaka says—Do not do so; go after having corrected the error you have committed in (the feat of) your (dance)-learning—(that is first clear yourself off from the over-sight committed by you in course of your showing a feat of instruction you have received in dancing)—beginning with this (i. e. with this set up) Ganadasa—venerable sir! please tell what discrepaney you have noticed in her feat. Vidusaka:—First of all comes the Puja of a Brahman (i. e. first of all, offerings are made to a Brahman) and this order has been vitiated by her,

Malavika—(smiles) [and Ganadasa is curious and agitated].

With this and like statement that gives birth to laughter and curiosity (agitation), the heroine is shown to the hero in her normal appearance and hence due to this it is (a case of) Vyahara.

Text—श्लोकः। दोषा गुणा गुणा दोषा यत्र स्यु र्मृदवं * हि तत्। वृत्तिः। यत्र दोषाः गुणा भवन्ति—ये यथार्थत एव दोषास्ते तु गुणाय सम्पद्यन्ते, अथवा गुणाः दोषा भवन्ति ये तु यथार्थत एव गुणास्ते तु दोषाय सम्पद्यन्ते, तत्र हि मृदवं नाम वीथ्यङ्गं स्यात्। [श्रीमुनिस्तु "यत कारणाद्, गुणानां दोषीकरणं भवेद् विपादकृतम्। दोषगुणीकरणं वा तन्मृदवं नामापि विज्ञेयम्" इति लक्षणं कृतवान्]। अथ प्रथमस्य दृष्टान्तो यथा, प्रिय जीवितताक्रौर्य्यं निःस्नेहत्वं कृतघ्नता, भूयस्त्वद्दर्शनादेव ममैते गुणतांगता—इत्यत्र। अत्र दोषाः नाम गुणाय परिणताः। द्वितीयस्य दृष्टान्तो यथा—तस्याः तद्रूपसौन्दर्य्यं भूषितं यौवनश्रिया, सुखैकायतनं दुःखायैव ममाधुना—इत्यत्र श्लोके। तस्याः विरहे तदेव अहं स्मरामि तेन च दुःखं प्राप्नोमि।

इति व्याख्यातानि त्रयोदश वीथ्यङ्गानि॥ Note—एते ते प्रस्तावनाङ्गानि अपि भवन्ति इति धनिकः। तथाहि दशरूपके "वीथ्यङ्गानामामुखाङ्गत्वात्" इति।

N. B.—एतत् च "योज्यान्यत्र यथालाभं वीथ्यङ्गानीतराण्यपि" इत्यनेन ग्रन्थकारेण अपि स्वीकृतम्। [* मार्दवमित्यपि पाठोऽत्रदृश्यते]।

Eng. Trans.—Mridava is that in which merit turns into demrit and vice versa.

As (the examples being in serial order)—oh my beloved ! my living (i. e. dragging of my existence in your separation) is (nothing but) cruelty, dispassionateness

and ingratitude. But these have turned into merits (virtues) since I have met you again.

That grace of her body endowed with youthful charms and the sole abode of pleasure—has now been (being remembered) for my sorrow.

Text—वृत्तिः। एतानि च अङ्गानि नाटकादिषु सम्भवन्ति अपि वीथ्याम् अवश्यं विधेयानि विस्पष्टतया, नाटकादिषु विनिविष्टान्यपि इह उदाहृतानि। वीथीव नानारसानाम्वात्रमालारूपतया स्थितत्वात् वीथीयम्। यथा—मालविका।

Eng. Tran.—These angas, though possible in dramas (i. e. though they may be found in dramas etc.) must needs appear in very clear forms in a Vithi ; and here they have been cited from dramas (i. e. as they have been set on in dramas also). The Vithi is so named as in it various sentiments appear in a row—just as in the case of a row of trees.

Example—Malavika.

Text—वृत्तिः। अथ प्रहसनम्—

इतः परम् क्रमप्राप्तम् अवशिष्टं रूपकं प्रहसनं विवृणोति।

Eng. Tran.—Now comes description of Prahasana (farce).

Text - श्लोकः। भाणवत् सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्म्मितम्।
भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम्।
अत्र नारभटी नापि विष्कम्भकप्रवेशकौ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्नवा॥

मित—। यथा भाणे तथा प्रहसने अपि सन्धिः, सन्धेरङ्गानि, लास्याङ्गानि तथा अङ्कश्च स्थास्यन्ति। अतएव उक्तम्—सन्धिसन्ध्यङ्गलास्याङ्गाङ्कै विनिर्मितम्। तथाहि यथा भाणे तथा अत्रापि एक एव अङ्कः। मुखनिर्व्वहणे इति सन्धिद्वयम्। तथा तयोरङ्गानि एवं दश लास्याङ्गानि भवेयुः। एवं च भाणवत् अत्रापि वृत्तं इतिवृत्तमपि कविकल्पितं स्यात् इतिवृत्तं निन्द्याणाम् निन्दार्हाणाम् जनानाम् चरितमवलम्ब्य प्रहसने वृत्तम् रचितं स्यात् इत्यर्थः। विष्कम्भकः प्रवेशकश्च अत्र न तिष्ठतः। आरभटा वृत्तिरपि न। अत्र हास्यरसः अङ्गी। किञ्च वीथ्यङ्गानाम् स्थितिः न वा स्यात्। परं श्रीमुनिमते तु प्रहसने वीथ्यङ्गानां स्थितिरावश्यकी—तथाहि नाट्यशास्त्रे—"वीथ्यङ्ग संयुक्तं कर्त्तव्यं प्रहसनं यथायोगम" इति।

Eng. Tran.—The subject-matter of a Prahsana—will be the story of those—that deserve condemnation, the story proceeding from the imagination of the poet and endowed with Sandhis, Angas of Sandhis, Angas of Lasya and (a single) act—as in Bhana. There will be no Arabhati nor Viskambhaka or Pravesaka. The dominant sentiment is comic and the Angas of Vithi may or may not stay in it.

Text—श्लोकः। (तत्र) तपस्विभगवद्विप्रप्रभृतिष्वत्र, नायकः। एको यत्र भवेद्धृष्टो हास्यं तच्छुद्धमुच्यते।

वृत्तिः। यथा—कन्दर्पकेलिः।

मित—। अथ श्रीमुनिः प्रहसनस्य द्वैविध्यं स्वीकरोति यथा—नाट्यशास्त्रे "प्रहसनमपि विज्ञेयं द्विविधं शुद्धं तथा संकीर्णम्"। अथ शुद्धस्य प्रहसनस्य श्रीमुनिकृतं लक्षणं यथा "भगवत्तापसविप्रैरन्यैरपि हास्यवादसंबद्धम्। कापुरुषसंप्रयुक्तं परिहासभाषणप्रायम्। अविकृत-

भाषाचारम् विशेषभावोपपन्नचरितपदम्। नियतगतिवस्तुविषयं शुद्धं ज्ञेयं प्रहसनं तु"। धनञ्जयस्तु प्रहसनस्य त्रैविध्यं वक्ति यथा दशरूपके "तत् प्रहसनं त्रेधाशुद्धवैकृतसंकरैः"। तत्र शुद्धस्यलक्षणं यथा—पाखण्डि (पाषण्डि) विप्रप्रभृतिचेटचेटीविटाकुलम्। चेष्टितं वेषभाषाभिः शुद्धं हास्यवचोऽन्वितम्।" इति। श्रीमान् विश्वनाथस्तु धनञ्जयम् अनुसृत्य प्रहसनस्य त्रैविध्यमेव कथितवान्। तत्र आदौ शुद्धप्रहसनम् लक्षयति—तपस्वीत्यादिना। अत्र प्रहसने तपस्विनः तपस्याचारिणः भगवन्तः ब्रह्मनिष्ठाः विप्राः ब्राह्मणाः इति एतन् प्रभृतिषु कश्चित् एकः नायकः स्यात्। तथाहि यत्र प्रहसने एतेषां मध्ये कश्चित् एकः धृष्टः प्रगलभः नायकः स्यात् तन् हास्यं प्रहसनम् शुद्धमिति उच्यते। अस्य उदाहरणं यथा कन्दर्पकेलिः।

Eng. Tran.—In Prahasana, the hero comes from amongst ascetics, religious persons and Brahmans ; and the Prahasana in which there is one impertinent fellow (from amongst these, playing the part of the hero) is said to be Suddha (pure). As—Kahdarpakeli.

Text—श्लोकः। आश्रित्य कञ्चन जनं सङ्कीर्णमिति तद्विदुः।

वृत्तिः। यथा धूर्त्तचरितम्।

मित। 'कञ्चन जनम्' कम् अपि नायकम् धृष्टभिन्नं जनम् इति श्रीहरिदास सिद्धान्तवागीशादयः। आश्रित्य अवलम्ब्य रचितं यत् प्रहसनम् तत् संकीर्णम् इति विदुः। ननु संकीर्णमिति संज्ञायाः का सार्थकता? अनियतनायकसङ्करात् सङ्कीर्णम् इति सिद्धान्तवागीशाः। परं धनिकस्तु "वीथ्यङ्गैस्तु संकीर्णत्वात् संकीर्णम्' इति घोषयति। यतः धनञ्जयः "वीथ्या संकीर्णम् धूर्त-संकुलम्" इति लक्षणं कृतवान्। श्रीमुनिस्तु— "वेश्याचेटनपुंसकविटधूर्त्ता बन्धकी च यत्र स्युः। अनियतवेष-परिच्छदचेष्टितकरणैस्तु सङ्कीर्णम्" इति वदति।

Eng. Tran.—That Prahasana which is composed on (the story of) some one of these is said to be mixed (samkirna).

As Dhurta-charitam.

Text—श्लोकः। वृत्तं वहूनाम् धृष्टानां सङ्कीणं केचिदूचिरे।
तत् पुनर्भवति द्व्यङ्कमथवैकाङ्कनिर्मितम्।
यथा लटकमेलकादिः।

मित । मतान्तरे सङ्कीर्णलक्षणम् आह—केचित् नाट्यशास्त्रविदः वहुनाम् अनेकेषां धृष्टानाम् वृत्तम् इतिवृत्तम् अनेकानाम् धृष्टानाम् चरित मवलम्ब्य रचितं प्रहसनम् इत्यर्थः सङ्कीर्णम् इति आख्यया ऊचिरे। धनञ्जय मते धूर्त्तः संकुलम् तथा वीथ्यङ्गैः संकीर्णम् प्रहसनम् सङ्कीर्णम् इति प्रागेव उक्तम्॥ तत् सङ्कीर्णम् द्वाभ्याम् अङ्काभ्याम् ग्रथितं एकेन वा अङ्केन ग्रथितं स्यात् इति तदपि द्विधा। अस्य सङ्कीर्णप्रहसनस्य दृष्टान्तो यथा लठकमेलकम्। एवं अन्यानि च।

Eng. Tran.—Some call that Prahasana as Samkirna (mixed) which is based on the exploits of many impudent fellows. It, on its part, may constitute either one or two acts.

As Lataka-melaka and others.

Text—वृत्ति। मुनिस्त्वाह—

वेश्याचेटनपुंसकविटधूर्त्ता वन्धकी च यत्र स्युः।
अविकृतवेशपरिच्छदचेष्टितकरणैस्तु संकीर्णम्।

मित—। अथ श्रीमुनिकृतलक्षणं उद्धरति यत्र प्रहसने वेश्या चेटः दासः नपुंसकः धूर्त्ताः कितवाः वन्धकी गणिकाविशेषाः स्युः; अविकृताः (अनिभृताः इति पाठे तु प्रकाश्या इत्यर्थः) ये वेशाः तथा परिछदः।

एवं अविकृतं (अनिभृतं) यत् चेष्टितं यथा करणं तैः उपलक्षितं तत् प्रहसनम् सङ्कीर्णमुच्यते।

Eng. Tran.—But Muni (The sage Bharata) said—That Prahasana is Samkirna in which appear a harlot, a slave, a eunuch, a cheat or sharper, and a courtezan—with normal apparel, appearance, exploits and deeds.

Text—श्लोकः। विकृतन्तु विदुर्यत्र षण्डकञ्चुकीतापसाः।

भुजङ्गचारणभटप्रभृतेर्वेशवाग्युताः॥

वृत्तिः। इदन्तु सङ्कीर्णेनैव गतार्थम् इति मुनिना पृथग्नोक्तम्।

मिन--। षण्डः नपुंसकः तथा कञ्चुकी तथा तापसश्च, यत्र यस्मिन् प्रहसने भुजङ्गचारणभटः— चारणः स्तुति--पाठकः तथा भटः ओद्धा इति एतत् प्रभृतीनाम् वेशेन तथा वाग्भिः युताः अन्विताः सन्तः अभिनयन्ति तत् प्रहसनम् तु विकृतम् इति विदुः।

तथाहि दशरूपके--

कामुकादिवचोवेषैः षण्डककञ्चुकीतापसैः

विकृतं- संकरन्तु वीथ्या संकीर्णं धूर्त्तसङ्कुलम्॥

अत्र धनिकः—‘कामुकादयः भुजङ्गचारणभटादयः। तद्वेषभाषादियोगिनो यत्र षन्डकञ्चुकितापसवृद्धादयस्तद् विकृतम्। स्वस्वरुपप्रच्युत-विभावत्वात् इति।

ननु इदं खलु तृतीयप्रकारम् विकृतमिति आख्यातं प्रहसनम् श्रीमुनिस्तु न गणयति। कथम्? उच्यते—इदन्तु विकृतम् इति संज्ञितं प्रहसनम् सङ्कीर्णेनैव गतार्थम्। सङ्कीर्णप्रहसनस्य एव अन्तर्भुक्तं विकृतम् सङ्कीर्णप्रहसनस्य यल्लक्षणम् वाहुल्येन विकृतमपि तल्लक्षणम् इति अनेनैव हेतुना विकृतम् इति सङ्कीर्णात् पृथक् कृत्वा न उक्तं श्रीमुनिना।

अथ प्रहसनवस्तुविषये इदं खलमुनिना कथितं—

“लोकोपचारयुक्ता या वार्त्ता यश्चदम्भसंयोगः।

तत् प्रहसनेषुयोज्यं धूर्त्तोक्तिविवादसंयुक्तम्” इति।

Eng. Tran.—That Prahasana is said to be vikrita, in which eunuchs, chamberlains and ascetics appear in the dress as well as in the speech of vitas charanas (panegyrists) and Bhatas (soldiers or wrestlers)

The sage Bharata has not spoken of it separately, in as much as it is incorporated in the (i.e. his) Samkirna Prahasana.

वृत्तिः। अथ उपरूपकाणि।

मित—। दशरूपकाणि विविच्य अधुना अष्टादश उपरूपकाणि विवेचयितुम् प्रस्तौति। 'विना विशेषं सर्व्वेषां लक्ष्मनाटकवत् मतम्' इति वचनात् उपरूपकेषु यत्र विशेषः स तु मुस्पष्टम् ग्रन्थकारेण कथयिष्यते। तत्र आदौ क्रमाप्राप्ताम् नाटिकां लक्षयति—

Eng. Tran.—Now comes the turn of upa-rupakas.

Text—श्लोकः। नाटिका क्लृप्तवृत्तास्यात् स्त्रीप्राया चतुरङ्किका।

प्रख्यातो धीरललितस्तत्रस्यान्नायको नृपः॥

स्यादन्तःपुरसम्बन्धा सङ्गीतव्यापृताथवा।

नवानुरागा कन्यात्र नायिका नृपवंशजा॥

सम्प्रवर्त्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः।

देवीभवेत् पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा॥

पदे पदे मानवती तद्वशः सङ्गमो द्वयोः।

वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः॥

वृत्तिः। द्वयोर्नायकनायिकयोः। यथा रत्नावलीविद्धशालभञ्जिकादि।

मित—। नाटिका तु क्लृप्तवृत्तास्यात्। नाटिकाया इतिवृत्तं कविना उत्पाद्यं स्यात्—परम् तत्र नायकस्तु प्रख्यातः इतिहासप्रसिद्धस्तथा धीरललितश्च कश्चित्। नाटके तु नायकस्तथा इतिवृत्तमपि प्रख्यातम् स्यात्। प्रकरणे नायकस्तथा इतिवृत्तमपि कविना उद्भावनीयम। अत्राह धनिकः—"उत्पाद्येतिवृत्तत्वम् प्रकरणधर्म्मः प्रख्यातनृपनायकादित्वं तु

नाटकधर्म्मं इति। अत्र नाटिकायां तु नायकः प्रख्यातः परमतमालम्ब्य कथितम् इतिवृत्तम् कविकल्पितं भवेदिति एषां परस्परभेदः। अन्यत् सुगमम्।

नाटिकाम् अधिकृत्य श्रीमुनिः—

'स्त्रीप्राया चतुरङ्का ललिताभिनयात्मिका सुविहिताङ्गी।
वहुगीतनृत्यवाद्यरतिसम्भोगात्मिका चैव।
राजोपचारयुक्ता प्रसादनक्रोधदम्भसंयुक्ता।
नायकदूती चापि देवीसम्बन्धा नाटिका ज्ञेया॥ इति।

Eng. Tran.—The subject matter (i. e. the story) of a Natika proceeds from the imagination (of the poet).

It (i. e. a Natika) has four acts—abounding with a majority of females ; and the hero will be a well-known figure—a king of the Dhira Lalita type. The heroine here will be virgin princess that has for the first time fallen in love. The hero always standing in, one of the senior queen will follow the virgin heroine. The senior queen will also be a princess a bit advanced in age (i. e. older than the virgin) and imprudent. She will be very prone (prone) to love pique (i. e. she will take offence at every step) and the (nuptual) union of the two will be subject to her (will). The Vritti will be Kaisiki and as regards sandhis—here will stay all of them—but the Vimarsa Sandhi will be very slightly inhibited. The word "Dwayoh" i. e. both, stands for the hero and the heroine.

Example—Sriharsa's Ratnavali, Rajshekhara's Viddha-sala-bhanjika and others.

द्रष्टव्यम् - नाटिकालक्षणे "देव्यास्त्रासेन शङ्कितः" इति देवी शब्देन या राजमहिषी लक्षिता तस्याः लक्षणं तु नाट्यशास्त्रे इदं दृश्यते—

"एभिरेवगुणैर्युक्ता वहुमानविवर्जिता। गर्विता राजपुत्री च रतिसंभोगतत्परा॥

वाला नित्योज्जलगुणा प्रतिपक्षेअसूयिका। यौवनादि-गुणोत्तमा सा देवीत्यभिधीयते॥"

Text—वृत्तिः। अथ त्रोटकम्।

मित—। अथ क्रमप्राप्तम् त्रोटकं लक्षयति।

Eng. Tran. —Now comes the turn of Trotaka.

Text—श्लोकः। सप्ताष्ठनवपञ्चाङ्कं द्रिव्यमानुषसंश्रयम्।
त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्॥

वृत्तिः—प्रत्यङ्कं सविदूषकत्वादेवात्र श्रृङ्गारोऽङ्गी। सप्ताङ्कं यथा—स्तम्भितरम्भम्। पञ्चाङ्कं यथा—विक्रमोर्व्वशी।

Eng. Tran.—A Trotaka is said to be that—which consists of either seven, or eight or nine or five acts—each act being grand by the presence of the jester and which is based on the story of mortals and immortals.

The erotic sentiment is here—the predominant one—as indicated by the presence of the Vidusaka (jester who is usually the hero's नर्मसचिव) in every act. An example of a Trotaka with seven acts stamvitarambha and with five acts is Vikromorvasi. [Note here the reading प्रत्यङ्कं सविदूषकम् and not सर्व्वाङ्कं सविदूषकम्]।

वृत्तिः। अथ गोष्ठी।

मित—। इतः परं क्रमप्राप्तां गोष्ठीं विवृणोति।

Eng. Tran.—Now comes the turn of Gosthi.

Text—श्लोकः। प्राकृतैर्नवभिः पुंभिर्दशभिर्वाप्यलङ्कृता।
नोदात्तवचनागोष्ठी कैशिकी वृत्तिशालिनी॥

हीना गर्भबिमर्शाभ्याम् पञ्चषड् योषिदन्विता * ।
कामश्रृङ्गारसंयुक्ता स्यादेकाङ्कविनिर्मिता ॥

वृत्तिः । यथा रैवतमदनिका ।

मित । प्राकृतैः साधारणैः नवभिः दशभिर्वा पुंभिः पुरुषः अलङ्कृता अन्विता—एवं च साधरणपात्रैर्युक्तत्वात् न उदात्तवचना कैशिकी वृत्तिशालिनी गोष्ठी भवति। सा तु गर्भसन्धिना तथा बिमर्शसन्धिना रहिता भवेत्—एवं च पञ्चभिस्तथा षडभिर्वा योषिद्भिः रमणीभिः अन्विता युक्ता स्यात्। अपिच या गोष्ठी कामश्रृङ्गारसंयुक्ता, प्रहसनश्रृङ्गार-प्रदर्शिका तथा एकेन एव अङ्केन बिनिर्मिता ग्रथिता स्यात्। यथा रैवत-मदनिका। कामश्रृङ्गारस्तु समवकारान्तर्गतविद्रवप्रसङ्गे अस्माभिः व्याख्यातः। [* अत्र "पञ्चषट्" स्थले "पञ्चष" इति पाठो युक्तः। बहुव्रीहौ संख्येये डच्—सूत्रेण। विश्रुतचरिते "पञ्चषैः फलैः" इति। वा समासात विधेरभावात् समाधयम्। पञ्चविकल्पिताः षट् इति पञ्चषट इति वा कथञ्चित् (?) समाधेयम ।

Eng. Tran.—A Gosthi abounds with nine or ten ordinary fellows and five or six females. It is runon by the Kaisiki Vritti and its subject-matter is not of a serious nature. It has got only a single act lacking in the Garbha as well as the Vimarsa Sandhis and is replete with Kama Sringara i. e. erotic sentiment dominated solely by passion.

वृत्तिः । अथ सट्टकम् ।

मित । अनन्तरं क्रमप्राप्तं सट्टकं कथयति ।

Eng. Tran.—Now comes the turn of sattaka.

Text श्लोकः । सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः ।
अङ्काः जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम् ।
यथा—कर्पूरमञ्जरी ।

वृत्तिः। यथा कर्पूरमञ्जरी।

मित—। सट्टकं तु प्रकृताशेषपाठ्यम् इत्यादि सुगमम्। अङ्कास्तु अत्र जवनिका इति आख्यया उल्लिखिताः स्युः। दृष्टान्तो यथा—कर्पूर मञ्जरी।

Eng. Tran.—A Sattaka has all its text composed in Prakrit. It lacks in either Praveshaka or Viskambhaka and Adbhuta Rasa (the sentiment of wonder) largely abounds in it. Here the acts passby the denomination Javanika and in other respects, it is like a Natika.

Example—is Karpura Manjari.

Text—वृत्तिः। अथ नाट्यरासकम्।

मित—। अनन्तरं क्रमप्राप्तं नाट्यरासकं नामोपरूपकं विवृणोति।

Eng. Tran.—Now comes the turn of Natyarasaka.

Text—श्लोकः। नाट्यरासकमेकाङ्कम् बहुताललयस्थिति।
उदात्तनायकं तद्वत् पीठमर्दोपनायकम्॥
हास्योऽङ्गयत्र सश्रृङ्गारो नारी वासकसज्जिका।
मुखनिर्व्वहणे सन्धी लास्याङ्गानि दशापि च॥
केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्।

वृत्तिः— तत्र सन्धिद्वयवती—यथा नर्मवती॥
सन्धिचतुष्टयवती—यथा विलासवती।

मित—। नाट्यरासकं नाम उपरूपकम् तु एकेनैव अङ्केन निष्पाद्यम्। तत्र बहूनाम् तालानां तथा लयानाम् स्थितिः सत्ता निवेशनीया। तथा तत्र नायकश्च उदात्तः धीरोदात्तः भवेत्। एवं च कश्चित् पीठमर्द्दस्तत्र उपनायकः स्यात्। नायकसहकारी भवेत् इत्यर्थः। पीठमर्द्दलक्षणं यथा— "दूरानुवर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु। किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः"। अत्र श्रृङ्गाररसेन उपबृंहितो हास्यरस एव अङ्गी।

अत्र नागी नायिका तु वासकसज्जा स्यात्। वासकसज्जालक्षणं यथा—'कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा।" तत्र दशलास्याङ्गानि तिष्ठन्ति। एवं मुखसन्धिः निर्व्यहणसन्धिश्च निष्ठतः। परं केचित् तु नाट्यरासके प्रतिमुखं वर्जयित्वा अन्येषां चतुर्णाम् सन्धींनाम् सत्ताम् स्वीकुर्व्वन्ति। तत्र मुखनिर्व्वहणसन्धियुक्तस्य नाट्यरासकस्य दृष्टान्तो यथा—नर्म्मवती। मुखगर्भविमर्शनिर्व्वहण सन्धियुक्तस्य यथा बिलासवती।

Eng. Tran.—Natyarasaka has got a single act—endwoed with a variety of cadence and timing, The hero is one of Dhirodatta type and his upanayaka (assistant) will be of Pithhamarda type. Comic—attended by erotic is the running sentiment and the heroine is of the Vasaka-sajya type. There are two sandhis, Mukha and Nirvahana and ten Lasyanga. Some authorities do not wish only the Pratimukha Sandhi herein.

Example of Natyarasaka with two Sandhis—

is Narmavati ; with four Sandhis—is Vilasavati.

Text—वृत्तिः। अथ प्रस्थानम् (प्रस्थानकंवा)।

श्लोकः। प्रस्थाने नायको दासोहीनःस्यादुपनायकः।
दासा च नायिका वृत्तिः कैशिकी भारती तथा॥
सुरापानसमायोगादुद्दिष्टार्थस्य संहृतिः।
अङ्कौ द्वौ लयतालादिर्विलासो वहुलस्तथा॥

वृत्तिः। यथा शृङ्गारतिलकम्।

मित—। अथ प्रस्थानमिति उपरूपकं व्याचष्टे—प्रस्थाने कश्चित् दासः कस्यचित् भृत्यः एव नायकः स्यात्। तथा कश्चित् हीनः दासादपि निकृष्टतरः जनः उपनायकः दासस्य सहकारी पीठमर्द्दादिः स्यात्। काचित्

दासी परिचारिका नायिका, तथा वृत्तिः तत्र कैशिकी भारती च भवेताम्। सुरापानसमायोगात्—मद्यपानम् आश्रित्य 'उद्दिष्टार्थस्य' उद्दिष्टः प्रस्थाने प्रतिपाद्यतया अभिप्रेतः योऽर्थः यत् वस्तु 'तस्य संहृतिः' तस्य उपसंहारः कर्त्तव्यः। तत्र द्वावेव अङ्कौ तथा लयतालप्रभृतिर्बहुलः प्रभूतः विलासश्च स्युः।

विलासः नायकसम्बन्धी यथा—धीरा दृष्टिर्गतिश्चित्रा बिलासे सस्मितंवचः।

विलासः नायिकासम्बन्धी यथा—

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु
विलासः स्यादिष्टसन्दर्शनादिना॥

विलासः सन्ध्यङ्गाश्रितो यथा—समीहा रतिभोगार्था
विलास इति कथ्यते।

एवम्भूतेन बिलासेन वाहुल्येन अन्वितं स्यात् प्रस्थानम्। अस्य दृष्टान्तो यथा—शृङ्गारतिलकम्।

Eng. Tran.—Now comes the turn of Prasthana, in which the hero is a certain slave and even inferior to him is his assistant—the upanayaka; whereas the heroine is a certain slavegirl or hatch maid, and the Vritti is Bharati as well as Kaisiki, The theme of the drama is to be brought to a close in connection with a revelry. There are two acts in it—abounding with much dalliance attended by time and cadence.

Text—वृत्तिः। अथोल्लाप्यम्।

मित—। अनन्तरम् उल्लाप्यमिति उपरूपकं लक्षयति।

Eng. Tran.—Now comes the turn or description of an ullapya.

Text—श्लोकः। उदात्तनायकं दिव्यवृत्तमेकाङ्कभूषितम्
शिल्पकाङ्गैर्युतं हास्यश्रृङ्गारकरुणैः रसैः॥
उल्लाप्यं बहुसंग्राममस्त्रगीतमनोहरम्।
चतस्रो नायिकास्तत्र त्रयोऽङ्का इति केचन॥

वृत्तिः। शिल्पकाङ्गानिवक्ष्यमाणानि। यथा—देवीमहादेवम्।

मित—। उल्लाप्यं खलु उदात्तनायकं, तत्र वृत्तं नाटकीयकथावस्तु दिव्यम् स्वर्गीयव्यापराश्रितम् भवेत्। अङ्कश्च तत्र एकः। तथा च शिल्पकं इति यत् उपरूपकं—तस्य च "आशंसातर्क—सन्देहतापादीनि" यानि सप्तविंशतिः अङ्गानि पश्चात् वक्तव्यानि, तैश्च अङ्गैं युक्तं भवेदुल्लाप्यं। श्रृङ्गारहास्यकरुणरसाश्च तत्र भूयिष्ठाः तिष्ठेयुः। एवं च बहुसग्रामः तथा अस्त्रं नयनजलपातः तथा गीतं गानं—तैश्च मनोहरम् अभिरामं। यद्वा अस्त्रगीतं—"उत्तरोत्तररूपं यत् प्रस्तुतार्थपरिष्कृतम्।
अन्तर्भाबनिकं गीतमस्त्रगीतं तदुच्यते" इति एतल्लक्षणेन एव
गीतेन तथा बहुसंग्रामेण च अन्वितं स्यात् एतत् उल्लाप्यम्।

तत्र चतस्रः खलु नायिकाः स्युः। केचित् च अस्य त्रयः अङ्काः भवन्तीति कथयन्ति। दृष्टान्तो यथा—देवीमहादेवम्।

Eng. Trans.—An Ullapya has got a hero of the Dhirodatta type ; its act being one and it dealing with a celestial story. It is graced with the angas of a silpaka (uparupaka) as well as it will have the erotic, comic and pathetic sentiments. It is charming with many battles and music (of the Asragita type). There are four heroines. Some opine that all these should be in three acts only of an उल्लाप्य।

वृ। :तत्रथ काव्यम्।

मित—। अथ काव्यमिति नाम्ना प्रसिद्धस्य उपरूपकस्य वर्णनां विधत्ते।

Eng. Tran.—Now comes the turn of Kavya.

Text—श्लोकः। काव्यमारभटीहीनमेकाङ्कं हास्यसङ्कुलम्।
खण्डमात्राद्विपदिकाभग्नतालैरलङ्कृतम्॥
* वर्णमात्राच्छड्डलिकायुतं शृङ्गारभाषितम्।
नेता स्त्री, चाप्युदात्तात्र सन्धी आद्यौ तथान्तिमः॥
यथा—यादवोदयः।

मित—। काव्यम् इति आख्यया प्रसिद्धम् उपरूपकं तु आरभटी इति वृत्त्या रहितम् स्यात्। अतएव काव्ये भारती, सात्त्वती, कैशिकी वृत्तिश्च तिष्ठेयुः। तथा च तत् काव्यम् एकाङ्कं हास्यसङ्कुलम् स्यात्। किं च तत् खण्डमात्रा-द्विपदिका-भग्नताल प्रभृतिभिर्गीतविशेषैः अलङ्कृतं भवेत्। तथा वर्णमात्रा छड्डलिका इति छन्दोद्वयस्य अपि अत्र सद्भावः। एवं तत् शृङ्गारभाषितं शृङ्गाररसेन कथितम् भवेत्। अत्र नेता नायकः धीरोदात्तः। तथा नायिका अपि उदात्ता, गम्भीरा उच्चप्रवृतिका वा धीरोदात्तगुणैर्मण्डिता वा भवेत्। तत्र आद्यौ मुखप्रतिमुखौ इति सन्धी तथा अन्तिमः निर्व्वहण इति सन्धिश्च तिष्ठन्ति। अस्य दृष्टान्तो यथा—यादवोदयः।

द्विपदिका इत्यस्य हिन्दीभाषायाम् संज्ञा दोँहा। द्विपदीखण्डम् अपि एतत् उच्यते यथा रत्नावल्याः प्रथमे अङ्के—

"कुसुमायुधप्रियदूतः मुकुलायितप्रियचूतकः।
शिथिलितमानग्रहो वाति दक्षिणपवनकः इति।" द्विपदी परिगदिता सा द्वादशकलायुक्ता इति छन्दःकौस्तुभे।

एवं खन्डमात्रायाः भग्नतालस्य च उदाहरणम् अनुसन्धेयम् ज्ञेयञ्च नाट्यशास्त्रे।

एवं वर्णमात्रा छड्डलिका इति छन्दोविशेषः उच्यते। यद्वा वर्णः वर्णप्रस्तारादयः। मात्रा मात्राप्रस्तारादयः। ते च श्रीराधादामोदर

कृते छन्दःकौस्तुभे द्रष्टव्याः। तैश्च छड्डलिकया च युतमिति व्याख्या।
[* वर्णमात्रस्वच्छणिकायुतम्" इत्यपि पाठो दृश्यते]।

Eng. Trans.—Kavya (उपरूपक) lacks in the Aravati Vritti ; it has only one act full of comic sentiment. It is graced with Khandamatra, Dwipadika and Bhagnatala type of Gita, with Varnamatra (or Varna and Matra) and chhaddlaika variety of metres—and is teeming with erotic speeches. Here the hero is of the Dhirodatta type and so is the heroine ; and it has the first two Sandhis as well as the last.

Text—वृत्तिः। अथ प्रेङ्क्षणम्।

मित। अनन्तरं प्रेङ्क्षणम् इति उपरूपकं विवृणोति।

Eng. Tran.—Now comes description of Prenkhana.

Text—श्लोकः। गर्भविमर्शरहितं प्रेङ्खणं हीननायकम्।
असूत्रधारमेकाङ्कमविष्कम्भक-प्रवेशकम्॥
नियुद्धसम्फेटयुतं सर्व्ववृत्तिसमाश्रितं नेपथ्ये गीयते नान्दीतथा
तत्र प्ररोचना॥

यथा—वालिवधः।

मित—। प्रेङ्क्षणम् नाम उपरूपकम् तु गर्भेण तथा बिमर्शेन च सन्धिना रहितम्—अतएव तत्र मुखप्रतिमुखनिर्व्वहण—सन्धयस्तिष्ठन्तीति बोध्यम्। तत् तु हीननायकम् एवं च एकाङ्कम्, अपिच सूत्रधारस्य उपस्थितिस्तत्र नास्ति। विष्कम्भकः प्रवेशकश्च अपि तत्र न स्तः। नियुद्धं बाहुयुद्धम् तथा सम्फेटभाषणम् रोषभाषणं क्रोधप्रकाशिका उक्तिः, ताभ्याम् च युतम् स्यात्। किञ्च भारतीप्रभृतयः वृत्तयो विद्यन्ते प्रेङ्क्षणे। "सूत्रधारः पठेन्नान्दीम्" इति सूत्रधारपाठ्या नान्दी अत्र सूत्रधारस्य अभावात् केनचिदेव नटेन नेपथ्ये गीयते। एवं प्ररोचना वीथी प्रहसनामुखानि इति चतुर्णाम् भारती-

वृत्ताङ्गानां मध्ये या प्ररोचना प्रशंसातः सभ्यानाम् उन्मुखीकाररूपा या, सापि सूत्रधारस्य अभावात् नेपथ्ये एव पठ्यते। अस्य दृष्टान्तो यथा—वालिबधः।

Eng. Tran.—Prenkhana is without the Garbha as well as the Vimarsa sandhi; its hero is one of the lower rank—and it is devoid of Suttradhara, Pravesaka and Viskambhaka and it consists of a single act. It is replete with duals and angry speeches and it contains all the (four) Vrittis. The Nandi here is sung in the green-room and so also is the Prarochana.

Text—वृत्तिः। अथ रासकम्।

मित—। अनन्तरं क्रमप्राप्तं रासकं व्याचष्टे।

Eng. Tran.—Now comes the turn of Rasaka.

Text—श्लोकः। रासकं पञ्चपात्रं स्यानमुखनिर्वहणाङ्कितम्।
भाषाविभाषाभूयिष्टं भारतीकैशिकीयुतम्॥
असूत्रधारमेकाङ्कं सवीथ्यङ्गं कलान्वितं।
शिलष्टनान्दीयुतं ख्यातनायिकं मूर्खनायकं॥
उदात्तभावविन्यासमंश्रितं चोत्तरोत्तरम्।
इह प्रतिमुखं सन्धिमपिकेचित् प्रचक्षते॥

वृत्तिः। यथा—मेनकाहितम्।

मत—। पञ्च पात्राणि नाटकीयाः पुरुषाः यत्र तादृशं पञ्चपात्रं स्यात् रासकं नाम उपरूपकम्। तच्च मुखसन्धिना निर्व्वहणसन्धिना च एव अन्वितम्। अपिच तत्—भाषा संस्कृतं विभाषा शौरसेनादि विविधाः प्राकृता ताभिश्च भूयिष्टं वहुलं स्यात्। तत्र भारती तथा कैशिकी इति च वृत्तिद्वयं तिष्ठेत्। सूत्रधारो नास्ति तत् तेन इदम् असूत्रधारम्। एक एव अत्र अङ्कः। तथा तत् सवीथ्यङ्गम् त्रयोदशभिः वीथ्यङ्गैः सनाथ

भवेत्। एवं कलया सङ्गीतचित्राङ्कनादि चतुःषष्टिकलाविषयया च अन्वितं भूषितं स्यात् रासकम्। किञ्च श्लिष्टाद्व्यर्था या नान्दी तया युतं स्यात्, नायिका तत्र ख्याता विद्याचण्डादिगुणेन प्रसिद्धा एव नायकश्च तत्र मूर्खः स्यात्। तथा उत्तरोत्तरम क्रमशः तत् रासकम् उदात्तः गम्भीर उच्च इति यावत् यो भावः अभिप्रायः तस्य विन्यासेन रासककलेवरे संस्थापनेन, यद्वा 'उदात्तः भावः' ख्याता या नायिका तत्गौरवं तस्य विन्यासेन समावेशेन संश्रितं समायुक्तं स्यात्। केचित् च इह रासके प्रतिमुखसन्धिरपि भवेत् इति प्रचक्षते वदन्ति। अस्य दृष्टान्तो यथा मेनकाहितम्।

Eng. Tran.—Rasaka has got five (dramatic) persons and has only the Mukha and Nirvahana Sandhis. It is full of Sanskrit and the dialects (various forms of Prakrita) and is endowed with Bharati and Kaisiki Vritti. It is without any Sutradhara ; it has only one act replete with the angas of the Vithi as well as with fine arts. The Nandi here admits of double meaning ; the heroine is a noted one—whereas the hero is a dull fellow. It will have a gradual display of majestic (lofty) ideas. Some opine that the same has also the Pratimukha Sandhi.

Text—वृत्तिः। अथ संलापकम्।

मित—। अनन्तरं क्रमप्राप्तम् संलापकं विवृणोति।

Eng. Tran.—Now comes the turn of Samlapaka.

Text—श्लोकः। संलापकेऽङ्काश्चत्वारस्त्रयो वा नायकः पुनः।
पाषण्डःस्याद्रसस्तत्र शृङ्गारकरुणेतरः॥
भवेयुः पुरसंरोधच्छलसंग्रामविद्रवाः।
न तत्र वृत्तिर्भवति भारतीय नच कैशिकी॥

वृत्तिः। यथा—मायाकापालिकम्।

मित—। संलापकम् इति प्रसिद्धे उपरूपके त्रयः अथवा चत्वारः अङ्काभवन्ति। तत्र नायकस्तु कश्चित् पाषण्डः बौद्धजैनकापालिकादीनाम् एकतमः भवति। शृङ्गारात् करुणात् च इतरः अन्यः कश्चित् रसस्तत्र स्यात्, अङ्गी भवेत्। एवं संलापे पुरसंरोधः नगरावरोधनं तथा छलं "प्रियाभैर-प्रियैर्वाक्यैर्विलोभ्य छलना छलमिति" लक्षणाक्रान्तं छलं तथा संग्रामः युद्धम् एवं विद्रवः अचेतनैः चेतनाचेतनैर्वा कृतः शङ्कया भयेन क्रमेण वा उत्पादितः विद्रवः अपि तत्र भवेयुः। परमत्र भारती वृत्तिः कैशिकावृत्ति र्वा न तिष्ठेत्। यथा मायाकापालिकम्।

Eng. Tran.—There are three or four acts in a Samlapaka. The hero therein is a heretic and the (predomimant) sentiment is any one (of the nine) save and except the erotic and the pathetic. Besieging of cities, hood-winking or out-witting, battles and confusion will stay there and neither the Bharati nor the Kaisiki Vritti has got any scope therein.

Text—वृत्तिः। अथ श्रीगदितमित्युपरुपकं व्याचष्टे—

Eng. Tran.—Now comes the turn of Srigadita.

Text—श्लोकः। प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम्।
प्रसिद्धनायिकं गर्भविमर्शाभ्याम् विवर्जितम्॥
भारतीवृत्तिवहुलंश्रीतिशव्देन सङ्कुलम्। मतं श्रीगदितं नाम
विद्वद्भिरुपरूपकम्॥

वृत्ति। यथा—कीड़ा-रसातलम्।

Eng. Tran.—That uparupaka in which the story is a well-known one and the hero—a noted person of the

Dhirodatta type, the heroine—a famous figure, and which lacks in the Garbha and Vimarsa Sandhis and is run on with the Bharati Vritti—being replete with the word "Sri" is taken by the wise to be Srigadita. As—Krida-rasatalam.

मित—अथ मतान्तरे श्रीगदितं प्रदर्शयति—

श्लोकः। श्रीरासीना श्रीगदिते गायेत् किञ्चित् पठेदपि।
एकाङ्को भारतीप्राय इति केचित् प्रचक्षते ॥

वृत्तिः। ऊह्यमुदाहरणम्।

मित—श्रीगदिते श्रीगदितम् इति नाम्ना प्रसिद्धे उपरूपके आसीना रङ्गमध्ये उपविष्टा श्रीः लक्ष्मीः लक्ष्मीरूपधारिणी काचित् नटी गायेत् किञ्चिदपि च पठेत्। तथा श्रीगदिते एक एव अङ्कः स तु प्रायेण भारती भारतीतुल्यः भारतीबहुलः=भारतीप्रायः'—इति केचित् नाट्यशास्त्रविदः प्रचक्षते कथयन्ति। ईदृशस्य श्रीगदितस्य उदाहरणं तु ऊह्यम् मृग्यम् इत्यर्थः।

Eng. Tran.—In Srigadita, Sri (some actress in the garb of Lakshmi) having taken her seat (i. e, seated on the stage) sings and reads something. There is only one act mostly in the Bharati-Vritti—so opine some (scholars).

An Example (of this type of Srigadita) is to be sought for.

वृत्तिः। अथ शिल्पकम्।

मित—। अनन्तरं क्रमप्राप्तं शिल्पकं बिवृणोति।

Eng. Tran.—Now comes the turn of Silpaka.

Text—श्लोकः। चत्वारः शिल्पकेऽङ्काः स्युः चतस्रो वृत्तयस्तथा।
अशान्तहास्याश्च रसा नायको ब्राह्मणोमतः॥
वर्णनात्र श्मशानादेर्हीनः स्यादुपनायकः। सप्तविंशतिरङ्गानि
भवन्त्येतस्य तानि तु॥
आशंसातर्कसन्देह-तापोद्वेग प्रसक्तयः।
प्रयत्न प्रथनोत्कण्ठावहित्था प्रतिपत्तयः॥
विलासालस्य-बाष्पाणि प्रहर्षाश्वासमूढ़ताः।
साधनानुगमोच्छ्वासविस्मयप्राप्तयस्तथा।
लाभविस्मृति सम्फेटाः वैशारद्यं प्रबोधनम्। चमत्कृतिश्चेत्य-
मीषां स्पष्टत्वाल्लक्ष्म नोच्यते।

वृत्तिः। सम्फेटप्रथनयोः पूर्व्वमुक्तत्वात् लक्ष्म सिद्धम्॥ यथा—कनकावतीमाधवः।

मित—। शिल्पकम् इति नाम्ना प्रसिद्धे उपरूपके चत्वारः एव अङ्काः भवन्ति—तथा भारत्यादिचतसृणां खलु वृत्तीनां सद्भावः। एवम् अशान्त-हास्याश्चरसाः—तत्र हास्यं तथा शान्तं विहाय अन्ये सर्वेरसाः तिष्ठन्ति, तथा तेषामेव रसानां मध्ये कश्चित् अङ्गी भवति। तत्र कश्चित् ब्राह्मण एव नायकः स्यात्—उपनायकः तस्य नायकस्य सहकारी कश्चित् हीनः नीच एव भवेत्। अपिच अस्य शिल्पके श्मशानादेः भयावहवस्तूनाम् वर्णना तिष्ठेत्। आदिपदेन प्रतिभयम् अरण्यम् एवम् तादृशम् अन्यत् वा गृह्यते। अस्य तु सप्तविंशतिरङ्गानि। तानि यथा—(१) आशंसा—नाट्यालङ्कारप्रसङ्गे अस्य लक्षणं कथितम्। (२) तर्कः (३) सन्देहः (४) तापः (५) उद्वेगः (६) प्रसक्तिः अनुरागः आकर्षणं वा (७) प्रयत्नः (८) प्रथनं—सन्ध्यङ्गमध्ये अस्य लक्षणम् उक्तम्। (९) उत्कण्ठा (१०) अवहित्था। अस्य लक्षणं यथा—भयगौरव लज्जादेर्हर्षाद्याकारगुप्तिरवहित्था (११) प्रतिपत्तिः ज्ञानम् ग्रहणम् वा (१२) विलासः सन्ध्यङ्गमध्ये अस्य लक्षणम् उक्तम् (१३) आलस्यम्

(१४) वाष्पम् (१५) प्रहर्षः (१६) आश्वासः (१७) मूढ़ता। (१८) साधनानुगमः। साधनस्य अभिप्रेतवस्तुप्रापनाय चेष्टायाः अनुगमः अनुसरणं ग्रहणम् इत्यर्थः। यद्वा साधनस्य अभिलषितवस्तुनः यः अनुगमः विज्ञानम्। (१९) उच्छ्वासः (२०) विस्मयः (२१) प्राप्तिः (२२) लाभः (२३) विस्मृतिः (२४) सम्फेटः (२५) वैशारद्यम् पटुता इत्यर्थः (२६) प्रवोधनम् जागरणं चेतनाप्रदानं ज्ञानोन्मोचनं वा। (२७) चमत्कृतिः।

एतेषाम् मध्ये केषाञ्चित् लक्षणानि अस्मिन् षष्ठपरिच्छेदे एव कथितानि। केषांचित् लक्षणानि अस्य एव ग्रन्थस्य तृतीयपरिच्छेदे उक्तानि। कानि च सुस्पष्टानि। तेन हि एतेषाम् अङ्गानां लक्षणानि न अत्र पृथग् विवृतानि। तथाहि—सम्फेटः सन्ध्यङ्गं तथा सम्फेटः आरभटीनृत्यङ्गम्। एवं मथनम् अपि सन्ध्यङ्गम् तयोः लक्षणं सन्ध्यङ्गवर्णन—प्रसङ्गे पूर्व्वम् एव उक्तम्। अस्य शिल्पकस्य दृष्टान्तो यथा कनकावतीमाधवः।

Eng. Tran.—In silpaka, there are four acts and four vrittis. All sentiments save the comic and the quietestic are there and the hero is a Brahmana. In it is to be seen the description of cremation-ground and like things and the upanayaka is to be an inferior fellow.

Asamsa, Tarka, Sandeha, Tapa, Udvega, Prasakti, Grathana, utkantha. Avahittha, Pratipatti, Vilasa, Alasya, Vaspa, Praharsa, Aswasa, Mudata, Sadhananugama, Uchhvasa, Vismaya, Prapti, Labha, Vismriti, Sampheta, Vaisaradya, Pravodhana and Chamatkriti are its Angas; and since they are easily understandable, their definitions are not give here by me.

The definitions of Sampheta and grathana has been already known being laid down earlier.

As—(an example of Silpaka) is Kanakavati-Madhava.

Text—वृत्तिः। अथ विलासिका।

मित—। अनन्तरं क्रमप्राप्तां विलासिकां विवृणोति।

Eng. Tran.—Now comes the turn of Vilasika.

श्लोकः। शृङ्गारबहुलैकाङ्का दशलास्याङ्गसंयुता।
विदूषकविटाभ्याञ्च पीठमर्द्देन भूषिता॥
हीनागर्भविमर्शभ्याम् सन्धिभ्याम् हीननायका।
स्वल्पवृत्ता सुनेपथ्या विख्याता सा विलासिका॥

वृत्तिः। केचित्तत्र "विलासिका" स्थाने विनायिकेति पटन्ति।
"तस्यातु दुर्मल्लिकायामन्तर्भावः' इत्यन्ये।

मित—। शृङ्गारबहुला आदिरसपरिपूर्णा एकाङ्का दशभिः लास्याङ्गैस्तु गेयपदादिभिः प्राक्कथितैः संयुक्ता तथा विदूषकेण विटेन तथा पीठमर्द्देन च भूषिता। गर्भसन्धिना तथा विमर्शसन्धिना च रहिता एवं हीननायका अपिच स्वल्पवृत्ता संक्षिप्तेतिवृत्तान्विता सुनेपथ्या शोभनपरिच्छदधारि-नटैः नटीभिश्च सनाथा विख्याता प्रसिद्धा सा विलासिका इति आख्यातम् उपरूपकम्। पीठमर्दादीनाम् लक्षणानि तृतीये परिच्छेदे अस्मातिश्च प्राक् कथितानि।

मितभाषिण्यां तु प्रागेव पीटमर्दस्य लक्षणं उद्धृतम्। विटस्य लक्षणं यथा—सम्भोगहीनसम्पद्विटस्तु धूर्त्तः कलैकदेशज्ञः। वेषोपचार-कुशलोवाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्। विदूषकलक्षणं—यथा कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः। हास्यकरः कलहरति विदूषकः स्यात् स्वकर्म्मज्ञः। केचित् नाट्याशास्त्रविदः विलासिकां बिनायिका इति संज्ञया आचक्षते। अन्ये च नाट्याशास्त्रविदः "तस्याः" विनायिकाया दुर्म्मल्लिकायाम् एव अन्तर्भावः" इति घोषयन्ति। विनायिका न पृथक्

किञ्चित् उपरूपकम् अपितु दुर्म्मल्लिकायाः एव अन्तर्भुक्ता सा इतितेषामाशयः। यद्वा अन्ये तस्याः विलासिकायाः एव दुर्म्मल्लिकायाम् अन्तर्भावः इति मन्यन्ते। अन्ये खलु नाट्याशास्त्रविदः विलासिकाम् न पृथग् गणयन्ति अपितु ताम् दुर्म्मल्लिकायाम् मन्यन्ते इत्यर्थः।

Eng. Trans.—The well-known Vılasika is profusely replete with the erotic sentiment; it has got only one act and it is endowed with the ten angas of the Lasya. Jester, Vita and Pithamarda, appear in it and it lacks in the Garbha and the Vimarsa Sandhis. The hero herein is one of lower order. The story is a short one and ıt looks gorgeous with fine apparels (put in by actors); some read here vinayika in the place of Vılasika. Others opine that it is included in the Durmallika (uparupaka).

वृत्तिः। अथ दुर्म्मल्लिका।

मित—। क्रमप्राप्तां दुर्म्मल्लिकां विवृणोति—

Eng. Tran.—Now comes the turn of Durmallika.

Text—श्लोकः। दुर्म्मल्ली चतुरङ्का स्यात् कैशिकीभारतीयुता।
अगर्भा नागरनरान्यूननायकभूषिता।
त्रिनालिः प्रथमोऽङ्कोऽस्याम् विटक्रीडामयी भवेत्।
पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्॥
षण्णालिकस्तृतीयस्तु पीठमर्द्दविलासवान्।
चतुर्थो दशनालिः स्यादङ्कः क्रीडितनायकः॥

वृत्तिः। यथा—विन्दुमती।

मित—। दुर्म्मल्ली चतुरङ्का स्यात् दुर्म्मल्लिका इति उपरूपके चत्वारः एव अङ्काः स्युः। अत्र कैशिकी तथा भारती वृत्तिश्च तिष्ठेताम्। सा

अगर्भा तत्र गर्भसन्धिर्न स्यात्। तथा नागरनराः—नगरवासिनः अतएव चतुराः विदग्धाः इति यावत् नराः नाटकीयपात्राणि यत्र सा। अपिच सा अन्यूनः अनिकृष्टः उत्कृष्टः इत्यर्थः यः नायकः तेन भूषिता स्यात्। [यद्वा="न्यूननायक" इति पाठे न्यूनो जात्या अपकृष्टः नायकः इत्यादि व्याख्येयः]। अथ अस्य चतुर्णाम् अङ्कानां मध्ये प्रथमोऽङ्कः त्रिणालिः तिसृभिः नालिभिः नालिकाभिः नाड़िकाभिः इति यावत् निर्व्वर्त्तनीयः स्यात्। नालिका घटिकाद्वयपरिमितः कालः। अस्याम् दुर्म्मल्लिकायाम् प्रथमे अङ्के यत् वृत्तं—तत् त्रिनाड़ीपरिमितसमयेन (षड्घटिका परिणति-समयेन इत्यर्थः) निष्पादनीयं स्यात्। एवं स च अङ्कः प्रथमे अङ्के वृत्तान्त इत्यर्थः विटक्रीड़ामयः विटस्यक्रीड़ामयः लीलाबहुलः भवेत्। दुर्म्मल्लिकायाः प्रथमोऽङ्कः विटस्य एव चरितेन पूर्णः स्यादित्यर्थः। एवम् द्वितीयोअङ्कः पञ्चभिः नालिभिः पञ्चनाड़ीपरिमित-कालेन निर्व्वर्त्तनीयः भवेत्। स तु द्वितीयोऽङ्क विदूषकविलासवान् विदूषकस्य विलासेन लीलानैपुण्येन अन्वितः स्यात्। एवं तृतीयोऽङ्कः षण्णालिः षड्भिः नाड़िकाभिः षण्णाड़ीपरिमित—कालेन निष्पाद्यः स्यात्। स तु पीठमर्द्दविलासवान्। एवं चतुर्थोङ्कः दशनालि दशनाड़ीपरिमितकालेन साधनीयः स्यात्। स तु क्रीड़ितनायकः *—नायकस्य क्रीड़या विलासचेष्टितेन इत्यर्थः पूर्णः स्यात्। अस्य दृष्टान्तो यथा—बिन्दुमती। [* क्रीड़ितनागरः इत्यपि पाठो दृश्यते]।

Eng. Tran.—Durmalli has got four acts and the two Vrittis-Bharati and Kaisiki. It lacks in Garbha Sandhi and herein the dramatic persons are (mostly) gallant town fellows ; and the hero himself is not one of mean order. The first act's incidents should be worked up within a period of three Nalis and it will abouud with the play of the Vita. The second act's incident should be worked

up within a period of five Nalis and it will be full of the deeds or caricatures of the jester. The third act's incident should be worked up by six Nalis and it will present the achievements of the Pithamarda and the fourth act's incident is to be worked up by ten Nalis and it will contain the exploits of the hero.

An example of this is Vindumati.

Text—वृत्तिः। अथ प्रकरणिका।

मित—। अनन्तरं क्रमप्राप्ताम् प्रकरणिकां विवृणोति।

Eng. Trans.—Now comes the turn of a Prakavanika.

Text—श्लोकः। नाटिकैव प्रकरणी सार्थवाहादिनायका।
समानवंशजा नेतुर्भवेद् यत्र च नायिका ॥

वृत्तिः। मृग्यम् उदाहरणम्।

मित—। नाटिका एव प्रकरणिका। नाटिकायाः यत् खलु लक्षणं तदेव प्रकरणिकाया एव लक्षणम्। तर्हि कुत्र भेदः? सार्थवाहादिनायका। नाटिकायाम् राजा नायकः। प्रकरणिकायाम् कश्चित् सार्थवाहः वणिक्, एवं आदिपदेन विप्रः अमात्यः वा नायको भवेत्।

एवं नाटिकायाम् राजकन्या नायिका। अत्र तु नायिका नेतुः नायकस्य समानवंशजा समानकुलोत्पन्ना—विश्रुतवंशजा सार्थवाहकुलजा अमात्यनन्दिना वा भवेत्।

अस्याः प्रकरणिकायाः उदाहरणं तु मृग्यम् अनुसन्धेयम्।

Eng. Tran.—A prakaranika is just like a Natika but in it the hero is a merchant or the like and the heroine belongs to the same caste or social status or cadre with the hero.

An example of this is to the sought for.

द्रष्टव्यम्। अत्र ईदृशः विचारः। भारतीयनाट्यशास्त्रस्य अष्टादशे अध्याये श्रीमुनिना दशरूपकाणि एव सलक्षणं प्रोक्तानि। उपरूपकाणि कुत्रापि तेन न गणितानि। दशरूपककारः धनञ्जयः अत्र श्रीमुनिमेव अनुसृतवान्। एतेन ज्ञायते यत् अन्येषाम् नाट्यशास्त्रविदां ग्रन्थेषु अष्टादश उपरूपकाणि उल्लिखितानि तेभ्यः एव श्रीमता विश्वनाथेन एतानि गृहीतानि। तथाहि त्रोटकलक्षणे "प्राहुः" इति पदं, नाट्यरासके रासके श्रीगदिते च केचिदिति पदं, उल्लाप्ये केचन इति पदम्, एवं विलासिकाप्रसङ्गे केचित् तथा "अन्ये" इति पदद्वयम् एतदनुमानम् द्रढयति।

परम् अष्टादशानाम् उपरूपकाणाम् मध्ये एकामेव नाटिकाम् श्रीमुनि स्तथा धनञ्जयः ऊरीकुर्व्वाते।

तत्र श्रीमुनिकृतं नाटिकालक्षणम्—

"अनयोश्च बन्धयोगादन्योभेदः प्रयोक्तृभिः कार्य्यः प्रख्यातस्त्वितरो वा नाटीसंज्ञाश्रिते काव्ये"।

अत्र "प्रख्यातस्त्वितरो वा" इत्यस्मात् केचित् प्रकरणिकाम्
आकर्षन्ति। तेषाम् मते प्रख्याता नाटिका,
अप्रख्याता तु प्रकरणिका। एतेन उपायेन
स्वीकृतम् प्रकरणिकाम् असहमानः
धनिकः लिखति—"अत्र केचित्—

"अनयोश्च बन्धयोगादेकः भेदः प्रयोक्तृभिः। प्रख्यातस्त्वितरो वा नाटीसंज्ञाश्रिते काव्ये" इत्यमुं भारतीयं श्लोकमेकोभेदः प्रख्यातः नाटिकाख्यः इतरस्त्वप्रख्यातः प्रकरणिकासंज्ञो नाटीसंज्ञया द्वे काव्ये आश्रिते इति व्याचक्षाणाः प्रकरणिकामपि मन्यन्ते। तदसत्। उद्देशलक्षणयोरनभिधानात् समानलक्षणत्वे वा भेदाभावात्। वस्तुरसनायकानां प्रकरणाभेदात् प्रकरणिकायाः। अतोऽनुद्दिष्टाया नाटिकाया यन्मुनिना लक्षणं कृतम्, तत्रायमभिप्रायः। शुद्धलक्षणसंकरादेव तल्लक्षणे सिद्धे

लक्षणकरणं संकीर्णानाम् नाटिकैव कर्त्तव्या इति नियमार्थं विज्ञायते इति।

अपिच नाटिका सकीर्णा इति धनञ्जयः अपि स्वीकरोति यथा—दशरूपके—

"लक्ष्यते नाटिकाप्यत्र संकीर्णान्यनिवृत्तये"। श्रीमान् विश्वनाथस्तु एतन्मतम् उपेक्ष्य अष्टादशरूपकानि एव उल्लिखितवान्।

Text—वृत्तिः। अथ हल्लीशः।

श्लोकः। हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः
वागुदात्तैकपुरुषः कैशिकीवृत्तिरुज्ज्वला।
मुखान्तिमौ तथा सन्धी वहुताललयस्थितिः।

वृत्तिः। यथा केलिरैवतकम्।

मित—। अनन्तरं क्रमप्राप्तं हल्लीशं लक्षयति। हल्लीशशब्देन नृत्यविशेषः लक्ष्यते। मन्ये नृत्यं च हल्लीश इति उपरूपके वाहुल्येन वर्त्तते। तेन अस्य हल्लीश इति आख्या। एतच्च अस्मिन् लक्षणे "वहुताल लयस्थितिः" इति विशेषणेन व्यज्यते। तथाहि दशरूपके—"नृत्यं ताललयाश्रयम्"। "तालः चच्चत् पुटादिः। लयः द्रुतादिः, तन्मात्रापेक्षीऽङ्ग विक्षेपोऽभिनयशून्यो नृत्यमिति" धनिकः। हल्लीश इति नृत्यवहुलम् उपरूपकम् एकेन एव अङ्केन ग्रथितं भवति। तत्र सप्त वा अष्ट वा दश वा स्त्रियः वर्त्तन्ते। अपि च तत्र वाक् व्यवहृता भाषा उदात्ता उन्नतरूपा संस्कृतनिवद्धा भवति। किञ्च तत्र एक एव पुरुषः स्यात्। स एव नायकः। तथाच उज्ज्वला देदीप्यमाना कैशिकीवृत्तिस्तत्र तिष्ठति। "शृङ्गारे कैशिकी" इति वचनात्। मुखसन्धिस्तथा अन्तिमसन्धिः निर्व्वहणसन्धिश्च तत्र तिष्ठतः। एवं च तत्र वहूनां तालानां लयानां च स्थितिः स्यात्। दृष्टान्तो यथा—केलिरैवतकम्।

Eng. Tran.—Now comes the turn of Hallisa. Hallisa

has got only a single act—played by seven, eight or ten females.

The language therein is a high class one—and there will be a single male actor. The shining brilliant Kausiki Vritti will be there—together with the first and the last Sandhis ; and the same will be attended with a profuse amount of tune and time.

—As Keliraivataka.

वृत्तिः। अथ भणिका—

मित—। अनन्तरं क्रमप्राप्तां भाणिकां लक्षयति—

Eng. Trans.—Now comes the turn of Bhanika,

Text—श्लोकः। भाणिका श्लक्ष्णनेपथ्या मुखनिर्व्वहणान्विता।
कैशिकीभारतीवृत्तियुक्त काङ्कविनिर्मिता।
उदात्तनायिका मन्दपुरुषाऽत्राङ्कसप्तकम्॥
उपन्यासोऽथविन्यासो विबोधः साध्वसं तथा।
समर्पणं निवृत्तिश्च संहार इति सप्तमः॥
उपन्यासः प्रसङ्गेन भवेत् कार्य्यस्य कीर्त्तनम्।
निर्व्वेदवाक्यव्युत्पत्तिर्विन्यास इति स स्मृतः॥
भ्रान्तिनाशो विबोधः स्यान्मिथ्याख्यानन्तु साध्वसं।
सोपालम्भवचः कोपपीड़येह समर्पणम्॥
निदर्शनस्योपन्यासो निवृत्तिरिति कथ्यते।
संहार इति च प्राहु र्यत् कार्य्यस्य समापनम्॥

वृत्तिः। स्पष्टान्युदाहरणानि (सप्ताङ्गस्य)। यथा—कामदत्ता।

मित—। यथा नाटकं प्रकरणम् भाण इति रूपकानि, तद्वत् नाटिका, प्रकरणिका, भाणिकेति च तेषां रूपकाणाम् प्रतिरूपकस्थानीयानि उपरूपकाणि। अथ भाणिका तु कीदृशी ? उच्यते—सा श्लक्ष्णनेपथ्या

श्लक्ष्णं सूक्ष्मं कौषेयादिघटितम इति यावत् नेपथ्यं वसनं यस्यां सा। भाणिकायाम् सर्व्वाणि नाटकीयपात्राणि सूक्ष्मवसनशोभितानि भवेयुरितिभावः। तथा चमुखसन्धिना तथा निर्व्वहणसन्धिनैव युक्ता। तत्र वृत्तिः कैशिकी भारती च। एवं तत्र एक एव अङ्कः—यथा भाणे, किञ्च सा उदात्तनायिका एवं मन्दपुरुषा अपिच अत्र अस्याम् भाणिकायाम् अङ्गसप्तकं सप्त अङ्गानि वर्त्तन्ते। तानि तु—आद्यौ उपन्यासः। स च प्रसङ्गेन प्रसङ्गवशात् कार्यस्य भाणिकायाः मूलोद्देश्यस्य कीर्त्तनम् घोषणं इति। द्वितायस्तु विन्यासः? स निर्व्वेदवाक्यस्य व्युत्पत्तिः विशेषण-प्रकाशः एव। निर्व्वेदवाक्यं तु—यथा तृतीये—"तत्त्वज्ञानापदीर्षादे निर्वेदः स्वावमानना। न्यचिन्ताश्रुनिश्वासवैवर्ण्य यौच्छ्वसितादिकृत्।" तृतीयस्तु विवोधः—स तु भ्रान्तिनाशरूपः। कस्मिन् एव वस्तुनि यत् अज्ञानम् आसीत् तस्य अज्ञानस्य नाश एव विबोधः। चतुर्थं साध्वसं—तत् तु मिथ्याख्यानम् अलीककथनम्। पञ्चमं समर्पणम् तत् इह अस्याम् भाणिकायाम् कोपेन पीड़या वा सोपालम्भं वचः तिरस्कारगर्भं वाक्यम्। षष्ठस्तु निवृत्तिः सा तु निद्दर्शनस्य दृष्टान्तस्य उपन्यासः स्थापनम् प्रदर्शनम्। सप्तमस्तु संहारः—स कार्य्यस्य समापनं समाप्तिः। एतानि सप्त अङ्गानि स्पष्टानि अतएव सविशेषं न व्याख्यातानि ग्रन्थकर्त्रा। भाणिकाया दृष्टान्तो यथा कामदत्ता। अस्य अपरो दृष्टान्तो यथा—श्रीरूपगोस्वामिचरणविरचिता दानकेलिकौमुदी।

तस्याः भाणिकायाः प्रथमश्लोकः—

"अन्तः स्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा, किञ्चित् पाटलिताञ्चला रसिकतोत्सिक्तापुरःकुञ्चती। रुद्धायाः पथि माधवेन मधुराभुग्नतारोत्तरा राधायाः किलकिञ्चितस्तावकिनी दृष्टिः श्रियंवः क्रियात्।"

Eng. Tran.—Bhanika is full of (actors wearing) fine apparel and has got the Mukha and the Nirvahana Sandhis. It runs on the Kaisiki and the Bharati Vrittis

and has only one act. The heroine herein is a high class lady and the hero belongs to the lower order. Here are seven angas—the upanyasa, the Vinyasa, the Vivodha, Sadhwasa, Samarpana, Nivritti and the seventh being Samhara. Upanyasa is the presentation of the object in passing talks etc. ; Vinyasa is said to be the expression of words implying mortification. Vivodha is the removal or disappearance of ignorgnce (or misconception) ; and Sadhwasa is some misrepresentation. And in it, Samarpana is a statement, full of reproach, due to anger or disturbance (or trouble). Nivritti is said to be the citation of an example.

And lastly Samhara is the completion of the (primary) object (of the Bhanika).

Text--वृत्तिः। एतेषां सर्व्वेषां नाटकप्रकृतिकत्वेऽपि यथौचित्यं यथालाभं नाटकोक्तविशेषपरिग्रहं। यत्र च नाटकोक्तस्यापि पुनरुपादानं• तत्र तत्सद्भावस्य नियमः।

मित। 'विना विशेषं सर्व्वेषाम् लक्ष्म नाटकवन्मतम्।" अपि सर्व्वेषाम् इत्यनेन "प्रकरणादि रूपकाणां तथा नाटिकाद्युपरुपकाणाम्" इति उक्तम्। एतेन आयाति यत् यस्मिन् रुपके उपरुपके वा यो विशेषः प्रोक्तः—तस्य तु सत्ता तत्र आवश्यिकी। अपि च तेन विशेषेण सह एव अविरोधेन नाटकलक्षणानाम् अन्येषाम् अपि सत्ता तत्र आवशायिकी। ननु अत्र पृच्छ्यते-किम् सर्व्वेषां एव नाटकलक्षणानाम् सत्ता तत्र आवशियकी उत केषाञ्चित् एव? उत्तरं पठति—"एतेषां "सर्व्वेषाम्' रुपकाणां तथा उपरुपकाणां नाटकप्रकृतिकत्वे' अपि नाटकधर्म्माक्रान्तेऽपि

यद्यपि एतानि रूपकानि उपरूपसाणि च मूलतः नाटकधर्म्माक्रान्तानि भवन्ति तथापितेषु यथौचित्त्यम् औचित्यम् अनतिक्रम्य, तथा "यथालाभ" यथासम्भवं च 'नाठकोक्तविशेषपरिग्रहः नाटके कथितानां लक्षणनाम् अवस्थितिरित्यर्थः। अथ भावः--रुपकाणां तथा उपरूपकाणां स्वस्व-विशेषाः तेषु तेषु अवश्यमेव स्थास्यन्ति। अपि च एतानि नाटक-धर्म्मान्वितानि अतएव एतेषु नाटकस्य यानि लक्षणानि तानि तु एतेषां स्वस्वविशेषेण वह अविरोधेन ओचित्यानुसारेण यथासम्भवं तिष्ठेयुः। तथाहि अस्मिन् उपरूपके वा रूपके यस्य एव नाटकलक्षणस्य सन्निवेश-योग्यता सन्निवेशसम्भाव्यतां च कविः विवेचयेत् तस्मिन् तत् सन्निवेशनीयम् इति भावः। अपिच, "यत्र" यस्मिन् रूपकलक्षणे उपरुपक-लक्षणे वा नाटकोक्तस्यापि नाटकप्रसङ्गे उक्तस्य नाटकधर्म्मस्यापि पुनरु-पादानम् पुनरपि उल्लेखः "यत्र" तस्मित् रूपके उपरुपके वा तत्सद्भावस्य तस्य पुनः कथितस्य धर्म्मस्य सद्भावस्य अवस्थितेर्नियमः।

कस्यचिद्रूपकस्य उपरुपकस्य वा लक्षणकथनप्रसङ्गे यः खलु नाटक-धर्म्मः नाटकलक्षणप्रसङ्गे कथितोऽपि पुनरपि अत्र कथितः स तु धर्म्मः अवश्यमेव तस्मिन् रूपके उपरुपके वा तिष्ठेदिति भावः।

Eng. Tran.—Though all these (Rupakas and Uparupakas) are (primarily) of Nataka-character (i. e. though they are endowed in the main with the characteristics of a Nataka), yet only some (not all) of the characteristics of a Nataka (spoken in connection with the definition of a Nataka) should be inserted here (in other rupakas or in uparupakas), and that (also) in accordance with (i. e. in consideration of) this (i. e, of the characteristic) propriety and capacity, On the other hand, where (in the definition of a rupaka or an uparupaka) the character-

istics of a Nataka have been re-iterated, they (these characterestics) must needs stay there—such is the rule.

मित। अथ अस्मिन् प्रसङ्गे कश्चित् दशरूपकानुसारी विचारः। प्रागेव अस्माभिरुक्तं यत् नाटिकां विहाय अन्यानि उपरूपकाणि मुनिना दशरूपककृता वा न उररीकृतानि। तेषां मते—दश एव रूपकाणि तानि च रसान् आश्रित्य वर्त्तमानानि शुद्धानि इति कथ्यन्ते। नाटिका तु "उत्पाद्येतिवृत्तत्वम्" इति प्रकरणधर्म्मम् तथा प्रख्यातनृपनायकादित्वं इति तु नाटकधर्म्मम् आश्रित्य वर्त्तते अतः सा सङ्कीर्णा इति कथ्यते।

एतत् सर्व्वं कथयित्वा दशरूपकटीकाकृत् धनिकः पूर्व्वपक्षम् उत्थापयति—

"ननु डोम्बी (डिम्बी इति मन्यामहे) श्रीगदितम् भाणो भाणी प्रस्थानरासकाः। काव्यं च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत् इति रूपकान्तराणामपि भावात् दशएव रूपकाणि इति अवधारणस्य अनुपपत्तिरिति"।

सिद्धान्तं सूत्रयति धनञ्जयः--

"अन्यद्भावाश्रयं नृत्तं"। सूत्रं बिवृणोति धनिकः—रसाश्रयात् नाट्यात् भावाश्रयम् नृत्तमन्यदेव। तत्र भावाश्रयमिति विषयभेदात् नृत्तं नृत्यमिति नृतेर्गात्र विक्षेपार्थत्वेनाङ्गिकबाहुल्यात् तत्कारिषु च नर्त्तकव्यप देशात् लोकेऽपि चात्र प्रेक्षणीयमिति व्यवहारात् नाटकादेरन्यत् नृत्तं नृत्यम्। तद्भेदत्वात् श्रीगदितादेरवधारणोपपत्तिः। नाटकादि च रसविषयम्।

अतएव अस्य मते श्रीगदितादीनि उपरूपकाणि तु नृत्तानि एव। अपि तु यत् नृत्यम्- तत्तु तालल्याश्रयम्। नृत्यं तालल्याश्रयम् इति धनञ्जयः॥ इति व्याख्यातानि दृश्यकाव्यानि॥

Text—वृत्तिः। अथ श्रव्यकाव्यानि।

मित—। दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। इति द्विविधयोः काव्ययोर्मध्ये दृश्यकाव्यं सविस्तरम् व्याख्यातम्। अधुना श्रव्यकाव्यम् व्याख्यातुम् प्रक्रमते।

Eng. Tran.—Now comes the turn of works which are to be read and heard,

Text—श्लोकः। श्रव्यम् श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा।

मित—। श्रोतव्यमात्रं केवलं श्रवणयोग्यम्—स्वेन वा अपरेण वा पठ्यमानम् अपिच केवलं श्रवणयोग्यम् न तु कदापि अभिनययोग्यं यत् काव्यं तत् हि श्रव्यं श्रव्यकाव्यम् इति उच्यते। तत् द्विधा द्विप्रकारम्—पद्यमयं तथा गद्यमयम् च इति।

Eng. Trans.—A Sravya-Kavya is that piece of composition—which is merely fit to be heard only. It is of two varieties— Poetical and Prosaic.

Text—वृत्तिः। तत्र पद्यमयानि आह।

मित—। अस्य भेदविवक्षया एव बहुवचनम् अत्र।

Eng. Tran.—Amongst these (two), Poetical pieces of composition are to be described now—

-Text— छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम्।
द्वाभ्यामत्र युग्मकं सन्दानितकं त्रिभिरिष्यते॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।

मित—। आदौ पद्यस्य लक्षणं कथयति—छन्दोबद्धम् इत्यंशेन। छन्द्यन्ते ग्रथ्यन्ते पद्यानि एभिरिति "छन्दांसि" इति श्रीबलदेवविद्याभूषण कृतायाम् छन्दःकौस्तुभटीकायाम् छन्दोलक्षणम्। छन्दोभिः गायत्र्युष्णिगनुष्टुभादीनां छन्दः इति संज्ञया प्रसिद्धानाम् एकतमेन बद्धं पदं पदानि सुप्तिङरूपाणि यस्य तादृशं एव पद्यम्। तेन तादृशेन एकेन एव मुक्तकम्

भवति। यदि पादचतुष्टयप्रथितम् एकमेव पद्यं वाक्यार्थबोधे पर्य्याप्तम् स्यात् तर्हि तत् पद्यं मुक्तकम् इति कथ्यते इति भावः। द्वाभ्यां पद्याभ्याम् युग्मकं भवति। यदि द्वे पद्ये खलु एकत्र एव अन्विते सती एकमेव पूर्णमर्थं प्रकाशयति तर्हि यत् पद्यद्वयं युग्मकम् इति कथ्यते। एवं त्रिभिः पद्यैः खलु सन्दानितकम् इष्यते। एतस्य एव तिलकम् इति अपरासंज्ञा। एवं पञ्चभिः पद्यैः कुलकं स्यात्। यदि पञ्च पद्यानि एकत्र अन्वितानि सन्ति एकमेव पूर्णवाक्यम् उत्पादयन्ति तर्हि तानि एकत्र कुलकम् इति संज्ञां गच्छन्ति। एतेषां पञ्चविधानां पद्यानां दृष्टान्तानि प्रदर्शयन्ते वृत्तौ।

Eng. Tran. Padya (verse) is that which is couched up in metres ; and a single verse (implying a complete idea) is called Muktaka ; two—(conveying together a complete sentence) is called Yugmaka ; three—a Sandanitaka ; four—a Kalapaka, and five—a Kulaka.

वृत्तिः। तत्र मुक्तकं यथामम—

"सान्द्रानन्दमनन्तमव्ययमजं यद् योगिनोऽपि क्षणं
साक्षात् कर्त्तुमुपासते प्रतिमुदुर्ध्यानैकतानाः परम्।
धन्यास्ता मथुरापुरी युवतयस्तद् ब्रह्म याः कौतुका—
दालिङ्गन्ति समालपन्ति शतधा कर्षन्ति चुम्बन्ति च॥

मित—। ताः प्रसिद्धाः एव मथुरापुरीयुवतयः मथुरानगरीनिवासिन्यः तरुण्यः धन्याः प्रशंसार्हाः। काः? याः खलु तत् प्रसिद्धं ब्रह्म भगवन्तम् कौतुकात् आलिङ्गन्ति आश्लिष्यन्ति, समालपन्ति तथा विहाराय शतधा कर्षन्ति एवं चुम्बन्ति च। ननु कीदृशं ब्रह्म? सान्द्रानन्दम् आनन्दघनस्वरूपं तथा अनन्तम् अव्ययम् परिवर्त्तहीनम् एवं अजम् उत्पत्तिरहितम्। अपिच परम् मायातीतं। किञ्च यत् यत् खलु

परब्रह्मलक्षणं स्वल्पकालाय एव साक्षात् कर्त्तुम् उपलब्धुम् योगिनः ध्यानैकतानाः ध्यानपरायणाः ध्यानस्थापितचेतसः सन्तः प्रतिमुहुः सदैव उपासते।

Eng. Tran —Blessed are those damsels of the city of Mathura—who out of eagerness embrace, talk, kiss and drag hundred times (in hundred ways) that supreme Brahman who is the essence of deep bliss, unchangeable, birthless and infinite, and to realise whom, even the yogins constantly meditate—being concentrated in Dhyana (meditation).

Text—वृत्तिः। युग्मकं यथा मम -

किं करोषि करोपान्ते कान्ते! गण्डस्थलीमिमां
प्रणयप्रवणे कान्तेऽनैकान्ते नोचिता क्रुधः॥
इति तावत् कुरङ्गाक्षीं वक्तुमीहामहे वयं
तावदाविरभूच्चूते मधुरोमधुपध्वनिः॥

एवमन्यत्रापि।

मित—। अथ युग्मकस्य दृष्टान्तं दर्शयति—हे कान्ते हे प्रियमते! किं इमां ते गण्डस्थलीम् मम करोपान्ते हस्ततले करोषि? अधुना स्थापयिष्यसि? तत्र कान्ते प्रेमास्पदे मयि प्रणयप्रवणे प्रेमोन्मुखे सति। तस्मिन् अनैकान्ते अपि तस्मिन् तव प्रेमास्पदे मयि अन्यरमणीसङ्गते अपि तत्र मयि क्रुधः तवप्रणयकोपाः न उचिताः। यद्यपि तव प्रणयी अनैकान्तः—न एकान्तमेव त्वयि अनुरक्तः—तथापि तादृशे प्रणयिनि तव कोपः न उचितः यतः स एव प्रणयी त्वयि प्रणयप्रवणः प्रेमोन्मुख इति भावः। इति इत्थम् यावत् वयम् कुरङ्गाक्षीं मृगनयनां वक्तुम् ईहामहे चेष्टितवन्तः—तावदेव चूते आम्रवृक्षे मधुरः भृङ्गरवः आविरभूत्।

एवं सन्दानितकस्य, कलापकस्य तथा कुलकस्य अपि दृष्टान्ता भवन्ति। तानि च काव्यग्रन्थे द्रष्टव्यानि। रघुवंशे त्रयोदशसर्गे गङ्गायमुनासङ्गम-प्रसङ्गे कलापकस्य दृष्टान्तः स्यात्; प्रथमे "सोहमाजन्मशुद्धानाम्" इत्यत्र कुलकस्य दृष्टान्तः स्यात्।

Eng. Tran.—"Will you, my love, place your excellent cheek on my palm ? Your wrath upon your lover, drawn by your love, is (by no means) justified, even though he is not faithful to you ; and as no sooner did I cry to say this unto the deer-eyed lady, than the sweet humming of bees was heard on the mangoe tree.

मित—। अथाधुना पद्यमयानां ग्रन्थानाम् मध्ये सर्व्वश्रेष्टम् महाकाव्यमादौ लक्षयति—

Text—श्लोकः। सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥
एकवंशभवाः भूपाः कुलजा वहवोऽपि वा।
श्रृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वनाटकसन्धयः।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्॥
चत्वारस्तस्य वर्गाः स्तेष्वेकञ्च फलं भवेद्।
आदौ नमष्क्रियाशीर्वा वस्तुनिर्द्देश एव वा॥
क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्।
एकवृत्तमयैः पद्यै रवसानेन्यवृत्तकैः॥
नातिस्वल्पाः नातिदीर्घाः सर्गाः अष्टाधिका इह।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।
सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः॥

प्रातर्मध्याह्नमृगयाशैलर्त्तु वनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयम-मन्त्रपुत्रोदयादयः ।
वर्णनीयाः यथायोगं साङ्गोपाङ्गा अमीह ॥
कवे र्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥

वृत्तिः । सन्ध्यङ्गानि यथालाभमत्र विधेयानि ।
"अवसानेऽन्यवृत्तकैः" इति वहुवचनमविवक्षितम् ॥
"साङ्गोपाङ्गा" इति जलकेलिमधुपानादयः ।
यथा - रघुवंश-शिशुपालवध नपधादयः ॥
यथा वा मम -राघवविलासादिः ।

मितभाषिणी । सर्गाः सृष्टिः । स च काव्यस्य अध्यायं आश्रित्य तिष्ठति—अतएव सर्गबन्धः सर्गः सर्गइतिनाम्ना प्रसिद्धैः अध्यायैः बन्धः बन्धनं ग्रथनं पद्यसमष्टीनाम् रचनम् महाकाव्यम् उच्यते। अन्यत् सुगमम ।

Eng. Tran.—A Mahakavya i. e. an Epic or great poem is composed in Cantos ; and in it there is one hero—a divine one or one born in a noble family or a Kshattriya—and he will be of the Dhirodatta type ; or high-family born princes of a single dynasty (may act as heroes), one of the three sentiments—Erotic, heroic or Quietitude—will be the predominant one. All other seutiments are to be subordinate to the dominant one(i. e. all other sentiments are to stay therein as subordinate to the principal one) and all the Sandhis of a drama are to be there. The

story will be either historical or one relative to some great person. In it—there will be four vargas (धर्म, अर्थ काम, मोक्ष) and one of them will be the main (फलम्) theme. In the beginning will stay salutation, or benediction or a reference to the mainsubject (or topic). Somewhere (in such epic) will lie deprecation of rogues and somewhere appreciation of the good. Each Canto—is to run in one metre—having a change of the same in the end. There will be more than eight cantos—which will be neither too short nor too long. In some epic or poem such a canto is seen—which is full of a variety of metres. The evening, the sun, the moon, the night, the dusk, the darkness, the day, the morning, the noon, the hunting, the mountain, the seasons, the forest, the ocean, love-union (or conjugal union), separation, the ascetic, the heaven, the city, sacrifice, war (or battle)., campaign, marriage, counsel, and child-birth and the like are to be described in proper places with accessories in it. Its name will be after the name of the main theme, or the hero or any other ; and the name of cantos will be after the topic dealt with therein.

The Angas too of Sandhis are to be inserted as far as practicable.

The plural number in the word "Anya-Vrittakaih" (in the phrase "Avasane Anyavrittakaih") has got no special significance. By "accessories" (साङ्गोपाङ्ग) are to be understood "water-sports, drinking" and the like.

Examples—as Raghuvamsa, Sishupala-Vadha, Naisadha charita or the like ; or as my Raghavavilas and others.

Text—श्लोकः। अस्मिन्नार्षे पुनः सर्गाः भवन्त्याख्यान-संज्ञकाः।

वृत्ति। अस्मिन् महाकाव्ये। यथा—महाभारतम्।

मित—। अस्मिन् महाकाव्ये आर्षे ऋषिप्रणीते पुनः सति तु सर्गाः आख्यानसंज्ञकाः आख्यानम् इति नाम्ना कथिताः भवेयुः। यथा—महाभारते। महाभारतम् तु श्रीद्वैपायनमहर्षिव्यासप्रणीतम्।

Eng. Tran.—In an epic or great poem, composed by some sage,the cantos receive the denomination of Akhyana.

As in the Mahabharata.

(Cp. "महत्वात् भारवत्त्वाच्च महाभारतमुच्यते"॥ महाभारतादौ गद्यसत्त्वेपि पद्यप्राचुर्य्येणैव महाकाव्यत्वव्यवहारः इति सर्वमवदातम।)

Text—श्लोक। प्राकृतै निर्मिते तस्मिन् सर्गाः आश्वाससंज्ञकाः।
छन्दसा स्कन्धकेनैतत् क्वचिद् गलितकैरपि॥

वृत्तिः। यथा सेतुबन्धः। यथा वा मम-कुवलयाश्वचरितम्।

मित। "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिरिति" संस्कृत-लक्षणं दृश्यते श्रीदण्डिकृते काव्यादर्शे। तदेव संस्कृतं प्रकृतिर्मूलं तत् प्राकृतम्। यद्वा प्रकृतिषु साधारणेषु जनेषु भवमिति प्राकृतम्। प्राकृतं साधारणजनानां भाषा। तत् च प्राधान्येन पञ्चविधम—महाराष्ट्री (प्राकृतं) शौरसेनी, पैशाची प्राकृतं अर्द्धमागधी यथा मागधी। एषां च बहवः अवान्तरभेदाः। प्राकृतैः भाषाभिः निर्मिते विरचिते तस्मिन् महाकाव्ये सर्गाः खलु आश्वाससंज्ञका भवन्ति। एतत् प्राकृत-निबद्धम् महाकाव्यम् छन्दसा स्कन्दकेन, स्कन्द इति नाम्ना आख्यातेन

छन्दसा एवं क्वचित् कुत्रापि प्राकृतमहाकाव्यं गलितकैः गलितकम् इति संज्ञया प्रसिद्धैः छन्दोभिः विरचितं स्यात्। प्राकृतमहाकाव्यस्य दृष्टान्तो यथा प्रवरसेनरचितः सेतुबन्धः। ग्रन्थकर्त्रा विरचितं कुवलयश्वाचरितं च।

Eng. Tran.—In Epics, composed in the Prakrita language, cantos pass by the name of Aswasa. These are written in Skanda metre and sometimes in Galıtaka metre also.

As Setubandha ; or my Kuvlayaswacharitam.

Text—श्लोकः। अपभ्रंशनिबद्धेऽस्मिन् सर्गाः कुड़वकाभिधाः।
तथापभ्रंशयोग्यानि छन्दांसि विविधान्यपि॥

वृत्तिः। यथा कर्णपराक्रमः।

मित—। अपभ्रंशः खलु प्राकृतात् उत्पन्नः भाषाविशेषः। अयम् क्रमः—आदौ संस्कृतम् प्रचलितम् आसीत्। पश्चात् संस्कृतात् एव रूपान्तरितम् प्राकृतम्, अपभ्रंश इति भाषायाम् परिणतमभूत्। एष अपि अपभ्रंशः अंशतो वर्त्तमानानां बङ्गभाषा - मैथिलीभाषा—हिन्दिभाषा - प्रभृतीनां जननी। अपभ्रंशेनिबद्धेप्रथिते अस्मिन् महाकाव्ये सर्गाः कुड़वकाभिधा कुड़वक इति संज्ञया आख्याताः स्युः। किञ्च तस्मिन् अपभ्रंशरचिते महाकाव्ये योग्यानि अपभ्रंशभाषायाम् प्रयोज्यानि विविधानि अपि छन्दांसि वर्त्तन्ते। अस्य दृष्टान्तो यथा --कर्णपराक्रमः।

Eng. Trans.—In epics or great poems written in the Apabhramsa language, the cantos pass by the name Kudavaka ; metres of various descriptions are also there fit to be used in such epics. As—Karna-parakrama.

Text—श्लोकः। भाषाविभाषानियमात् काव्यं सर्गसमुज्झितम्।
एकार्थश्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितम्॥

वृत्तिः। यथा भिक्षाटनम्। आर्य्याविलासश्च।

मित—। महाकाव्यं व्याख्याय अधुना काव्यम् व्याख्यातु' प्रस्तौति भाषा इत्यादिना। भाषा देवभाषा संस्कृतं, विभाषा संस्कृतात् सम्भूतं प्राकृतम्। तस्मादपि उत्पन्नः अपभ्रंशः। भाषाविभाषा नियमात् संस्कृतेन प्राकृतेन अपभ्रंशेन वा निर्म्मितं कविरचितं पद्यंकाव्यम् इति संज्ञां गच्छति। ननु महाकाव्यमपि तादृशम्? नहि—काव्यम् खलु सर्ग समुज्झितं सर्गरहितं महाकाव्यम् इव काव्यम् सर्गवन्धो न स्यात्। तर्हि तत्र काव्ये अवस्थितानि पद्यानि कीदृक् सम्बन्धेन सम्बद्धानि स्युः? उच्यते—एकार्थश्रवणः एकवाक्यतापन्नं रिति, श्रीरामचरणतर्कवागीशः एकवस्तुप्रतिपादकैरित्यर्थः पद्यैः ग्रथितम्। अपिच नाटके यथा, तथा महाकाव्ये अपि सन्धयस्तिष्टन्ति--"सर्व्वे नाटक सन्धयः" इनि वचनात्। काव्ये तु तत् न स्यात् अतएव उक्त' "सन्धिसामग्रा-वर्ज्जितम्"। सन्धीनां मुखादीनां सामग्रं सकलत्वं अङ्गानि इत्यर्थः तेन वर्जित' रहितम् इत्यर्थः। संस्कृते प्राकृते अपभ्रंशे वा विरचित' सर्गवन्धरहितम् सन्धिभिस्तथा सन्ध्यङ्गैश्च हीनम् एकवस्तुप्रतिपादकं पद्यम काव्यम् इत्युच्यते इति भावः। दृष्टान्तो यथा—भिक्षाटनम्, आर्य्या-विलासः।

Eng. Tran.—A Kavya (poem) is composed in Sanskrit (bhasa) or other off-shoots thereof (vibhasa)—it consisting of poems (or verses) dealing with only one topic —and being shorn of cantos and the Sandhis as well as their angas.

As Viksha-tanam and Aryya-vilasa.

Test—श्लोकः। खन्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।

वृत्तिः। यथा मेघदूतादिः।

मित—। महाकाव्यं काव्य च व्याख्याय अधुना खण्डकाव्यं प्रस्तौति; तत् हि खण्डकाव्यं काव्यस्य एकदेशानुसारि एकदेशम् किञ्चित् किञ्चित् लक्षणं अनुसरति अनुकरोति इति यावत्। अतएव उक्तं श्रीमता रामचरण तर्कवागीशेन—एकदेशानुसारि यत् किञ्चिल्लक्षणहीनम् इति। तथाहि खण्डकाव्यं सर्गवद्धं न भवति। सन्धिसामग्र्यवर्जितं च स्यात् परं महाकाव्यवत् अत्र शैलनदीनगनगरार्णवादिवर्णनं च तिष्टेत्। अत्र काव्यवत् भाषाविभाषानियमो नास्तीति तर्कवागीशः। अस्य दृष्टान्तो यथा- मेघदूतम् ऋतुसंहारः। किञ्च मेघदूतम् अनुसृत्य वहूनि दूताख्यजातीयानि खण्ड-काव्यानि अवरस्मिन् काले रचितानि यथा—श्रीरूपविरचितं हंसदूतम् तथा धोयीविरचितं पवनदूतं च। एवं वातदूतं पदाङ्कदूतम्, काव्यदूतम्, कोकिलदूतं, भृङ्गदूतम्, मनोदूतम् इत्यादयः।

Eng. Tran.—A Khanda-kavya is a poem—which resembles or imitates a Kavya only partially, As Meghadutam and others.

Text—श्लोकः। कोषः श्लोकसमूहस्तुस्य ादन्योन्यानपेक्षकः।
व्रज्याक्रमेण रचितः स एवाति मनोरमः॥

वृत्तिः। सजातीयानामेकत्र सन्निवेशो व्रज्या। यथा—मुक्तावल्यादि।

मित—। अथ कोषकाव्यं प्रस्तौति। स च कोषः कीदृशः? उच्यते—अन्योन्यानपेक्षः परस्परसापेक्षतारहितः श्लोकसमूहस्तु कोषः स्यात्। खण्डकाव्यनिविष्टानां श्लोकानां परस्परसापेक्षता अस्ति—कोषे तु सा नास्ति। ननु यदि श्लोकाः परस्परनिरपेक्षाः तर्हि केन सम्बन्धेन आवद्धास्ते कोष इति साधारणसंज्ञां गच्छन्ति? उत्तरं पठति—व्रज्या क्रमेण रचितः। "सजातीयानां" एकमेव पदार्थम् अवलम्व्य रचितानाम् एकत्र सन्निवेशः व्रज्या। व्रज्याक्रमेण व्रज्यारूपं क्रमम् आश्रित्य रचितः स्यात् कोषः। स एव व्रज्याक्रमेण रचितः कोषः अतीव मनोरमः अभिरामः स्यात्।

तथाहि खण्डकाव्ये श्लोकानां परस्परसापेक्षता। कोषे तु श्लोकाः परस्परनिरपेक्षाः—परं ते एकमेव पदार्थम् अवलम्ब्य तस्यैव पदार्थस्य विविधगुणवर्णनाप्रसङ्गेन रचिताः स्युः। एवम् एकत्र निविष्टाः तादृशाः श्लोकाः कोषकाव्यम् इति साधारणसंज्ञां गच्छन्ति। दृष्टान्तो यथा मुक्तावली। एवं अन्ये च। तथाहि श्रीविल्वमङ्गलविरचितं श्रीकृष्णकर्णामृतं कोषकाव्यस्य अन्यत् उदाहरणम्।

Eng. Tran.—A Kosa is a poem in which verses stand independent of one another; but they are in order of Vrajya i. e. they concern a single subject and are very charming.

Vrajya implies the placing together of some verses and objects dealing with a single topic.

As Muktavali and others.

वृत्तिः। अथ गद्यकाव्यानि। तत्र गद्यम्—

मित—। "पद्यगद्यमयं द्विधा" इति वचनात् प्राप्तयोर्द्विविधश्रव्यकाव्ययोर्मध्ये आदौ पद्यमयं काव्यं व्याख्याय अधुना गद्यमयं काव्यम् व्याख्यातुम् प्रक्रमते। तत्र गद्यमयस्य काव्यस्य व्याख्यानात् प्राक् किं नाम गद्यम् इति गद्यमेव आदौ प्रस्तौति।

Eng. Tran.—Now come prose works; and at first is being explained what is prose.

Text—श्लोकः। वृत्तगन्धोज्झितं गद्यं, मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम्॥
आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद् दीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम्॥

वृत्तिः। मुक्तकं यथा—"गुरुर्वचसि पृथुरुरसि" इत्यादि। वृत्तगन्धि—यथा मम— "समरकण्डूलनिबिडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटंकारोज्जागरितवैरिनगर" इत्यादि। अत्र "कुण्डलीकृतकोदण्डेत्यनुष्टुब्वृत्तस्य

पादः। "समरकण्डूलेति च" प्रथमाक्षरद्वयरहितस्तस्यैव पादः। उत्कलिका-प्रायंयथा ममैव—अणिसविमुमरणिसिद्दसरविसरविदलितसमर परिगद-पवरपरवल इत्यादि।

चूर्णकं यथा मम गुणरत्नसागर जगदेकनागर कामिनीमदन जनरञ्जन इत्यादि।

मित—। आदौ गद्यस्य लक्षणं दर्शयति गद्यम् वृत्तगन्धोज्झितम्। तत् चतुर्व्विधम् प्रथमम्-मुक्तकम्। ततः-वृत्तगन्धि इत्यादि सुगमम्।

Eng. Trans.—Prose is what is composed without any metre ; (that is nonmetrical composition is prose).

It is of four varieties ; Muktaka, Vrittagandhi, Utkalikapraya and churnaka ; of this the first is void of any compound ; the second abounds with the foot of a metre ; the third entertains big compounds and the fourth only small ones.

Muktaka—as, grave in speech and broad in the chest. Vrittagandhi—as mine—(i. e. one of my compositions) :— The city of the enemy being awakened by the twang of the string of the bow—that has been bent by the sticklike (i. e. firm) arm wedded to the desire for war. Here the portion—"the bow that has been bent" forms the foot of an Anustubh metre ; the portion "Samara-Kandula" (desire for war) also does the same savė and except the first two letters ; utkalika-praya as mine—

The strong or vast army of the enemy—which is in war being trampled by the constant discharge (अनिशविसमर) of sharp arrows. Churnaka—as mine—

The ocean of the gems of merits, the sole leader (or the only lover or the sole gallant fellow) of the world, the cupid of females, the gladdener of the people and so forth.

Text—वृत्तिः। कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ॥
आदौ पद्यैर्नमस्कार खलादेर्वृत्तकीर्त्तनम्।

वृत्तिः। यथा कादम्बर्यादि।

मित—। अथ पुनः गद्यनिर्म्मितं काव्यद्वयं व्याख्याति। तत्र आदौ कथां लक्षयति—कथायां कथा इति नाम्ना प्रसिद्धं गद्यकाव्ये सरसं रसवत् वस्तु इतिवृत्तं गद्यैरेव विनिर्मितं रचितं स्यात्। परं गद्यकाव्येऽस्मिन् क्वचित् आर्य्या आर्य्याच्छन्दोग्रथितः श्लोको दृश्यते। क्वचित् कुत्रचिद्वा वक्त्रं वक्त्रमिति छन्दसा ग्रथितः श्लोक. क्वचिद्वा अपवक्त्रम् अपवक्त्रम् इति छन्दसा निवद्धः श्लोकश्च दृश्यते।

Eng. Tran.—An (interesting) topic appealing to or inspiring sentiment and couched up in prose, abounds in a Katha ; somewhere in it (or in some of the Kathas) is seen metrical composition in Aryya or in Vaktra or in Apavaktraka metre ; and in the beginning there stays salutation composed in poem as well as an account or analysis of the exploits of rogues.

As Kadambari and others.

Text—श्लोकः। आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्।
अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित्।
कथांशानां व्यवच्छेद आश्वास इति वध्यते।
आर्य्या वक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्।

वृत्तिः। यथा—हर्षचरितादि ॥

मित—। द्वितीयप्रकारं गद्यकाव्यं आख्यायिकासंज्ञकं विवृणोति—आख्यायिका कथावत् स्यात्। यथा—कथायाम् तथा आख्यायिकायाम्

अपि गद्ये विनिर्म्मितं सरसं वस्तु तिष्ठेत्। एवं पद्यैर्नमस्कारश्च तत्र भवेत्। तथाहि उक्तं श्रीरामचरणतर्कवागीशैः—

'यथा कथायाम् पद्यैर्नमस्कार खलवृत्तकीर्त्तनसरसवस्तुवर्णना स्तथात्रापीत्यर्थः। तथा सति कथायाः आख्यायिकायाश्च मध्ये को विशेषः? विशेषमाह—कवेर्वंशादि कीर्त्तनम्। अन्यकवीनां वृत्तम् इत्यादि।

Eng. Tran.—Akhyayika is just like a katha; but in it is to stay an account of the family of the poet and the like, together with the achievements of other poets. Here and there in an Akhyayika is to be inserted verses. Division of the story is to form Aswasa; and on the pretext of describing other things, the event to come is to be hinted at the outset in one of the metres—Aryya, Vaktra and Apavaktra.

As—Harshacharita and others.

Text—वृत्तिः। "अपि त्वनियमोदृष्टस्तत्राप्यन्यैरुदीरणात्" -इति—दण्ड्याचार्यवचनात् केचित् "आख्यायिका नायकेनैव निबन्धव्या" इत्याहुस्तदयुक्तम्।

मित—। "तत्रापि अनियमोदृष्टः" —कथायास्च आख्यायिकायाश्च मध्ये भेदविषये कोऽपि नियमोनास्ति "अन्यैरुदीरणात्" इति अन्येषाम् आचार्य्याणां वचनवलात् सिध्यति। इदं खलु मतं श्रीदण्डिना काव्यदर्शे प्रकाशितम्। इममेव श्रीदाण्डिनः अभिप्रायम् आश्रित्य केचित् कथयन्ति यत् या खलु आख्यायिका सा नायकमुखेनैव प्रकाशयितव्या—इत्येव कथायाः आख्यायिकायाश्चभेदः न कश्चित् अन्यभेदः अस्ति। तत् मतं न युक्तं न साधु इति ग्रन्थकारस्य अभिप्रायः।

Eng. Tran.—Following the statement of Acharyya Dandin, running as "there is no (hard and fast line of)

difference (between a katha and an Akhyayika). So opine others", some hold that Akhyayika should be related by the hero himself.

This too is not proper.

Text—श्लोकः। आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः, यदुक्तः दन्डिनैव—"अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः"। इति—

एषामुदाहरणं पञ्चतन्त्रादि।

Eng. Tran.—Akhyana and other prose-works are included in katha and akhyayika and hence they are not separately mentioned. As it is stated by Acharyya Dandin—

The remaining (prose) such as Akhyana and others (or of the Akhyana class) should be included in these. An example of this type of prose-work is Panchatantra.

Text—वृत्तिः। अथ गद्यपद्यमयानि।

मित—। पद्यमयंश्रव्यकाव्यं तथा गद्यमयं च श्रव्यकाव्यम् व्याख्याय अधुना गद्यपद्यमयं (अतएव मिश्रं) श्रव्यकाव्यं प्रस्तौति—अथ इत्यादिना। अथ अनन्तरं गद्यपद्यमयानि श्रव्यकाव्यानि मया व्याख्यायन्ते इत्यर्थः।

Eng. Tran.—Now works in both prose and poem (are being discussed by me)—

Text—श्लोकः। गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।

वृत्तिः। यथा देशराजचरितम्। यथा वा—नलचम्प्वादि।

मित—। गद्यपद्यमयं अंशतो गद्येन अंशतश्च पद्येन निर्मितं काव्यं चम्पूः इति कथ्यते। यथा नलचम्पूप्रभृतयः।

अन्यत् उदाहरणं यथा—श्रीजीवगोस्वामिचरणरचितश्रीगोपाल चम्पूः। श्लोकविकर्णपूरबिरचित—श्रीआनन्दवृन्दावनचम्पूः। एवम्—श्रीगौराङ्गचम्पूरपि चम्पूकाव्यम्।

Eng. Tran.—A work written in both prose and poem (that is partly in poem) is called Champu.

As—Desarajacharitam. Nalachampu etc.

Text—श्लोकः। गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते।

वृत्तिः। यथा विरुदमणिरत्नमाला।

मित—। अत्र राजस्तुतिरित्यत्र राजपदम् उपलक्षणं तेन इष्टदेवस्तुतिरपि गद्यपद्यनिर्म्मिता सती विरुदसंज्ञां गच्छति। राजस्तुतिरूपस्य विरुदस्य दृष्टान्तो यथा—विरुदमणिरत्नमाला। इष्टदेवस्तुतिरूपविरुदम्- यथा श्रीगौराङ्गविरुदावली; श्रीजीवगोस्वामिबिरचितश्रीकृष्णविरुदावली। इष्टदेवचरितस्तुतिरपि विरुदसंज्ञां गच्छति यथा श्रीविश्वनाथचक्रवर्त्तिपाद-रचिता श्रीनिकुञ्जकेलिबिरुदावली।

दर्पणोक्तं विरुदलक्षणं खलु सामान्यलक्षणमेव। अस्य विशेषलक्षणं श्रीरूपगोस्वामिचरणरचिते सामान्यविरुदावलीलक्षणसंज्ञके ग्रन्थे द्रष्टव्यम्। लक्षणसंगतिरपि श्रीरूपविरचिते श्रीगोपालविरुदावलीग्रन्थे दृश्या।

Eng. Tran.—Royal Eulogy, composed in prose and poem is called Viruda. As—Viruda maniratnamala.

Text—श्लोकः। करम्भकन्तु भाषाभिर्विविधाभिर्विनिर्मितम्।

वृत्तिः। यथा मम—षोड़शभाषामयी प्रशस्तिरत्नावली।

मित—। विबिधाभिः भाषाभिः संस्कृतेन तथा मागधी-शौरसेन्यादि विविधन च प्राकृतेत विनिर्मितं रचितं गद्यकाव्यं करम्भकम् इति कथ्यते। अस्य दृष्टान्तो यथा—ग्रन्थकारस्य एव प्रशस्तिरत्नावली।

Eng. Tran.—Karambhaka is (a prose-work), composed in so many dialects. As—Prasasti-ratnavali—of mine—composed in sixteen dialects.

Text—वृत्तिः। एवम् अन्येऽपि भेदा उद्देशमात्रप्रसिद्धत्वात् उक्तभेदानतिक्रमाच्च न पृथग् लक्षिताः।


मित—। पूर्व्वोक्तेभ्यः भेदेभ्यः अतिरिक्ताः अन्ये ये च गद्यकाव्यस्य गद्यपद्यमयकाव्यस्य च भेदाः सन्ति, ते च उद्देशमात्रप्रसिद्धाः नाममात्रेणैव ख्याताः—तेषां उदाहरणानि न वा दृश्यन्ते। अपिच ते पूर्व्वोक्त भेदलक्षणानि अतिक्रम्य न वर्त्तन्ते। पूर्व्वोक्तभेदेषु ते अन्तर्भुक्ताः सन्तः तेषाम् एव अवान्तरभेदाः ते भवन्ति -इत्यर्थः। अतएव उक्तं श्रीरामचरणतर्कवागीशैः—"तथा च तेषां संज्ञयैव भिन्नत्वं न तु वस्तुतः इति भावः।" अनेनैव हेतुना ते पृथक् न उपलक्षिताः एभ्यः पृथक्कृत्य न बिचारिताः।

Eng. Tran.—Other varieties are known only by name and do not go beyond the aforesaid classes and hence they are not separately discussed here.

इति साहित्यदर्पणे दृश्यश्रव्यकाव्यनिरूपणो नाम षष्ठःपरिच्छेदः॥


इत्यबिरतविद्यावितरणनिष्णस्य नानाशास्त्रनदीष्णस्य वङ्गवास्तव्यस्य सुगृहीतनाम्नः श्रीसारदारञ्जनस्य सूनुना श्रीकुसुदरञ्जनभिषग्ज्योतिषाचार्य्येण कृतायां साहित्यदर्पणव्याख्यायां मितभाषिणीसमाख्यायां षष्ठपरिच्छेदः समाप्तः॥


Division of Kavya in Darpana here



[N. B.=All the avove broad divisions of काव्य may also be either—(i) Dhwani Kavya or (ii) Gunibhuta Vyanga (see our Text P, 39-40). Darpana does not recognise Chitra Kavya of Kavyaprakasa (see Intro. here)

Division of Kavya in Kavyadarsha*







[N. B.—Dhwani-theory was not in vogue during Dandin's time (see our intro. in Kavyadarsha, and our Tran. & Tika under sl. 10 ch. 1. there)].

APPENDIX

As this following व्यासकूट comes within the purview of some Text Books and as one and all commentators from Nilkantha downwards have stumbled down here, and as it may come within the लक्षण (embellishment named शोभा, P. 284) so we discuss this here :—under "पीवासि दृढम्" and "पीवानसि दृढम्" in महाभारत, Nikantha takes पीवानसि दृढम् as आर्षप्रयोग for he recognises the usual base पीवन् (from प्या+क्वनिप्) which gives पीवा (स्थूल) in 1st case sing. But पीवान् also being grammatically correct in 1st case sing., it will be wrong to take it as an आर्षप्रयोग। If anyone takes a grammatically correct form as आर्ष be he an authoritative scholar, then it must be admitted that he is wrong. We say an usage as आर्ष or poetical license only where there is no way out.

Let me explain that पीवान् (in 1st sing.) is grammatically correct. Panini's धातुपाठ reads in भ्वादि list "पीव मीव तीव नीव स्थौल्ये' (=पीवति etc), and again there runs the उणादिसूत्र "सर्वधातुभ्यः असुन्"। Hence पीव+असुन् कर्त्तरि gives the base पीवस् meaning "one who becomes fat." The above rule for असुन् has no restriction that it should come in such and such वाच्य (voice), and the instances in the सिद्धान्तकौमुदी under the above rule are चेतः पयः सदः ; note that पयः is derived in कर्मवाच्य, सदः in अधिकरण वाच्य and चेतः can be derived both in कर्त्तृ and करणवाच्य (e. g, चेतति इति चेतः, वा चित्यते अनेनइति चेतः)। Neither do the above rule for असुन् restricts gender for असुन्-प्रत्ययान्त

words, thus चेतस् is neuter, whereas सदः (सदः) is both neut. and fem, (for Amara says "स्त्रीनपुंसकयोः सदः")। Again under वर्चस् (which is also असुन् प्रत्ययान्त) medini says "वर्चो नपुंसके रूपे निष्टायामपि तेजसि। पुंसि चन्द्रस्य तनये।" Now the question arises what will be the declension of असुन् प्रत्यान्त words in the masculine gender ? It will be declined like ईयसुन् प्रत्ययान्त words as प्रेयस् वा श्रेयस् etc. The Paninirule on the point is "उगिदचां सर्वनामस्थाने अधातोः' which directs that bases ending in उगित् प्रत्यय should have a न् (नुम्) in the first five विभक्तिप्रत्यय ; and our असुन् is उगित्। Nor can it be argued that Panini does no recognise नुम् in cases of उगित् प्रत्यय which is in उणादि list ; for grammarians one and all accept नुम् for the base पुमस् which is derived as पू+डुमसुन् (उणादि), and Bhattoji under the Panini rule "पुंसोऽसुङ्" writes "पूञो डुमसुन् इति प्रत्ययस्य उगित्वेनैव नुम्सिद्धेः"। So पीवस् is declined as पीवान् पीवांसौ पीवांसः etc. Indeed Vachaspatya has पीवस् as पीव+असुन् and declines it in the above way ; under the circumstances पीवान् being correct in 1st case sing., it will be palpably wrong to say it as an आर्षप्रयोग। So Nilkantha is wrong here when he says—it is an आर्षप्रयोग ; similarly Sridhara's declaring पीवान् in विष्णुपुराण as आर्ष use for पीवा, is also unsound, and all editors also following Nilkantha here has made this error. Now to say पीवान् is wrong is unsound and betrays ignorance of grammatical subtleties.

PREFACE

This chapter of Sahityadarpana is a course for our B. A. Honours students ; so this portion is being published first—"त्वत्प्रीत्यर्थं सरस्वतीविनोदं कुर्मः" ।

In my boyhood when I was a college student I felt a want for a good uptodate explanatory Tika and Translation of Sahityadarpana, for it was in many places then incomprehensible to me on many topics and points. All the extant Tikas are tikas only, not fit for beginners nor exhaustive to meet wants of readers. And to remove that longfelt want, I have now in my fourth stage of life (chaturthasrama) undertaken and ventured with untiring labour to bring out a fullfledged explanatory commentary and English Translation of this Sahitya-darpana in four volumes.

This is the second volume, but first published as said above to meet the requirements of our B. A. students. And I hope it will be really useful to my readers—to students and to all alike. Readings and inconsistencies in the Text have also been discussed and marked out. The readers are to judge how for I have succeeded : Errors and inconsistencies it is impossible to avoid in Sanskrit works specially those involving abstruse matters, so I apologise for mistakes if any.

Cal. Sept., 56.

2nd. Ed. in 1963.